अग्निपुराणं ।

अथाग्निपुराणानुक्रमणिका ।

अध्याये विषयः पृष्ठे

1 पुराणप्रश्नः 1
2 मत्स्यावतारवर्णनम् 3
3 कूर्मावतारवर्णनम् 5
4 वराह-नृसिंह-वामन-परशुरामावतारवर्णनम् 8
5 रामावतारवर्णनम् 10
12 हरिवंशकथनम् 28
13 भारताख्यानम् 33
16 बुद्धकल्क्यवतारवर्णनम् 39
17 नवसर्गप्रदर्शनं 40
21 आगमोक्तविष्ण्वादिदेवतासामान्यपूजा 52
22 स्नानविधिः 55
23 वासुदेवादिपूजाविधिः 56
24 कुण्डनिर्माणाद्यग्निकार्यकथनम् 59
25 वासुदेवादिमन्त्रनिरूपणम् 65
26 मुद्रालक्षणकथनम् 70
27 सर्वदीक्षाकथनम् 71
28 आचार्याभिषेकः 79
29 सर्वतोभद्रमण्डलादिलक्षणम् 79
30 मण्डलविधिः 84
31 कुशापामार्जनकथनम् 87
32 दीक्षितसंस्कारः 92
33 विष्णुपवित्रारोहणादिविधानम् 93
37 सर्वदेवपवित्रारोहणविधिः 107
38 देवालयनिर्माणफलम् 109
39 भूमिपरिग्रहः 114
40 अर्घ्यदानविधिः 116
41 शिलाविन्यासः 119
42 प्रासादलक्षणकथनम् 122

43 प्रासाददेवतास्थापनादिकथनम् 125
44 वासुदेवादिप्रतिमालक्षणकथनम् 128
45 पिण्डिकालक्षणम् 132
46 शालग्रामादिमूर्त्तिलक्षणम् 134
47 शालग्रामादिपूजा 135
48 विष्णुचतुर्विंशतिमूर्त्तिस्तोत्रं 137
49 मत्स्यादिप्रतिमालक्षणम् 138
50 देवीप्रतिमालक्षणम् 145
51 सूर्यादिप्रतिमालक्षणम् 145
52 योगिनीप्रतिमालक्षणम् 147
53 लिङ्गलक्षणम् 150
54 व्यक्ताव्यक्तलिङ्गलक्षणम् 152
55 लिङ्गपिण्डिकालक्षणम् 157
56 दिक्पालयागकथनम् 158

अध्याये विषयः पृष्ठे
57 कलशाधिवासः 161
58 देवस्नपनविधिः 164
59 देवाधिवासनविधिः 167
60 वासुदेवप्रतिष्ठा 173
61 द्वारप्रतिष्ठाध्वजारोहणादिकथनं 177
62 लक्ष्मीप्रतिष्ठा 182
63 सुदर्शनचक्रादिप्रतिष्ठा 184
64 कूपादिप्रतिष्ठा 187
65 सभागृहस्थापनम् 191
66 साधारणप्रतिष्ठा 194
67 जीर्णमूर्त्युद्धारः 197
68 देवयात्रोत्सवः 198
69 यज्ञावभृथस्नानं 200
70 वृक्षारामादिप्रतिष्ठा 202
71 विनायकपूजा 203
72 विशेषस्नानादिकथनम् 204
73 सूर्यार्चनं 209
74 शिवपूजा 211
75 अग्निस्थापनादिकथनम् 220
76 चण्डपूजा 227
77 कपिलादिपूजनम् 228
78 पवित्राधिवासनविधिः 231
79 पवित्रारोहणम् 238
80 दमनकारोहणविधिः 242
81 समयदीक्षा 244
82 संस्कारदीक्षा 253
83 निर्वाणदीक्षाधिवासनं 259
84 निर्वाणदीक्षा 262
89 एकतत्त्वदीक्षा 284
90 निर्वाणदीक्षाङ्गीभूताभिषेककथनं 285
91 नानामन्त्रकथनम् 286

92 पातालशिलान्यासः 288
93 वास्तुपूजा 295
94 प्रासादशिलान्यासः 300
95 शिवलिङ्गप्रतिष्ठासामग्री 302
96 शिवलिङ्गाधिवासनविधिः 310
97 शिवलिङ्गप्रतिष्ठाविधिः 327
98 गौरीप्रतिष्ठाविधिः 339
99 सूर्यप्रतिष्ठाविधिः 341
100 द्वारप्रतिष्ठा 342
101 प्रासादकृत्यप्रतिष्ठा 343
102 ध्वजारोहणम् 345
103 जीर्णशिवलिङ्गोद्धारः 349
104 प्रासादसामान्यलक्षणम् 352
105 गृहादिवास्तुकथनम् 356
106 नगरादिवास्तुकथनम् 392
107 स्वायम्भुवसर्गकथनम् 365
108 भुवनकोषवर्णनम् 367
109 तीर्थमाहात्म्यम् 371
110 गङ्गामाहत्म्यम् 374
111 प्रयागमाहत्म्यम् 375
112 वाराणसीमाहात्म्यकथनम् 377
113 नर्मदादिमाहात्म्यकथनम् 379
114 गयामाहात्म्यकथनम् 380

ओं नमो भगवते वासुदेवाय ।
अग्निपुराणम् ।

# 1

## अथ प्रथमो ऽध्यायः ।

ग्रन्थ प्रस्तावना ।
श्रियं[1] सरस्वतीं गौरीं गणेशं स्कन्दमीश्वरम् । 1ab
ब्रह्माणं वह्निमिन्द्रादीन्वासुदेवं नमाम्यहम् ॥ 1cd
नैमिषे हरिमीजाना ऋषयः शौनकादयः । 2ab
तीर्थयात्राप्रसङ्गेन स्वागतं सूतमब्रुवन् ॥ 2cd
ऋषय ऊचुः ।
सूत त्वं पूजितो ऽस्माभिः सारात्सारं वदस्व नः । 3ab
येन विज्ञानमात्रेण[2] सर्व्वज्ञत्वं प्रजायते ॥ 3cd
सूत उवाच ।
सारात्सारो हि भगवान् विष्णुः सर्गादिकृद्विभुः । 4ab
ब्रह्माहमस्मि तं ज्ञात्वा सर्व्वज्ञत्वं प्रजायते ॥ 4cd
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्[3] । 5ab
द्वे विद्ये वेदितव्ये हि इति चाथर्वणी श्रुतिः ॥ 5cd
अहं शुकश्च पैलाद्या गत्वा वदरिकाश्रमम् । 6ab
व्यासं नत्वा पृष्टवन्तः सो ऽस्मान् सारमथाब्रवीत् ॥ 6cd
व्यास उवाच ।
शुकाद्यैः शृणु सूत त्वं वशिष्ठो मां यथा ऽब्रवीत्[5] । 7ab
ब्रह्मसारं हि पृच्छन्तं मुनिभिश्च परात्परम् ॥ 7cd

---

1 लक्ष्मीमिति घ, चिह्नितपुस्तकपाठः ।
2 विज्ञातमात्रेण इति घ, चिह्नितपुस्तकपाठः ।
3 अपरञ्च परञ्च यदिति ख, चिह्नितपुस्तकपाठः ।
4 यदब्रवीदिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।

वसिष्ठ उवाच।
द्वैविध्यं ब्रह्म[1] वक्ष्यामि शृणु व्यासाखिलानुगम्[2] । 8ab
यथा ऽग्निर्मां पुरा प्राह मुनिभिर्दैवतैः सह ॥ 8cd
पुराणं परमाग्नेयं ब्रह्मविद्याक्षरं परम् । 9ab
ऋग्वेदाद्यपरं ब्रह्म सर्वदेवसुखावहम्[3] ॥ 9cd
अग्निनोक्तं पुराणं यदाग्नेयं ब्रह्मसम्मितम्[4] । 10ab
भुक्तिमुक्तिप्रदं दिव्यं[5] पठतां शृण्वतां नृणाम् ॥ 10cd
कालाग्निरूपिणं विष्णुं ज्योतिर्ब्रह्म परात्परम् । 11ab
मुनिभिः पृष्टवान् देवं पूजितं ज्ञानकर्म्मभिः ॥ 11cd
वसिष्ठ उवाच ।
संसारसागरोत्तारनावं ब्रह्मेश्वरं वद । 12ab
विद्यासारं यद्विदित्वा[6] सर्वज्ञो जायते नरः ॥ 12cd
अग्निरुवाच ।
विष्णुः कालाग्निरुद्रो ऽहं[7] विद्यासारं वदामि ते । 13ab
विद्यासारं पुराणं[8] यत्सर्वं सर्वस्य कारणम् ॥ 13cd
सर्गस्य प्रतिसर्गस्य वंशमन्वन्तरस्य च । 14ab
वंशानुचरितादेश्च, मत्स्यकूर्म्मादिरूपधृक् ॥ 14cd
द्वे विद्ये भगवान् विष्णुः परा चैवापरा च ह । 15ab
ऋग्यजुःसामाथर्वाख्या वेदाङ्गानि च षड् द्विज[9] ॥ 15cd

1 द्वे विद्ये ब्रह्म इति घ, चिह्नितपुस्तकपाठः ।
2 अखिलात्मगमिति ख, चिह्नितपुस्तकपाठः ।
3 सर्ववेदमुखं परमिति ख, चिह्नितपुस्तकपाठः ।
4 वेदसम्मितमिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
5 पुण्यमिति ख, चिह्नितपुस्तकपाठः ।
6 यद् गदित्वा इति ग, चिह्नितपुस्तकपाठः ।
7 ज्ञानसन्दीपनादेव इति ग, चिह्नितपुस्तकपाठः ।
8 ब्रह्माग्नेयं पुराणमिति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
9 यद् द्विज इति ख, चिह्नितपुस्तकपाठः ।

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषाङ्गतिः । 16ab
छन्दो ऽभिधानं मीमांसा धर्म्मशास्त्रं पुराणकम् ॥ 16cd
न्यायवैद्यकगान्धर्वं धनुर्वेदो ऽर्थशास्त्रकम् । 17ab
अपरेयं परा विद्या यया ब्रह्माभिगम्यते[1] ॥ 17cd
यत्तददृश्यमग्राह्यमगोत्रचरणं ध्रुवम्[2] । 18ab
विष्णुनोक्तं यथा मह्यं देवेभ्यो ब्रह्मणा पुरा । 18cd
तथा ते कथयिष्यामि हेतुं मत्स्यादिरूपिणम् ॥ 18॥ 18ef

इत्यादिमहापुराणे आग्नेये प्रश्नो नाम प्रथमोध्यायः ॥

## 2

### अथ द्वितीयो ऽध्यायः ।

मत्स्यावतारवर्णनं ।
वशिष्ठ उवाच ।
मत्स्यादिरूपिणं विष्णुं ब्रूहि सर्गादिकारणम् । 1ab
पुराणं ब्रह्म चाग्नेयं यथा विष्णोः पुरा श्रुतम् ॥ 1cd
अग्निरुवाच ।
मत्स्यावतारं वक्ष्ये ऽहं वसिष्ठ शृणु वै हरेः । 2ab
अवतारक्रिया दुष्टनष्ट्यै सत्पालनाय हि ॥ 2cd
आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः । 3ab
समुद्रोपप्लुतास्तत्र लोका भूरादिका मुने ॥ 3cd
मनुर्वैवस्वतस्तेपे तपो वै भुक्तिमुक्तये । 4ab
एकदा कृतमालायां कुर्वतो जलतर्पणम् ॥ 4cd
तस्याञ्जल्युदके मत्स्यः स्वल्प एको ऽभ्यपद्यत । 5ab
क्षेप्तुकामं जले प्राह न मां क्षिप नरोत्तम[3] ॥ 5cd

---

1 ब्रह्मावगम्यते इति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।
2 अगोत्रचरणं परमिति ग, चिह्नितपुस्तकपाठः ।
3 न मां क्षिप नृपोत्तम इति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।

ग्राहादिभ्यो भयं मे ऽद्य[1] तच्छ्रुत्वा कलशे ऽक्षिपत् । 6ab
स तु वृद्धः पुनर्मत्स्यः प्राह तं देहि मे वृहत् ॥ 6cd
स्थानमेतद्वचः श्रुत्वा राजा ऽथोदञ्चने ऽक्षिपत् । 7ab
तत्र वृद्धो ऽब्रवीद्रूपं पृथु देहि पदं मनो ॥ 7cd
सरोवरे पुनः क्षिप्तो ववृधे तत्प्रमाणवान् । 8ab
ऊचे देहि वृहत् स्थानं[2] प्राक्षिपच्चाम्बुधौ ततः[3] ॥ 8cd
लक्षयोजनविस्तीर्णः क्षणमात्रेण सो ऽभवत् । 9ab
मत्स्यं तमद्भुतं दृष्ट्वा विस्मितः प्राब्रवीन् मनुः ॥ 9cd
को भवान्ननु वै विष्णु[4]र्नारायण नमोस्तुते । 10ab
मायया मोहयसि मां किमर्थं त्वं जनार्दन ॥ 10cd
मनुनोक्तो ऽब्रवीन्मत्स्यो मनुं वै पालने रतम् । 11ab
अवतीर्णो भवायास्य जगतो दुष्टनष्टये ॥ 11cd
सप्तमे दिवसे त्वब्धिः प्लावयिष्यति वै जगत् । 12ab
उपस्थितायां नावि त्वं वीजादीनि विधाय च ॥ 12cd
सप्तर्षिभिः परिवृतो निशां ब्राह्मीं चरिष्यसि । 13ab
उपस्थितस्य मे शृङ्गे निबध्नीहि महाहिना ॥ 13cd
इत्युक्त्वान्तर्द्दधे मत्स्यो[5] मनुः कालप्रतीक्षकः[6] । 14ab
स्थितः समुद्र उद्वेले नावमारुरुहे तदा ॥ 14cd
एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः । 15ab

---

1 मे ऽत्र इति ख, चिह्नितपुस्तकपाठः ।
2 पुनः स्थानमिति ख, चिह्नितपुस्तकपाठः ।
3 अम्बुधौ मनुरिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
4 ननु विष्णुस्त्वमिति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।
5 इत्युक्तान्तर्हितो मत्स्य इति घ, चिह्नितपुस्तकपाठः ।
6 इत्युक्त्वा देवमत्स्यात्मा बृहत्कारणसङ्गत इति ग, चिह्नितपुस्तकपाठः
।

नावम्बबन्ध तच्छृङ्गे[1] मत्स्याख्यं च पुराणकम् ॥ 15cd
शुश्राव मत्स्यात्पापघ्नं संस्तुवन् स्तुतिभिश्च तं[2] । 16ab
ब्रह्मवेदप्रहर्त्तारं हयग्रीवञ्च दानवम् ॥ 16cd
अवधीत्, वेदमन्त्राद्यान् पालयामास केशवः । 17ab
प्राप्ते कल्पे ऽथ वाराहे कूर्म्मरूपो ऽभवद्धरिः ॥ 17cd

इत्यादिमहापुराणे आग्नेये मत्स्यावतारो नाम द्वितीयो ऽध्यायः ॥

## 3

### अथ तृतीयो ऽध्यायः ।

कूर्म्मावतारवर्णनं ।
अग्निरुवाच
वक्ष्ये कूर्म्मावतारञ्च श्रुत्वा पापप्रणाशनम्[3] । 1ab
पुरा देवासुरे युद्धे दैत्यैर्देवाः पराजिताः ॥ 1cd
दुर्व्वाससश्च शापेन निश्रीकाश्चाभवंस्तदा । 2ab
स्तुत्वा क्षीराब्धिगं[4] विष्णुमूचुः पालय चासुरात् ॥ 2cd
ब्रह्मादिकान् हरिः प्राह सन्धिं कुर्वन्तु चासुरैः[5] । 3ab
क्षीराब्धिमथनार्थं हि अमृतार्थं श्रिये ऽसुराः ॥ 3cd
अरयो ऽपि हि सन्धेयाः सति कार्यार्थगौरवे । 4ab
युष्मानमृतभाजो हि कारयामि[6] न दानवान् ॥ 4cd

---

1 नावं बध्वा तस्य शृङ्गे इति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
2 स्तुतिभिर्मनुरिति ग, चिह्नितपुस्तकपाठः ।
3 संश्रुतं पापनाशनमिति ख, ग, घ चिह्नितपुस्तकत्रयपाठः ।
4 सुरा क्षीराब्धिगमिति ग, घ, चिह्नितपुस्त्कद्वयपाठः ।
5 सन्धिं कुरुत चासुरैरिति ग, चिह्नितपुस्तकपाठः ।
6 भाजो हि करिष्यामि इति ख, चिह्नितपुस्तकपाठः ।

मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु [1] वासुकिम् । 5ab
क्षीराब्धिं मत्सहायेन निर्मथध्वमतन्द्रिताः ॥ 5cd
विष्णूक्तां संविदं कृत्वा दैत्यैः क्षीराब्धिमागताः । 6ab
ततो मथितुमारब्धाः यतः पुच्छन्ततः सुराः ॥ 6cd
फणिनिःश्वाससन्तप्ता[2] हरिणाप्यायिताः सुराः । 7ab
मथ्यमाने ऽर्णवे सो ऽद्रिरनाधारो ह्यपो ऽविशत् ॥ 7cd
कूर्म्मरूपं समास्थाय दध्रे विष्णुश्च मन्दरम् । 8ab
क्षीराब्धेर्मथ्यमानाच्च विषं हालाहलं ह्यभूत् ॥ 8cd
हरेण धारितं कण्ठे नीलकण्ठस्ततो ऽभवत्[3] । 9ab
ततो ऽभूद्वारुणी देवी पारिजातस्तु कौस्तुभः ॥ 9cd
गावश्चाप्सरसो दिव्या लक्ष्मीर्देवी हरिङ्गता । 10ab
पश्यन्तः सर्वदेवास्तां स्तुवन्तः सश्रियो ऽभवन् ॥ 10cd
ततो धन्वन्तरिर्विष्णुरायुर्वेदप्रवर्त्तकः[4] । 11ab
बिभ्रत कमण्डलुम्पूर्णममृतेन समुत्थितः ॥ 11cd
अमृतं तत्कराद्दैत्या सुरेभ्यो ऽर्द्धं प्रदाय च । 12ab
गृहीत्वा जग्मुर्जन्माद्या ऽविष्णुः स्त्रीरूपधृक् ततः ॥ 12cd
तां दृष्ट्वा रूपसम्पन्नां दैत्याः प्रोचुर्विमोहिताः । 13ab
भव भार्या ऽमृतं गृह्य पाययास्मान् वरानने ॥ 13cd
तथेत्युक्त्वा हरिस्तेभ्यो गृहीत्वा ऽपाययत्सुरान् । 14ab
चन्द्ररूपधरो राहुः पिबंश्चार्केन्दुनार्पितः [5] ॥ 14cd

---

1 रज्जं कृत्वा तु इति ख, चिह्नितपुस्तकपाठः ।
2 निःश्वाससंग्लाना इति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
3 ततो हर इति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
4 प्रदर्शक इति ख, ग, चिह्नितपुस्तकद्वयपाठः ।
5 अर्केन्दुसूचित इति ख, चिह्नितपुस्तकपाठः ।

हरिणाप्यरिणा च्छिन्नं[1] स राहुस्तच्छिरः पृथक् । 15ab
कृपया ऽमरतान्नीतं वरदं हरिमब्रवीत् ॥ 15cd
राहुर्मत्तस्तु चन्द्रार्कौ प्राप्स्येते ग्रहणं ग्रहः । 16ab
तस्मिन् काले च यद्दानं दास्यन्त, स्यात्तत्क्षयम्[2] ॥ 16cd
तथेत्याहाथ तं विष्णुस्ततः सर्वैः सहामरैः । 17ab
स्त्रीरूपं सम्परित्यज्य हरेणोक्तः प्रदर्शय ॥ 17cd
दर्शयामास रुद्राय स्त्रीरूपं भगवान् हरिः । 18ab
मायया मोहितः शम्भुः गौरीं त्यक्त्वा स्त्र्यङ्गतः ॥ 18cd
नग्न उन्मत्तरूपो ऽभूत् स्त्रियः केशानधारयत्[3] । 19ab
अगाद्विमुच्य केशान् स्त्री अन्वधावच्च ताङ्गताम् ॥ 19cd
स्खलितं तस्य वीर्यं कौ यत्र यत्र हरस्य हि । 20ab
तत्र तत्राभवत् क्षेत्रं लिङ्गानां कनकस्य च [4] ॥ 20cd
मायेयमिति तां ज्ञात्वा स्वरूपस्थो ऽभवद्धरः । 21ab
शिवमाह हरी रुद्र जिता माया त्वया हि मे ॥ 21cd
न जेतुमेनां शक्तो मे त्वदृते ऽन्यः पुमान् भुवि । 22ab
अप्राप्याथामृतं दैत्या देवैर्युद्धे निपातिताः । 22cd
त्रिदिवस्थाः सुराश्चासन् यः पठेत् त्रिदिवं व्रजेत् ॥ 22॥ 22ef

इत्यादिमहापुराणे आग्नेये कूर्म्मावतारो नाम तृतीयो ऽध्यायः ॥

---

1 हरिणा चासिना च्छिन्नमिति ग, चिह्नितपुस्तकपाठः ।

2 भवेयं ये तदा दानं दास्यन्ते स्यात्तदक्षयमिति ख, चिह्नितपुस्तकपाठः ।

3 मायया मोहितो रुद्रस्तरसा तां जगाम ह । मोहिनीं प्राप्य मतिमान् स्त्रियः केशामधारयदिति ग, चिह्नितपुस्तकपाठः ।

4 तत्र तत्र महातीर्थं क्षेत्राणामुत्तमोत्तममिति ग, चिह्नितपुस्तकपाठः ।

## 4

## अथ चतुर्थो ऽध्यायः

वराहाद्यवतारवर्णनं ।

अग्निरुवाच ।

अवतारं वराहस्य वक्ष्ये ऽहं पापनाशनम् । 1ab
हिरण्याक्षो ऽसुरेशो ऽभूत्[1] देवान् जित्वा[2] दिवि स्थितः ॥ 1cd
देवैर्गत्वा स्तुतो विष्णुर्यज्ञरूपो वराहकः । 2ab
अभूत्, तं दानवं हत्वा दैत्यैः साकञ्च कण्टकम्[2] ॥ 2cd
धर्मदेवादिरक्षाकृत् ततः सो ऽन्तर्द्दधे हरिः । 3ab
हिरण्याक्षस्य वै भ्राता हिरण्यकशिपुस्तथा[4] ॥ 3cd
जितदेवयज्ञभागः सर्वदेवाधिकारकृत् । 4ab
नारसिंहवपुः कृत्वा तं जघान सुरैः सह ॥ 4cd
स्वपदस्थान् सुरांश्चक्रे नारसिंहः सुरैः स्तुतः । 5ab
देवासुरे पुरा युद्धे बलिप्रभृतिभिः सुराः ॥ 5cd
जिताः स्वर्गात्परिभ्रष्टा हरिं वै[5] शरणं गताः । 6ab
सुराणामभयं दत्वा अदित्या कश्यपेन च ॥ 6cd
स्तुतो ऽसौ वामनो भूत्वा ह्यदित्यां स क्रतुं ययौ । 7ab
बलेः श्रीयजमानस्य, राजद्वारे ऽगृणात् श्रुतिं ॥ 7cd
देवान् पठन्तं तं श्रुत्वा वामनं वरदो ऽब्रवीत् । 8ab
निवारितो ऽपि शुक्रेण बलिर्ब्रूहि यदिच्छसि ॥ 8cd
तत्ते ऽहं सम्प्रदास्यामि, वामनो बलिमब्रवीत् । 9ab

---

1 सुरेन्द्रोभूदिति घ, चिह्नितपुस्तकपाठः ।
2 सुरान् जित्वेति ख, चिह्नितपुस्तकपाठः ।
3 सार्द्धन्तु कण्टकमिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
4 हिरण्यकशिपुस्तदेति घ, चिह्नितपुस्तकपाठः ।
5 हरिन्ते इति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।

पदत्रयं हि गुर्वर्थं[1] देहि दास्ये तमब्रवीत् ॥ 9cd
तोये तु पतिते हस्ते वामनो ऽभूदवामनः । 10ab
भूर्लोकं स भुवर्लोकं स्वर्लोकञ्च पदत्रयम् ॥ 10cd
चक्रे बलिञ्च सुतलं तच्छक्राय ददौ हरिः । 11ab
शक्रो देवैर्हरिं स्तुत्वा भुवनेशः सुखी त्वभूत् ॥ 11cd
वक्ष्ये परशुरामस्य चावतारं शृणु द्विज । 12ab
उद्धतान् क्षत्रियान् मत्वा भूभारहरणाय सः ॥ 12cd
अवतीर्णो हरिः शान्त्यै देवविप्रादिपालकः । 13ab
जमदग्ने रेणुकायां भार्गवः शस्त्रपारगः ॥ 13cd
दत्तात्रेयप्रसादेन कार्त्तवीर्यो नृपस्त्वभृत् । 14ab
सहस्रबाहुः सर्वोर्वीपतिः स मृगयां गतः ॥ 14cd
श्रान्तो[2] निमन्त्रितो ऽरण्ये मुनिना जमदग्निना । 15ab
कामधेनुप्रभावेण भोजितः सबलो नृपः ॥ 15cd
अप्रार्थयत् कामधेनुं[3] यदा स न ददौ तदा । 16ab
हृतवानथ रामेण शिरश्छित्वा निपातितः ॥ 16cd
युद्धे परशुना राजा धेनुः स्वाश्रममाययौ[4] । 17ab
कार्त्तवीर्यस्य पुत्रैस्तु जमदग्निर्निपातितः ॥ 17cd
रामे वनं गते वैरादथ रामः समागतः । 18ab
पितरं निहतं दृष्ट्वा पितृनाशाभिमर्षितः ॥ 18cd
त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रामकरोद्विभुः । 19ab
कुरुक्षेत्रे पञ्च कुण्डान् कृत्वा सन्तर्प्य वै पितॄन् ॥ 19cd

1 मे गुर्वर्थमिति ख, चिह्नितपुस्तकपाठः ।
2 भ्रान्त इति ख, चिह्नितपुस्तकपाठः ।
3 अप्रार्थयद्धोमधेनुमिति ख, ग, चिहिनितपुस्तकद्वयपाठः ।
4 सधेनुश्चाश्रमं ययौ इति ख, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।

काश्यपाय महीं दत्वा महेन्द्रे पर्वते स्थितः । 20ab
कूर्म्मस्य च वराहस्य नृसिंहस्य च वामनं । 20cd
अवतारं च रामस्य श्रुत्वा याति दिवं नरः ॥ 20॥ 20ef

इत्यादिमहापुराणे आग्नेये वराहनृसिंहाद्यवतारो नाम चतुर्थो ऽध्यायः ।

## 5

### अथ पञ्चमो ऽध्यायः ।

श्रीरामावतारवर्णनम् ।
अग्निरुवाच ।
रामायणमहं वक्ष्ये नारदेनोदितं पुरा । 1ab
वाल्मीकये यथा तद्वत् पठितं भुक्तिमुक्तिदम् ॥ 1cd
नारद उवाच ।
विष्णुनाभ्यब्जजो ब्रह्मा मरीचिर्ब्रह्मणः सुतः । 2ab
मरीचेः कश्यपस्तस्मात् सूर्यो वैवस्वतो मनुः ॥ 2cd
ततस्तस्मात्तथेक्ष्वाकुस्तस्य वंशे ककुत्स्थकः । 3ab
ककुत्स्थस्य रघुस्तस्मादजो दशरथस्ततः ॥ 3cd
रावणादेर्बधार्थाय चतुर्द्धाभूत् स्वयं हरिः । 4ab
राज्ञो दशरथाद्रामः कौशल्यायां बभूव ह ॥ 4cd
कैकेय्यां भरतः पुत्रः सुमित्रायाञ्च लक्ष्मणः । 5ab
शत्रुघ्न ऋष्यशृङ्गेण तासु सन्दत्तपायसात् ॥ 5cd
प्राशिताद्यज्ञसंसिद्धाद्रामाद्याश्च समाः पितुः । 6ab
यज्ञविघ्नविनाशाय विश्वामित्रार्थितो नृपः ॥ 6cd
रामं सम्प्रेषयामास लक्ष्मणं मुनिना सह । 7ab

रामो गतो ऽस्त्रशस्त्राणि शिक्षितस्ताडकान्तकृत्[1] ॥ 7cd
मारीचं मानवास्त्रेण मोहितं दूरतो ऽनयत् । 8ab
सुबाहुं यज्ञहन्तारं सबलञ्चावधीत् बली ॥ 8cd
सिद्धाश्रमनिवासी च विश्वामित्रादिभिः सह । 9ab
गतः क्रतुं मैथिलस्य द्रष्टुञ्चापं सहानुजः ॥ 9cd
शतानन्दनिमित्तेन विश्वामित्रप्रभावतः । 10ab
रामाय कथितो राज्ञा समुनिः पूजितः क्रतौ ॥ 10cd
धनुरापूरयामास लीलया स बभञ्ज तत्[2] । 11ab
वीर्यशुल्काञ्च जनकः सीतां कन्यान्त्वयोनिजाम् ॥ 11cd
ददौ रामाय रामो ऽपि पित्रादौ हि समागते । 12ab
उपयेमे जानकीन्तामुर्मिलां लक्ष्मणस्तथा[3] ॥ 12cd
श्रुतकीर्तिं माण्डवीञ्च कुशध्वजसुते तथा । 13ab
जनकस्यानुजस्यैते शत्रुघ्नभरतावुभौ ॥ 13cd
कन्ये द्वे उपयेमाते जनकेन सुपूजितः । 14ab
रामो ऽगात्सवशिष्ठाद्यैर्जामदग्न्यं विजित्य च । 14cd
अयोध्यां भरतोभ्यागात्[4] सशत्रुघ्नो युधाजितः ॥ 14॥ 14ef

इत्यादिमहापुराणे आग्नेये रामायणे बालकाण्डवर्णनं नाम पञ्चमो ऽध्यायः ।

1 ताडकापहृदिति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।
2 बभञ्ज तद्दृढं धनुरिति ग, चिह्नितपुस्तकपाठः ।
3 तदा इति ख, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।
4 भरतोथागात् इति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।

## 6

### अथ षष्ठो ऽध्यायः ।

श्रीरामावतारवर्णनं ।

नारद उवाच ।

भरते ऽथ गते रामः पित्रादीनभ्यपूजयत् । 1ab
राजा दशरथो राममुवाच शृणु राघव ॥ 1cd
गुणानुरागाद्राज्ये त्वं प्रजाभिरभिषेचितः । 2ab
मनसा ऽहं प्रभाते ते यौवराज्यं ददामि ह ॥ 2cd
रात्रौ त्वं सीतया सार्धं संयतः सुव्रतो भव । 3ab
राज्ञश्च मन्त्रिणश्चाष्टौ सवसिष्ठास्तथाब्रुवन् ॥ 3cd
सृष्टिर्जयन्तो विजयः सिद्धार्थो राष्ट्रवर्धनः[1] । 4ab
अशोको धर्मपालश्च सुमन्त्रः सवसिष्ठकः[2] ॥ 4cd
पित्रादिवचनं श्रुत्वा तथेत्युक्त्वा स राघवः । 5ab
स्थितो देवार्चनं कृत्वा कौशल्यायै निवेद्य तत् ॥ 5cd
राजोवाच वसिष्ठादीन् रामराज्याभिषेचने । 6ab
सम्भारान् सम्भवन्तु स्म इत्युक्त्वा कैकेयीङ्गतः ॥ 6cd
अयोध्यालङ्कृतिं दृष्ट्वा ज्ञात्वा रामाभिषेचनं । 7ab
भविष्यतीत्याचचक्षे कैकेयीं मन्थरा सखी[3] ॥ 7cd
पादौ गृहीत्वा रामेण कर्षिता सापराधतः । 8ab
तेन वैरेण सा रामवनवासञ्च काङ्क्षति ॥ 8cd
कैकेयि त्वं समुत्तिष्ठ रामराज्याभिषेचनं । 9ab
मरणं तव पुत्रस्य मम ते नात्र संशयः ॥ 9cd

---

1 राज्यवर्द्धन इति ख, ग, घ चिह्नितपुस्तकत्रयपाठः ।

2 सुमन्त्रश्च वशिष्ठक इति ख, ग, घ, ङ, चिह्नितपुस्तकचतुष्टयपाठः ।

3 मन्थरासती इति ख, ङ, चिह्नितपुस्तकद्वयपाठः मन्थरा सतीमिति ग, चिह्नितपुस्तकपाठः ।

कुब्जयोक्तञ्च तच्छ्रुत्वा एकमाभरणं ददौ । 10ab
उवाच मे यथा रामस्तथा मे भरतः सुतः ॥ 10cd
उपायन्तु न पश्यामि भरतो येन राज्यभाक् । 11ab
कैकेयीमब्रवीत् क्रुद्धा हारं त्यक्त्वा ऽथ मन्थरा ॥ 11cd
बालिशे रक्ष भरतमात्मानं माञ्च राघवात् । 12ab
भविता राघवो राजा राघवस्य ततः सुतः ॥ 12cd
राजवंशस्तु कैकेयि भरतात् परिहास्यते । 13ab
देवासुरे पुरा युद्धे शम्बरेण हताः सुराः ॥ 13cd
रात्रौ भर्त्ता गतस्तत्र रक्षितो विद्यया त्वया । 14ab
वरद्वयन्तदा प्रादाद्याचेदानीं नृपञ्च तत् ॥ 14cd
रामस्य च वनेवासं नव वर्षाणि पञ्च च । 15ab
यौवराज्यञ्च भरते तदिदानीं प्रदास्यति ॥ 15cd
प्रोत्साहिता कुब्जया सा अनर्थे चार्थदर्शिनी । 16ab
उवाच सदुपायं मे कच्चित्तं[1] कारयिष्यति ॥ 16cd
क्रोधागारं प्रविष्टा ऽथ पतिता भुवि मूर्च्छिता । 17ab
द्विजादीनर्च्चयित्वा ऽथ राजा दशरथस्तदा ॥ 17cd
ददर्श केकयीं रुष्टामुवाच कथमीदृशी । 18ab
रोगार्त्ता किं भयोद्विग्ना किमिच्छसि करोमि तत् ॥ 18cd
येन रामेण हि विना न जीवामि मुहूर्त्तकम् । 19ab
शपामि तेन कुर्य्यां वै वाञ्छितं तव सुन्दरि ॥ 19cd
सत्यं ब्रूहीति सोवाच नृपं मह्यं ददासि चेत् । 20ab
वरद्वयं पूर्वदत्तं सत्यात् त्वं देहि मे नृप ॥ 20cd
चतुर्द्दशसमा रामो वने वसतु संयतः । 21ab

---

1 कथितमिति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

सम्भारैरेभिरद्यैव भरतोत्राभिषेच्यताम् ॥ 21cd
विषं पीत्वा मरिष्यामि दास्यसि त्वं न चेन्नृप । 22ab
तच्छ्रुत्वा मूर्च्छितो भूमौ वज्राहत इवापतत् ॥ 22cd
मुहूर्त्ताच्चेतनां प्राप्य कैकेयीमिदमब्रवीत् । 23ab
किं कृतं तव रामेण मया वा पापनिश्चये ॥ 23cd
यन्मामेवं ब्रवीषि त्वं सर्वलोकाप्रियङ्करि । 24ab
केवलं त्वत्प्रियं कृत्वा भविष्यामि सुनिन्दितः ॥ 24cd
या त्वं भार्या[1] कालरात्री भरतो नेदृशः सुतः । 25ab
प्रशाधि विधवा राज्यं मृते मयि गते सुते ॥ 25cd
सत्यपाशनिबद्धस्तु राममाहूय चाब्रवीत् । 26ab
कैकेय्या वञ्चितो राम राज्यं कुरु निगृह्य मां ॥ 26cd
त्वया वने तु वस्तव्यं कैकेयीभरतो नृपः । 27ab
पितरञ्चैव कैकेयीं नमस्कृत्य प्रदक्षिणं ॥ 27cd
कृत्वा नत्वा च कौशल्यां समाश्वास्य सलक्ष्मणः । 28ab
सीतया भार्यया सार्द्धं सरथः ससुमन्त्रकः ॥ 28cd
दत्वा दानानि विप्रेभ्यो दीनानाथेभ्य एव सः । 29ab
मातृभिश्चैव विप्राद्यैः शोकार्त्तैर्निर्गतः पुरात् ॥ 29cd
उषित्वा तमसातीरे रात्रौ पौरान् विहाय च । 30ab
प्रभाते तमपश्यन्तो ऽयोध्यां ते पुनरागताः ॥ 30cd
रुदन् राजापि कौशल्यागृहमागात् सुदुःखितः । 31ab
पौरा जना स्त्रियः सर्वा रुरुदू राजयोषितः ॥ 31cd
रामो रथस्थश्चीराढ्यः शृङ्गवेरपुरं ययौ । 32ab
गुहेन पूजितस्तत्र इङ्गुदीमूलमाश्रितः[2] ॥ 32cd

1 ग त्वं भार्य्या इति ग, घ, छ, चिह्नितपुस्तकत्रयपाठः ।
2 संश्रित इति ग, घ, चिह्नितपुस्तकद्वयपाठः ।

लक्ष्मणः स गुहो रात्रौ चक्रतुर्ज्जागरं हि तौ । 33ab
सुमन्त्रं सरथं त्यक्त्वा प्रातर्न्नावाथ जाह्नवीं ॥ 33cd
रामलक्ष्मणसीताश्च तीर्णा आपुः प्रयागकम् । 34ab
भरद्वाजं नमस्कृत्य चित्रकूटं गिरिं ययुः ॥ 34cd
वास्तुपूजान्ततः कृत्वा स्थिता मन्दाकिनीतटे । 35ab
सीतायै दर्शयामास चित्रकूटञ्च राघवः ॥ 35cd
नखैर्विदारयन्तन्तां काकन्तच्चक्षुराक्षिपत् । 36ab
ऐषिकास्त्रेण शरणं प्राप्तो देवान् विहायसः ॥ 36cd
रामे वनं गते राजा षष्ठे ऽह्नि निशि चाब्रवीत् । 37ab
कौशल्यां स कथां पौर्वां[1] यदज्ञानद्धतः पुरा ॥ 37cd
कौमारे शरयूतीरे यज्ञदत्तकुमारकः । 38ab
शब्दभेदाच्च कुम्भेन शब्दं कुर्वंश्च तत्पिता ॥ 38cd
शशाप विलपन्मात्रा शोकं कृत्वा रुदन्मुहुः । 39ab
पुत्रं विना मरिष्यावस्त्वं च शोकान्मरिष्यसि ॥ 39cd
पुत्रं विना स्मरन् शोकात् कौशल्ये मरणं मम । 40ab
कथामुक्त्वा ऽथ हा राममुक्त्वा राजा दिवङ्गतः ॥ 40cd
सुप्तं मत्वा ऽथ कौशल्या सुप्ता शोकार्त्तमेव सा । 41ab
सुप्रभाते गायनाश्च सूतमागधवन्दिनः ॥ 41cd
प्रबोधका बोधयन्ति न च बुध्यत्यसौ मृतः[2] । 42ab
कौशल्या तं मृतं ज्ञात्वा हा हतास्मीति चाब्रवीत्[3] ॥ 42cd
नरा नार्यो ऽथ रुरुदुरानीतो भरतस्तदा । 43ab
वशिष्ठाद्यैः सशत्रुघ्नः शीघ्रं राजगृहात्पुरीम् ॥ 43cd

---

1 पूर्वामिति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 नृप इति ङ, चिह्नितपुस्तकपाठः ।
3 चापतदिति ङ, चिह्नितपुस्तकपाठः ।

दृष्ट्वा सशोकां कैकेयीं निन्दयामास दुःखितः । 44ab
अकीर्त्तिः पातिता मूर्द्ध्नि कौशल्यां स प्रशस्य च ॥ 44cd
पितरन्तैलद्रोणिस्थं संस्कृत्य सरयूतटे । 45ab
वशिष्ठाद्यैर्ज्जनैरुक्तो राज्यं कुर्विति सो ऽब्रवीत् ॥ 45cd
व्रजामि राममानेतुं रामो राजा मतो बली[1] । 46ab
शृङ्गवेरं प्रयागञ्च भरद्वाजेन भोजितः ॥ 46cd
नमस्कृत्य भरद्वाजं रामं लक्ष्मणमागतः । 47ab
पिता स्वर्गं गतो राम अयोध्यायां नृपो भव ॥ 47cd
अहं वनं प्रयास्यामि त्वदादेशप्रतीक्षकः । 48ab
रामः श्रुत्वा जलं दत्वा गृहीत्वा पादुके व्रज ॥ 48cd
राज्यायाहन्नयास्यामि[2] सत्याच्चीरजटाधरः । 49ab
रामोक्तो भरतश्चायान्नन्दिग्रामे स्थितो बली ॥ 49cd
त्यक्त्वा ऽयोध्यां पादुके ते पूज्य राज्यमपालयत् ॥ 49॥ 49ef

इत्यादिमहापुराणे आग्नेये रामायणे ऽयोध्याकाण्डवर्णनं नाम षष्ठो ऽध्यायः ॥

## 7

### अथ सप्तमो ऽध्यायः ।

रामायणवर्णनं ।
नारद उवाच ।
रामो वशिष्ठं मातॄंश्च नत्वा ऽत्रिञ्च प्रणम्य सः । 1ab
अनसूयाञ्च तत्पत्नीं शरभङ्गं सुतीक्ष्णकम् ॥ 1cd

---

1 यतो बली इति ख, ग, चिह्नितपुस्तकद्वयपाठः गतो बली इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

2 नाहं राज्यं प्रयास्यामि इति ख, चिह्नितपुस्तकपाठः राज्यं नाहं प्रयास्यामि इति ङ, चिह्नितपुस्तकपाठः ।

अगस्त्यभ्रातरं नत्वा अगस्त्यन्तत्प्रसादतः । 2ab
धनुःखड्गञ्च सम्प्राप्य दण्डकारण्यमागतः ॥ 2cd
जनस्थाने पञ्चवट्यां स्थितो गोदावरीतटे । 3ab
तत्र सूर्पणखायाता भक्षितुं तान् भयङ्करी ॥ 3cd
रामं सुरूपं दृष्ट्वा सा कामिनी वाक्यमब्रवीत् । 4ab
कस्त्वं कस्मात्समायातो भर्त्ता मे भव चार्थितः ॥ 4cd
एतौ च भक्षयिष्यामि इत्युक्त्वा तं समुद्यता । 5ab
तस्या नासाञ्च कर्णौ च रामोक्तो लक्ष्मणो ऽच्छिनत् ॥ 5cd
रक्तं क्षरन्ती प्रययौ खरं भ्रातरमब्रवीत् । 6ab
मरिष्यामि विनासा ऽहं खर जीवामि वै तदा ॥ 6cd
रामस्य भार्य्या सीता ऽसौ तस्यासील्लक्ष्मणो ऽनुजः । 7ab
तेषां यद्रुधिरं[1] सोष्णं पाययिष्यसि मां यदि ॥ 7cd
खरस्तथेति तामुक्त्वा चतुर्द्दशसहस्रकैः । 8ab
रक्षसां दूषणेनागाद्योद्धुं[2] त्रिशिरसा सह ॥ 8cd
रामं रामो ऽपि युयुधे शरैर्विव्याध राक्षसान् । 9ab
हस्त्यश्वरथपादातं बलं निन्ये यमक्षयं ॥ 9cd
त्रिशीर्षाणं खरं रौद्रं युध्यन्तञ्चैव दूषणम् । 10ab
ययौ सूर्पणखा लङ्कां रावणाग्रे ऽपतद् भुवि ॥ 10cd
अब्रवीद्रावणं क्रुद्धा न त्वं राजा न रक्षकः । 11ab
खरादिहन्तू रामस्य सीतां भार्यां हरस्व च ॥ 11cd
रामलक्ष्मणरक्तस्य पानाज्जीवामि नान्यथा । 12ab
तथेत्याह च तच्छ्रुत्वा मारीचं प्राह वै व्रज ॥ 12cd
स्वर्णचित्रमृगो भूत्वा रामलक्ष्मणकर्षकः । 13ab

---
1 हृद्रुधिरमिति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।
2 रक्षसां सहसा प्रायाद्योद्धुमिति ग, चिह्नितपुस्तकपाठः ।

सीताग्रे तां हरिष्यामि अन्यथा मरणं तव ॥ 13cd
मारीचो रावणं प्राह रामो मृत्युर्धनुर्धरः[1] । 14ab
रावणादपि मर्त्तव्यं मर्त्तव्यं राघवादपि ॥ 14cd
अवश्यं यदि मर्त्तव्यं वरं रामो न रावणः । 15ab
इति मत्वा मृगो भूत्वा सीताग्रे व्यचरन्मुहुः ॥ 15cd
सीतया प्रेरितो[2] रामः शरेणाथावधीच्च तं । 16ab
म्रियमाणो मृगः प्राह हा सीते लक्ष्मणेति च ॥ 16cd
सौमित्रिः सीतयोक्तो ऽथ विरुद्धं राममागतः । 17ab
रावणोप्यहरत् सीतां हत्वा गृध्रं जटायुषं ॥ 17cd
जटायुषा स भिन्नाङ्गो[3] अङ्केनादाय जानकीम् । 18ab
गतो लङ्कामशोकाख्ये धारयामास चाब्रवीत् ॥ 18cd
भव भार्य्या ममाग्र्या त्वं राक्षस्यो रक्ष्यतामियम् । 19ab
रामो हत्वा तु मारीचं दृष्ट्वा लक्ष्मणमब्रवीत् ॥ 19cd
मायामृगो ऽसौ सौमित्रे यथा त्वमिह चागतः । 20ab
तथा सीता हृता नूनं नापश्यत् स गतो ऽथ ताम् ॥ 20cd
शुशोच विललापार्त्तो मान्त्यक्त्वा क्व गतासि वै । 21ab
लक्ष्मणाश्वासितो रामो मार्गयामास[4] जानकीम् ॥ 21cd
दृष्ट्वा जटायुस्तं प्राह रावणो हृतवांश्च ताम् । 22ab
मृतो ऽथ संस्कृतस्तेन कबन्धश्चावधीत्ततः ॥ 22cd
शापमुक्तो ऽब्रवीद्रामं स त्वं सुग्रीवमाव्रज ॥ 22॥ 22ef

इत्यादिमहापुराणे आग्नेये रामायणे आरण्यककाण्डवर्णनं नाम सप्तमो ऽध्यायः ।

1 मृत्युर्न तद्दूरमिति ख, ग, चिह्नितपुस्तकद्वयपाठः ।
2 प्रेषित इति ख, चिह्नितपुस्तकपाठः ।
3 विरथ इति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।
4 आह्वयामास इति ङ, चिह्नितपुस्तकपाठः ।

# 8

## अथ अष्टमो ऽध्यायः ।

श्रीरामावतारकथनम् ।
नारद उवाच ।
रामः पम्पासरो गत्वा शोचन् स शर्वरीं ततः[1] । 1ab
हनूमता स सुग्रीवं[2] नीतो मित्रञ्चकार ह ॥ 1cd
सप्त तालान् विनिर्भिद्य शरेणैकेन पश्यतः । 2ab
पादेन दुन्दुभेः कायञ्चिक्षेप दशयोजनं ॥ 2cd
तद्रिपुं बालिनं हत्वा भ्रातरं वैरकारिणम् । 3ab
किष्किन्धां कपिराज्यञ्च रुमान्तारां समर्पयत् ॥ 3cd
ऋष्यमूके हरीशाय किष्किन्धेशो ऽब्रवीत्स च[3] । 4ab
सीतां त्वं प्राप्स्यसे यद्वत्[4] तथा राम करोमि ते ॥ 4cd
तच्छ्रुत्वा माल्यवत्पृष्ठे चातुर्मास्यं चकार सः । 5ab
किष्किन्धायाञ्च सुग्रीवो यदा नायाति दर्शनं ॥ 5cd
तदा ऽब्रवीत्तं रामोक्तं लक्ष्मणो व्रज राघवम् । 6ab
न स सङ्कुचितः पन्था येन बाली हतो गतः ॥ 6cd
समये तिष्ठ सुग्रीव मा बालिपथमन्वगाः । 7ab
सुग्रीव आह संसक्तो[5] गतं कालं न बुद्धवान् ॥ 7cd
इत्युक्त्वा स गतो रामं नत्वोवाच हरीश्वरः । 8ab
आनीता वानराः सर्वे सीतायाश्च गवेषणे ॥ 8cd

---

1 गौरवाच्छवरीनतः इति ङ, चिह्नितपुस्तकपाठः । शवरीं तत इति ख, ग, चिह्नितपुस्तकपाठः ।
2 हनूमता वानरेन्द्रमिति ङ, चिह्नितपुस्तकपाठः ।
3 अब्रवीत्तत् इति ग, चिह्नितपुस्तकपाठः ।
4 प्राप्स्यसि यथा इति ख, चिह्नितपुस्तकपाठः ।
5 सुग्रीवमाह सङ्क्रुद्ध इति ख, ग, चिह्नितपुस्तकद्वयपाठः । सुग्रीव ऋद्धिसंसक्त इति ङ, चिह्नितपुस्तकपाठः ।

त्वन्मतात् प्रेषयिष्यामि विचिन्वन्तु च जानकीम् । 9ab
पूर्वादौ मासमायान्तु मासादूर्ध्वं निहन्मि तान् ॥ 9cd
इत्युक्ता वानराः पूर्वपश्चिमोत्तरमार्गगाः । 10ab
जग्मू रामं ससुग्रीवमपश्यन्तस्तु जानकीम् ॥ 10cd
रामाङ्गुलीयं सङ्गृह्य हनूमान् वानरैः सह । 11ab
दक्षिणे मार्गयामास सुप्रभाया गुहान्तिके ॥ 11cd
मासादूर्ध्वञ्च विन्यस्ता अपश्यन्तस्तु जानकीम् । 12ab
ऊचुर्वृथा मरिष्यामो जटायुर्द्धन्य एवसः ॥ 12cd
सीतार्थे यो ऽत्यजत् प्राणान्रावणेन हतो रणे । 13ab
तच्छ्रुत्वा प्राह सम्पातिर्विहाय कपिभक्षणं ॥ 13cd
भ्राता ऽसौ मे जटायुर्वै मयोड्डीनो ऽर्कमण्डलम् । 14ab
अर्कतापाद्रक्षितो ऽगात् दग्धपक्षो ऽहमब्भ्रगः ॥ 14cd
रामवार्त्ताश्रवात् पक्षौ जातौ भूयो ऽथ जानकीम् । 15ab
पश्याम्यशोकवनिकागतां लङ्कागतां किल ॥ 15cd
शतयोजनविस्तीर्णे लवणाब्धौ त्रिकूटके । 16ab
ज्ञात्वा रामं ससुग्रीवं वानराः कथयन्तु वै ॥ 16cd

इत्यादिमहापुराणे आग्नेये रामायणे किष्किन्धाकाण्डवर्णनं नाम अष्टमो ऽध्यायः ।

# 9

## अथ नवमो ऽध्यायः ।

श्रीरामावतारकथनं ।
नारद उवाच ।
सम्पातिवचनं श्रुत्वा हनुमानङ्गदादयः । 1ab
अब्धिं दृष्ट्वा ऽब्रुवंस्ते ऽब्धिं लङ्घयेत् को नु जीवयेत् ॥ 1cd

कपीनां जीवनार्थाय रामकार्य्यप्रसिद्धये । 2ab
शतयोजनविस्तीर्णं पुप्लुवे ऽब्धिं स मारुतिः ॥ 2cd
दृष्ट्वोत्थितञ्च मैनाकं सिंहिकां विनिपात्य च । 3ab
लङ्कां दृष्ट्वा राक्षसानां गृहाणि वनितागृहे ॥ 3cd
दशग्रीवस्य कुम्भस्य कुम्भकर्णस्य रक्षसः । 4ab
विभीषणस्येन्द्रजितो गृहे ऽन्येषां च रक्षसो ॥ 4cd
नापश्यत् पानभूम्यादौ सीतां चिन्तापरायणः । 5ab
अशोकवनिकां गत्वा दृष्टवाञ्छिंशपातले ॥ 5cd
राक्षसीरक्षितां सीतां भव भार्येति वादिनं । 6ab
रावणं शिंशपास्थो ऽथ नेति सीतान्तु वादिनीं ॥ 6cd
भव भार्या रावणस्य राक्षसीर्वादिनीः कपिः । 7ab
गते तु रावणे प्राह राजा दशरथो ऽभवत् ॥ 7cd
रामो ऽस्य[1] लक्ष्मणः पुत्रौ वनवासङ्गतौ वरौ । 8ab
रामपत्नी जानकी त्वं रावणेन हृता बलात् ॥ 8cd
रामः सुग्रीवमित्रस्त्वां मार्गयन् प्रैषयच्च माम्[2] । 9ab
साभिज्ञानञ्चांगुलीयं रामदत्तं गृहाण वै ॥ 9cd
सीता ऽङ्गुलीयं जग्राह सा ऽपश्यन्मारुतिन्तरौ । 10ab
भूयो ऽग्रे चोपविष्टं तमुवाच यदि जीवति ॥ 10cd
रामः कथं न नयति शङ्कितामब्रवीत् कपिः । 11ab
रामः सीते न जानीते ज्ञात्वा त्वां स नयिष्यति ॥ 11cd
रावणं राक्षसं हत्वा सबलं देवि मा शुच । 12ab
साभिज्ञानं देहि मेत्वं मणिं सीता ऽददत्कपौ ॥ 12cd
उवाच मां यथा रामो नयेच्छीघ्रं तथा कुरु । 13ab

---

1 रामश्च इति ख, चिह्नितपुस्तकपाठः ।
2 त्वां मार्गयेत् प्रेषयेच्चमामिति घ, चिह्नितपुस्तकपाठः ।

काकाक्षिपातनकथाम्प्रतियाहि हि शोकह ॥ 13cd
मणिं कथां गृहीत्वाह हनूमान्नेष्यते पतिः । 14ab
अथवा तेत्वरा काचित् पृष्ठमारुह मे शुभे ॥ 14cd
अद्य त्वां दर्शयिष्यामि ससुग्रीवञ्च राघवम् । 15ab
सीता ऽब्रवीद्धनूमन्तं नयतां मां हि राघवः ॥ 15cd
हनूमान् स दशग्रीवदर्शनोपायमाकरोत् । 16ab
वनं बभञ्ज तत्पालान् हत्वा दन्तनखादिभिः ॥ 16cd
हत्वातु किङ्करान् सर्वान् सप्त मन्त्रिसुतानपि । 17ab
पुत्रमक्षं कुमारञ्च शक्रजिच्च बबन्ध तम् ॥ 17cd
नागपाशेन पिङ्गाक्षं दर्शयामास रावणम् । 18ab
उवाच रावणः कस्त्वं मारुतिः प्राह रावणम् ॥ 18cd
रामदूतो राघवाय सीतां देहि मरिष्यसि । 19ab
रामबाणैर्हतः सार्द्धं लङ्कास्थै राक्षसैर्धुवम् ॥ 19cd
रावणो हन्तुमुद्युक्तो विभीषणनिवारितः । 20ab
दीपयामास लाङ्गलं दीप्तपुच्छः स मारुतिः ॥ 20cd
दग्ध्वा लङ्कां राक्षसांश्च दृष्ट्वा सीतां प्रणम्य ताम् । 21ab
समुद्रपारमागम्य दृष्टा सीतेति चाब्रवीत् ॥ 21cd
अङ्गदादीनङ्गदाद्यैः पीत्वा मधुवने मधु । 22ab
जित्वा दधिमुखादींश्च दृष्ट्वा रामञ्च ते ऽब्रुवन् ॥ 22cd
दृष्टा सीतेति रामो ऽपि हृष्टः पप्रच्छ मारुतिम् । 23ab
कथं दृष्टा त्वया सीता किमुवाच च माम्प्रति ॥ 23cd
सीताकथामृतेनैव सिञ्च मां कामवह्निगम् । 24ab
हनूमानब्रवीद्रामं लङ्घयित्वा ऽब्धिमागतः ॥ 24cd
सीतां दृष्ट्वा पुरीं दग्ध्वा सीतामणिं गृहाण वै । 25ab
हत्वा त्वं रावणं सीतां प्राप्स्यसे राम मा शुच ॥ 25cd
गृहीत्वा तं मणिं रामो रुरोद विरहातुरः । 26ab

मणिं दृष्ट्वा जानकी मे दृष्टा सीता नयस्व माम् ॥ 26cd
तया विना न जीवामि सुग्रीवाद्यैः प्रबोधितः । 27ab
समुद्रतीरं गतवान् तत्र रामं विभीषणः ॥ 27cd
गतस्तिरस्कृतो भ्रात्रा रावणेन दुरात्मना । 28ab
रामाय देहि सीतां त्वमित्युक्तेनासहायवान् ॥ 28cd
रामो विभीषणं मित्रं लङ्कैश्वर्ये ऽभ्यषेचयत् । 29ab
समुद्रं प्रार्थयन्मार्गं यदा नायात्तदा शरैः ॥ 29cd
भेदयामास रामश्च उवाचाब्धिः समागतः । 30ab
नलेन सेतुं बध्वाब्धौ लङ्कां व्रज गभीरकः ॥ 30cd
अहं त्वया कृतः पूर्वं रामो ऽपि नलसेतुना । 31ab
कृतेन तरुशैलाद्यैर्गतः पारं महोदधेः ॥ 31cd
वानरैः स सुवेलस्थः सह लङ्कां ददर्श वै ॥ 31॥ 31ef

इत्यादिमहापुराणे आग्नेये रामायणे सुन्दरकाण्डवर्णनं नाम नवमो ऽध्यायः ।

## 10

### अथ दशमो ऽध्यायः ।

श्रीरामावतारवर्णनं ।
नाराद उवाच ।
रामोक्तश्चाङ्गदो गत्वा रावणं प्राह जानकी । 1ab
दीयतां राघवायाशु अन्यथा त्वं मरिष्यसि ॥ 1cd
रावणो हन्तुमुद्युक्तः सङ्ग्रामोद्धतराक्षसः । 2ab
रामायाह दशग्रीवो युद्धमेकं तु मन्यते ॥ 2cd
रामो युद्धाय तच्छ्रुत्वा लङ्कां सकपिराययौ । 3ab
वानरो हनूमान् मैन्दो द्विविदो जाम्बवान्नलः ॥ 3cd
नीलस्तारोङ्गदो धूम्रः सुषेणः केशरी गयः । 4ab

पनसो विनतो रम्भः शरभः क्रथनो बली ॥ 4cd
गवाक्षो दधिवक्त्रश्च गवयो गन्धमादनः । 5ab
एते चान्ये च सुग्रीव एतैर्युक्तो ह्यसङ्ख्यकैः ॥ 5cd
रक्षसां वानराणाञ्च युद्धं सङ्कुलमाबभौ । 6ab
राक्षसा वानरान् जघ्नुः शरशक्तिगदादिभिः ॥ 6cd
वानरा राक्षसान् जघ्नुर्नखदन्तशिलादिभिः । 7ab
हस्त्यश्वरथपादातं राक्षसानां बलं हतं ॥ 7cd
हनूमान् गिरिशृङ्गेण धूम्राक्षमबधीद्रिपुम् । 8ab
अकम्पनं प्रहस्तञ्च युध्यन्तं नील आबधीत् ॥ 8cd
इन्द्रजिच्छरबन्धाच्च विमुक्तौ रामलक्ष्मणौ । 9ab
तार्क्षसन्दर्शनाद्बाणैर्जघ्नतू राक्षसं बलम् ॥ 9cd
रामः शरैरजर्जरितं रावणञ्चाकरोद्रणे । 10ab
रावणः कुम्भकर्णञ्च बोधयामास दुःखितः ॥ 10cd
कुम्भकर्णः प्रबुद्धो ऽथ पीत्वा घटसहस्रकम् । 11ab
मद्यस्य महिषादीनां भक्षयित्वाह रावणम् ॥ 11cd
सीताया हरणं पापं कृतन्त्वं हि गुरुर्यतः । 12ab
अतो गच्छामि युद्धाय रामं हन्मि सवानरम् ॥ 12cd
इत्युक्त्वा वानरान् सर्वान् कुम्भकर्णो ममर्द ह । 13ab
गृहीतस्तेन सुग्रीवः कर्णनासं चकर्त्त सः ॥ 13cd
कर्णनासाविहीनो ऽसौ भक्षयामास वानरान् । 14ab
रामो ऽथ कुम्भकर्णस्य बाहू चिच्छेद शायकैः ॥ 14cd
ततः पादौ ततश्छित्वा शिरो भूमौ व्यपातयत् । 15ab
अथ कुम्भो निकुम्भश्च मकराक्षश्च राक्षसः ॥ 15cd
महोदरो महापार्श्वो मत्त उन्मत्तराक्षसः । 16ab
प्रघसो भासकर्णश्च विरूपाक्षश्च संयुगे ॥ 16cd
देवान्तको नरान्तश्च त्रिशिराश्चातिकायकः । 17ab

रामेण लक्ष्मणेनैते वानरैः सविभीषणैः ॥ 17cd
युध्यमानास्तथा ह्यन्ये राक्षसा भुवि पातिताः । 18ab
इन्द्रजिन्मायया युध्यन् रामादीन् सम्बबन्ध ह ॥ 18cd
वरदत्तैर्न्नागबाणैः[1] ओषध्या तौ विशल्यकौ । 19ab
विशल्यययाव्रणौ कृत्वा मारुत्यानीतपर्वते ॥ 19cd
हनूमान् धारयामास तत्रागं यत्र संस्थितः । 20ab
निकुम्भिलायां होमादि कुर्वन्तं तं हि लक्ष्मणः ॥ 20cd
शरैरिन्द्रजितं वीरं युद्धे तं तु व्यशातयत् । 21ab
रावणः शोकसन्तप्तः सीतां हन्तुं समुद्यतः ॥ 21cd
अविन्ध्यवारितो[2] राजा रथस्थः सबलो ययौ । 22ab
इन्द्रोक्तो मातली रामं रथस्थं प्रचकार तम् ॥ 22cd
रामरावणयोर्युद्धं रामरावणयोरिव । 23ab
रावणो वानरान् हन्ति मारुत्याद्याश्च रावणम् ॥ 23cd
रामः शस्त्रैस्तमस्त्रैश्च ववर्ष जलदो यथा । 24ab
तस्य ध्वजं स चिच्छेद रथमश्वांश्च सारथिम् ॥ 24cd
धनुर्बाहूञ्छिरांस्येव उत्तिष्ठन्ति शिरांसि हि । 25ab
पैतामहेन हृदयं भित्वा रामेण रावणः ॥ 25cd
भूतले पातितः सर्वे राक्षसै रुरुदुः स्त्रियः । 26ab
आश्वास्य तञ्च संस्कृत्य रामाज्ञप्तो विभीषणः ॥ 26cd
हनूमतानयद्रामः सीतां शुद्धां गृहीतवान् । 27ab
रामो वह्नौ प्रविष्टान्तां शुद्धामिन्द्रादिभिः स्तुतः ॥ 27cd
ब्रह्मणा दशरथेन त्वं विष्णू राक्षसमर्द्दनः । 28ab
इन्द्रोर्च्चितो ऽमृतवृष्ट्या जीवयामास वानरान् ॥ 28cd

---

1 नागपाशैरिति ख, चिह्नितपुस्तकपाठः ।
2 सुहृन्निवारित इति ख, चिह्नितपुस्तकपाठः ।

रामेण पूजिता जग्मुर्युद्धं दृष्ट्वा दिवञ्च ते । 29ab
रामो विभीषणायादाल्लङ्कामभ्यर्च्य वानरान् ॥ 29cd
ससीतः पुष्पके स्थित्वा गतमार्गेण वै गतः[1] । 30ab
दर्शयन् वनदुर्गाणि सीतायै हृष्टमानसः ॥ 30cd
भरद्वाजं नमस्कृत्य नन्दिग्रामं समागतः । 31ab
भरतेन नतश्चागादयोध्यान्तत्र संस्थितः ॥ 31cd
वसिष्ठादीन्नमस्कृत्य कौशल्याञ्चैव केकयीम् । 32ab
सुमित्रां प्राप्तराज्यो ऽथ द्विजादीन् सो ऽभ्यपूजयत् ॥ 32cd
वासुदेवं स्वमात्मानमश्वमेधैरथायजत् । 33ab
सर्वदानानि स ददौ पालयामास सः प्रजाः ॥ 33cd
पुत्रवद्धर्म्मकामादीन् दुष्टनिग्रहणे रतः । 34ab
सर्वधर्म्मपरो लोकः सर्वशस्या च मेदिनी । 34cd
नाकालमरणञ्चासीद्रामे राज्यं प्रशासति ॥ 34॥ 34ef

इत्यादिमहापुराणे आग्नेये रामायणे युद्धकाण्डवर्णनं नाम दशमो ऽध्यायः ।

## 11

### अथ एकादशो ऽध्यायः ।

श्रीरामावतारकथनं ।
नारद उवाच
राज्यस्थं राघवं जग्मुरगस्त्याद्याः सुपूजिताः । 1ab
धन्यस्त्वं विजयी यस्मादिन्द्रजिद्विनिपातितः ॥ 1cd
ब्रह्मात्मजः पुलस्त्योभूत् विश्रवास्तस्य नैकषी । 2ab
पुष्पोत्कटाभूत् प्रथमा तत्पुत्रोभूद्धनेश्वरः ॥ 2cd
नैकष्यां रावणो जज्ञे विंशद्बाहुर्दशाननः । 3ab

1 स्वर्गमार्गेण वैगत इति ख, चिह्नितपुस्तकपाठः ।

तपसा ब्रह्मदत्तेन वरेण जितदैवतः ॥ 3cd
कुम्भकर्णः सनिद्रो ऽभूद्धर्म्मिष्ठो ऽभूद्विभीषणः । 4ab
स्वसा शूर्पणखा तेषां रावणान्मेघनादकः ॥ 4cd
इन्द्रं जित्वेन्द्रजिच्चाभूद्रावणादधिको बली । 5ab
हतस्त्वया लक्ष्मणेन देवादेः क्षेममिच्छता ॥ 5cd
इत्युक्त्वा ते गता विप्रा अगस्त्याद्या नमस्कृताः । 6ab
देवप्रार्थितरामोक्तः शत्रुघ्नो लवणार्द्दनः ॥ 6cd
अभूत् पूर्म्मथुरा काचित् रामोक्तो भरतो अबधीत् । 7ab
कोटित्रयञ्च शैलूषपुत्राणां निशितैः शरैः ॥ 7cd
शैलूषं दुष्टगन्धर्वं सिन्धुतीरनिवासिनम् । 8ab
तक्षञ्च पुष्करं पुत्रं स्थापयित्वाथ देशयोः ॥ 8cd
भरतोगात्सशत्रुघ्नो राघवं पूजयन् स्थितः । 9ab
रामो दुष्टान्निहत्याजौ शिष्टान् सम्पाल्य मानवः ॥ 9cd
पुत्रौ कुशलवौ जातौ वाल्मीकेराश्रमे वरौ । 10ab
लोकापवादात्त्यक्तायां ज्ञातौ सुचरितश्रवात् ॥ 10cd
राज्येभिषिच्य ब्रह्माहमस्मीति ध्यानतत्परः । 11ab
दशवर्षसहस्राणि दशवर्षशतानि च ॥ 11cd
राज्यं कृत्वा क्रतून् कृत्वा स्वर्गं देवार्च्चितो ययौ । 12ab
सपौरः सानुजः सीतापुत्रो जनपदान्वितः ॥ 12cd
अग्निरुवाच ।
वाल्मीकिर्न्नारदाच्छ्रुत्वा रामायणमकारयत् । 13ab
सविस्तरं यदेतच्च शृणुयात्स दिवं व्रजेत् ॥ 13cd

इत्यादिमहापुराणे आग्नेये रामायणे उत्तरकाण्डवर्णनं नाम एकादशो ऽध्यायः ।

# 12

## अथ द्वादशो ऽध्यायः ।

श्रीहरिवंशवर्णनं ।
अग्निरुवाच ।
हरिवंशम्प्रवक्ष्यामि विष्णुनाभ्यम्बुजादजः[1] । 1ab
ब्रह्मणोत्रिस्ततः सोमः सोमाज्जातः पुरूरवाः ॥ 1cd
तस्मादायुरभूत्तस्मान्नहुषो ऽतो ययातिकः । 2ab
यदुश्च तुर्वसुन्तस्माद्देवयानी व्यजायत ॥ 2cd
द्रुह्यश्चानुश्च पूरुश्च शर्म्मिष्ठा वार्षपर्व्वणी । 3ab
यदोः कुले यादवाश्च वसुदेवस्तदुत्तमः ॥ 3cd
भुवो भारावतारार्थं देवक्यां वसुदेवतः । 4ab
हिरण्यकशिपोः पुत्राः षड्गर्भा योगनिद्रया ॥ 4cd
विष्णुप्रयुक्तया नीता देवकीजठरं पुरा । 5ab
अभूच्च सप्तमो गर्भो देवक्या जठराद्बलः ॥ 5cd
सङ्क्रामितो ऽभूद्रोहिण्यां रौहिणेयस्ततो हरिः । 6ab
कृष्णाष्टम्याञ्च नभसि अर्द्धरात्रे चतुर्भुजः ॥ 6cd
देवक्या वसुदेवेन स्तुतो बालो द्विबाहुकः । 7ab
वसुदेवः कंसभयाद्यशोदाशयने ऽनयत् ॥ 7cd
यशोदाबालिकां गृह्य देवकीशयने ऽनयत् । 8ab
कंसो बालध्वनिं श्रुत्वा ताञ्चिक्षेप शिलातले ॥ 8cd
वारितोपि स देवक्या मृत्युर्गर्भोष्टमो मम । 9ab
श्रुत्वा ऽशरीरिणीं वाचं मत्तो गर्भास्तु मारिताः ॥ 9cd
समर्पितास्तु देवक्या विवाहसमयेरिताः । 10ab
सा क्षिप्ता बालिका कंसमाकाशस्थाब्रवीदिदम् ॥ 10cd
किं मया क्षिप्तया कंस जातो यस्त्वां बधिष्यति । 11ab

---
1 विष्णुनाभ्यब्जादज इति ख, चिह्नितपुस्तकपाठः ।

सर्वस्वभूतो देवानां भूभारहरणाय सः ॥ 11cd
इत्युक्त्का सा च शुम्भादीन् हत्वेन्द्रेण च संस्तुता । 12ab
आर्या दुर्गा वेदगर्भा अम्बिका भद्रकाल्यपि ॥ 12cd
भद्रा क्षेम्या क्षेमकरी नैकबाहुर्न्नमामि ताम् । 13ab
त्रिसन्ध्यं यः पठेन्नाम सर्वान् कामानवाप्नुयात् ॥ 13cd
कंसोपि पूतनादींश्चाप्रेषयद्बालनाशने । 14ab
यशोदापतिनन्दाय वसुदेवेन चार्पितौ ॥ 14cd
रक्षणाय च कंसादेर्भीतेनैव हि गोकुले । 15ab
रामकृष्णौ चेरतुस्तौ गोभिर्गोपालकैः सह ॥ 15cd
सर्वस्य जगतः पालौ गोपालौ तौ बभूवतुः । 16ab
कृष्णश्चोलूखले बद्धो दाम्ना व्यग्रयशोदया ॥ 16cd
यमलार्जुनमध्ये ऽगाद् भग्नौ च यमलार्जुनौ । 17ab
परिवृत्तश्च शकटः पादक्षेपात् स्तनार्थिना ॥ 17cd
पूतना स्तनपानेन सा हता हन्तुमुद्यता । 18ab
वृन्दावनगतः कृष्णः कालियं यमुनाह्रदात् ॥ 18cd
जित्वा निःसार्य चाब्धिस्थश्चकार बलसंस्तुतः । 19ab
क्षेमं तालवनं चक्रे हत्वा धेनुकगर्द्दभं ॥ 19cd
अरिष्टवृषभं हत्वा केशिनं हयरूपिणम् । 20ab
शक्रोत्सवं परित्यज्य कारितो गोत्रयज्ञकः ॥ 20cd
पर्वतं धारयित्वा च शक्राद्वृष्टिर्न्निवारिता । 21ab
नमस्कृतो महेन्द्रेण गोविन्दो ऽथार्जुनोर्पितः ॥ 21cd
इन्द्रोत्सवस्तु तुष्टेन भूयः कृष्णेन कारितः । 22ab
रथस्थो मथुराञ्चागात् कंसोक्ताक्रूरसंस्तुतः ॥ 22cd
गोपीभिरनुरक्ताभिः क्रीडिताभिर्न्निरीक्षितः । 23ab

रजकं चाप्रयच्छन्तं[1] हत्वा वस्त्राणि चाग्रहीत् ॥ 23cd
सह रामेण मालाभृन्मालाकारे वरन्ददौ । 24ab
दत्तानुलेपनां कुब्जामृजुं चक्रे ऽहनद् गजं ॥ 24cd
मत्तं कुवलयापीडं द्वारि रङ्गं प्रविश्य च । 25ab
कंसादीनां पश्यतां च मञ्चस्थानां नियुद्धकं ॥ 25cd
चक्रे चाणूरमल्लेन मुष्टिकेन बलो ऽकरोत् । 26ab
चाणूरमुष्टिकौ ताभ्यां हतौ मल्लौ तथापरे ॥ 26cd
मथुराधिपतिं कंसं हत्वा तत्पितरं हरिः । 27ab
चक्रे यादवराजानमस्तिप्राप्ती च कंसगे ॥ 27cd
जरासन्धस्य ते पुत्र्यौ जरासन्धस्तदीरितः । 28ab
चक्रे स मथुरारोधं यादवैर्युयुधे शरैः ॥ 28cd
रामकृष्णौ च मथुरां त्यक्त्वा गोमन्तमागतौ । 29ab
जरासन्धं विजित्याजौ पौण्ड्रकं वासुदेवकं ॥ 29cd
पुरीं च द्वारकां कृत्वा न्यवसद् यादवैर्वृतः । 30ab
भौमं तु नरकं हत्वा तेनानीताश्च कन्यकाः ॥ 30cd
देवगन्धर्वयक्षाणां ता उवाच जनार्द्दनः । 31ab
षोदशस्त्रीसहस्राणि रुक्मिण्याद्यास्तथाष्ट च ॥ 31cd
सत्यभामासमायुक्तो गरुडे नरकार्दनः । 32ab
मणिशैलं सरत्नञ्च इन्द्रं जित्वा हरिर्द्दिवि ॥ 32cd
पारिजातं समानीय सत्यभामागृहे ऽकरोत् । 33ab
सान्दीपनेश्च शस्त्रास्त्रं ज्ञात्वा तद्बालकं ददौ ॥ 33cd
जित्वा पञ्चजनं दैत्यं यमेन च सुपूजितः । 34ab

1 रजकञ्च प्रजल्पन्तमिति ख, चिह्नितपुस्तकपाठः ।

अबधीत् कालयवनं मुचुकुन्देन पूजितः ॥ 34cd
वसुदेवं देवकीञ्च भक्तविप्रांश्च सोच्चर्यत् । 35ab
रेवत्यां बलभद्राच्च यज्ञाते निशठोन्मुकौ ॥ 35cd
कृष्णात् शाम्बो जाम्बवत्यामन्यास्वन्ये ऽभवन् सुताः । 36ab
प्रद्युम्नो ऽभूच्च रुक्मिण्यां षष्ठे ऽह्नि स हृतो बलात् ॥ 36cd
शम्बरेणाम्बुधौ क्षिप्तो मत्स्यो जग्राह धीवरः । 37ab
तं मत्स्यं शम्बरायादान्मायावत्यै च शम्बरः ॥ 37cd
मायावती मत्स्यमध्ये दृष्ट्वा स्वं पतिमादरात् । 38ab
पपोष सा तं चोवाच रतिस्ते ऽहं पतिर्मम ॥ 38cd
कामस्त्वं शम्भुनानङ्गः कृतोहं शम्बरेण च । 39ab
हृता न तस्य पत्नी त्वं मायाज्ञः शम्बरं जहि ॥ 39cd
तच्छ्रुत्वा शम्बरं हत्वा प्रद्युम्नः सह भार्यया । 40ab
मायावत्या ययौ कृष्णं कृष्णो हृष्टो ऽथ रुक्मिणी ॥ 40cd
प्रद्युम्नादनिरुद्धोभूदुषापतिरुदारधीः । 41ab
बाणो बलिसुतस्तस्य सुतोषा शोणितं पुरं ॥ 41cd
तपसा शिवपुत्रो ऽभूत् मायूरध्वजपातितः । 42ab
युद्धं प्राप्स्यसि वाण त्वं वाणं तुष्टः शिवोभ्यधात् ॥ 42cd
शिवेन क्रीडतीं गौरीं दृष्ट्वोषा सस्पृहा पतौ । 43ab
तामाह गौरी भर्त्ता ते निशि सुप्तेति दर्शनात् ॥ 43cd
वैशाखमासद्वादश्यां पुंसो भर्त्ता भविष्यति । 44ab
गौर्य्युक्ता[1] हर्षिता चोषा गृहे सुप्ता ददर्श तं ॥ 44cd
आत्मना सङ्गतं ज्ञात्वा तत्सख्या चित्रलेखया । 45ab
लिखिताद्वै चित्रपटादनिरुद्धं समानयत् ॥ 45cd

1 तच्छ्रुत्वा इति ग, चिह्नितपुस्तकपाठः ।

कृष्णपौत्रं द्वारकातो दुहिता वाणमन्त्रिणः । 46ab
कुम्भाण्डस्यानिरुद्धोगाद्रराम ह्युषया सह ॥ 46cd
वाणध्वजस्य सम्पाते रक्षिभिः स निवेदितः । 47ab
अनिरुद्धस्य वाणेन युद्धमासीत्सदारुणम् ॥ 47cd
श्रुत्वा तु नारदात् कृष्णः प्रद्युम्नबलभद्रवान् । 48ab
गरुडस्थोथ जित्वाग्नीन् ज्वरं माहेश्वरन्तथा ॥ 48cd
हरिशङ्करयोर्युद्धं बभूवाथ शराशरि । 49ab
नन्दिविनायकस्कन्दमुखास्तार्क्षादिभिर्जिताः ॥ 49cd
जृम्भिते शङ्करे नष्टे जृम्भणास्त्रेण विष्णुना । 50ab
छिन्नं सहस्रं बाहूनां रुद्रेणाभयमर्थितम् ॥ 50cd
विष्णुना जीवितो वाणो द्विबाहुः प्राब्रवीच्छिवम् । 51ab
त्वया यदभयं दत्तं वाणस्यास्य मया च तत् ॥ 51cd
आवयोर्न्नास्ति भेदो वै भेदी नरकमाप्नुयात् । 52ab
शिवाद्यैः पूजितो विष्णुः सोनिरुद्ध उषादियुक् ॥ 52cd
द्वारकान्तु गतो रेमे उग्रसेनादियादवैः । 53ab
अनिरुद्धात्मजो वज्रो मार्क्कण्डेयात्तु सर्ववित् ॥ 53cd
बलभद्रः प्रलम्बघ्नो यमुनाकर्षणो[1] ऽभवत् । 54ab
द्विविदस्य कपेर्भेत्ता कौरवोन्मादनाशनः ॥ 54cd
हरी रेमेनेकमूर्त्तो रुक्मिण्यादिभिरीश्वरः । 55ab
पुत्रानुत्पादयामास त्वसंख्यातान् स यादवान् । 55cd
हरिवंशं पठेत् यः स प्राप्तकामो हरिं व्रजेत् ॥ 55॥ 55ef

इत्यादिमहापुराणे आग्नेये हरिवंशवर्णनं नाम द्वादशो ऽध्याय- यः ।

1 कर्षक इति ख, चिह्नितपुस्तकपाठः ।

# 13

## अथ त्रयोदशो ऽध्यायः ।

कुरुपाण्डवोत्पत्त्यादिकथनं ।
अग्निरुवाच ।
भारतं सम्प्रवक्ष्यामि कृष्णमाहात्म्यलक्षणम् । 1ab
भूभारमहरद्विष्णुर्न्निमित्तीकृत्य पाण्डवान् ॥ 1cd
विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रो ऽत्रिरत्रितः । 2ab
सोमः सोमाद्बुधस्तस्मादैल आसीत् पुरूरवाः ॥ 2cd
तस्मादायुस्ततो राजा नहुषो ऽतो ययातिकः । 3ab
ततः पुरुस्तस्य वंशे भरतो ऽथ नृपः कुरुः ॥ 3cd
तद्वंशे शान्तनुस्तस्माद्भीष्मो गङ्गासुतो ऽनुजौ । 4ab
चित्राङ्गदो विचित्रश्च सत्यवयाश्च शान्तनोः ॥ 4cd
स्वर्गं गते शान्तनौ च भीष्मो भार्य्याविवर्ज्जितः । 5ab
अपालयत् भ्रातृराज्यं बालश्चित्राङ्गदो हतः ॥ 5cd
चित्राङ्गदेन द्वे कन्ये काशिराजस्य चाम्बिका । 6ab
अम्बालिका च भीष्मेण आनीते विजितारिणा ॥ 6cd
भार्य्ये विचित्रवीर्यस्य यक्ष्मणा स दिवङ्गतः । 7ab
सत्यवत्या ह्यनुमतादम्बिकायां नृपोभवत् ॥ 7cd
धृतराष्ट्रो ऽम्बालिकायां पाण्डुश्च व्यासतः सुतः । 8ab
गान्धार्य्यां धृतराष्ट्राच्च दुर्योधनमुखं शतम् ॥ 8cd
शतशृङ्गाश्रमपदे भार्यायोगाद् यतो मृतिः । 9ab
ऋषिशापात्ततो धर्म्मात् कुन्त्यां पाण्डोर्युधिष्ठिरः ॥ 9cd
वाताद्भीमो ऽर्जुनः शक्रान्माद्र्यामश्विकुमारतः । 10ab
नकुलः सहदेवश्च पाण्डुर्म्माद्रीयुतो मृतः ॥ 10cd
कर्णः कुन्त्यां हि कन्यायां जातो दुर्योधाश्रितः । 11ab
कुरुपाण्डवयोर्वैरन्दैवयोगाद्बभूव ह ॥ 11cd

दुर्योधनो जतुगृहे पाण्डवानदहत् कुधीः । 12ab
दग्धागाराद्विनिष्क्रान्ता मातृषष्ठास्तु पाण्डवाः ॥ 12cd
ततस्तु एकचक्रायां ब्राह्मणस्य निवेशने । 13ab
मुनिवेषाः स्थिताः सर्वे निहत्य वकराक्षसम् ॥ 13cd
ययुः पाञ्चालविषयं द्रौपद्यास्ते स्वयम्वरे । 14ab
सम्प्राप्ता बाहुवेधेन[1] द्रौपदी पञ्चपाण्डवैः[2] ॥ 14cd
अर्द्धराज्यं ततः प्राप्ता ज्ञाता दुर्योधनादिभिः । 15ab
गाण्डीवञ्च धनुर्द्दिव्यं पावकाद्रथमुत्तमम् ॥ 15cd
सारथिञ्चार्जुनः सङ्ख्ये कृष्णमक्षय्यशायकान् । 16ab
ब्रह्मास्त्रादींस्तथा द्रोणात्सर्वे शस्त्रविशारदाः ॥ 16cd
कृष्णेन सो ऽर्जुनो वह्निं खाण्डवे समतर्पयत् । 17ab
इन्द्रवृष्टिं वारयंश्च शरवर्षेण पाण्डवः ॥ 17cd
जिता दिशः पाण्डवैश्च राज्यञ्चक्रे युधिष्ठिरः । 18ab
बहुस्वर्णं[3] राजसूयं न सेहे तं सुयोधनः ॥ 18cd
भ्रात्रा दुःशासनेनोक्तः कर्णेन प्राप्तभूतिना । 19ab
द्यूतकार्ये शकुनिना द्यूतेन स युधिष्ठिरम् ॥ 19cd
अजयत्तस्य राज्यञ्च सभास्थो माययाहसत् । 20ab
जितो युधिष्ठिरो भ्रातृयुक्तश्चारण्यकं ययौ ॥ 20cd
वने द्वादशवर्षाणि प्रतिज्ञातानि सो ऽनयत् । 21ab
अष्टाशीतिसहस्राणि भोजयन् पूर्ववद् द्विजान् ॥ 21cd
सधौम्यो द्रौपदीषष्ठस्ततः प्रायाद्विराटकम् । 22ab
कङ्को द्विजो ह्यविज्ञातो[4] राजा भीमोथ सूपकृत् ॥ 22cd

---

1 बाहुभेदेन इति ग, चिह्नितपुस्तकपाठः ।

2 द्रौपदीं पञ्च पाण्डवा इति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।

3 वसुपूर्णमिति ख, चिह्नितपुस्तकपाठः रत्नपूर्णमिति घ, चिह्नितपुस्तकपाठः ।

4 कङ्को द्विजो ह्यभूच्छ्रेष्ठ इति ख,चिह्नितपुस्तकपाठः ।

बृहन्नलार्जुनो भार्या सैरिन्ध्री यमजौ तथा । 23ab
अन्यनाम्ना भीमसेनः कीचकञ्चावधीन्निशि ॥ 23cd
द्रौपदीं हर्त्तुकामं तं अर्जुनश्चाजयत् कुरून् । 24ab
कुर्वतो गोग्रहादींश्च तैर्ज्ञाताः पाण्डवा अथ ॥ 24cd
सुभद्रा कृष्णभगिनी अर्जुनात्समजीजनत् । 25ab
अभिमन्युन्ददौ तस्मै विराटश्चोत्तरां सुताम् ॥ 25cd
सप्ताक्षौहिणीश आसीद्धर्म्मराजो रणाय सः । 26ab
कृष्णो दूतोब्रवीद् गत्वा दुर्योधनममर्षणम् ॥ 26cd
एकादशाक्षौहिणीशं नृपं दुर्योधनं तदा । 27ab
युधिष्ठिरायार्द्धराज्यं देहि ग्रामांश्च पञ्च वा ॥ 27cd
युध्यस्व वा वचः श्रुत्वा कृष्णमाह सुयोधनः । 28ab
भूसूच्यग्रं न दास्यामि योत्स्ये सङ्ग्रहणोद्यतः ॥ 28cd
विश्वरूपन्दर्शयित्वा अधृष्यं विदुरार्च्चितः[1] । 29ab
प्रागाद्युधिष्ठिरं प्राह योधयैनं सुयोधनम् ॥ 29cd

इत्यादिमहापुराणे आग्नेये आदिपर्वादिवर्णनं नाम त्रयो-
दशो ऽध्यायः ।

# 14

## अथ चतुर्दशो ऽध्यायः ।

कुरुपाण्डवसङ्ग्रामवर्णनम् ।

अग्निरुवाच ।
यौधिष्ठिरी दौर्योधनी कुरुक्षेत्रं ययौ चमूः । 1ab
भीष्मद्रोणादिकान् दृष्ट्वा नायुध्यत गुरूनिति ॥ 1cd
पार्थं ह्युवाच भगवान्नशोच्या भीष्ममुख्यकाः । 2ab
शरीराणि विनाशीनि न शरीरी विनश्यति ॥ 2cd

1 विदुरान्वित इति ख, चिह्नितपुस्तकपाठः ।

अयमात्मा परं ब्रह्म अहं ब्रह्मास्मि विद्धि तम् । 3ab
सिद्ध्यसिद्ध्योः समो योगी राजधर्म्मं प्रपालय ॥ 3cd
कृष्णोक्तोथार्जुनो ऽयुध्यद्रथस्थो वाद्यशब्दवान् । 4ab
भीष्मः सेनापतिरभूदादौ दौर्योधने बले ॥ 4cd
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह । 5ab
धार्त्तराष्ट्राः पाण्डवांश्च जघ्नुर्युद्धे सभीष्मकाः ॥ 5cd
धार्त्तराष्ट्रान् शिखण्ड्याद्याः पाण्डवा जघ्नुराहवे । 6ab
देवासुरसमं युद्धं कुरुपाण्दवसेनयोः ॥ 6cd
बभूव स्वःस्थदेवानां पश्यतां प्रीतिवर्द्धनम् । 7ab
भीष्मोस्त्रैः पाण्डवं सैन्यं दशाहोभिर्न्यपातयत् ॥ 7cd
दशमे ह्यर्जुनो वाणैर्भीष्मं वीरं ववर्ष ह । 8ab
शिखण्डी द्रुपदोक्तो ऽस्त्रैर्ववर्ष जलदो यथा ॥ 8cd
हस्त्यश्वरथपादातमन्योन्यास्त्रनिपातितम्[1] । 9ab
भीष्मः स्वच्छन्दमृत्युश्च युद्धमार्गं प्रदर्श्य च ॥ 9cd
वसूक्तो वसुलोकाय शरशय्यागतः स्थितः । 10ab
उत्तरायणमीक्षंश्च ध्यायन् विष्णुं स्तुवन् स्थितः ॥ 10cd
दुर्योधने तु शोकार्त्ते द्रोणः सेनापतिस्त्वभूत् । 11ab
पाण्दवे हर्षिते सैन्ये धृष्टद्युम्नश्चमूपतिः ॥ 11cd
तयोर्युद्धं बभूवोग्रं यमराष्ट्रविवर्धनम् । 12ab
विराटद्रुपदाद्याश्च निमग्ना द्रोणसागरे ॥ 12cd
दौर्योधनी महासेना हस्त्यश्वरथपत्तिनी । 13ab
धृष्टद्युम्नाधिपतिता द्रोणः काल इवाबभौ ॥ 13cd
हतोश्वत्थामा चेत्युक्ते द्रोणः शस्त्राणि चात्यजत् । 14ab
धृष्टद्युम्नशराक्रान्तः पतितः स महीतले ॥ 14cd

1 अन्योन्यास्त्रनिपीड़ितमिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।

पञ्चमेऽहनि दुर्द्धर्षः सर्वक्षत्रं प्रमथ्य च । 15ab
दुर्योधने तु शोकार्त्ते कर्णः सेनापतिस्त्वभूत् ॥ 15cd
अर्जुनः पाण्डवानाञ्च तयोर्युद्धं बभूव ह । 16ab
शस्त्राशस्त्रि महारौद्रं देवासुररणोपमम् ॥ 16cd
कर्णार्जुनाख्ये सङ्ग्रामे कर्णोरीनबधीच्छरैः । 17ab
द्वितीयेऽहनि कर्णस्तु अर्जुनेन निपातितः ॥ 17cd
शल्यो दिनार्द्धं युयुधे ह्यबधीत्तं युधिष्ठिरः । 18ab
युयुधे भीमसेनेन हतसैन्यः सुयोधनः ॥ 18cd
बहून् हत्वा नरादींश्च भीमसेनमथाब्रवीत् । 19ab
गदया प्रहरन्तं तु भीमस्तन्तु व्यपातयत् ॥ 19cd
गदयान्यानुजांस्तस्य तस्मिन्नष्टादशेऽहनि । 20ab
रात्रौ सुषुप्तञ्च बलं पाण्डवानां न्यपातयत् ॥ 20cd
अक्षौहिणीप्रमाणन्तु अश्वत्थामा महाबलः । 21ab
द्रौपदेयान् सपाञ्चालान् धृष्टद्युम्नञ्च सो ऽबधीत् ॥ 21cd
पुत्रहीनां द्रौपदीं तां रुदन्तीमर्जुनस्ततः । 22ab
शिरोमणिं तु जग्राह ऐषिकास्त्रेण तस्य च ॥ 22cd
अश्वत्थामास्त्रनिर्द्दग्धं जीवयामास वै हरिः । 23ab
उत्तरायास्ततो गर्भं स परीक्षिदभून्नृपः ॥ 23cd
कृतवर्म्मा कृपो द्रौणिस्त्रयो मुक्तास्ततो रणात् । 24ab
पाण्डवाः सात्यकिः कृष्णः सप्त मुक्ता न चापरे ॥ 24cd
स्त्रियश्चार्त्ताः समाश्वास्य भीमाद्यैः स युधिष्ठिरः । 25ab
संस्कृत्य प्रहतान् वीरान् दत्तोदकधनादिकः ॥ 25cd
भीष्माच्छान्तनवाच्छ्रुत्वा धर्म्मान् सर्वांश्च शान्तिदाम् । 26ab

राजधर्म्मान्मोक्षधर्म्मान्दानधर्म्मान् नृपो ऽभवत् ॥ 26cd
अश्वमेधे ददौ दानं ब्राह्मणेभ्योरिमर्द्दनः । 27ab

श्रुत्वार्जुनान्मौषलेयं[1] यादवानाञ्च सङ्क्षयम् । 27cd
राज्ये परीक्षितं स्थाप्य सानुजः स्वर्गमाप्तवान् [2] ॥ 27॥ 27ef

इत्यादिमहापुराणे आग्नेये महाभारतवर्णनं नाम चतुर्दशोऽध्यायः ।

# 15

## अथ पञ्चदशोऽध्यायः ।

पाण्डवचरितवर्णनम् ।
अग्निरुवाच ।
युधिष्ठिरे तु राज्यस्थे आश्रमादाश्रमान्तरम् । 1ab
धृतराष्ट्रो वनमगाद् गान्धारी च पृथा द्विज ॥ 1cd
विदुरस्त्वग्निना दग्धो वनजेन दिवङ्गतः । 2ab
एवं विष्णुर्भुवो भारमहरद्दानवादिकम् ॥ 2cd
धर्म्मायाधर्मनाशाय निमित्तीकृत्य पाण्डवान् । 3ab
स विप्रशापव्याजेन मुषलेनाहरत् कुलम् ॥ 3cd
यादवानां भारकरं वज्रं राज्येभ्यषेचयत् । 4ab
देवादेशात् प्रभासे स देहं त्यक्त्वा स्वयं हरिः ॥ 4cd
इन्द्रलोके ब्रह्मलोके पूज्यते स्वर्गवासिभिः । 5ab
बलभद्रोनन्तमूर्त्तिः पातालस्वर्गमीयिवान् ॥ 5cd
अविनाशी हरिर्देवो ध्यानिभिर्ध्येय एव सः । 6ab
विना तं द्वारकास्थानं प्लावयामास सागरः ॥ 6cd
संस्कृत्य यादवान् पार्थो दत्तोदकधनादिकः । 7ab
स्त्रियोष्टावक्रशापेन भार्य्या विष्णोश्च याः स्थिताः ॥ 7cd
पुनस्तच्छापतो नीता गोपालैर्लगुडायुधैः । 8ab
अर्जुनं हि तिरस्कृत्य पार्थः शोकञ्चकार ह ॥ 8cd
व्यासेनाश्वासितो मेने बलं मे कृष्णसन्निधौ । 9ab

1 मौषलेनेति ख, चिह्नितपुस्तकपाठः ।
2 स्वर्गमाप्नुयादिति ख, ग, चिह्नितपुस्तकद्वयपाठः ।

हस्तिनापुरमागत्य पार्थः सर्वं न्यवेदयत् ॥ 9cd
युधिष्ठिराय स भ्रात्रे पालकाय नृणान्तदा । 10ab
तद्धनुस्तानि चास्त्राणि स रथस्ते च वाजिनः ॥ 10cd
विना कृष्णेन तन्नष्टं दानञ्चाश्रोत्रिये यथा । 11ab
तच्छ्रुत्वा धर्म्मराजस्तु राज्ये स्थाप्य परीक्षितम् ॥ 11cd
प्रस्थानं प्रस्थितो धीमान् द्रौपद्या भ्रातृभिः सह । 12ab
संसारानित्यतां ज्ञात्वा जपन्नष्टशतं हरेः ॥ 12cd
महापथे तु पतिता द्रौपदी सहदेवकः । 13ab
नकुलः फाल्गुनो भीमो राजा शोकपरायणः ॥ 13cd
इन्द्रानीतरथारूढः सानुजः स्वर्गमाप्तवान् । 14ab
दृष्ट्वा दुर्योधनादींश्च वासुदेवं च हर्षितः ॥ 14cd
एतत्ते भारतं प्रोक्तं यः पठेत्स दिवं व्रजेत् ॥ 14॥ 14ef

इत्यादिमहापुराणे आग्नेये महाभारतवर्णनं नाम पञ्चदशो ऽध्यायः ।

## 16

### अथ षोड़शो ऽध्यायः ।

बुद्धाद्यवतारकथनम् ।
अग्निरुवाच ।
वक्ष्ये बुद्धावतारञ्च पठतः शृण्वतोर्थदम् । 1ab
पुरा देवासुरे युद्धे दैत्यैर्द्देवाः पराजिताः ॥ 1cd
रक्ष रक्षेति शरणं वदन्तो जग्मुरीश्वरम् । 2ab
मायमोहस्वरुपोसौ शुद्धोदनसुतो ऽभवत् ॥ 2cd
मोहयामास दैत्यांस्तांस्त्याजिता वेदधर्मकम् । 3ab
ते च बौद्धा बभूवुर्हि तेभ्योन्ये वेदवर्जिताः ॥ 3cd
आर्हतः सो ऽभवत् पश्चादार्हतानकरोत् परान् । 4ab
एवं पाषण्डिनो जाता वेदधर्म्मादिवर्जिताः ॥ 4cd

नरकार्हं कर्म चक्रुर्ग्रहीष्यन्त्यधमादपि । 5ab
सर्वे कलियुगान्ते तु भविष्यन्ति च सङ्कराः ॥ 5cd
दस्यवः शीलहीनाश्च वेदो वाजसनेयकः । 6ab
दश पञ्च च शाखा वै प्रमाणेन भविष्यति ॥ 6cd
धर्म्मकञ्चुकसंवीता अधर्मरुचयस्तथा । 7ab
मानुषान् भक्षयिष्यन्ति म्लेच्छाः पार्थिवरूपिणः ॥ 7cd
कल्की विष्णुयशःपुत्रो याज्ञवल्क्यपुरोहितः । 8ab
उत्सादयिष्यति म्लेच्छान् गृहीतास्त्रः कृतायुधः ॥ 8cd
स्थापयिष्यति मर्यादां चातुर्वर्ण्ये यथोचिताम् । 9ab
आश्रमेषु च सर्वेषु प्रजाः सद्धर्मवर्त्मनि ॥ 9cd
कल्किरूपं परित्यज्य हरिः स्वर्गं गमिष्यति । 10ab
ततः कृतयुगन्नाम पुरावत् सम्भविष्यति ॥ 10cd
वर्णाश्रमाश्च धर्मेषु स्वेषु स्थास्यन्ति सत्तम । 11ab
एवं सर्वेषु कल्पेषु सर्वमन्वन्तरेषु च ॥ 11cd
अवतारा असङ्ख्याता अतीतानागतादयः । 12ab
विष्णोर्द्दशावताराख्यान् यः पठेत् शृणुयान्नरः ॥ 12cd
सोवाप्तकामो विमलः सकुलः स्वर्गमाप्नुयात् । 13ab
धर्म्माधर्म्मव्यवस्थानमेवं वै कुरुते हरिः । 13cd
अवतीर्णश्च स गतः सर्गादेः कारणं हरिः ॥ 13॥ 13ef

इत्यादिमहापुराणे आग्नेये बुद्धकल्क्यवतारवर्णनं नाम षोडशोऽध्यायः ।

## 17

अथ सप्तदशोऽध्यायः ।

सृष्टिविषयकवर्ननम् ।
अग्निरुवाच ।
जगत्सर्गादिकां क्रीडां विष्णोर्वक्ष्येधुना शृणु । 1ab
सर्गादिकृत् स सर्गादिः सृष्ट्यादिः सगुणोगुणः ॥ 1cd

ब्रह्माव्यक्तं सदाग्रे ऽभूत् न खं रात्रिदिनादिकं । 2ab
प्रकृतिं पुरुषं विष्णुः[1] प्रविश्याक्षोभयत्ततः ॥ 2cd
सर्गकाले महत्तत्त्वमहङ्कारस्ततो ऽभवत् । 3ab
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ॥ 3cd
अहङ्काराच्छब्दमात्रमाकाशमभवत्ततः । 4ab
स्पर्शमात्रो ऽनिलस्तस्माद्रूपमात्रो ऽनलस्ततः ॥ 4cd
रसमात्रा आप इतो गन्धमात्रा मही स्मृता[2] । 5ab
अहङ्कारात्तामसात्तु तैजसानीन्द्रियाणि च ॥ 5cd
वैकारिका दश देवा मन एकादशेन्द्रियम् । 6ab
ततः स्वयम्भूर्भगवान्[3] सिसृक्षुर्विविधाः प्रजाः ॥ 6cd
अप एव ससर्जादौ तासु वीर्यमवासृजत्[4] । 7ab
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ 7cd
अयनन्तस्य ताः पूर्वन्तेन नारायणः स्मृतः । 8ab
हिरण्यवर्णमभवत्[5] तदण्डमुदकेशयम् ॥ 8cd
तस्मिन् जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति नः श्रुतम् । 9ab
हिरण्यगर्भो[6] भगवानुषित्वा परिवत्सरम् ॥ 9cd
तदण्डमकरोत् द्वैधन्दिवं भुवमथापि च । 10ab
तयोः शकलयोर्म्मध्ये आकाशमसृजत् प्रभुः ॥ 10cd
अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे । 11ab
तत्र कालं मनो वाचं कामं क्रोधमथो रतिम् ॥ 11cd

1 विष्णुमिति ख, चिह्नितपुस्तकपाठः ।
2 गन्धमात्रा धरित्र्यभूदिति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।
3 ततः स्वयम्भूर्भगवानित्यारभ्य स्रष्टुमिच्छन् प्रजापतिरित्यन्त-पाठस्तु महाभारतीयहरिवंशपर्व्वण उद्धृत इति अध्यवसीयते उभयत्र क्रमेण पाठसाम्यात् ।
4 तासु बीजमथासृजदिति ख, चिह्नितपुस्तकपाठः ।
5 हिरण्यगर्भमभवदिति ख, चिह्नितपुस्तकपाठः ।
6 हिरण्यवर्ण इति ग, चिह्नितापुस्तकपाठः ।

ससर्ज सृष्टिन्तद्रूपां स्रष्टुमिच्छन् प्रजापतिः । 12ab
विद्युतोशनिमेघांश्च रोहितेन्द्रधनूंषि च ॥ 12cd
वयांसि च ससर्जादौ पर्जन्यञ्चाथ वक्त्रतः । 13ab
ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये ॥ 13cd
साध्यास्तैरयजन्देवान् भूतमुच्चावचं भुजात्[1] । 14ab
सनत्कुमारं रुद्रञ्च ससर्ज्ज क्रोधसम्भवम् ॥ 14cd
मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् । 15ab
वसिष्ठं मानसाः सप्त ब्रह्माण इति निश्चिताः[2] ॥ 15cd
सप्तैते जनयन्ति स्म प्रजा रुद्राश्च सत्तम । 16ab
द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषो ऽभवत् ॥ 16cd
अर्द्धेन नारी तस्यां स ब्रह्मा वै चासृजत् प्रजाः ॥ 16॥ 16ef

इत्यादिमहापुराणे आग्नेये जगत्सर्गवर्णनं नाम सप्तदशो ऽध्यायः ।

## 18

### अथ अष्टादशो ऽध्यायः ।

स्वायम्भुववंशवर्णनम् ।

अग्निरुवाच ।

प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवात् सुतौ । 1ab
अजीजनत्स तां कन्यां शतरूपां तपोन्वितान्[3] ॥ 1cd

1 भूतमुच्चावचं ह्यजादिति ख, घ, चिह्नितपुस्तकद्वयपाठः साध्यांस्तैरयजन् देवान् भूतमुच्चावचं प्रजा इति ङ, चिह्नितपुस्तकपाठः ।

2 निश्चितमिति ख,चिह्नितपुस्तकपाठः ।

3 अजीजनत् सुतां कन्यां सद्रूपाञ्च तपोन्वितामिति ग, चिह्नितपुस्तकपाठः । अजीजनत् सुतां कन्यां शतरूपां तपोन्वितामिति ङ,चिह्नितपुस्तकपाठः ।

काम्यां[1] कर्द्दमभार्यातः सम्राट् कुक्षिर्विराट् प्रभुः । 2ab
सुरुच्यामुत्तमो जज्ञे पुत्र उत्तानपादतः ॥ 2cd
सुनीत्यान्तु धुवः पुत्रस्तपस्तेपे स कीर्तये । 3ab
धुवो वर्षसहस्राणि त्रीणि दिव्यानि हे मुने ॥ 3cd
तस्मै प्रीतो हरिः प्रादान्मुन्यग्रे स्थानकं स्थिरम्[2] । 4ab
श्लोकं पपाठ ह्युशना वृद्धिं दृष्ट्वा स तस्य च ॥ 4cd
अहो ऽस्य तपसो वीर्यमहो श्रुतमहोऽद्भुतम् । 5ab
यमद्य[3] पुरतः कृत्वा धुवं सप्तर्षयः स्थिताः ॥ 5cd
तस्मात् शिष्टिञ्च[4] भव्यञ्च धुवाच्छम्भुर्व्यजायत । 6ab
शिष्टेराधत्त[5] सुच्छाया पञ्च पुत्रानकल्मषान् ॥ 6cd
रिपुं रिपुञ्जयं रिप्रं वृकलं वृकतेजसम् । 7ab
रिपोराधत्त बृहती चाक्षुषं सर्वतेजसम् ॥ 7cd
अजीजनत् पुष्करिण्यां वीरिण्यां चाक्षुषो मनुम् । 8ab
मनोरजायन्त दश नड्वलायां सुतोत्तमाः ॥ 8cd
ऊरुः[6] पुरुः शतद्युम्नस्तपस्वी सत्यवाक्कविः । 9ab
अग्निष्टुरतिरात्रश्च सुद्युम्नश्चाभिमन्युकः ॥ 9cd
ऊरोरजनयत् पुत्रान् षडग्नेयी महाप्रभान् । 10ab
अङ्गं सुमनसं स्वातिं क्रतुमङ्गिरसङ्गयम् ॥ 10cd
अङ्गात् सुनीथापत्यं वै वेणमेकं व्यजायत । 11ab

1 काम्या इति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 स्थानमुत्तममिति ङ, चिह्नितपुस्तकपाठः ।
3 यदत्र इति ङ, चिह्नितपुस्तकपाठः ।
4 तस्मात् श्लिष्टिञ्च इति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
5 श्लिष्टेराधत्त इति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
6 उरूरिति ख,ग, ङ, चिह्नितपुस्तकत्रयपाठः ।

अरक्षकः पापरतः स हतो मुनिभिः कुशैः ॥ 11cd
प्रजार्थमृषयोथास्य ममन्थुर्द्दक्षिणं करम् । 12ab
वेणस्य मथिते पाणौ सम्बभूव पृथुर्न्नृपः ॥ 12cd
तं दृष्ट्वा मुनयः प्राहुरेष वै मुदिताः प्रजाः । 13ab
करिष्यति महातेजा यशश्च प्राप्स्यते महत् ॥ 13cd
स धन्वी कवची जातस्तेजसा निर्द्दहन्निव । 14ab
पृथुर्वैण्यः प्रजाः सर्वा ररक्ष क्षेत्रपूर्वजः ॥ 14cd
राजसूयाभिषिक्तानामाद्यः[1] स पृथिवीपतिः । 15ab
तस्माच्चैव समुत्पन्नौ निपुणौ सूतमागधौ ॥ 15cd
तत्स्तोत्रञ्चक्रतुर्व्वीरौ राजाभूज्जनरञ्जनात् । 16ab
दुग्धा गौस्तेन शस्यार्थं प्रजानां जीवनाय च ॥ 16cd
सह देवैर्मुनिगणैर्गन्धर्वैः साप्सरोगणैः । 17ab
पितृभिर्द्दानवैः सर्पैर्वीरुद्भिः पर्वतैर्जनैः ॥ 17cd
तेषु तेषु च पात्रेषु दुह्यमाना वसुन्धरा । 18ab
प्रादाद्यथेप्सितं क्षीरन्तेन प्राणानधारयत् ॥ 18cd
पृथोः पुत्रौ तु धर्म्मज्ञौ जज्ञाते ऽन्तर्द्धिपालिनौ । 19ab
शिखण्डिनी हविर्द्धानमन्तर्द्धानात् व्यजायत ॥ 19cd
हविर्द्धानात् षडाग्नेयी धीषणाजनयत् सुतान् । 20ab
प्राचीनवर्हिषं शुक्रं[2] गयं कृष्णं व्रजाजिनौ ॥ 20cd
प्राचीनाग्राः कुशास्तस्य पृथिव्यां यजतो यतः । 21ab
प्राचीनवर्हिर्भगवान् महानासीत्प्रजापतिः ॥ 21cd
सवर्णा ऽधत्त[3] सामुद्री दश प्राचीनवर्हिषः । 22ab

---

1 राजसूयाभिव्यक्तानामाद्य इति ख,चिह्नितपुस्तकपाठः ।
2 शुभ्रमिति ग,चिह्नितपुस्तकपाठः ।
3 सुवर्णाधत्त इति ग, चिह्नितपुस्तकपाठः ।

सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ॥ 22cd
अपृथग्धर्म्मचरणास्ते तप्यन्त महत्तपः । 23ab
दशवर्षसहस्राणि समुद्रसलिलेशयाः ॥ 23cd
प्रजापतित्वं सम्प्राप्य तुष्टा विष्णोश्च निर्गताः । 24ab
भूः खं व्याप्तं हि तरुभिस्तांस्तरूनदहंश्च ते ॥ 24cd
मुखजाग्निमरुद्भ्यां च दृष्ट्वा चाथ द्रुमक्षयम् । 25ab
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन् ॥ 25cd
कोपं यच्छत दास्यन्ति कन्यां वो मारिषां वराम् । 26ab
तपस्विनो मुनेः कण्डोः[2] प्रम्लोचायां ममैव च ॥ 26cd
भविष्यं जानता सृष्टा भार्या वो ऽस्तु कुलङ्करी । 27ab
अस्यामुत्पत्स्यते दक्षः प्रजाः संवर्द्धयिष्यति ॥ 27cd
प्रचेतसस्तां जगृहुर्दक्षोस्याञ्च ततो ऽभवत् । 28ab
अचरांश्च चरांश्चैव द्विपदोथ चतुष्पदः ॥ 28cd
स सृष्ट्वा मनसा[2] दक्षः पश्चादसृजत स्त्रियः । 29ab
ददौ स दश धर्म्माय कश्यपाय त्रयोदश ॥ 29cd
सप्तविंशति सोमाय चतस्त्रो ऽरिष्टनेमिने । 30ab
द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे अदात्[3] ॥ 30cd
तासु देवाश्च नागाद्या मैथुनान्मनसा पुरा । 31ab
धर्म्मसर्गम्प्रवक्ष्यामि दशपत्नीषु धर्मतः ॥ 31cd
विश्वेदेवास्तु विश्वायाः साध्यान् साध्या व्यजायत । 32ab
मरुत्त्वया मरुत्त्वन्तो वसोस्तु वसवो ऽभवन् ॥ 32cd
भानोस्तु भानवः पुत्रा मुहूर्त्तास्तु मुहूर्त्तजाः । 33ab

---

1 कण्ठोरिति ग, चिह्नितपुस्तकपाठः कर्णोरिति ङ,चिह्नितपुस्तकपाठः
।

2 स दृष्ट्वा मनसा इति ख, ग, चिह्नितपुस्तकपाठः ।

3 द्वे चैव भाण्डवे तत इति ग, चिह्नितपुस्तकपाठः ।

सम्बाया[1] धर्मतो घोषो नागवीथी[2] च यामिजा ॥ 33cd
पृथिवीविषयं सर्वमरुन्धत्यां व्यजायत । 34ab
सङ्कल्पायास्तु सङ्कल्पा इन्दोर्न्नक्षत्रतः सुताः ॥ 34cd
आपो ध्रुवश्च सोमश्च धरश्चैवानिलोनलः[3] । 35ab
प्रत्यूषश्च प्रभावश्च वसवोष्टौ च नामतः ॥ 35cd
आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तो मुनिस्तथा । 36ab
ध्रुवस्य कालो लोकान्तो वर्च्चाः सोमस्य वै सुतः ॥ 36cd
धरस्य पुत्रो द्रविणो[4] हुतहव्यवहस्तथा । 37ab
मनोहरायाः शिशिरः प्राणोथ रमणस्तथा[5] ॥ 37cd
पुरोजवोनिलस्यासीदविज्ञातो ऽनलस्य च । 38ab
अग्निपुत्रः कुमारश्च शरस्तम्बे व्यजायत ॥ 38cd
तस्य शाखो विशाखश्च नैगमेयश्च पृष्टजः । 39ab
कृत्तिकातः कार्त्तिकेयो यतिः सनत्कुमारकः[6] ॥ 39cd
प्रत्यूषाद्देवलो जज्ञे विश्वकर्म्मा प्रभावतः । 40ab
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः ॥ 40cd
मनुष्याश्चोपजीवन्ति शिल्पं वै भूषणादिकं । 41ab
सुरभी[7] कश्यपाद्रुद्रानेकादश विजज्ञुषी ॥ 41cd
महादेवप्रसादेन तपसा भाविता सती । 42ab

1 लम्बाया इति ग,चिह्नितपुस्तकपाठः ।
2 नगवीथी इति ख, चिह्नितपुस्तकपाठः ।
3 धर्म्मश्चैवानिलोनल इति ख, ग, चिह्नितपुस्तकपाठः ।
4 धरिष इति ग, चिह्नितपुस्तकपाठः ।
5 मरणस्तथेति ग, चिह्नितपुस्तकपाठः ।
6 जातः सनत्कुमारत इति ग, चिह्नितपुस्तकपाठः ।
7 युवती इति ग, चिह्नितपुस्तकपाठः ।

अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्राश्च सत्तम[1] ॥ 42cd
त्वष्टुश्चैवात्मजः श्रीमान्विश्वरूपो महायशाः । 43ab
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ॥ 43cd
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा । 44ab
मृगव्याधस्ञ्ज सर्पश्च कपाली दश चैककः । 44cd
रुद्राणां च शतं लक्षं यैर्व्याप्तं सचराचरं ॥ 44॥ 44ef

इत्यादिमाहापुराणे आग्नेये जगत्सर्गवर्णनं नाम अष्टादशो ऽध्यायः ।

## 19

### अथोनविंशतितमो ऽध्यायः ।

कश्यपवंशवर्णनम् ।
अग्निरुवाच ।
कश्यपस्य वदे सर्गमदित्यादिषु हे मुने । 1ab
चाक्षुषे तुषिता देवास्ते ऽदित्यां कश्यपात्पुनः ॥ 1cd
आसन् विष्णुश्च शक्रश्च त्वष्टा धाता तथार्य्यमा । 2ab
पूषा विवस्वान् सविता मित्रोथ वरुणो भगः ॥ 2cd
अंशुश्च द्वादशादित्या आसन् वैवस्वतेन्तरे । 3ab
अरिष्टनेमिपत्नीनामपत्यानीह षोडश ॥ 3cd
बहुपुत्रस्थ विदुषश्चतस्रो विद्युतः सुताः[2] । 4ab
प्रत्यङ्गिरसजाः श्रेष्ठाः कृशाश्वस्य सुरायुधाः ॥ 4cd
उदयास्तमने सूर्ये तद्वदेते युगे युगे । 5ab
हिरण्यकशिपुर्द्दित्यां हिरण्याक्षश्च कश्यपात् ॥ 5cd

1 सप्तम इति ख, ङ, चिह्नितपुस्तकपाठः ।
2 स्मृता इति ग, चिह्नितपुस्तकपाठः ।

सिंहिका चाभवत् कन्या विप्रचित्तेः परिग्रहः । 6ab
राहुप्रभृतयस्तस्यां सैंहिकेया इति श्रुताः ॥ 6cd
हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः । 7ab
अनुह्लादश्च ह्लादश्च प्रह्लादश्चातिवैष्णवः ॥ 7cd
संह्लादश्च चतुर्थोभूत् ह्लादपुत्रो ह्रदस्तथा । 8ab
ह्रदस्य पुत्र आयुष्मान्[1] शिबिर्वास्कल एव च ॥ 8cd
विरोवनस्तु प्राह्लादिर्बलिर्जज्ञे विरोचनात् । 9ab
बलेः पुत्रशतं त्वासीद्वाणश्रेष्ठं[2] महामुने ॥ 9cd
पुराकल्पे हि वाणेन प्रसाद्योमापतिं वरः[3] । 10ab
पार्श्वतो विहरिष्यामीत्येवं प्राप्तश्च ईश्वरात्[4] ॥ 10cd
हिरण्याक्षसुताः पञ्च शम्बरः शकुनिस्त्विति[5] । 11ab
द्विमूर्द्धा शङ्कुरार्यश्च[6] शतमासन् दनोः सुताः ॥ 11cd
स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु शची स्मृता । 12ab
उपदानवी हयशिरा शर्म्मिष्ठा वार्षपर्वणी ॥ 12cd
पुलोमा कालका चैव वैश्वानरसुते उभे । 13ab
कश्यपस्य तु भार्य्यै द्वे तयोः पुत्राश्च कोटयः ॥ 13cd
प्रह्लादस्य चतुष्कोट्यो निवातकवचाः कुले । 14ab
ताम्रायाः षट् सुताः स्युश्च काकी श्वेनी च भास्यपि ॥ 14cd
गृध्रिका शुचि सुग्रीवा[7] ताभ्यः काकादयो ऽभवन् । 15ab

1 संह्लादपुत्र आयुष्मानिति ख, ग, चिह्नितपुस्तकद्वयपाठः ।

2 वाणज्येष्ठमिति ख, ग, चिह्नितपुस्तकद्वयपाठः ।

3 प्रभुमिति ख, चिह्नितपुस्तकद्वयपाठः ।

4 इत्येवं प्राप्तमीश्वरादिति ख, चिह्नितपुस्तकपाठः ।

5 झर्झरः शकुनिस्त्वतीति ख, चिह्नितपुस्तकपाठः शङ्किस्त्वथेति ङ, चिह्नितपुस्तकपाठः ।

6 द्विमूर्द्धा शम्बराद्याश्च इति ख, चिह्नितपुस्तकपाठः ।

7 गृध्रिका च शुचिग्रीवो इति ख, चिह्नितपुस्तकपाठः गृध्रिकाशुचिसुग्रीवो इति ग, चिह्नितपुस्तकपाठः ।

अश्वाश्वोष्ट्राश्च ताम्राया अरुणो गरुडस्तथा ॥ 15cd
विनतायाः सहस्रन्तु सर्पाश्च सुरसाभवाः । 16ab
काद्रवेयाः सहस्रन्तु शेषवासुकितक्षकाः ॥ 16cd
दंष्ट्रिणः क्रोधवशजा धरोत्थाः[1] पक्षिणो जले । 17ab
सुरभ्यां गोमहिष्यादि इरोत्पन्नास्तृणादयः ॥ 17cd
खसायां यक्षरक्षांसि मुनेरश्वरसोभवन् । 18ab
अरिष्टायान्तु गन्धर्वाः कश्यपाद्धि स्थिरञ्चरं[2] ॥ 18cd
एषां पुत्रादयो ऽसङ्ख्या देवैर्वै दानवा जिताः[3] । 19ab
दितिर्विनष्टपुत्रा वै तोषयामास कश्यपं ॥ 19cd
पुत्रमिन्द्रप्रहर्त्तारमिच्छती प्राप कश्यपात् । 20ab
पादाप्रक्षालनात् सुप्ता तस्या गर्भं जघान ह ॥ 20cd
छिद्रमन्विष्य चेन्द्रस्तु ते देवा मरुतो ऽभवन् । 21ab
शक्रस्यैकोनपञ्चाशत्सहाया दीप्ततेजसः ॥ 21cd
एतत् सर्वं हरिर्ब्रह्मा अभिषिच्य पृथुं नृपं । 22ab
ददौ क्रमेण राज्यानि अन्येषामधिपो हरिः ॥ 22cd
द्विजौषधीनां चन्द्रश्च अपान्तु वरुणो नृपः । 23ab
राज्ञां वैश्रवणो राजा सूर्याणां विष्णुरीश्वरः ॥ 23cd
वसूनां पावको राजा मरुतां वासवः प्रभुः । 24ab
प्रजापतीनां दक्षोथ प्रह्लादो दानवाधिपः ॥ 24cd
पितॄणां च यमो राजा भूतादीनां हरः[4] प्रभुः । 25ab
हिमवांश्चैव शैलानां नदीनां सागरः प्रभुः ॥ 25cd

1 धरण्या इति ख, चिह्नितपुस्तकपाठः ।
2 कश्यपादि परस्परमिति ख, चिह्नितपुस्तकपाठः ।
3 देवैर्दैत्याः पराजिता इति ख, चिह्नितपुस्तकपाठः ।
4 भूतानाञ्च हर इति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।

गन्धर्वाणां चित्ररथो नागानामथ वासुकिः । 26ab
सर्पाणां तक्षको राजा गरुडः पक्षिणामथ ॥ 26cd
ऐरावतो गजेन्द्राणां गोवृषोथ गवामपि । 27ab
मृगणामथ शार्द्दूलः प्लक्षो वनस्पतीश्वरः ॥ 27cd
उच्चैःश्रवास्तथाश्वानां सुधन्वा पूर्वपालकः । 28ab
दक्षिणस्यां शङ्खपदः केतुमान् पालको जले । 28cd
हिरण्यरोमकः सौम्ये प्रतिसर्गोयमीरितः ॥ 28॥ 28ef

इत्यादिमाहापुराणे आग्नेये प्रतिसर्गवर्णनं नाम ऊनविंश-तितमो ऽध्यायः ।

## 20

### अथ विंशतितमो ऽध्यायः ।

सर्गविषयकवर्णनं ।
अग्निरुवाच ।
प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः । 1ab
तन्मात्राणां द्वितीयस्तु भूतसर्गो हि स स्मृतः ॥ 1cd
वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः । 2ab
इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्वकः ॥ 2cd
मुख्यः सर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः । 3ab
तिर्य्यक्स्रोतास्तु यः प्रोक्तःस्तैर्य्यग्योन्यस्ततः स्मृतः ॥ 3cd
तथोर्द्ध्वस्रोतसां षष्ठो देवसर्गस्तु स स्मृतः । 4ab
ततोर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः ॥ 4cd
अष्टमोनुग्रहः सर्गः सात्विकस्तामसश्च यः । 5ab
पञ्चैते वैकृताः सर्गाः प्राकृताश्च त्रयः स्मृताः ॥ 5cd
प्राकृतो वैकृतश्चैव कौमारो नवमस्तथा । 6ab

ब्रह्मतो नव सर्गास्तु जगतो मूलहेतवः ॥ 6cd
ख्यात्याद्या दक्षकन्यास्तु भृग्वाद्या उपयेमिरे । 7ab
नित्यो नैमित्तकः सर्गस्त्रिधा प्रकथितो जनैः ॥ 7cd
प्राकृता दैनन्दिनी स्यादन्तरप्रलयादनु । 8ab
जायते यत्रानुदिनं मित्यसर्गो हि सम्मतः ॥ 8cd
देवौ धाताविधातारौ भृगोः ख्यातिरसूयत । 9ab
श्रियञ्च पत्नी विष्णोर्या स्तुता शक्रेण वृद्धये ॥ 9cd
धातुर्विधातुर्द्वौ पुत्रौ क्रमात् प्राणो मृकण्डुकः । 10ab
मार्कण्डेयो मृकण्डोश्च जज्ञे वेदशिरास्ततः ॥ 10cd
पौर्णमासश्च सम्भूत्यां मरीचेरभवत् सुतः । 11ab
स्मृत्यामङ्गिरसः पुत्राः सिनीवाली कुहूस्तथा ॥ 11cd
राकाश्चानुमतिश्चात्रेरनसूयाप्यजीजनत् । 12ab
सोमं दुर्वाससं पुत्रं दत्तात्रेयञ्च योगिनम् ॥ 12cd
प्रीत्यां पुलस्त्यभार्यायां दत्तोलिस्तत्सुतोभवत् । 13ab
क्षमायां[1] पुलहाज्जाताः सहिष्णुः कर्मपादिकाः ॥ 13cd
सन्नत्याञ्च क्रतोरासन् बालिखिल्या महौजसः । 14ab
अङ्गुष्ठपर्वमात्रास्ते ये हि षष्टिसहस्रिणः ॥ 14cd
उर्ज्जायाञ्च वशिष्ठाच्च राजा गात्रोर्ध्वबाहुकः[2] । 15ab
सवनश्चालघुः शुक्रः[3] सुतपाः सप्त चर्षयः ॥ 15cd
पावकः पवमानोभूच्छुचिः स्वाहाग्निजोभवत् । 16ab

1 कुमार्य्यामिति ख, चिह्नितपुस्तकपाठः ।

2 रजोगोत्रोर्द्ध्वबाहुक इति ख, चिह्नितपुस्तकपाठः राजा शात्रोर्द्ध्वबालक इति ग, चिह्नितपुस्तकपाठः, रजोगोत्रोर्द्ध्ववाहक इति ङ, चिह्नितपुस्तक-पाठः ।

3 सबलश्चानघः शुक्र इति घ, चिह्नितपुस्तकपाठः ।

अग्निस्वात्ता वर्हिषदो ऽनग्नयः साग्नयो ह्यजात्[1] ॥ 16cd
पितृभ्यश्च स्वधायाश्च मेना वैधारिणी सुते[2] । 17ab
हिंसाभार्या त्वधर्म्मस्य तयोर्जज्ञे तथानृतम् ॥ 17cd
कन्या च निकृतिस्ताभ्यां भयन्नरकेमेव च । 18ab
माया च वेदना चैव मिथुनन्त्विदमेतयोः ॥ 18cd
तयोर्जज्ञेथ वै मायां मृत्युं भूतापहारिणम् । 19ab
वेदना च सुतं चापि दुःखं जज्ञेथ रौरवात् ॥ 19cd
मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे । 20ab
ब्रह्मणश्च रुदन् जातो रोदनाद्रुद्रनामकः ॥ 20cd
भवं शर्वमथेशानं तथा पशुपतिं द्विज । 21ab
भीममुग्रं महादेवमुवाच स पितामहः ॥ 21cd
दक्षकोपाच्च तद्भार्या देहन्तत्याज सा सती । 22ab
हिमवद्दुहिता भूत्वा पत्नी शम्भोरभूत् पुनः ॥ 22cd
ऋषिभ्यो नारदाद्युक्ताः पूजाः स्नानादिपूर्विकाः । 23ab
स्वायम्भुवाद्यास्ताः कृत्वा विष्ण्वादेर्भुक्तिमुक्तिदाः ॥ 23cd

इत्यादिमहापुराणे आग्नेये जगत्सर्गवर्णनं नाम विंशतितमो ऽध्यायः ।

## 21

### अथ एकविंशो ऽध्यायः ।

सामान्यपूजाकथनं ।
नारद उवाच ।
सामान्यपूजां विष्ण्वादेर्वक्ष्ये मन्त्रांश्च सर्वदान् । 1ab
समस्तपरिवाराय अच्युताय नमो यजेत् ॥ 1cd

1 साग्नयो ह्यगादिति ख, चिह्नितपुस्तकपाठः, अग्निपाला वर्हिषदो ह्याज्यपाः साग्नयो ह्यजादिति घ, चिह्नितपुस्तकपाठः ।
2 वैसारणी सुते इति ख, चिह्नितपुस्तकपाठः ।

धात्रे विधात्रे गङ्गायै यमुनायै निधी तथा । 2ab
द्वारश्रियं वस्तुनवं शक्तिं कूर्म्ममनन्तकम् ॥ 2cd
पृथिवीं धर्म्मकं ज्ञानं वैराग्यैश्वर्यमेव च । 3ab
अधर्मादीन् कन्दनालपद्मकेशरकर्णिकाः ॥ 3cd
ऋग्वेदाद्यं कृताद्यञ्च सत्वाद्यर्क्कादिमण्डलम् । 4ab
विमलोत्कर्षिणी ज्ञाना क्रिया योगा च ता यजेत् ॥ 4cd
प्रह्वीं सत्यां तथेशानानुग्रहासनमूर्त्तिकाम्[1] । 5ab
दुर्गां गिरङ्गणं[2] क्षेत्रं वासुदेवादिकं यजेत् ॥ 5cd
हृदयञ्च शिरः शूलं वर्मनेत्रमथास्त्रकम् । 6ab
शङ्खं चक्रं गदां पद्मं श्रीवत्सं कौस्तुभं यजेत् ॥ 6cd
वनमालां श्रियं पुष्टिं गरुडं गुरुमर्चयेत् । 7ab
इन्द्रमग्निं यमं रक्षो जलं वायुं धनेश्वरम् ॥ 7cd
ईशानन्तमजं चास्त्रं वाहनं कुमुदादिकम् । 8ab
विष्वक्सेनं मण्डलादौ सिद्धिः पूजादिना भवेत् ॥ 8cd
शिवपूजाथ सामान्या पूर्वं नन्दिनमर्च्चयेत् । 9ab
महाकालं यजेद्गङ्गां[3] यमुनाञ्च गणादिकम् ॥ 9cd
गिरं श्रियं[4] गुरुं वास्तुं शक्त्यादीन् धर्मकादिकम् [5] । 10ab
वामा ज्येष्ठा तथा रौद्री काली कलविकारिणी ॥ 10cd
बलविकरिणी चापि बलप्रमथिनी क्रमात् । 11ab

---

1 प्रह्वी सन्ध्या तथेशानानुग्रहासनमूर्त्तिका इति ग, चिह्नितपुस्तकपाठः ।

2 दुर्गां गिरिं गणमिति ख, चिह्नितपुस्तकपाठः दुर्गां शिवं गणमिति घ, चिह्नितपुस्तकपाठः ।

3 यजेत् दुर्गां इति ख, घ, चिह्नितपुस्तकपाठः ।

4 गिरिं श्रियमिति ख, चिह्नितपुस्तकपाठः शिवं श्रियमिति घ, चिह्नितपुस्तकपाठः ।

5 गौरीं श्रियं गुरुं चास्त्रं शक्त्यादिं धर्म्मकादिकमिति ङ, चिह्नितपुस्तकपाठः ।

सर्वभूतदमनी च मदनोन्मादिनी शिवासनं ॥ 11cd
हां हुं हां शिवमूर्त्तये साङ्गवक्त्रं शिवं यजेत् । 12ab
हौं शिवाय हामित्यादि हामीशानादिवक्त्रकं ॥ 12cd
ह्रीं गौरीं गं गणः शक्रमुखाश्चण्डीहृदादिकाः । 13ab
क्रमात्सूर्य्यार्च्चने मन्त्रा दण्डी पूज्यश्च पिङ्गलः ॥ 13cd
उच्चैःश्रवाश्चारुणश्च प्रभूतं विमलं यजेत् । 14ab
साराध्योपरमसुखं[1] स्कन्दाद्यं मध्यतो यजेत् ॥ 14cd
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा । 15ab
अमोघा विद्युता चैव पूज्याथ सर्वतोमुखी ॥ 15cd
अर्क्कासनं हि हं खं ख सोल्कायेति च मूर्तिकाम् । 16ab
ह्रां ह्रीं स सूर्य्याय नम आं नमो हृदयाय च ॥ 16cd
अर्क्काय शिरसे तद्वदग्नीशासुरवायुगान्[2] । 17ab
भूर्भुवः स्वरे ज्वालिनि शिखा हुं कवचं स्मृतं ॥ 17cd
भां नेत्रं वस्तथार्क्कास्त्रं राज्ञी शक्तिश्च निष्कुभा[3] । 18ab
सोमो ऽङ्गारकोथ बुधो जीवः शुक्रः शनिः क्रमात् ॥ 18cd
राहुः केतुस्तेजश्चण्डः सङ्क्षेपादथ पूजनं । 19ab
आसनं मूर्त्तये मूलं हृदाद्यं परिचारकः ॥ 19cd
विष्ण्वासनं विष्णुमूर्त्तेरों श्रीं श्रीं श्रीधरो हरिः । 20ab
ह्रीं सर्वमूर्त्तिमन्त्रोयमिति त्रैलोक्यमोहनः ॥ 20cd
ह्रीं हृषीकेशः क्लीं विष्णुः स्वरैर्द्दीर्घैर्हृदादिकं । 21ab
समस्तैः पञ्चमी पूजा सङ्ग्रामादौ जयादिदा ॥ 21cd

---

1 सावाराध्योपरं दुःखमिति ख, चिह्नितपुस्तकपाठः ।

2 अग्निसाश्रयवायुगानिति ख, चिह्नितपुस्तकपाठः । अर्काय शिरसे तद्वदग्निजायायुतञ्च तदिति ङ,चिह्नितपुस्तकपाठः ।

3 शक्तिश्च निर्गता इति ख, चिह्नितपुस्तकपाठः ।

चक्रं गदां क्रमाच्छङ्खं मुषलं खड्गशार्ङ्गकम् । 22ab
पाशाङ्कुशौ च श्रीवत्सं कौस्तुभं वनमालया ॥ 22cd
श्रीं श्रीर्महालक्ष्मीताक्ष्यो गुरुरिन्द्रादयो ऽर्च्चनम् । 23ab
सरस्वत्यासनं मूर्त्तिरौं ह्रीं देवी सरस्वती ॥ 23cd
हृदाद्या लक्ष्मीर्म्मेधा च कलातुष्टिश्च पुष्टिका । 24ab
गौरी प्रभामती दुर्गा गणो गुरुश्च क्षेत्रपः ॥ 24cd
तथा गं गणपतये च ह्रीं गौर्यै च श्रीं श्रियै । 25ab
ह्रीं त्वरितायै ह्रीं सौ त्रिपुरा[1] चतुर्थ्यन्तनमोन्तकाः ॥ 25cd
प्रणवाद्याश्च नामाद्यमक्षरं विन्दुसंयुतं । 26ab
ओं युतं वा सर्वमन्त्रपूजनाज्जपतः स्मृताः ॥ 26cd
होमात्तिलघृताद्यैश्च धर्म्मकामार्थमोक्षदाः । 27ab
पूजामन्त्रान् पठेद्यस्तु भुक्तभोगो दिवं व्रजेत् ॥ 27cd

इत्यादिमहापुराणे आग्नेये वासुदेवादिपूजाकथनं नाम एक-विंशतितमो ऽध्यायः ।

## 22

### अथ द्वाविंशो ऽध्यायः ।

स्नानविधिकथनं ।
नारद उवाच ।
वक्ष्ये स्नानं क्रियाद्यर्थं नृसिंहेन तु मृत्तिकां । 1ab
गृहीत्वा तां द्विधा कृत्वा मनःस्नानमथैकया ॥ 1cd
निमज्याचम्य विन्यस्य सिंहेन कृतरक्षकः[2] । 2ab

---

1 ह्रीं त्वरितायै, ह्रीं ऐं क्लीं सौ त्रिपुरा इति ख, चिह्नितपुस्तकपाठः ।

2 कृतरक्षण इति घ, चिह्नितपुस्तकपाठः ।

विधिस्नानं ततः कुर्य्यात् प्राणायामपुरःसरं ॥ 2cd
हृदि ध्यायन् हरिस्नानं[1] मन्त्रेणाष्टाक्षरेण हि । 3ab
त्रिधा पाणितले मृत्स्नां दिग्बन्धं सिंहजप्ततः ॥ 3cd
वासुदेवप्रजप्तेन तीर्थं सङ्कल्प्य चालभेत् । 4ab
गात्रं वेदादिना मन्त्रैः सम्मार्ज्याराध्य मूर्त्तिना ॥ 4cd
कृत्वाघमर्षणं वस्त्रं परिधाय समाचरेत् । 5ab
विन्यस्य मन्त्रैर्द्विर्म्मार्ज्य पाणिस्थं जलमेव च ॥ 5cd
नारायणेन संयम्य वायुमाघ्राय चोत्सृजेत् । 6ab
जलं ध्यायन् हरिं पश्चाद्दत्वार्घ्यं द्वादशाक्षरं ॥ 6cd
जप्त्वान्याञ्छतशस्तस्य योगपीठादितः क्रमात् । 7ab
मन्त्रान् दिक्पालपर्यन्तानृषीन् पितृगणानपि ॥ 7cd
मनुष्यान् सर्वभूतानि स्थावरान्तान्यथावसेत् । 8ab
न्यस्य चाङ्गानि संहृत्य मन्त्रान्यागगृहं व्रजेत् ॥ 8cd
एवमन्यासु पूजासु मूलाद्यैः स्नानमाचरेत् ॥ 8॥ 8ef

इत्यादिमहापुराणे आग्नेये स्नानविधिकथनं नाम द्वाविंशोध्यायः ।

## 23

### अथ त्रयोविंशोध्यायः । पूजाविधिकथनं ।

नारद उवाच ।
वक्ष्ये पूजाविधिं विप्रा यत् कृत्वा सर्वमाप्नुयात् । 1ab
प्रक्षालिताङ्घ्रिराचम्य वाग्यतः कृतरक्षकः ॥ 1cd

1 ध्यायन् हरिं देवमिति घ, चिह्नितपुस्तकपाठः ।

प्राङ्मुखः स्वस्तिकं बद्धा पद्माद्यपरमेव च । 2ab
यं वीजं नाभिमध्यस्थं धूम्रं चण्डानिलात्मकं ॥ 2cd
विशेषयेदशेषन्तु[1] ध्यायेत् कायात्तु कल्मषं । 3ab
क्ष्रौं हृत्पङ्कजमध्यस्थं वीजं तेजोनिधिं स्मरन् ॥ 3cd
अधोर्द्धतिर्यग्गाभिस्तु ज्वालाभिः कल्मषं दहेत् । 4ab
शशाङ्काकृतिवद्ध्यायेदम्बरस्थं सुधाम्बुभिः ॥ 4cd
हृत्पद्मव्यापिभिर्द्देहं स्वकमाप्लावयेत्सुधीः[2] । 5ab
सुसुम्नायोनिमार्ग्गेण सर्वनाडीविसर्प्पिभिः ॥ 5cd
शोधयित्वा न्यसेत्तत्त्वं करशुद्धिरथास्त्रकं । 6ab
व्यापकं हस्तयोरादौ दक्षिणाङ्गुष्ठतोङ्गकं ॥ 6cd
मूलं देहे द्वादशाङ्गं न्यसेन्मन्त्रैर्द्विषट्ककैः । 7ab
हृदयं च शिरश्चैव शिखा वर्म्मास्त्रलोचने ॥ 7cd
उदरं च तथा पृष्ठं बाहुरुजानुपादकं । 8ab
मुद्रां दत्त्वा स्मरेत् विष्णुं जप्त्वाष्टशतमर्च्चयेत् ॥ 8cd
वामे तु वर्द्धनीं न्यस्य पूजाद्रव्यं तु दक्षिणे । 9ab
प्रक्षाल्यास्त्रेण चार्घ्येण गन्धपुष्पान्विते न्यसेत् ॥ 9cd
चैतन्यं सर्व्वगं ज्योतिरष्टजप्तेन वारिणा । 10ab
फडन्तेन तु संसिच्य हस्ते ध्यात्वा हरिं परे[3] ॥ 10cd
धर्मं ज्ञानं च वैराग्यमैश्वर्य्यं वह्निदिङ्मुखाः । 11ab
अधर्मादीनि गात्राणि पूर्वादौ योगपीठके ॥ 11cd
कूर्मं पीठे ह्यनन्तञ्च यमं[4] सूर्य्यादिमण्डलं । 12ab

---

1 विशोषयेदशेषन्तु इति ङ, चिह्नितपुस्तकपाठः ।

2 स्वकामान्दाहयेत् सुधीः इति ख, चिह्नितपुस्तकपाठः स्वकमाल्हादयेत् सुधीरिति ङ, चिह्नितपुस्तकपाठः ।

3 स्थलं तेन तु संसिच्य हस्ते ध्यात्वा हरिं पठेदिति ङ, चिह्नितपुस्तकपाठः ।

4 पद्ममिति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।

विमलाद्याः केशरस्थानुग्रहा कर्णिकास्थिता ॥ 12cd
पूर्वं स्वहृदये ध्यात्वा आवाह्यार्च्चैच्च मण्डले । 13ab
अर्घ्यं पाद्यं तथाचामं मधुपर्क्कं पुनश्च तत् ॥ 13cd
स्नानं वस्त्रोपवीतञ्च भूषणं गन्धपुष्पकं । 14ab
धूपदीपनैवेद्यानि पुण्डरीकाक्षविद्यया ॥ 14cd
यजेदङ्गानि पूर्वादौ द्वारि पूर्वे परेण्डजं । 15ab
दक्षे चक्रं गदां सौम्ये कोणे शङ्खं धनुर्न्यसेत् ॥ 15cd
देवस्य वामतो दक्षे चेषुधी खड्गमेव च । 16ab
वामे चर्म्म श्रियं[1] दक्षे पुष्टिं वामेग्रतो न्यसेत् ॥ 16cd
वनमालाञ्च श्रीवत्सकौस्तुभौ दिक्पतीन्वहिः । 17ab
स्वमन्त्रैः पूजयेत् सर्वान् विष्णुरर्घोवसानतः[2] ॥ 17cd
व्यस्तेन च समस्तेन अङ्गैर्वीजेन वै यजेत् । 18ab
जप्त्वा प्रदक्षिणीकृत्य स्तुत्त्वार्घ्यञ्च समर्प्य च ॥ 18cd
हृदये विन्यसेद्ध्यात्वा अहं ब्रह्म हरिस्त्विति । 19ab
आगच्छावाहने योज्यं क्षमस्वेति विसर्ज्जने ॥ 19cd
एवमष्टाक्षराद्यैश्च पूजां कृत्वा विमुक्तिभाक् । 20ab
एकमूर्त्त्यर्च्चनं प्रोक्तं नवव्यूहार्च्चनं शृणु ॥ 20cd
अङ्गुष्ठकद्वये न्यस्य वासुदेवं बलादिकान् । 21ab
तर्ज्जन्यादौ शरीरेथ शिरोललाटवक्त्रके ॥ 21cd
हृन्नाभिगुह्यजान्वङ्घ्रौ मध्ये पूर्वादिकं यजेत्[3] । 22ab
एकपीठं नवव्यूहं नवपीठञ्च पूर्ववत् ॥ 22cd

---

1 वामे वर्म्म श्रियमिति ख, चिह्नितपुस्तकपाठः ।

2 अस्मल्लब्धपुस्तकेषु विष्णुरर्घोवसानत इति विष्णावर्घौ च मानतः इति च पाठो वर्त्तते । अयन्स्वसमीचीन इव प्रतिभाति विष्णुमर्घ्यासनादिभिरिति तु युक्तः पाठः ।

3 मध्यगुल्फादितः पिस्फच इति ङ, चिह्नितपुस्तकपाठः ।

नवाब्जे नवमूर्त्त्या च नवव्यूहञ्च पूर्ववत् । 23ab
इष्टं मध्ये ततः स्थाने वासुदेवञ्च पूजयेत् ॥ 23cd

इत्यादिमहापुराणे आग्नेये आदिमूर्त्यादिपूजाविधिर्नाम त्रयोविंशो ऽध्यायः ।

## 24

**अथ चतुर्विंशो ऽध्यायः । कुण्डनिर्म्माणादिविधिः ।**

नारद उवाच ।
अग्निकार्य्यं प्रवक्ष्यामि येन स्यात्सर्वकामभाक् । 1ab
चतुरभ्यधिकं विंशमङ्गुलं चतुरस्रकं ॥ 1cd
सूत्रेण सूत्रयित्वा तु क्षेत्रं तावत् खनेत्समं । 2ab
खातस्य मेखला कार्य्या त्यक्ता चैवाङ्गुलद्वयं ॥ 2cd
सत्त्वादिसञ्ज्ञा[1] पूर्वाशा द्वादशाङ्गुलमुच्छ्रिता । 3ab
अष्टाङ्गुला द्व्यङ्गुलाथ चतुरङ्गुलविस्तृता ॥ 3cd
योनिर्दशाङ्गुला रम्या षट्चतुर्द्व्यङ्गुलाग्रगा । 4ab
क्रमान्निम्ना तु कर्त्तव्या पश्चिमाशाव्यवस्थिता ॥ 4cd
अश्वत्थपत्रसदृशी किञ्चित् कुण्डे निवेशिता । 5ab
तुर्य्याङ्गुलायता नालं पञ्चदशाङ्गुलायतं ॥ 5cd
मूलन्तु त्र्यङ्गुलं[2] योन्या अग्रं तस्याः षड्ङ्गुलं । 6ab
लक्षणञ्चैकहस्तस्य द्विगुणं द्विकरादिषु ॥ 6cd
एकत्रिमेखलं कुण्डं वर्तुलादि वदाम्यहं । 7ab

---

1 सद्यादिसञ्ज्ञा इति ख, चिह्नितपुस्तकपाठः ।
2 मलन्तु द्व्यङ्गुलमिति ग,चिह्नितपुस्तकपाठः ।

कुण्डार्द्धे तु स्थितं सूत्रं कोणे यदतिरिच्यते ॥ 7cd
तदर्द्धं दिशि संस्थाप्य भ्रामितं वर्त्तुलं भवेत् । 8ab
कुण्डार्द्धं कोणभागार्द्धं दिशिश्चोत्तरतो वहिः ॥ 8cd
पूर्वपश्चिमतो यत्नाल्लाञ्छयित्वा तु मध्यतः । 9ab
संस्थाप्य भ्रामितं कुण्डमर्द्धचन्द्रं भवेत् शुभं ॥ 9cd
पद्माकारे दलानि स्युर्मेखलानान्तु वर्त्तुले । 10ab
बाहुदण्डप्रमाणन्तु होमार्थं कारयेत् स्रुचं ॥ 10cd
सप्तपञ्चाङ्गुलं वापि चतुरस्रन्तु कारयेत् । 11ab
त्रिभागेन भवेद्गर्त्तं मध्ये वृत्तं सुशोभनम् ॥ 11cd
तिर्य्यगूर्द्धं समं खाताद्वहिरर्द्धन्तु शोधयेत् । 12ab
अङ्गुलस्य चतुर्थांशं शेषार्द्धार्द्धं तथान्ततः ॥ 12cd
खातस्य मेखलां रम्यां शेषार्द्धेन तु कारयेत् । 13ab
कण्ठं त्रिभागविस्तारं अङ्गुष्ठकसमायतं ॥ 13cd
सार्द्धमङ्गुष्ठकं वा स्यात्तदग्रे तु मुखं भवेत् । 14ab
चतुरङ्गुलविस्तारं पञ्चाङ्गुलमथापि वा ॥ 14cd
त्रिकं द्व्यङ्गुलकं तत् स्यान्मध्यन्तस्य सुशोभनम् । 15ab
आयामस्तत्समस्तस्य मध्यनिम्नः सुशोभनः ॥ 15cd
शुषिरं कण्ठदेशे स्याद्विशेद् यावत् कनीयसी । 16ab
शेषकुण्डन्तु कर्त्तव्यं यथारुचि विचित्रितं ॥ 16cd
स्रुवन्तु हस्तमात्रं स्याद्दण्डकेन समन्वितं [1] । 17ab
वटुकं द्व्यङ्गुलं[2] वृत्तं कर्त्तव्यन्तु सुशोभनं ॥ 17cd

1 कुण्डकेन समन्वितमिति ख, चिह्नितपुस्तकपाठः ।

2 कण्ठकं द्व्यङ्गुलमिति ख, चिह्नितपुस्तकपाठः चन्द्राभं द्व्यङ्गुलमिति ङ, चिह्नितपुस्तकपाठः ।

गोपदन्तु यथा मग्नमल्पपङ्के तथा भवेत् । 18ab
उपलिप्य लिखेद्रेखामङ्गुलां वज्रनासिकां[1] ॥ 18cd
सौम्याग्रा प्रथमा तस्यां रेखे पूर्वमुखे तयोः । 19ab
मध्ये तिस्रस्तथा कुर्य्याद्दक्षिणादिक्रमेण तु ॥ 19cd
एवमुल्लिख्य चाभ्युक्ष्य प्रणवेन तु मन्त्रवित् । 20ab
विष्टरं कल्पयेत्तेन तस्मिन् शक्तिन्तु वैष्णवीं ॥ 20cd
अलं कृत्वा मूर्त्तिमतीं क्षिपेदग्निं हरिं स्मरन् । 21ab
प्रादेशमात्राः समिधो दत्वा परिसमुह्य तं ॥ 21cd
दर्भैस्त्रिधा परिस्तीर्य पूर्वादौ तत्र पात्रकं । 22ab
आसादयेदिध्मवह्नी भूमौ च श्रुक्श्रुवद्वयं ॥ 22cd
आज्यस्थाली चरुस्थाली कुशाज्यञ्च प्रणीतया । 23ab
प्रोक्षयित्वा प्रोक्षणीञ्च गृहीत्वापूर्य्य वारिणा ॥ 23cd
पवित्रान्तर्हिते हस्ते परिश्राव्य च तज्जलं । 24ab
प्राङ्नीत्वा प्रोक्षणीपात्रं ज्योतिरग्रे निधाय च ॥ 24cd
तदद्भिस्त्रिश्च सम्प्रोक्ष्य इध्मं विन्यस्य चाग्रतः । 25ab
प्रणीतायां सपुष्पायां विष्णुं ध्यात्वोत्तरेण च ॥ 25cd
आज्यस्थालीमथाज्येन सम्पूर्याग्रे निधाय च । 26ab
सम्प्लवोत्पवनाभ्यान्तु कुर्य्यादाज्यस्य संस्कृतिं ॥ 26cd
अखण्डिताग्रौ निर्गर्भौ कुशौ प्रादेशमात्रकौ । 27ab
ताभ्यामुत्तानपाणिभ्यामङ्गुष्ठानामिकेन तु ॥ 27cd
आज्यं तयोस्तु सङ्गृह्य द्विर्नीत्वा त्रिरवाङ्क्षिपेत्[2] । 28ab
स्रुक्स्रुवौ चापि सङ्गृह्य ताभ्यां प्रक्षिप्य वारिणा ॥ 28cd

1 रुद्रनासिकामिति ख, चिह्नितपुस्तकपाठः वक्रनासिकामिति ङ, चिह्नितपुस्तकपाठः ।

2 आद्यं तयोस्तु सम्पूज्य त्रीन् वारानूर्द्धमुत्क्षिपेदिति ङ, चिह्नितपुस्तकपाठः ।

प्रतप्य दर्भैः सम्मृज्य पुनः प्रक्ष्याल्य चैव हि । 29ab
निष्टप्य स्थापयित्वा[1] तु प्रणवेनैव साधकः ॥ 29cd
प्रणवादिनमोन्तेन पश्चाद्धोमं समाचरेत् । 30ab
गर्भाधानादिकर्म्माणि यावदंशव्यवस्थया ॥ 30cd
नामान्तं व्रतबन्धान्तं समावर्त्तावसानकम् । 31ab
अधिकारावसानं वा कर्य्यादङ्गानुसारतः ॥ 31cd
प्रणवेनोपचारन्तु कुर्यात्सर्वत्र साधकः । 32ab
अङ्गैर्होमस्तु कर्त्तव्यो यथावित्तानुसारतः ॥ 32cd
गर्भाधानन्तु प्रथमं ततः पुंसवनं स्मृतम् । 33ab
सीमन्तोन्नयनं जातकर्म्म नामान्नप्राशनम् ॥ 33cd
चूडाकृतिं व्रतबन्धं वेदव्रतान्यशेषतः[2] । 34ab
समावर्त्तनं पत्न्या च योगश्चाथाधिकारकः[3] ॥ 34cd
हृदादिक्रमतो ध्यात्वा एकैकं कर्म्म पूज्य च । 35ab
अष्टावष्टौ तु जुहुयात् प्रतिकर्म्माहुतीः पुनः ॥ 35cd
पूर्णाहुतिं ततो दद्यात् श्रुचा मूलेन साधकः । 36ab
वौषडन्तेन मन्त्रेण स्रुतं सुस्वरमुच्चरन् ॥ 36cd
विष्णोर्वह्निन्तु संस्कृत्य श्रपयेद्वैष्णवञ्चरुम् । 37ab
आराध्य स्थिण्डिले विष्णुं मन्त्रान् संस्मृत्य संश्रपेत्[4] ॥ 37cd
आसनादिक्रमेणैव साङ्गावरणमुत्तमम् । 38ab
गन्धपुष्पैः समभ्यर्च्य ध्यात्वा देवं सुरोत्तमम् ॥ 38cd
आधायेध्ममथाघारावाज्यावग्नीशसंस्थितौ । 39ab

---

1 नियुज्य स्थापयित्वेति ख, चिह्नितपुस्तकपाठः ।
2 देवव्रतान्यशेषत इति ख, चिह्नितपुस्तकपाठः ।
3 योगश्चाथाधिकारत इति ख, चिह्नितपुस्तकपाठः ।
4 मन्त्रान् सन्तर्प्य संत्रपेत् इति ख, घ, चिह्नितपुस्तकद्वयपाठः ।

वायव्यनैर्ऋताशादिप्रवृत्तौ तु यथाक्रमम् ॥ 39cd
आज्यभागौ ततो हुत्वा चक्षुषी दक्षिणोत्तरे । 40ab
मध्येथ जुहुयात्सर्वमन्त्रानर्चाक्रमेण तु ॥ 40cd
आज्येन तर्पयेन्मूर्त्तेर्द्दशांशेनाङ्गहोमकम् । 41ab
शतं सहस्रं वाज्याद्यैः समिद्भिर्वा तिलैः सह[1] ॥ 41cd
समाप्यार्चान्तु होमान्तां शुचीन् शिष्यानुपोषितान् । 42ab
आहूयाग्रे निवेश्याथ ह्यस्त्रेण प्रोक्षयेत् पशून् ॥ 42cd
शिष्यानात्मनि संयोज्य अविद्याकर्म्मबन्धनैः । 43ab
लिङ्गानुवृत्तश्चैतन्यं सह लिङ्गेन पाशितम्[2] ॥ 43cd
ध्यानमार्गेन सम्प्रोक्ष्य वायुवीजेन शोधयेत् । 44ab
ततो दहनवीजेन सृष्टिं ब्रह्माण्डसञ्ज्ञिकाम् ॥ 44cd
निर्द्दग्धां सकलां ध्यायेद्भस्मकूटनिभस्थिताम् । 45ab
प्लावयेद्वारिणा भस्म संसारं वार्म्मयं स्मरेत्[3] 45cd
तत्र शक्तिं न्यसेत् पश्चात् पार्थिवीं बीजसञ्ज्ञिकाम् । 46ab
तन्मात्राभिः समस्ताभिः संवृतं पार्थिवं शुभम् ॥ 46cd
अण्डन्तदुद्भवन्ध्यायेत्तदाधारन्तदात्मकम् । 47ab
तन्मध्ये चिन्तयेन्मूर्त्तिं पौरुषीं प्रणवात्मिकाम् ॥ 47cd
लिङ्गं सङ्क्रामयेत् पश्चादात्मस्थं पूर्वसंस्कृतम् [4] । 48ab
विभक्तेन्द्रियसंस्थानं क्रमाद् वृद्धं विचिन्तयेत् ॥ 48cd
ततोण्डमब्दमेकं तु स्थित्वा द्विशकलीकृतम् । 49ab

1 समिद्भिर्वा तिलैस्तथा इति घ, चिह्नितपुस्तकपाठः ।
2 सह लिङ्गेन दर्शितमिति ङ, चिह्नितपुस्तकपाठः ।
3 संसारश्चाक्षयं स्मरेदिति ख, चिह्नितपुस्तकपाठः ।
4 स्थण्डिले पूर्व्वसंस्कृतमिति ख, चिह्नितपुस्तकपाठः ।

द्यावापृथिव्यौ शकले तयोर्म्मध्ये प्रजापतिम् ॥ 49cd
जातं ध्यात्वा पुनः प्रोक्ष्य प्रणवेन तु संश्रितम् । 50ab
मन्त्रात्मकतनुं कृत्वा यथान्यासं पुरोदितम् ॥ 50cd
विष्णुर्हस्तं ततो मूर्द्ध्नि दत्वा ध्यात्वा तु वैष्णवम् । 51ab
एवमेकं बहून् वापि जनित्वा ध्यानयोगतः ॥ 51cd
करौ सङ्गृह्य मूलेन नेत्रे बद्ध्वा तु वाससा । 52ab
नेत्रमन्त्रेण मन्त्री तान् सदनेनाहतेन तु ॥ 52cd
कृतपूजो गुरुः सम्यक् देवदेवस्य तत्त्ववान् । 53ab
शिष्यान् पुष्पाञ्जलिभृतः प्राङ्मुखानुपवेशयेत् ॥ 53cd
अर्च्चयेयुश्च तेप्येवम्प्रसूता गुरुणा हरिम् । 54ab
क्षिप्त्वा पुष्पाञ्जलिं तत्र पुष्पादिभिरनन्तरम् ॥ 54cd
अमन्त्रमर्च्चनं कृत्वा[1] गुरोः पादार्च्चनन्ततः । 55ab
विधाय दक्षिणां दद्यात् सर्वस्वं चार्द्धमेव वा ॥ 55cd
गुरुः संशिक्षयेच्छिष्यान् तैः पूज्यो नामभिर्हरिः । 56ab
विश्वक्सेनं यजेदीशं शङ्खचक्रगदाधरम् ॥ 56cd
तज्जपन्तञ्च तर्ज्जन्या मण्डलस्थं विसर्जयेत् ॥ 57॥ 57ab
विष्णुनिर्म्माल्यमखिलं विष्वक्सेनाय चार्पयेत् । 58ab
प्रणीताभिस्तथात्मानमभिषिच्य च कुण्डगं ॥ 58cd
वह्निमात्मनि संयोज्य विष्वक्सेनं विसर्जयेत् । 59ab
बुभुक्षुः सर्वमाप्नोति मुमुक्षुर्ल्लीयते हरौ ॥ 59cd

इत्यादिमहापुराणे आग्नेये अग्निकार्य्यादिकथनं नाम चतुर्विंशोऽध्यायः ।

1 वासुदेवार्च्चनं कृत्वा इति ख, चिह्नितपुस्तकपाठः ।

## 25

### अथ पञ्चविंशो ऽध्यायः ।

वासुदेवादिमन्त्रनिरूपणं ।
नारद उवाच ।
वासुदेवादिमन्त्राणां पूज्यानां लक्षणं वदे । 1ab
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ 1cd
नमो भगवते चादौ अ आ अं अः स्ववीजकाः[1] । 2ab
ओङ्काराद्या नमोन्ताश्च नमो नारायणस्ततः ॥ 2cd
ओं तत् सत् ब्रह्मणे चैव ओं नमो विष्णवे नमः । 3ab
ओं क्षौं ओं नमो भगवते नरसिंहाय वै नमः ॥ 3cd
ओं भूर्नमो भगवते वराहाय नराधिपाः । 4ab
जवारुणहरिद्राभा नीलश्यामललोहिताः ॥ 4cd
मेघाग्निमधुपिङ्गाभा वल्लभा नव नायकाः । 5ab
अङ्गानि स्वरवीजानां स्वनामान्तैर्यथाक्रमम् ॥ 5cd
हृदयादीनि कल्पेत विभक्तैस्तन्त्रवेदिभिः । 6ab
व्यञ्जनादीनि वीजानि तेषां लक्षणमन्यथा ॥ 6cd
दीर्घस्वरैस्तु भिन्नानि नमोन्तान्तस्थितानि तु । 7ab
अङ्गानि ह्रस्वयुक्तानि उपाङ्गानीति वर्ण्यते ॥ 7cd
विभक्तनामवर्णान्तस्थितानि वीजमुत्तमं[2] । 8ab
दीर्घैर्ह्रस्वैश्च संयुक्तं साङ्गोपाङ्गंस्वरैः क्रमात्[3] ॥ 8cd
व्यञ्जनानां क्रमो ह्येष हृदयादिप्रक्लृप्तये । 9ab
स्ववीजेन स्वनामान्तैर्विभक्तान्यङ्गनामभिः ॥ 9cd

1 द्वादशाक्षरवीजका इति ख, चिह्नितपुस्तकपाठः ।
2 स्थितवीजार्थमुत्तममिति ख, चिह्नितपुस्तकपाठः ।
3 दीर्घस्वरैश्च संयुक्तमङ्गोपाङ्गं स्वरैः क्रमादिति ख, चिह्नितपुस्तकपाठः ।
4 स्वरवीजेषु नामान्तैर्विभक्तान्यङ्गनामभिरिति ङ, चिह्नितपुस्तकपाठः ।

युक्तानि हृदयादीनि द्वादशान्तानि पञ्चतः[1] । 10ab
आरभ्य कल्पयित्वा तु जपेत् सिद्ध्यनुरूपतः ॥ 10cd
हृदयञ्च शिरश्चूडा कवचं नेत्रमस्त्रकं । 11ab
षडङ्गानि तु वीजानां मूलस्य द्वादशाङ्गकं ॥ 11cd
हृच्छिरश्च शिखा वर्म्म चास्त्रनेत्रान्तथोदरं । 12ab
प्रष्टबाहूरुजानूंश्च जङ्घा पादौ क्रमान्नचसेत् ॥ 12cd
कं टं पं शं वैनतेयः खं ठं फं षं गदामनुः[2] । 13ab
गं डं बं सं पुष्टिमन्तो घं ढं भं हं श्रियै नमः ॥ 13cd
वं शं मं क्षं[3] पाञ्चजन्यं छं तं पं[4] कौस्तुभाय च । 14ab
जं खं वं सुदर्शनाय श्रीवत्साय सं वं दं चं लं[5] ॥ 14cd
ओं धं वं वनमालायै महानन्ताय वै नमः[6] । 15ab
निर्वीजपदमन्त्राणां पदैरङ्गानि कल्पयेत् ॥ 15cd
जात्यन्तैर्नामसंयुक्तेर्हृदयादीनि पञ्चधा । 16ab
प्रणवं हृदयादीनि ततः प्रोक्तानि पञ्चधा ॥ 16cd
प्रणवं हृदयं पूर्वं परायेति शिरः शिखा । 17ab
नाम्नात्मना तु[7] कवचं अस्त्रं नामान्तकं भवेत् ॥ 17cd

---

1 द्वादशार्णानि यत्नत इति ङ, चिह्नितपुस्तकपाठः ।
2 महागदा इति ङ,चिह्नितपुस्तकपाठः ।
3 ठं णं मं क्षं इति ङ, चिह्नितपुस्तकपाठः ।
4 दं भं पमिति ख, चिह्नितपुस्तकपाठः ।
5 श्रीवत्साय च पञ्चममिति ङ, चिह्नितपुस्त्कपाठः श्रीवत्सो वं चं दं ठं लं इति ग, चिह्नितपुस्तकपाठः ।
6 नमोनन्ताय वै नम इति ङ, चिह्नितपुस्तकपाठः ।
7 नाम्नामुना तु इति ख, ङ, चिह्नितपुस्त्कद्वयपाठः ।

ओं परास्त्रादिस्वनामात्मा[1] चतुर्थ्यन्तो नमोन्तकः । 18ab
एकव्यूहादिषड्विंशव्यूहात्तस्यात्मनो मनुः[2] ॥ 18cd
कनिष्टादिकराग्रेषु प्रकृतिं देहकेर्च्चयेत् । 19ab
पराय पुरुषात्मा स्यात् प्रकृत्यात्मा द्विरूपकः ॥ 19cd
ओं परयाग्न्यात्मने चैव वाय्वर्क्कौ च द्विरूपकः । 20ab
अग्निं त्रिमूर्त्तौ[3] विन्यस्य व्यापकं करदेहयोः ॥ 20cd
वाय्वर्क्कौ करशाखासु सव्येतरकरद्वये । 21ab
हृदि मूर्त्तौ तनावेष त्रिव्यूहे तुर्य्यरूपके ॥ 21cd
ऋग्वेदं व्यापकं हस्ते अङ्गुलीषु यजुर्न्यसेत् । 22ab
तलद्वयेथर्वरूपं शिरोहृच्चरणान्तकः ॥ 22cd
आकाशं व्यापकं न्यस्य करे देहे तु पूर्ववत् । 23ab
अङ्गुलीषु च वाय्वादि शिरोहृद्गुह्यपादके ॥ 23cd
वायुर्ज्योतिर्जलं पृथ्वी पञ्चव्यूहः समीरितः । 24ab
मनः श्रोत्रन्त्वग्दृग्जिह्वा घ्राणं षड्व्यूह ईरितः ॥ 24cd
व्यापकं मानसं न्यस्य ततोङ्गुष्टादितः क्रमात् । 25ab
मूर्द्धास्यहृद्गुह्यपत्सु कथितः करुणात्मकः ॥ 25cd
आदिमूर्त्तिस्तु सर्वत्र व्यापको जीवसञ्ज्ञितः । 26ab
भूर्भुवः स्वर्म्महर्ज्जनस्तपः सत्यञ्च सप्तधा ॥ 26cd
करे देहे न्यसेदाद्यमङ्गुष्टादिक्रमेण तु । 27ab
तलसंस्थः सप्तमश्च[4] लोकेशो देहके क्रमात् ॥ 27cd

1 ओं परास्त्रादित्यनामात्मा इति घ, चिह्नितपुस्तकपाठः ।

2 एवं व्यूहादिषड्विंशं व्यूहात्तस्यात्मनो मनुरिति ख, चिह्नितपुस्तक-पाठः ।

3 अग्निं द्विमूर्त्तौ इति ख, चिह्नितपुस्त्कपाठः ।

4 तलस्थः सप्तमश्चैव इति ङ, चिह्नितपुस्तकपाठः ।

देहे शिरोललाटास्यहृद्गुह्याङ्घ्रिषु संस्थितः । 28ab
अग्निष्टोमस्तथोक्थस्तु षोडशी वाजपेयकः ॥ 28cd
अतिरात्राप्तोर्यामश्च[1] यज्ञात्मा सप्तरूपकः । 29ab
धीरहं मनः शब्दश्च स्पर्शरूपरसास्ततः[2] ॥ 29cd
गन्धो बुद्धिर्व्यापकं तु करे देहे न्यसेत् क्रमात् । 30ab
न्यसेदन्त्यै च[3] तलयोः के ललाटे मुखे हृदि ॥ 30cd
नाभौ गुह्ये च पादे च अष्टव्यूहः पुमान् स्मृतः[4] । 31ab
जीवो बुद्धिरहङ्कारो मनः शब्दो गुणोनिलः ॥ 31cd
रूपं रसो नवात्मायं जीव अङ्गुष्ठकद्वये । 32ab
तर्जन्यादिक्रमाच्छेषं यावद्वामप्रदेशिनीं ॥ 32cd
देहे शिरोललाटास्यहृन्नाभिगुह्यजानुषु । 33ab
पादयोश्च दशात्मायं इन्द्रो व्यापी समास्थितः ॥ 33cd
अङ्गुष्ठकद्वये वह्निस्तर्जन्यादौ परेषु च । 34ab
शिरोललाटवक्त्रेषु हृन्नाभिगुह्यजानुषु ॥ 34cd
पादयोरेकादशात्मा मनः श्रोत्रं त्वगेव च । 35ab
चक्षुर्जिह्वा तथा घ्राणं वाक्पाण्यङ्घ्रिश्च पायुकः ॥ 35cd
उपस्थं मानसो व्यापी श्रोत्रमङ्गुष्ठकद्वये । 36ab
तर्जन्यादिक्रमादष्टौ अतिरिक्तं तलद्वये ॥ 36cd
उत्तमाङ्गललाटास्यहृन्नाभावथ गुह्यके । 37ab
उरुयुग्मे तथा जङ्घे गुल्फपादेषु च क्रमात् ॥ 37cd

---

1 अतिरात्राप्तयामश्च इति ख, चिह्नितपुस्तकपाठः ।
2 रसास्तथा इति ख, चिह्नितपुस्तकपाठः ।
3 न्यसेदन्ते च इति ख, चिह्नितपुस्तकपाठः । न्यसेदष्टौ च इति ङ, चिह्नितपुस्तकपाठः ।
4 क्रमात् स्मृत इति ङ, चिह्नितपुस्तकपाट्ःअः ।

विष्णुर्म्मधुहरश्चैव त्रिविक्रमकवामनौ । 38ab
श्रीधरोथ हृषीकेशः पद्मनाभस्तथैव च ॥ 38cd
दामोदरः केशवश्च नारायणस्ततः परः । 39ab
माधवश्चाथ गोविन्दो विष्णुं वै व्यापकं न्यसेत् ॥ 39cd
अङ्गुष्ठादौ तले द्वौ च पादे जानुनि वै कटौ । 40ab
शिरःशिखरकत्याञ्च जानुपादादिषु न्यसेत् ॥ 40cd
द्वादशात्मा पञ्चविंशः षड्विंशव्यूहकस्तथा । 41ab
पुरुषो धीरहङ्कारो मनश्चित्तञ्च शब्दकः ॥ 41cd
तथा स्पर्शो रसो रूपं गन्धः श्रोत्रं त्वचस्तथा । 42ab
चक्षुर्जिह्वा नासिका च वाक्पाण्यङ्घ्रिश्च पायवः ॥ 42cd
उपस्थो भूर्जलन्तेजो वायुराकाशमेव च । 43ab
पुरुषं व्यापकं न्यस्य अङ्गुष्ठादौ दश न्यसेत् ॥ 43cd
शेषान् हस्ततले न्यस्य शिरस्यथ ललाटके । 44ab
मुखहृन्नाभिगुह्योरुजान्वङ्घ्रौ करणोद्गतौ ॥ 44cd
पादे जान्वोरुपस्थे च हृदये मूर्द्ध्नि च क्रमात् । 45ab
परश्च पुरुषात्मादौ षड्विंशे पूर्ववत्परं ॥ 45cd
सञ्चिन्त्य मण्डलैके तु प्रकृतिं पूजयेद्बुधः । 46ab
पूर्वयाम्याप्यसौम्येषु हृदयादीनि पूजयेत् ॥ 46cd
अस्त्रमग्न्यादिकोणेषु[1] वैनतेयादि पूर्ववत् । 47ab
दिक्पालांश्च विधिस्त्वन्यः[2] त्रिव्यूहेग्निश्च मध्यतः ॥ 47cd
पूर्वादिदिग्बलावसोराज्यादिभिरलङ्कृतः । 48ab
कर्णिकायां नाभसश्च मानसः कर्णिकास्थितः ॥ 48cd

---

1 अस्त्रमग्न्यादिपत्रेषु इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 दिक्पालांश्च विधिस्तस्य इति ग, घ, चिह्नितपुस्तकपाठः दिक्पालादौ विधिस्तुल्य इति ङ, चिह्नितपुस्तकपाठः ।

विश्वरूपं सर्वस्थित्यै[1] यजेद्राज्यजयाय च । 49ab
सर्वव्यूहैः समायुक्तमङ्गैरपि च पञ्चभिः ॥ 49cd
गरुडाद्यैस्तथेन्द्राद्यैः सर्वान् कामानवाप्नुयात् । 50ab
विश्वक्सेनं यजेन्नाम्ना वै वीजं व्योमसंस्थितं[2] ॥ 50cd

इत्यादिमहापुराणे आग्नेये मन्त्रप्रदर्शनं नाम पञ्चविंशो ऽध्यायः ।

# 26

## अथ षड्विंशो ऽध्यायः ।

मुद्रालक्षणकथनं ।
नारद उवाच ।
मुद्राणां लक्षणं वक्ष्ये सान्निध्यादिप्रकारकं । 1ab
अञ्जलिः प्रथमा मुद्रा वन्दनी हृदयानुगा ॥ 1cd
ऊर्द्धाङ्गुष्ठो वाममुष्टिर्द्दक्षिणाङ्गुष्ठबन्धनं । 2ab
सव्यस्य तस्य चाङ्गुष्ठो यस्य चोर्द्ध्वे प्रकीर्त्तितः[3] ॥ 2cd
तिस्रः साधरणा व्यूहे अथासाधरणा इमाः । 3ab
कनिष्ठादिविमोकेन अष्टौ मुद्रा यथाक्रमं ॥ 3cd
अष्टानां पूर्व्ववीजानां क्रमशस्त्ववधारयेत् । 4ab
अङ्गुष्ठेन कनिष्ठान्तं नामयित्वाङ्गुलित्रयं ॥ 4cd
ऊर्द्ध्वं कृत्वा सम्मुखञ्च वीजाय नवमाय वै । 5ab
वामहस्तमथोत्तानं कृत्वार्द्ध्वं नामयेच्छनैः ॥ 5cd

1 सर्व्वसिद्धौ इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 वैराजं नागसंयुतमिति ख, चिह्नितपुस्तकपाट्ःअः । यौ वीजं चाङ्गसंयुतमिति ङ, चिह्नितपुस्तकपाठः ।
3 यः सव्येर्द्धे प्रकीर्त्तित इति ख, चिह्नितपुस्तकपाठः ।

वराहस्य स्मृता मुद्रा अङ्गानाञ्च क्रमादिमाः । 6ab
एकैकां मोचयेद्बद्धा वाममुष्टो तथागुलीं ॥ 6cd
आकुञ्चयेत् पूर्वमुद्रां दक्षिणेप्येवमेव च । 7ab
ऊर्द्धाङ्गुष्ठो वाममुष्टिर्मुद्रासिद्धिस्ततो भवेत् ॥ 7cd

इत्यादिमहापुराणे आग्नेये मुद्राप्रदर्शनं नाम षड्विंशो ऽध्या-
यः ।

## 27

### अथ सप्तविंशो ऽध्यायः ।

दीक्षाविधिकथनं ।
नारद उवाच ।
वक्ष्ये दीक्षां सर्वदाञ्च मण्डलेब्जे हरिं यजेत् । 1ab
दशम्यामुपसंहृत्य यागद्रव्यं समस्तकं ॥ 1cd
विन्यस्य नारसिंहेन सम्मन्त्र्य शतवारकं । 2ab
सर्षपांस्तु फडन्तेन[1] रक्षोघ्नान् सर्व्वतः क्षिपेत् ॥ 2cd
शक्तिं सर्वात्मकां तत्र न्यसेत् प्रासादरूपिणीं । 3ab
सर्व्वौषधिं समाहृत्य विकिरानभिमन्त्रयेत् ॥ 3cd
शतवारं शुभे पात्रे वासुदेवेन साधकः । 4ab
संसाध्य पञ्चगव्यन्तु पञ्चभिर्मूलमूर्त्तिभिः ॥ 4cd
नारायणान्तैः सम्प्रोक्ष्य कुशाग्रैस्तेन तां भुवं[3] । 5ab
विकिरान्वासुदेवेन क्षिपेदुत्तानपाणिना ॥ 5cd
त्रिधा पूर्वमुखस्तिष्ठन् ध्यायेत् विष्णुं तथा हृदि । 6ab
वर्द्धन्या सहिते कुम्भे साङ्गं विष्णुं प्रपूजयेत् ॥ 6cd

1 सर्षपांस्तद्वदस्त्रेण इति ङ, चिह्नितपुस्तकपाठः ।
2 कुशाग्रेणैव तां भुवमिति ङ, चिह्नितपुस्तकपाट्ःअः ।

शतवारं मन्त्रयित्वा त्वस्त्रेणैव च वर्द्धनीं । 7ab
अच्छिन्नधारया सिञ्चन् ईशानान्तं नयेच्च तं ॥ 7cd
कलसं पृष्ठतो नीत्वा स्थापयेद्विकिरोपरि । 8ab
संहृत्य विकिरान् दर्भैः कुम्भेशं कर्करीं यजेत् ॥ 8cd
सवस्त्रं पञ्चरत्नाढ्यं खण्डिले पूजयेद्धरिं । 9ab
अग्नावपि समभ्यर्च्च्य मन्त्रान् सञ्जप्य पूर्ववत् ॥ 9cd
प्रक्षाल्य पुण्डरीकेन विलिप्यान्तः सुगन्धिना । 10ab
उखामाज्येन[1] संपूर्य्य गोक्षीरेण तु साधकः ॥ 10cd
आलोक्य वासुदेवेन[2] ततः सङ्कर्षणेन च । 11ab
तण्डुलानाज्यसंसृष्टान् क्षिपेत् क्षीरे सुसंस्कृते ॥ 11cd
प्रद्युम्नेन स्मालोड्य दर्व्या सङ्घट्टयेच्छनैः । 12ab
पक्वमुत्तारयेत् पश्चादनिरुद्धेन देशिकः ॥ 12cd
प्रक्षाल्यालिप्य तत् कुर्य्यादूर्द्ध्वपुण्ड्रं तु भस्मना । 13ab
नारायणेन पार्श्वेषु चरुमेवं सुसंस्कृतं ॥ 13cd
भागमेकं तु देवाय कलशाय द्वितीयकं । 14ab
तृतीयेन तु भागेन प्रदद्यादाहुतित्रयं ॥ 14cd
शिष्यैः सह चतुर्थं तु गुरुरद्याद्विशुद्धये[3] । 15ab
नारायणेन सम्मन्त्र्य सप्तधा क्षीरवृक्षजम् ॥ 15cd
दन्तकाष्ठं भक्षयित्वा त्यक्त्वा ज्ञात्वास्वपातकं । 16ab
ऐन्द्राग्न्युत्तरकेशानीमुखं पतितमुत्तमं ॥ 16cd
शुभं सिंहशतं हुत्वा[4] आचम्याथ प्रविश्य च । 17ab

1 उत्थायाज्येनेति ख, चिह्नितपुस्तकपाठः ।
2 आलोड्य वासुदेवेन इति ख, चिह्नितपुस्तकपाठः ।
3 विवृद्धये इति ङ, चिह्नितपुस्तकपाठः ।
4 शुभं सिद्धमिति ज्ञात्वा ङ, चिह्नितपुस्तकपाठः ।

पूजागारं न्यसेन्मन्त्री प्राच्यां विष्णुं प्रदक्षिणं ॥ 17cd
संसारार्णवमग्नानां पशूनां पाशमुक्तये । 18ab
त्वमेव शरणं देव सदा त्वं भक्तवत्सल ॥ 18cd
देवदेवानुजानीहि प्राकृतैः पाशबन्धनैः । 19ab
पाशितान्मोचयिष्यामि त्वत्प्रसादात् पशूनिमान् ॥ 19cd
इति विज्ञाप्य देवेशं सम्प्रविश्य पशूंस्ततः । 20ab
धारणाभिस्तु संशोध्य पूर्व्वज्ज्वलनादिना ॥ 20cd
संस्कृत्य मूर्त्त्या संयोज्य[1] नेत्रे बद्धा प्रदर्शयेत् । 21ab
पुष्पपूर्णाञ्जलींस्तत्र क्षिपेत्तन्नाम योजयेत् ॥ 21cd
अमन्त्रमर्च्चनं तत्र पूर्व्ववत् कारयेत् क्रमात् । 22ab
यस्यां मूर्त्तौ पतेत् पुष्पं तस्य तन्नाम निर्द्दिशेत् ॥ 22cd
शिखान्तसम्मितं सूत्रं पादाङ्गुष्ठादि षड्गुणं । 23ab
कन्यासु कर्त्तितं रक्तं[2] पुनस्तत्त्रिगुणीकृतम् ॥ 23cd
यस्यां संलीयते विश्वं यतो विश्वं प्रसूयते । 24ab
प्रकृतिं प्रक्रियाभेदैः संस्थितां तत्र चिन्तयेत् ॥ 24cd
तेन प्राकृतिकान् पाशान् ग्रथित्वा तत्त्वसङ्ख्यया[3] । 25ab
कृत्वा शरावे तत् सूत्रं कुण्डपार्श्वे निधाय तु[4] ॥ 25cd
ततस्तत्त्वानि सर्वाणि ध्यात्वा शिष्यतनौ न्यसेत् । 26ab
सृष्टिक्रमात् प्रकृत्यादिपृथिव्यन्तानि देशिकः ॥ 26cd
तत्रैकधा पञ्चधा स्याद्दशद्वादशधापि वा[4] । 27ab

---

1 मूर्त्त्या सम्प्रोक्ष्य इति ङ, चिह्नितपुस्तकपाठः ।

2 सूत्रमिति ङ, चिह्नितपुस्तकपाठः ।

3 तत्र सङ्ख्यया इति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।

4 निधीयते इति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।

5 तत्रार्च्चा पञ्चधा यास्यादङ्गैर्द्वादशधा पिवेति ख, चिह्नितपुस्तकपाठः । तत्रात्मा पञ्चधा वा स्यात् दशद्वादशधापिवेति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।

ज्ञातव्यः सर्व्वभेदेन ग्रथितस्तत्त्वचिन्तकैः ॥ 27cd
अङ्गैः पञ्चभिरध्वानं निखिलं विकृतिक्रमात् । 28ab
तन्मात्रात्मनि संहृत्य मायासूत्रे पशोस्तनौ[1] ॥ 28cd
प्रकृतिर्लिङ्गशक्तिश्च कर्त्ता बुद्धिस्तथा मनः । 29ab
पञ्चतन्मात्रबुद्ध्याख्यं कर्म्माख्यं भूतपञ्चकं ॥ 29cd
ध्यायेच्च द्वादशात्मानं सूत्रे देहे तथेच्छया । 30ab
हुत्वा सम्पातविधिना सृष्टेः सृष्टिक्रमेण तु ॥ 30cd
एकैकं शतहोमेन दत्त्वा पूर्णाहुतिं ततः । 31ab
शरावे सम्पुटीकृत्य कुम्भेशाय निवेदयेत् ॥ 31cd
अधिवास्य यथा न्यायं भक्तं शिष्यं तु दीक्षयेत् । 32ab
करणीं कर्त्तरीं वापि[2] रजांसि खटिकामपि ॥ 32cd
अन्यदप्युपयोगि स्यात् सर्वं तद्वायुगोचरे । 33ab
संस्थाप्य मूलमन्त्रेण परामृश्याधिवाधिवासयेत् ॥ 33cd
नमो भूतेभ्यश्च बलिः कुशे शेते स्मरन् हरिं । 34ab
मण्डपं भूषयित्वाथ वितानघटलड्डुकैः[3] ॥ 34cd
मण्डलेथ यजेद्विष्णुं ततः सन्तर्प्य पावकं । 35ab
आहूय दीक्षयेच्छिष्यान् बद्धपद्मासनस्थितान् ॥ 35cd
सम्प्रोक्ष्य विष्णुं हस्तेन मूर्द्धानं स्पृश्य वै क्रमात् । 36ab
प्रकृत्यादिविकृत्यन्तां साधिभूताधिदैवतां ॥ 36cd
सृष्टिमाध्यात्मिकीं कृत्वा हृदि तां संहरेत् क्रमात् । 37ab
तन्मात्रभूतां सकलां जीवेन समतां गतां ॥ 37cd
ततः सम्प्रार्थ्य कम्भेशं सूत्रं संहृत्य देशिकः । 38ab

1 मायासूत्रे सुशोभने इति ङ, चिह्नितपुस्तकपाठः ।
2 करालं कर्त्तरीञ्चापि इति ख, ग, चिह्नितपुस्तकद्वयपाठः ।
3 वितानभवगन्धकैरिति ख, चिह्नितपुस्तकपाठः । वितानपटकेन्द्रियै-रिति ग, घ, चिह्नितपुस्तकद्वयपाठः ।

अग्नेः समीपमागत्य पार्श्वे तं सन्निवेश्य तु ॥ 38cd
मूलमन्त्रेण सृष्टीशमाहुतीनां शतेन तं । 39ab
उदासीनमथासाद्य पूर्णाहुत्या च देशिकः ॥ 39cd
शुक्लं रजः समादाय मूलेन शतमन्त्रितं । 40ab
सन्ताड्य हृदयन्तेन हुंफट्कारान्तसंयुतैः ॥ 40cd
वियोगपदसंयुक्तैर्बीजैः पदादिभिः क्रमात् । 41ab
पृथिव्यादीनि तत्त्वानि विश्लिष्य जुहुयात्ततः ॥ 41cd
वह्नावखिलतत्त्वानामालये व्याहृते हरौ । 42ab
नीयमानं क्रमात्सर्वं तत्राध्वानं स्मरेद्बुधः ॥ 42cd
ताडनेन वियोज्यैवं[1] आदायापाद्य शाम्यतां । 43ab
प्रकृत्याहृत्य जुहुयाद्यथोक्ते जातवेदसि ॥ 43cd
गर्भाधानं जातकर्म भोगञ्चैव लयन्तथा । 44ab
हुत्वाष्टौ तत्र तत्रैव ततः शुद्धिन्तु होमयेत् ॥ 44cd
शुद्धं तत्त्वं समुद्धृत्य पूर्णाहुत्या तु देशिकः । 45ab
सन्नयेद्विपरे तत्त्वे यावदव्याहृतं क्रमात् ॥ 45cd
तत् परं ज्ञानयोगेन विलाप्य परमात्मनि । 46ab
विमुक्तबन्धनं जीवं परस्मिन्नव्यये पदे ॥ 46cd
निवृत्तं परमानन्दे शुद्धे बुद्धे स्मरेद्बुधः । 47ab
दद्यात् पूर्णाहुतिं पश्चादेवं दीक्षा समाप्यते ॥ 47cd
प्रयोगमन्त्रान् वक्ष्यामि यैर्दीक्षा होमसंलयः । 48ab
ओं यं भूतानि विशुद्धं हुं फट् ।
अनेन ताडनं कुर्याद्वियोजनमिह द्वयं ॥ 48cd
ओं यं भूतान्यापातयेहं ।
आदानं कृत्वा चानेन प्रकृत्या योजनं शृणु । 49ab

1 ताड़नेन विमोह्यैवमिति ख, चिह्नितपुस्तकपाठः ।

ओं यं भूतानि पुंश्चाहो ।
होममन्त्रं प्रवक्ष्यामि ततः पूर्णाहुतेर्मनुं ॥ 49cd
ओं भूतानि संहर स्वाहा । ओं अं ओं नमो भगवते वासुदेवाय वौषट् ।
पूर्णाहुत्यनन्तरे तु तद्वै शिष्यन्तु साधयेत्[1] । 50ab
एवं तत्त्वानि सर्वाणि क्रमात्संशोधयेद् बुधः ॥ 50cd
नमोन्तेन स्ववीजेन ताडनादिपुरःसरम् । 51ab
ओं वां कर्म्मेन्द्रियाणि । ओं दें बुद्धीन्द्रियाणि ।
यं वीजेन समानन्तु ताडनादिप्रयोगकम् ॥ 51cd
ओं सुगन्धतन्मात्रे वियुङ्क्ष्व हुं फट् । ओं सम्पाहिं हा(2) ॥ ओं खं खं क्ष प्रकृत्या(3) । ओं सुं हुं गन्धतन्मात्रे संहर स्वाहा ।
ततः पूर्णाहुतिश्चैवमुत्तरेषु प्रयुज्यते । 52ab
ओं रां रसतन्मात्रे । ओं भें रूपतन्मात्रे । ओं रं स्पर्शतन्मात्रे । ओं एं शब्दतन्मात्रे । ओं भं नमः । ओं सों अहङ्कारः । ओं नं बुद्धे । ओं ओं प्रकृते ।
एकमूर्त्तावयं प्रोक्तो दीक्षायोगः समासतः । 52cd
एवमेव प्रयोगस्तु नवव्यूहादिके स्मृतः ॥ 52॥ 52ef
दग्धापरस्मिन् सन्दध्यान्निर्वाणे प्रकृतिन्नरः । 53ab
अविकारे समादध्यादीश्वरे प्रकृतिन्नरः ॥ 53cd
शोधयित्वाथ भुतानि कर्म्माङ्गानि[4] विशोधयेत् । 54ab
बुद्ध्याख्यान्यथ तन्मात्रमनोज्ञानमहङ्कृतिं ॥ 54cd
लिङ्गात्मानं विशोध्यान्ते प्रकृतिं शोधायेत् पुनः । 55ab

---

1 तद्वै शिष्यन्तु सन्नयेदिति ख, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।

2 ओं सुं आयाहि हामिति ख,चिह्नितपुस्तकपाठः ओं सं पाहि स्वाहा इति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।

3 अं दुं स्त्व प्रकृत्या इति ओं खं खं स्त्व प्रकृत्या इति च ख, चिह्नितपुस्तकपाठः ।

4 कर्म्माख्याणि च शोधयेदिति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।

पुरुषं प्राकृतं शुद्धमीश्वरे धाम्नि संस्थितं ॥ 55cd
स्वगोचरीकृताशेषभोगमुक्तौ कृतास्पदं । 56ab
ध्यायन् पूर्णाहुतिं दद्याद्दीक्षेयं त्वधिकारिणी ॥ 56cd
अङ्गैराराध्य मन्त्रस्य नीत्वा तत्त्वगणं समं । 57ab
क्रमादेवं विशोध्यान्ते सर्वसिद्धिसमन्वितं ॥ 57cd
ध्यायन् पूर्णाहुतिं दद्यात्दीक्षेयं साधके स्मृता । 58ab
द्रव्यस्य वा न सम्पत्तिरशक्तिर्वात्मनो यदि ॥ 58cd
इष्ट्वा देवं यथा पूर्वं सर्वोपकरणान्वितं । 59ab
सद्योधिवास्य द्वादश्यां दीक्षयेद्देशिकोत्तमः ॥ 59cd
भक्तो विनीतः शारीरैर्गुणैः सर्वैः समन्वितः । 60ab
शिष्यो नातिधनी यस्तु स्थण्डिलेभ्यच्र्च्य दीक्षयेत् ॥ 60cd
अध्वानं निखिलं दैवं[2] भौतं वाध्यात्मिकीकृतं । 61ab
सृष्टिक्रमेण शिष्यस्य देहे ध्यात्वा तु देशिकः ॥ 61cd
अष्टाष्टाहुतिभिः पूर्वं क्रमात् सन्तर्प्य सृष्टिमान् । 62ab
स्वमन्त्रैर्वासुदेवादीन् जननादीन् विसर्जयेत्[2] ॥ 62cd
होमेन शोधयेत् पश्चात्संहारक्रमयोगतः । 63ab
योनिसूत्राणि बद्धानि मुक्त्वा कर्माणि देशिकः ॥ 63cd
शिष्यदेहात्समाहृत्य क्रमात्तत्त्वानि शोधयेत् । 64ab
अग्नौ प्राकृतिके विष्णौ लयं नीत्वाधिदैविके ॥ 64cd
शुद्धं तत्त्वमशुद्धेन पूर्णाहुत्या तु साधयेत्[3] । 65ab
शिष्ये प्रकृतिमापन्ने दग्ध्वा प्राकृतिकान् गुणान् ॥ 65cd

1 लिखितं दैवमिति ख, चिह्नितपुस्तकपाठः ।
2 पूजां कृत्वा विसर्जयेदिति घ, चिह्नितपुस्तकपाठः विमलादीन् विसर्जयेदिति ङ, चिह्नितपुस्तकपाठः ।
3 पूर्णाहुत्या तु सन्नयेदिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।

मौचयेदधिकारे वा नियुञ्ज्याद्देशिकः शिशून्[1] । 66ab
अथान्यान् शक्तिदीक्षां वा कुर्य्यात् भावे स्थितो गुरुः ॥ 66cd
भक्त्या सम्प्रातिपन्नानां यतीनां निर्द्धनस्य च । 67ab
सम्पूज्य स्थण्डिले विष्णुं पार्श्वस्थं स्थाप्य पुत्रकं ॥ 67cd
देवताभिमुखः शिष्यस्तिर्यगास्यः स्वयं स्थितः । 68ab
अध्वानं निखिलं ध्यात्वा पर्वभिः स्वैर्विकल्पितं ॥ 68cd
शिष्यदेहे तथा देवमाधिदैविकयाचनं । 69ab
ध्यानयोगेन सञ्चिन्त्य पूर्ववत्ताडनादिना ॥ 69cd
क्रमात्तत्त्वानि सर्वाणि शोधयेत् स्थण्डिले हरौ । 70ab
ताडनेन वियोज्याथ गृहीत्वात्मनि तत्परः[2] ॥ 70cd
देवे संयोज्य संशोध्य गृहीत्वा तत् स्वभावतः । 71ab
आनीय शुद्धभावेन सन्धयित्वा क्रमेण तु ॥ 71cd
शोधयेद्ध्यानयोगेन सर्वतो ज्ञानमुद्रया । 72ab
शुद्धेषु सर्वतत्त्वेषु प्रधाने चेश्वरे स्थिते ॥ 72cd
दग्ध्वा निर्वापयेच्छिष्यान् पदे चैशे नियोजयेत् । 73ab
निनयेत् सिद्धिमार्गे वा साधकं देशिकोत्तमः ॥ 73cd
एवमेवाधिकारस्थो गृही कर्म्मण्यतन्द्रितः । 74ab
आत्मानं शोधयंस्तिष्ठेद् यावद्रागक्षयो भवेत् ॥ 74cd
क्षीणरागमथात्मानं ज्ञात्वा संशुद्धकिल्विषः । 75ab
आरोप्य पुत्रे शिष्ये वा ह्यधिकारन्तु संयमी ॥ 75cd
दग्ध्वा मायामयं पाशं प्रव्रज्य स्वात्मनि स्थितः । 76ab
शरीरपातमाकाङ्क्षन्नासीताव्यक्तलिङ्गवान् ॥ 76cd

इत्यादिमहापुराणे आग्नेये सर्वदीक्षाकथनं नाम सप्तविंशोध्यायः ।

1 पशूनिति घ, चिह्नितपुस्तकपाठः ।
2 तत् पुनरिति ख, ग, घ, ङ, चिह्नितपुस्तकचतुष्टयपाठः ।

## 28

अथ अष्टाविंशोध्यायः । अभिषेकविधानं ।

नारद उवाच ।
अभिषेकं प्रवक्ष्यामि यथाचार्य्यस्तु पुत्रकः । 1ab
सिद्धिभाक् साधको येन रोगी रोगाद्विमुच्यते ॥ 1cd
राज्यं राजा सुतं स्त्रीञ्च प्राप्नुयान्मलनाशनं । 2ab
मूर्त्तिकुम्भान् सुरत्नाढ्यान्मध्यपूर्वादितो न्यसेत् ॥ 2cd
सहस्रावर्त्तितान् कुर्य्यादथवा शतवर्त्तितान् । 3ab
मण्डपे मण्डले विष्णुं प्राच्यैशान्याञ्च पीठिके ॥ 3cd
निवेश्य शकलीकृत्य पुत्रकं साधकादिकं । 4ab
अभिषेकं समभ्यर्च्च्य कुर्य्याद्गीतादिपूर्वकं ॥ 4cd
दद्याच्च योगपीठादींस्त्वनुग्राह्यास्त्वया नराः । 5ab
गुरुश्च समयान् ब्रूयाद्गुप्तः शिष्योथ सर्वभाक् ॥ 5cd

इत्यादिमहापुराणे आग्नेये आचार्य्याभिषेको नाम अष्टाविंशो ऽध्यायः ।

## 29

अथ ऊनत्रिंशो ऽध्यायः ।

सर्वतोभद्रमण्डलकथनं ।
नारद उवाच ।
साधकः साधयेन्मन्त्रं देवतायतनादिके । 1ab
शुद्धभूमौ गृहे प्राच्च्यं मण्डले हरिमीश्वरं ॥ 1cd
चतुरस्त्रीकृते क्षेत्रे मण्डलादीनि वै लिखेत् । 2ab
रसवाणाक्षिकोष्ठेषु सर्व्वतोभद्रमालिखेत् ॥ 2cd
षट्त्रिंशत्कोष्ठकैः पद्मं पीठं पङ्क्त्या वहिर्भवेत् । 3ab
द्वाभ्यान्तु वीथिका तस्माद् द्वाभ्यां द्वाराणि दिक्षु च ॥ 3cd

वर्त्तुलं भ्रामयित्वा तु पद्मक्षेत्रं पुरोदितम् । 4ab
पद्मार्द्धे भ्रामयित्वा तु भागं द्वादशमं वहिः ॥ 4cd
विभज्य भ्रामयेच्छेषं चतुःक्षेत्रन्तु वर्त्तुलं । 5ab
प्रथमं कर्णिकाक्षेत्रं केशराणां द्वितीयकम् ॥ 5cd
तृतीयं दलसन्धीनां दलाग्राणां चतुर्थकम् । 6ab
प्रसार्य कोणसूत्राणि कोणदिङ्मध्यमन्ततः ॥ 6cd
निधाय केशराग्रे तु दलसन्धींस्तु लाञ्छयेत् । 7ab
पातयित्वाथ सूत्राणि तत्र पत्राष्टकं लिखेत् ॥ 7cd
दलसन्ध्यन्तरालन्तु मानं मध्ये निधाय तु । 8ab
दलाग्रं भ्रामयेत्तेन तदग्रं तदनन्तरं ॥ 8cd
तदन्तरालं तत्पार्श्वे कृत्वा वाह्यक्रमेण च । 9ab
केशरे तु लिखेद्द्वौ द्वौ दलमध्ये ततः पुनः ॥ 9cd
पद्मलक्ष्मैतत् सामान्यं द्विषट्कदलमुच्यते । 10ab
कर्णिकार्द्धेन मानेन प्राक्संस्थं भ्रामयेत् क्रमात् ॥ 10cd
तत्पार्श्वे भ्रमयोगेन कुण्डल्यः षड् भवन्ति हि । 11ab
एवं द्वादश मत्स्याः स्युर्द्विषट्कदलकञ्च तैः ॥ 11cd
पञ्चपत्राभिसिद्ध्यर्थं मत्स्यं कृत्वैवमब्जकम् । 12ab
व्योमरेखावहिः पीठन्तत्र कोष्टानि मार्जयेत् ॥ 12cd
त्रीणि कोणेषु पादार्थं द्विद्विकान्यपराणि तु । 13ab
चतुर्दिक्षु विलिप्तानि गात्रकाणि भवन्त्युत ॥ 13cd
ततः पङ्क्तिद्वयं दिक्षु वीथ्यर्थन्तु विलोपयेत्[1] । 14ab
द्वाराण्याशासु कुर्वीत चत्वारि चतसृष्वपि ॥ 14cd
द्वाराणां पार्श्वतः शोभा अष्टौ कुर्याद्विचक्षणः । 15ab

1 पङ्क्तिद्वयं द्वयं दिक्षु वीथ्यर्थं विनियोजयेदिति ङ, चिह्नितपुस्तकपाठः ।

तत्पार्श्वे उपशोभास्तु तावत्यः परिकीर्त्तिताः ॥ 15cd
समीप उपशोभानां कोणास्तु परिकीर्त्तिताः[1] । 16ab
चतुर्दिक्षु ततो द्वे द्वे चिन्तयेन्मध्यकोष्ठकैः ॥ 16cd
चत्वारि वाह्यतो मृज्यादेकैकं पार्श्वयोरपि । 17ab
शोभार्थं पार्श्वयोस्त्रीणि त्रीणि लुम्पेद्दलस्य तु ॥ 17cd
तद्वद्विपर्यये कुर्यादुपशोभां ततः परम् । 18ab
कोणस्यान्तर्वहिस्त्रीणि चिन्तयेद्विर्विभेदतः ॥ 18cd
एवं षोडशकोष्ठं स्यादेवमन्यत्तु मण्डलम् । 19ab
द्विषड्कभागे षट्त्रिंशत्पदं पद्मन्तु वीथिका ॥ 19cd
एका पङ्क्तिः प्राभ्यां तु द्वारशोभादि पूर्ववत् । 20ab
द्वादशाङ्गुलिभिः पद्ममेकहस्ते तु मण्डले ॥ 20cd
द्विहस्ते हस्तमात्रं स्याद्वृद्ध्या द्वारेण वाचरेत् । 21ab
अपीठश्चतुरस्रं स्याद्द्विकरञ्चक्रपङ्कजम् ॥ 21cd
पद्मार्द्धं नवभिः प्रोक्तं नाभिस्तु तिसृभिः स्मृता । 22ab
अष्टाभिर्द्वारकान् कुर्यान्नेमिन्तु चतुरङ्गुलैः ॥ 22cd
त्रिधा[2] विभज्य च क्षेत्रमन्तर्द्वाभ्यामथाङ्कयेत् । 23ab
पञ्चान्तस्वरसिद्ध्यर्थं[3] तेष्वस्फाल्य लिखेदरान् ॥ 23cd
इन्दीवरदलाकारानथवा मातुलाङ्गवत् । 24ab
पद्मपत्रायतान्वापि लिखेदिच्छानुरूपतः ॥ 24cd
भ्रामयित्वा वहिर्नेमावरसन्ध्यन्तरे स्थितः । 25ab
भ्रामयेदरमूलन्तु सन्धिमध्ये व्यवस्थितः ॥ 25cd

---

1 परिमार्जिता इति घ, चिह्नितपुस्तकपाठः ।

2 द्विधा इति ख, चिह्नितपुस्तकपाठः ।

3 पञ्चान्तरस्त्वसिद्ध्यर्थमिति ख, चिह्नितपुस्तकपाठः पञ्चोत्तरस्तु सि-द्ध्यर्थमिति ङ, चिह्नितपुस्तकपाठः ।

अरमध्ये स्थितो मधमरणिं भ्रामयेत् समम् । 26ab
एवं सिद्ध्यन्तराः सम्यक् मातुलाङ्गनिभाः समाः ॥ 26cd
विभज्य सप्तधा क्षेत्रं चतुर्द्दशकरं समम् । 27ab
द्विधा कृते शतं ह्यत्र षण्नवत्यधिकानि तु ॥ 27cd
कोष्टकानि चतुर्भिस्तैर्म्मध्ये भद्रं समालिखेत् । 28ab
परितो विसृजेद्वीथ्यै तथा दिक्षु समालिखेत् ॥ 28cd
कमलानि पुनर्वीथ्यै परितः परिमृज्य तु । 29ab
द्वे द्वे मध्यमकोष्टे तु ग्रीवार्थं दिक्षु लोपयेत् ॥ 29cd
चत्वारि वाह्यतः पश्चात्त्रीणि त्रीणि तु लोपयेत् । 30ab
ग्रीवापार्श्वे वहिस्त्वेका शोभा सा परिकीर्त्तिता ॥ 30cd
विमृज्य वाह्यकोणेषु सप्तान्तस्त्रीणि मार्जयेत् । 31ab
मण्डलं नवभागं स्यान्नवव्यूहं हरिं यजेत् ॥ 31cd
पञ्चविंशतिकव्यूहं मण्डलं विश्वरूपगं । 32ab
द्वात्रिंशद्धस्तकं क्षेत्रं भक्तं द्वात्रिंशता समं ॥ 32cd
एवं कृते चतुर्विंशत्यधिकन्तु सहस्रकं । 33ab
कोष्टकानां समुद्दिष्टं मध्ये षोडशकोष्टकैः ॥ 33cd
भद्रकं परिलिख्याथ पार्श्वे पङ्क्तिं विमृज्य तु । 34ab
ततः षोडशभिः कोष्टैर्द्दिक्षु भद्राष्टकं लिखेत्[1] ॥ 34cd
ततोपि पङ्क्तिं सम्मृज्य तद्वत् षोडशभद्रकं । 35ab
लिखित्वा परितः पङ्क्तिं विमृज्याथ प्रकल्पयेत् ॥ 35cd
द्वारद्वादशकं दिक्षु त्रीणि त्रीणि यथाक्रमं । 36ab
षड्भिः परिलुप्यान्तर्मध्ये चत्वारि पार्श्वयोः ॥ 36cd
चत्वार्यन्तर्वहिर्द्वे तु शोभार्थं परिमृज्य तु । 37ab
उपद्वारसिद्ध्यर्थं त्रीण्यन्तः पञ्च वाह्यतः ॥ 37cd

1 दिक्षु तत्राष्टकं लिखेदिति ख, ग, घ, चिह्नितपुस्तकपाठः ।

परिमृज्य तथा शोभां पूर्ववत् परिकल्पयेत् । 38ab
वहिः कोणेषु सप्तान्तस्त्रीणि कोष्ठानि मार्जयेत् ॥ 38cd
पञ्चविंशतिकव्यूहे परं ब्रह्म यजेत् कजे[1] । 39ab
मध्ये पूर्वादितः पद्मे वासुदेवादयः क्रमात् ॥ 39cd
वराहं पूजयित्वा च पूर्वपद्मे ततः क्रमात् । 40ab
व्यूहान् सम्पूजयेत्तावत् यावत् षड्विंशमो भवेत् ॥ 40cd
यथोक्तं व्यूहमखिलमेकस्मिन् पङ्कजे क्रमात् । 41ab
यष्टव्यमिति यत्नेन[2] प्रचेता मन्यते ऽध्वरं[3] ॥ 41cd
सत्पन्तु मूर्त्तिभेदेन विभक्तं मन्यते ऽच्युतं । 42ab
चत्वारिंशत् करं क्षेत्रं ह्युत्तरं[4] विभजेत् क्रमात् ॥ 42cd
एकैकं सप्तधा भूयस्तथैवैकं द्विधा पुनः । 43ab
चतुःषष्ट्युत्तरं सप्तशतान्येकं सहस्रकं ॥ 43cd
कोष्ठकानां भद्रकञ्च मध्ये षोडशकोष्ठकैः । 44ab
पार्श्वे वीथीं ततश्चाष्टभद्राण्यथ च वीथिका ॥ 44cd
षोडशाब्जान्यथो वीथी चतुर्विंशतिपङ्कजं । 45ab
वीथीपद्मानि द्वात्रिंशत् पङ्क्तिवीथिकजान्यथ ॥ 45cd
चत्वारिंशत्ततो वीथी शेषपङ्क्तित्रयेण च । 46ab
द्वारशोभोपशोभाः स्युर्द्दिक्षु मध्ये विलोप्य च ॥ 46cd
द्विचतुःषड्द्वारसिद्ध्यै चतुर्द्दिक्षु विलोपयेत् । 47ab
पञ्च त्रीण्येककं वाह्ये शोभोपद्वारसिद्धये ॥ 47cd

1 शुभे इति ङ, चिह्नितपुस्तकपाठः ।

2 यष्टव्यमिति यज्ञेन इति ग, घ, चिह्नितपुस्तकद्वयपाठः यष्टव्यमिति मन्त्रेण इति ङ, चिह्नितपुस्तकपाठः ।

3 प्रचेता मन्यते धृवमिति ख, चिह्नितपुस्तकपाठः ।

4 ह्युत्तममिति ङ, चिह्नितपुस्तकपाठः ।

द्वाराणां पार्श्वयोरन्तः षड् वा चत्वारि मध्यतः । 48ab
द्वे द्वे लुम्पेदेवमेव षड् भवन्त्युपशोभिकाः ॥ 48cd
एकस्यां दिशि सङ्ख्याः स्युः चतस्रः परिसङ्ख्यया ॥ 49॥ 49ab
एकैकस्यां दिशि त्रीणि द्वाराण्यपि भवन्त्युत । 50ab
पञ्च पञ्च तु कोणेषु पङ्क्तौ पङ्क्तौ क्रमात् मृजेत् । 50cd
कोष्टकानि भवेदेवं मर्त्येष्ट्यं मण्डलं शुभं ॥ 50॥ 50ef

इत्यादिमहापुराणे आग्नेये मण्डलादिलक्षणं नाम ऊनत्रिंशो ऽध्यायः ।

# 30

## अथ त्रिंशो ऽध्यायः ।

मण्डलविधिः ।
नारद उवाच ।
मध्ये पद्मे यजेद्ब्रह्म साङ्गं पूर्वेब्जनाभकं । 1ab
आग्नेयेब्जे च प्रकृतिं याम्येब्जे पुरुषं यजेत् ॥ 1cd
पुरुषाद्दक्षिणे च वह्निं नैर्ऋते वारुणेनिलं । 2ab
आदित्यमैन्दवे पद्मे ऋग्यजुश्चैशपद्मके ॥ 2cd
इन्द्रादींश्च द्वितीयायां पद्मे षोडशके तथा । 3ab
सामाथर्वाणमाकाशं वायुं तेजस्तथा जलं ॥ 3cd
पृथिवीञ्च मनश्चैव श्रोत्रं त्वक् चक्षुरर्च्चयेत् । 4ab
रसनाञ्च तथा घ्राणं भूर्भुवश्चैव षोडशं ॥ 4cd
महर्जनस्तपः सत्यं तथाग्निष्टोममेव च । 5ab
अत्यग्निष्टोमकं[1] चोक्थं षोड़शीं वाजपेयकं ॥ 5cd
अतिरात्रञ्च सम्पूज्य तथाप्तोर्याममर्च्चयेत् । 6ab
मनो बुद्धिमहङ्कारं शब्दं स्पर्शञ्च रूपकं ॥ 6cd
रसं गन्धञ्च पद्मेषु चतुर्विंशतिषु क्रमात् । 7ab

1 प्रत्यग्निष्टोमकमिति ख, चिह्नितपुस्तकपाठः ज्योतिष्टोमकमिति ङ, चिह्नितपुस्तकपाठः ।

जीवं मनोधिपञ्चाहं प्रकृतिं शब्दमात्रकं ॥ 7cd
वासुदेवादिमूर्त्तीञ्च तथा चैव दशत्मकं । 8ab
मनः श्रोत्रं त्वचं प्राच्च्यं चक्षुश्च रसनं तथा ॥ 8cd
घ्राणं वाक्पाणिपादञ्च द्वात्रिंशद्वारिजेष्विमान् । 9ab
चतुर्थावरणे पूज्याः साङ्गाः सपरिवारकाः ॥ 9cd
पायूपस्थौ च सम्पूज्य मासानां द्वादशाधिपान् । 10ab
पुरुषोत्तमादिषड्विंशान् वाह्यावरणके यजेत् ॥ 10cd
चक्राब्जे तेषु सम्पूज्या मासानां पतयः क्रमात् । 11ab
अष्टौ प्रकृतयः षड्वा पञ्चाथ चतुरो ऽपरे ॥ 11cd
रजः पातं ततः कुर्य्याल्लिखिते मण्डले शृणु । 12ab
कर्णिका पीतवर्णा स्याद्रेखाः सर्वाः सिताः समाः ॥ 12cd
द्विहस्ते ऽङ्गुष्टमात्राः स्युर्हस्ते चार्द्धसमाः सिताः । 13ab
पद्मं शुक्लेन सन्धींस्तु कृष्णेन श्यामतोथवा ॥ 13cd
केशरा रक्तपीताः स्युः कोणान् रक्तेन पूरयेत् । 14ab
भूषयेद्योगपीठन्तु यथेष्टं सार्ववर्णिकैः ॥ 14cd
लतावितानपत्राद्यैर्वीथिकामुपशोभयेत् । 15ab
पीठद्वारे तु शुक्लेन शोभारक्तेन पीततः ॥ 15cd
उपशोभाञ्च नीलेन कोणशङ्खांश्च वै सितान् । 16ab
भद्रके पूरणं प्रोक्तमेवमन्येषु पूरणं ॥ 16cd
त्रिकोणं सितरक्तेन कृष्णेन च विभूषयेत् । 17ab
द्विकोणं रक्तपीताभ्यां नाभिं कृष्णेन चक्रके ॥ 17cd
अरकान् पीतरक्ताभिः श्यामान् नेमिन्तु रक्ततः । 18ab
सितश्यामारुणाः कृष्णाः पीता रेखास्तु वाह्यतः ॥ 18cd
शालिपिष्टादि शुक्लं स्याद्रक्तं कौसुम्भकादिकम् । 19ab
हरिद्रया च हारिद्रं कृष्णं स्याद्दग्धधान्यतः ॥ 19cd

शमीपत्रादिकैः श्यामं वीजानां लक्षजाप्यतः । 20ab
चतुर्लक्षैस्तु मन्त्राणां विद्यानां लक्षसाधनम् ॥ 20cd
अयुतं बुद्धिविद्यानां स्तोत्राणाञ्च सहस्रकम् । 21ab
पूर्व्वमेवाथ लक्षेण मन्त्रशुद्धिस्तथात्मनः ॥ 21cd
तथापरेण लक्षेण मन्त्रः क्षेत्रीकृतो भवेत् । 22ab
पूर्वमेवासमो होमो वीजानां सम्प्रकीर्तितः ॥ 22cd
पूर्वसेवा दशांशेन मन्त्रादीनां प्रकीर्त्तिता । 23ab
पुरश्चर्य्ये तु मन्त्रे तु मासिकं व्रतमाचरेत् ॥ 23cd
भुवि न्यसेद्वामपादं न गृह्णीयात् प्रतिग्रहम् । 24ab
एवं द्वित्रिगुणेनैव मध्यमोत्तमसिद्धयः ॥ 24cd
मन्त्रध्यानं प्रवक्ष्यामि येन स्यान्मन्त्रजं फलम् । 25ab
स्थूलं शब्दमयं रूपं विग्रहं वाह्यमिष्यते ॥ 25cd
सुक्ष्मां ज्योतिर्म्मयं रूपं हार्द्दं चिन्तामयं भवेत् । 26ab
चिन्तया रहितं यत्तु तत् परं परिकीर्त्तितम् ॥ 26cd
वराहसिंहशक्तीनां स्थूलरूपं प्रधानतः । 27ab
चिन्तया रहितं रूपं वासुदेवस्य कीर्त्तितम् ॥ 27cd
इतरेषां स्मृतं रूपं हार्द्दं चिन्तामयं सदा । 28ab
स्थूलं वैराजमाख्यातं सूक्ष्मं वै लिङ्गितं भवेत् ॥ 28cd
चिन्तया रहितं रूपमैश्वरं परिकीर्त्तितम् । 29ab
हृत्पुण्डरीकनिलयञ्चैतन्यं ज्योतिरव्ययम् ॥ 29cd
वीजं वीजात्मकं ध्यायेत् कदम्बकुसुमाकृतिं । 30ab
कुम्भान्तरगतो दीपो निरुद्धप्रसवो यथा ॥ 30cd
संहतः केवलस्तिष्ठेदेवं मन्त्रेश्वरो हृदि । 31ab
अनेकशुषिरे कुम्भे तावन्मात्रा गभस्तयः ॥ 31cd
प्रसरन्ति वहिस्तद्वन्नाडीभिर्वीजरश्मयः । 32ab

अथावभासतो दैवीमात्मीकृत्य तनुं स्थिताः ॥ 32cd
हृदयात् प्रस्थिता नाड्यो दर्शनेन्द्रियगोचराः । 33ab
अग्नीषोमात्मके तासां नाड्यौ नासाग्रसंस्थिते ॥ 33cd
सम्यग्गुह्येन योगेन जित्वा देहसमीरणम् । 34ab
जपध्यानरतो मन्त्री मन्त्रलक्षणमश्नुते[1] ॥ 34cd
संशुद्धभूततन्मात्रः सकामो योगमभ्यसन् । 35ab
अणिमादिमवाप्नोति विरक्तः प्रविलङ्घ्य च । 35cd
देवात्मके भूतमात्रान्मुच्यते चेन्द्रियग्रहात् ॥ 35॥ 35ef

इत्यादिमहापुराणे आग्नेये मण्डलादिवर्णनं नाम त्रिंशो ऽध्यायः ।

## 31

### अथ एकत्रिंशो ऽध्यायः ।

मार्जनविधानं ।
अग्निरुवाच ।
रक्षां स्वस्य परेषाञ्च वक्ष्ये तां मार्जनाह्वयां । 1ab
यया विमुच्यते दुःखैः सुखञ्च प्राप्नुयान्नरः[2] ॥ 1cd
ओं नमः परमार्थाय पुरुषाय महात्मने । 2ab
अरूपबहुरूपाय व्यापिने परमात्मने ॥ 2cd
निष्कल्मषाय शुद्धाय ध्यानयोगरताय च । 3ab
नमस्कृत्य प्रवक्ष्यामि यत् तत्सिध्यतु मे वचः ॥ 3cd
वराहाय नृसिंहाय वामनाय महामुने । 4ab
नमस्कृत्य प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥ 4cd

---

1 मन्त्रजं फलमश्नुते इति ख, चिह्नितपुस्तकपाठः ।
2 सुखं ब्रह्माप्नुयान्नर इति ख, चिह्नितपुस्तकपाठः ।

त्रिविक्रमाय रामाय वैकुण्ठाय नराय च । 5ab
नमस्कृत्य प्रवक्ष्यामि यत्तत् सिध्यतु मे वचः ॥ 5cd
वराह नरसिंहेश वामनेश त्रिविक्रम । 6ab
हयग्रीवेश सर्वेश हृषीकेश हराशुभम् ॥ 6cd
अपराजितचक्राद्यैश्चतुर्भिः परमायुधैः । 7ab
अखण्डितानुभावैस्त्वं[1] सर्वदुष्टहरो भव ॥ 7cd
हरामुकस्य दुरितं सर्वञ्च कुशलं कुरु । 8ab
मृत्युबन्धार्त्तभयदं दुरितस्य च यत् फलम् ॥ 8cd
पराभिध्यानसहितैः प्रयुक्तञ्चाभिचारकम् । 9ab
गदस्पर्शमहारोगप्रयोगं जरया जर ॥ 9cd
ओं नमो वासुदेवाय नमः कृष्णाय खड्गिने । 10ab
नमः पुष्करनेत्राय केशवायादिचक्रिणे ॥ 10cd
नमः कमलकिञ्जल्कपीतनिर्म्मलवाससे । 11ab
महाहवरिपुस्कन्धसृष्टचक्राय चक्रिणे ॥ 11cd
दंष्ट्रोद्धृतक्षितिभृते[2] त्रयीमूर्त्तिमते नमः । 12ab
महायज्ञवराहाय शेषभोगाङ्कशायिने ॥ 12cd
तप्तहाटककेशाग्रज्वलत्पावकलोचन । 13ab
वज्राधिकनखस्पर्श दिव्यसिंह नमोस्तु ते ॥ 13cd
काश्यपायातिह्रस्वाय ऋग्यजुःसामभूषित । 14ab
तुभ्यं वामनरूपायाक्रमते गां[3] नमो नमः ॥ 14cd
वराहाशेषदुष्टानि सर्वपापफलानि वै । 15ab
मर्द्द मर्द्द महादंष्ट्र मर्द मर्द च तत्फलम् ॥ 15cd

1 अखण्डितात्मभावैस्त्वमिति ख, चिह्नितपुस्तकपाठः ।
2 दंष्ट्रोद्धृतभूमिभर्त्रे इति ख, चिह्नितपुस्तकपाठः ।
3 सृजते गामिति ख, चिह्नितपुस्तकपाठः ।

नरसिंह करालाख्य दन्तप्रान्तानलोज्ज्वल । 16ab
भञ्ज भञ्ज निनादेन दुष्टान्यस्यार्तिनाशन ॥ 16cd
ऋग्यजुःसामगर्भाभिर्वाग्भिर्वामनरूपधृक् । 17ab
प्रशमं सर्वदुःखानि नयत्त्वस्य जनार्द्दनः ॥ 17cd
ऐकाहिकं द्व्याहिकञ्च तथा त्रिदिवसं ज्वरम् । 18ab
चातुर्थकन्तथात्युग्रन्तथैव सततज्वरम् ॥ 18cd
दोषोत्थं सन्निपातोत्थं तथैवागन्तुकं ज्वरम् । 19ab
शमं नयाशु गोविन्द च्छिन्धि च्छिन्ध्यस्य वेदनाम्[1] ॥ 19cd
नेत्रदुःखं शिरोदुःखं दुःखञ्चोदरसम्भवम् । 20ab
अन्तःश्वासमतिश्वासं[2] परितापं सवेपथुम् ॥ 20cd
गुदघ्राणाङ्घ्रिरोगांश्च कुष्ठरोगांस्तथा क्षयं[3] । 21ab
कामलादींस्तथा रोगान् प्रमेहांश्चातिदारुणान् ॥ 21cd
भगन्दरातिसारांश्च मुखरोगांश्च वल्गुलीम् । 22ab
अश्मरीं मूत्रकृच्छ्रांश्च रोगानन्यांश्च दारुणान् ॥ 22cd
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः । 23ab
कफोद्भवाश्च ये केचित् ये चान्ये सान्निपातिकाः ॥ 23cd
आगन्तुकाश्च ये रोगा लूता विस्फोटकादयः । 24ab
ते सर्वे प्रशमं यान्तु वासुदेवापमार्जिताः[5] ॥ 24cd
विलयं यान्तु ते सर्वे विष्णोरुच्चारणेन च । 25ab
क्षयं गच्छन्तु चाशेषास्ते चक्राभिहता हरेः ॥ 25cd

1 छिन्द छिन्दास्य वेदनामिति ग, चिह्नितपुस्तकपाठः ।
2 अनिश्वासमतिश्वासमिति ग, चिह्नितपुस्तकपाठः ।
3 तथैव च इति ग, चिह्नितपुस्तकपाठः ।
4 ये रोगाः पित्तसम्भवा इति ग, चिह्नितपुस्तकपाठः ।
5 वासुदेवपराजिता इति ख, चिह्नितपुस्तकपाठः ।

अच्युतानन्तगोविन्दनामोच्चारणभीषिताः । 26ab
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ 26cd
स्थावरं जङ्गमं वापि कृत्रिमं चापि यद्विषम् । 27ab
दन्तोद्भवं नखभवमाकाशप्रभवं विषम् ॥ 27cd
लूतादिप्रभवं यच्च विषमन्यत्तु दुःखदं । 28ab
शमं नयतु तत् सर्वं कीर्त्तितोस्य जनार्द्दनः ॥ 28cd
ग्रहान् प्रेतग्रहांश्चापि तथा वै डाकिनीग्रहान्[1] । 29ab
वेतालांश्च पिशाचांश्च गन्धर्वान् यक्षराक्षसान्[2] ॥ 29cd
शकुनीपूतनाद्यांश्च तथा वैनायकान् ग्रहान् । 30ab
मुखमण्डीं तथा क्रूरां रेवतीं वृद्धरेवतीम् ॥ 30cd
वृद्धकाख्यान् ग्रहांश्चोग्रांस्तथा मातृग्रहानपि । 31ab
बालस्य विष्णोश्चरितं हन्तु बालग्रहानिमान् ॥ 31cd
वृद्धाश्च ये ग्रहाः केचिद्ये च बालग्रहाः क्वचित् । 32ab
नरसिंहस्य ते दृष्ट्या दग्धा ये चापि यौवने ॥ 32cd
सदा[3] करालवदनो नरसिंहो महाबलः । 33ab
ग्रहानशेषान्निः शेषान् करोतु जगतो हितः ॥ 33cd
नरसिंह महासिंह ज्वालामालोज्ज्वलानन । 34ab
ग्रहानशेषान् सर्वेश खाद खादाग्निलोचन ॥ 34cd
ये रोगा ये महोत्पाता यद्विषं ये महाग्रहाः । 35ab
यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः ॥ 35cd
शस्त्रक्षतेषु ये दोषा ज्वालागर्द्दभकादयः । 36ab
तानि सर्वाणि सर्वात्मा परमात्मा जनार्द्दनः ॥ 36cd

1 तथा वेतालिकान् ग्रहानिति घ, चिह्नितपुस्तकपाठः ।
2 गन्धर्व्वान् राक्षसानपि इति ख, चिह्नितपुस्तकपाठः ।
3 शटा इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

किञ्चिद्रूपं समास्याय वासुदेवास्य नाशय ॥ 37॥ 37ab
क्षिप्त्वा सुदर्शनञ्चक्रं ज्वालामालातिभीषणम् । 38ab
सर्वदुष्टोपशमनं कुरु देववराच्युत ॥ 38cd
सुदर्शन महाज्वाल च्छिन्धि च्छिन्धि महारव[1] । 39ab
सर्व्वदुष्टानि रक्षांसि क्षयं यान्तु विभीषण ॥ 39cd
प्राच्यां प्रतीच्यां च दिशि दक्षिणोत्तरतस्तथा । 40ab
रक्षाङ्करोतु सर्वात्मा नरसिंहः सुगर्ज्जितः[2] ॥ 40cd
दिवि भुव्यन्तरीक्षे च पृष्ठतः पार्श्वतोग्रतः । 41ab
रक्षाङ्करोतु भगवान् बहुरूपी जनार्द्दनः ॥ 41cd
यथा विष्णुर्ज्जगत्सर्वं सदेवासुरमानुषं । 42ab
तेन सत्येन दुष्टानि शममस्य व्रजन्तु वै[3] ॥ 42cd
यथा विष्णौ स्मृते सद्यः सङ्क्षयं यान्ति पातकाः । 43ab
सत्येन तेन सकलं दुष्टमस्य प्रशाम्यतु ॥ 43cd
परमात्मा यथा विष्णुर्वेदान्तेषु च गीयते । 44ab
तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु ॥ 44cd
यथा यज्ञेश्वरो विष्णुर्द्देवेष्वपि हि गीयते । 45ab
सत्येन तेन सकलं यन्मयोक्तं तथास्तु तत् ॥ 45cd
शान्तिरस्तु शिवञ्चास्तु दुष्टमस्य प्रशाम्यतु । 46ab
वासुदेवशरीरोत्थैः कुशैर्न्निर्मथितं मया[4] ॥ 46cd
अपमार्जतु गोविन्दो नरो नारायणस्तथा । 47ab
तथास्तु सर्वदुःखानां प्रशमो जपनाद्धरेः ॥ 47cd

1 महाबल इति ख, चिह्नितपुस्तकपाठः ।
2 स्वर्गर्ज्जितैरिति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।
3 प्रयान्तु वै इति ग, चिह्नितपुस्तकपाठः ।
4 कुशैर्न्निर्णाशितमिति ख, ग, चिह्नितपुस्तकद्वयपाठः ।

अपमार्जनकं शस्त्रं सर्वरोगादिवारणम् । 48ab
अयं हरिः कुशो विष्णुर्हता रोगा मया तव ॥ 48cd

इत्यादिमहापुराणे आग्नेये कुशापमार्जनं नाम एकत्रिंशो ऽध्यायः ।

# 32

## अथ द्वात्रिंशो ऽध्यायः ।

संस्कारकथनं ।
अग्निरुवाच ।
निर्वाणादिषु दीक्षासु चत्त्वारिंशत्तथाष्ट च । 1ab
संस्कारान् कारयेद्धीमान् शृणु तान्यैः सुरो भवेत् ॥ 1cd
गर्भाधानन्तु योन्यां वै ततः पुंसवनञ्चरेत् । 2ab
सीमन्तोन्नयनञ्चैव जातकर्म्म च नाम च ॥ 2cd
अन्नाशनं ततश्चूडा ब्रह्मचर्यव्रतानि च । 3ab
चत्वारि वैष्णवी पार्थी भौतिकी श्रोत्रिकी तथा ॥ 3cd
गोदानं स्नातकत्वञ्च पाकयज्ञाश्च सप्त ते[1] । 4ab
अष्टका पार्वणश्राद्धं श्रावण्यग्रायणीति च ॥ 4cd
चैत्री चाश्वयुजी सप्त हविर्यज्ञांश्च तान् शृणु । 5ab
आधानञ्चाग्निहोत्रञ्च दर्शो वै पौर्णमासकः ॥ 5cd
चातुर्मास्यं पशुबन्धः सौत्रामणिरथापरः । 6ab
सोमसंस्थाः सप्त शृणु अग्निष्टोमः क्रतूत्तमः ॥ 6cd
अत्यग्निष्टोम उक्थश्च षोडशो वाजपेयकः । 7ab
अतिरात्राप्तोर्य्यामश्च सहस्रेशाः सवा इमे ॥ 7cd
हिरण्याङ्घ्रिर्हिरण्याक्षो हिरण्यमित्र इत्यतः । 8ab

1 सप्त च इति ग, ख, चिह्नितपुस्तकद्वयपाठः ।

हिरण्यपाणिर्हेमाक्षो हेमाङ्गो हेमसूत्रकः ॥ 8cd
हिरण्यास्यो हिरण्याङ्गो हेमजिह्वो हिरण्यवान् । 9ab
अश्वमेधो हि सर्वेशो गुणाश्चाष्टाथ तान् शृणु ॥ 9cd
दया च सर्वभूतेषु क्षान्तिश्चैव तथार्ज्जवम् । 10ab
शौचं चैवमनायासो मङ्गलं चापरो गुणः ॥ 10cd
अकार्पण्यञ्चास्पृहा च मूलेन जुहुयाच्छतम् । 11ab
सौरशाक्तेयविष्ण्वीशदीक्षास्त्वेते समाः स्मृताः ॥ 11cd
संस्कारैः संस्कृतश्चैतैर्भुक्तिमुक्तिमवाप्नुयात् । 12ab
सर्वरोगाद्विनिर्मुक्तो देववद्वर्त्तते नरः । 12cd
जप्याद्धोमात्पूजनाच्च ध्यानाद्देवस्य चेष्टभाक् ॥ 12॥ 12ef

इत्यादिमहापुराणे आग्नेये अष्टचत्वारिंशत्संस्कारकथनं नाम द्वात्रिंशो ऽध्यायः ।

# 33

## अथ त्रयस्त्रिंशो ऽध्यायः ।

पवित्रारोहणविधानं ।
अग्निरुवाच ।
पवित्रारोहणं वक्ष्ये वर्षपूजाकलं हरेः । 1ab
आषाढादौ कार्तिकान्ते प्रतिपद्धनदा तिथिः[1] ॥ 1cd
श्रिया गौर्या गणेशस्य सरस्वत्या गुहस्य च । 2ab
मार्त्तण्डमातृदुर्गाणां नागर्षिहरिमन्मथैः ॥ 2cd
शिवस्य ब्रह्मणस्तद्वद्द्वितीयादितिथेः क्रमात् । 3ab
यस्य देवस्य यो भक्तः पवित्रा तस्य सा तिथिः ॥ 3cd
आरोहणे तुल्यविधिः पृथक् मन्त्रादिकं यदि । 4ab

1 वर्द्धते तिथिरिरिति ख, चिह्नितपुस्तकपाठः ।

सौवर्णं राजतं ताम्रं नेत्रकार्प्पासिकादिकं ॥ 4cd
ब्राह्मण्या कर्त्तितं सूत्रं तदलाभे तु संस्कृतं । 5ab
त्रिगुणं त्रिगुणीकृत्य तेन कुर्य्यात् पवित्रकं ॥ 5cd
अष्टोत्तरशताद्दूर्द्ध्वं तदर्द्धं चोत्तमादिकं । 6ab
क्रियालोपाविघातार्थं यत्त्वयाभिहितं प्रभो ॥ 6cd
मया तत् क्रियते देव यथा यत्र पावित्रकं । 7ab
अविघ्नं तु भवेदत्र कुरु नाथ जयाव्यय ॥ 7cd
प्रार्थ्य तन्मण्डलायादौ गायत्र्या बन्धयेन्नरः । 8ab
ओं नारायणाय विद्महे वासुदेवाय धीमहि ॥ 8cd
तन्नो विष्णुः प्रचोदयात् देवदेवानुरूपतः । 9ab
जानूरुनाभिनामान्तं प्रतिमासु पवित्रकं ॥ 9cd
पादान्ता वनमाला स्यादष्टोत्तरसहस्रतः[1] । 10ab
माला तु कल्पसाध्यं वा द्विगुणं षोडशाङ्गुलात् ॥ 10cd
कर्णिका केशरं पत्रं मन्त्राद्यं[2] मण्डलान्तकं । 11ab
मण्डलाङ्गुलमात्रैकचक्राब्जाद्यौ[3] पवित्रकं ॥ 11cd
स्थण्डिले ऽङ्गुलमानेन आत्मनः सप्तविंशतिः । 12ab
आचार्य्याणां च सूत्राणि पितृमात्रादिपुस्तके ॥ 12cd
नाभ्यन्तं द्वादशग्रन्थिं तथा गन्धपवित्रके । 13ab
द्व्यङ्गुलात् कल्पनादौ द्विर्माला चाष्टोत्तरं शतं ॥ 13cd
अथवार्कचतुर्विंशषड्त्रिंशन्मालिका द्विजः । 14ab
अनामामध्यमाङ्गुष्ठैर्मन्दाद्यैः मालिकार्थिभिः [4] ॥ 14cd

1 पादान्तरेण माला स्यादष्टोत्तरसहस्रशः इति ग, चिह्नितपुस्तकपाठः ।

2 गदाद्यमिति घ, चिह्नितपुस्तकपाठः ।

3 चक्राङ्गदौ पवित्रके इति घ, चिह्नितपुतकपाठः ।

4 मन्दादौ इति ख, ग, चिह्नितपुस्तकद्वयपाठः मन्द्राद्यैरिति घ, चिह्नितपुस्तकपाठः ।

कनिष्ठादौ द्वादश वा ग्रन्थयः स्युः पवित्रके । 15ab
रवेः कुम्भहुताशादेः सम्भवे विष्णुवन्मतम् ॥ 15cd
पीठस्य पीठमानं स्यान्मेखलान्ते च कुण्डकं । 16ab
यथाशक्ति सूत्रग्रन्थिपरिचारेथ वैष्णवे ॥ 16cd
सूत्राणि वा सप्तदश सूत्रेण त्रिविभक्तके[1] । 17ab
रोचनागुरुकर्पूरहरिद्राकुङ्कुमादिभिः ॥ 17cd
रञ्जयेच्चन्दनाद्यैर्वा स्नानसन्ध्यादिकृन्नरः । 18ab
एकादश्यां यागगृहे भगवन्तं हरिं जयेत् ॥ 18cd
समस्तपरिवाराय बलिं पीठे समर्चयेत् । 19ab
क्ष्यौं क्षेत्रपालाय द्वारान्ते द्वारोपरि तथा श्रियं ॥ 19cd
धात्रे दक्षे विधात्रे च गङ्गाञ्च यमुनां तथा । 20ab
शङ्खपद्मनिधी पूज्य मध्ये वास्त्वपसारणं ॥ 20cd
सारङ्गायेति भूतानां भूतशुद्धिं स्थितश्चरेत् ॥ 20॥ 20ef
ओं ह्रूं हः फट् ह्रूं(2) गन्धतन्मात्रं संहरामि नमः ॥
ओं ह्रूं हः फट् ह्रूं(3) रसतन्मात्रं संहरामि नमः ।
ओं ह्रूं हः फट् ह्रूं(4) रूपतन्मात्रं संहरामि नमः ॥
ओं ह्रूं हः फट् ह्रूं(5) स्पर्शतन्मात्रं संहरामि नमः ।

---

1 त्रिसूत्राणि च भद्रके इति घ, चिह्नितपुस्तकपाठः ।
2 ओं हूं हः फट् हूमिति ग, चिह्नितपुस्तकपाठः ओं ह्रां हः फट् ह्रूमिति ङ, चिह्नितपुस्तकपाठः ।
2 ओं ह्रीं हः फट् ह्रूनिति ङ, चिह्नितपुस्तकपाठः ।
3 ओं ह्रां हः ह्रूं इति ग, चिह्नितपुस्तकपाठः ओं ह्रां हः फट् ह्रीमिति ङ, चिह्नितपुस्तकपाठः ।
4 ओं ह्रां हः फट् इति ग, चिह्नितपुस्तकपाठः ।

ओं ह्रूं हः फट् ह्रूं(1) शब्दतन्मात्रं संहरामि नमः ॥
पञ्चोद्घातैर्गन्धतन्मात्ररूपं भूमिमण्डलं । 21ab
चतुरस्रञ्च पीतञ्च कठिनं वज्रलाञ्छितम् ॥ 21cd
इन्द्राधिदैवतं पादयुग्ममध्यगतं स्मरेत् । 22ab
शुद्धञ्च रसतन्मात्रं प्रविलिप्याथ संहरेत् ॥ 22cd
रसमात्ररूपमात्रे क्रमेणानेन पूजकः ॥ 22॥ 22ef
ओं ह्रीं हः फट् ह्रूं(2) रसतन्मात्रं संहरामि नमः ।
ओं ह्रूं हः फट्(3) रूपतन्मात्रं संहरामि नमः ।
ओं ह्रीं हः फट् ह्रूं स्पर्शतन्मात्रं संहरामि नमः ।
ओं ह्रीं हः फट् ह्रूं(4) शब्दतन्मात्रं संहरामि नमः ।
जानुनाभिमध्यगतं[5] श्वेतं वै पद्मलाञ्छितं । 23ab
शुक्लवर्णं चार्द्धचन्द्रं ध्यायेद्वरुणदैवतं ॥ 23cd
चतुर्भिश्च तदुद्घातैः शुद्धं तद्रसमात्रकं । 24ab
संहरेद्रूपतन्मात्रे रूपमात्रे च संहरेत् ॥ 24cd
ओं ह्रृ हः फट् ह्रृ रूपतन्मात्रं संहरामि नमः ।
ओं ह्रृ हः फट् ह्रृ स्पर्शतन्मात्रं संहरामि नमः ।
ओं ह्रृ हः फट् ह्रृ शब्दतन्मात्रं संहरामि नमः ।
इति त्रिभिस्तदुद्घातैस्त्रिकोणं वह्निमण्डलम् । 25ab
नाभिकण्ठमध्यगतं रक्तं स्वस्तिकलाञ्छितम् ॥ 25cd
ध्यात्वानलाधिदैवन्तच्छुद्धं स्पर्शे लयं नयत् । 26ab

1 ओं ह्रां हः फट् हमिति ग, चिह्नितपुस्तकपाठः ।
2 ओं ह्रीं फट् हमिति ग, चिह्नितपुस्तकपाठः ओं ह्रूं हः फट् हूमिति ङ, चिह्नितपुस्तकपाठः ।
3 ओं ह्रीं हः फट् ह्रूं इति ङ, चिह्नितपुस्तकपाठः ।
4 ओं ह्रं हः फट् ह्रमिति ङ, चिह्नितपुस्तकपाठः ।
5 पद्मासनमध्यगतमिति ङ, चिह्नितपुस्तकपाठः ।

ओं ह्रौं हः फट् ह्रूं(1) स्पर्शतन्मात्रं संहरामि नमः ।
ओं ह्रौं हः फट् ह्रूं(2) शब्दतन्मात्रं संहरामि नमः ॥
कण्ठनासामध्यगतं वृत्तं वै वायुमण्डलम् ॥ 26cd
द्विरुद्घातैर्धूम्रवर्णं ध्यायेच्छुद्धेन्दुलाञ्छितम् । 27ab
स्पर्शमात्रं शब्दमात्रैः संहरेद्ध्यानयोगतः ॥ 27cd
ओं ह्रौं हः फट् ह्रूं शब्दतन्मात्रं संहरामि नमः ।
एकोद्घातेन चाकाशं शुद्धस्फटिकसन्निभम् । 28ab
नासापुटशिखान्तस्थमाकाशमुपसंहरेत् ॥ 28cd
शोषणाद्यैर्देहशुद्धिं कुर्यादेवं क्रमात्ततः । 29ab
शुष्कं कलेवरं ध्यायेत् पादाद्यञ्च शिखान्तकम् ॥ 29cd
यं वीजेन वं वीजेन ज्वालामालासमायुतम्[3] । 30ab
देहं रमित्यनेनैव ब्रह्मरन्ध्राद्विनिर्गतम् ॥ 30cd
विन्दुन्ध्यात्वा चामृतस्य तेन भस्मकलेवरम् । 31ab
सम्प्लावयेल्लमित्यस्मात् देहं सम्पाद्य दिव्यकम् ॥ 31cd
न्यासं कृत्वा करे देहे मानसं यागमाचरेत् । 32ab
विष्णुं साङ्गं हृदि पद्मे मानसैः कुसुमादिभिः ॥ 32cd
मूलमन्त्रेण देवेशम्प्रार्च्चयेद्भुक्तिमुक्तिदम् । 33ab
स्वागतं देवदेवेश सन्निधौ भव केशव ॥ 33cd
गृहाण मानसीं पूजां यथार्थं[4] परिभाविताम् । 34ab
आधारशक्तिः कूर्माथ पूज्योनन्तो मही ततः ॥ 34cd
मध्येग्न्यादौ च धर्माद्या अधर्मादीन्द्रमुख्यगम्[5] । 35ab

---

1 ओं क्षौं हः फट् क्रूमिति ङ, चिह्नितपुस्तकपाठः ।
2 ओं क्षौं हः फट् क्रूमिति ङ, चिह्नितपुस्तकपाठः ।
3 ज्वालामालासमप्रभमिति ङ, चिह्नितपुस्तकपाठः ।
4 यथास्वमिति ख, चिह्नितपुस्तकपाठः ।
5 धर्म्मादीनिन्द्रादौ विपरीतकानिति ङ, चिह्नितपुस्तकपाठः ।

सत्त्वादि मध्ये पद्मञ्च मायाविद्याख्यतत्त्वके ॥ 35cd
कालतत्त्वञ्च सूर्यादिमण्डलं पक्षिराजकः । 36ab
मध्ये ततश्च वायव्यादीशान्ता गुरुपङ्क्तिकाः ॥ 36cd
गणः सरस्वती पूज्या[1] नारदो नलकूवरः । 37ab
गुरुर्गुरुपादुका च परो गुरुश्च पादुका ॥ 37cd
पूर्वसिद्धाः परसिद्धाः केशरेषु च शक्तयः । 38ab
लक्ष्मीः सरस्वती प्रीतिः कीर्त्तिः शान्तिश्च कान्तिका ॥ 38cd
पुष्टिस्तुष्टिर्म्महेन्द्राद्या मध्ये वाचाहितो हरिः । 39ab
धृतिः श्रीरतिकान्त्याद्या मूलेन स्थापितो ऽच्युतः ॥ 39cd
ओं अभिमुखो भवेति प्रार्थ्य सन्निहितो भव । 40ab
विन्यस्यार्घ्यादिकं दत्वा गन्धाद्यैर्मूलतो यजेत् ॥ 40cd
ओं भीषय भीषय हृत् शिरस्त्रासय वै पुनः । 41ab
मर्द्दय मर्द्दय शिखा अग्न्यादौ शस्त्रतोस्त्रकं ॥ 41cd
रक्ष रक्ष प्रध्वंसय प्रध्वंसय कवचाय[2] नमस्ततः । 42ab
ओं ह्रूं[3] फट् अस्त्राय नमो मूलवीजेन चाङ्गकं ॥ 42cd
पूर्व्वदक्षाप्यसौम्येषु मूर्त्त्यावरणमर्च्चयेत् । 43ab
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ 43cd
अग्न्यादौ श्रीधृतिरतिकान्तयो मूर्त्तयो हरेः । 44ab
शङ्खचक्रगदापद्ममग्न्यादौ पूर्व्वकादिकं ॥ 44cd
शार्ङ्गञ्च मुषलं खड्गं वनमालाञ्च तद्वहिः । 45ab
इन्द्राद्याश्च तयानन्तो नैर्ऋत्यां वरुणस्ततः ॥ 45cd
ब्रह्मेन्द्रेशानयोर्मध्ये अस्त्रावरणकं वहिः । 46ab
ऐरावतस्ततश्छागो महिषो वानरो झषः ॥ 46cd

1 गणश्च तासु पूज्यो ऽथ इति ङ, चिह्नितपुस्तकपाठः ।
2 रक्ष रक्ष प्रध्वंसय कवचायेति ङ, चिह्नितपुस्तकपाठः ।
3 ओं ह्रीमिति ख, चिह्नितपुस्तकपाठः ।

मृगः शशो ऽथ वृषभः कूर्म्मो हंसस्ततो वहिः । 47ab
पृश्निगर्भः कुमुदाद्या द्वारपाला द्वयं द्वयं ॥ 47cd
पूर्व्वाद्युत्तरद्वारान्तं हरिं नत्वा बलिं वहिः । 48ab
विष्णुपार्षदेभ्यो नमो बलिपीठे बलिं ददेत् ॥ 48cd
विश्वाय विश्वक्सेनात्मने ईशानके यजेत् । 49ab
देवस्य दक्षिणे हस्ते रक्षासूत्रञ्च बन्धयेत् ॥ 49cd
संवत्सरकृतार्चायाः सम्पूर्णफलदायिने । 50ab
पवित्रारोहणायेदं कौतुकं धारय ओं नमः ॥ 50cd
उपवासादिनियमं कुर्याद्वै देवसन्निधौ । 51ab
उपवासादिनियतो देवं सन्तोषयाम्यहम् ॥ 51cd
कामक्रोधादयः सर्वे मा मे तिष्ठन्तु सर्वथा । 52ab
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ॥ 52cd
यजमानो ह्यशक्तश्चेत् कुर्यान्नक्तादिकं व्रती । 53ab
हुत्वा विसर्जयेत् स्तुत्वा श्रीकरन्नित्यपूजनम् ॥ 53cd
ओं ह्रीं[1] श्रीं श्रीधराय त्रैलोक्यमोहनाय नमः ॥ 53॥ 53ef

इत्यादिमहापुराणे आग्नेये पवित्रारोहणे श्रीधरनित्यपूजाकथनं नाम त्रयस्त्रिंशोध्यायः ।

## 34

### अथ चतुस्त्रिंशो ऽध्यायः ।

होमादिविधिः ।
अग्निरुवाच ।
विशेदनेन मन्त्रेण यागस्थानञ्च भूषयेत् । 1ab
नमो ब्रह्मण्यदेवाय श्रीधरायाव्ययात्मने ॥ 1cd

1 ओं क्लीमिति ख, चिह्नितपुस्तकपाठः ।

ऋग्यजुःसामरूपाय शब्ददेहाय । 2ab
विलिख्य मण्डलं सायं यागद्रव्यादि चाहरेत् ॥ 2cd
प्रक्षालितकराङ्घ्रिः सन् विन्यस्यार्घ्यकरो नरः । 3ab
अर्घ्याद्भिस्तु शिरः प्रोक्ष्य द्वारदेशादिकं यथा ॥ 3cd
आरभेद् द्वारयागञ्च तोरणेशान् प्रपूजयेत् । 4ab
अश्वत्थोदुम्बरवटप्लक्षाः पूर्वादिगा नगाः ॥ 4cd
ऋगिन्द्रशोभनं प्राच्यां यजुर्यमसुभद्रकम् । 5ab
सामापश्च सुधन्वाख्यं सोमाथर्वसुहोत्रकम् ॥ 5cd
तोरणान्तः पताकाश्च कुमुदाद्या घटद्वयम् । 6ab
द्वारि द्वारि स्वनाम्नार्च्याः पूर्वे पूर्णश्च पुष्करः ॥ 6cd
आनन्दनन्दनौ दक्षे वीरसेनः सुषेणकः । 7ab
सम्भवप्रभवौ सौम्ये द्वारपांश्चैव पूजयेत् ॥ 7cd
अस्त्रजप्तपुष्पक्षेपाद्विघ्नानुत्सार्य संविशेत् । 8ab
भूतशुद्धिं विधायाथ विन्यस्य कृतमुद्रवः ॥ 8cd
फट्कारान्तां शिखां जप्त्वा सर्षपान् दिक्षु निक्षिपेत् । 9ab
वासुदेवेन गोमूत्रं सङ्कर्षणेन गोमयम् ॥ 9cd
प्रद्युम्नेन पयस्तज्जात् दधि नारायणाद् घृतम् । 10ab
एकद्वित्र्यादिवाराणि घृताद्वै भागतोधिकम् ॥ 10cd
घृतपात्रे तदेकत्र पञ्चगव्यमुदाहृतम् । 11ab
मण्डपप्रोक्षणायैकञ्चापरम्प्राशनाय च ॥ 11cd
आनीय दशकुम्भेषु इन्द्राद्यान् लोकपान् यजेत् । 12ab
पूज्याज्ञां श्रावयेत्तांश्च स्थातव्यं चाज्ञया हरेः ॥ 12cd
यागद्रव्यादि संरक्ष्य विकिरान् विकिरेत्ततः । 13ab
मूलाष्टशतसञ्जप्तान् कुशकूर्चान् हरेश्च तान् ॥ 13cd
ऐशान्यां दिशि तत्रस्थं स्थाप्यं कुम्भञ्च वर्द्धनीं । 14ab

कुम्भे साङ्गं हरिं प्राच्र्य वर्द्धन्यामस्त्रमर्चयेत् ॥ 14cd
प्रदक्षिणं यागगृहं वर्द्धन्याच्छिन्नधारया । 15ab
सिञ्चन्नयेत्ततः कुम्भं पूजयेच्च स्थिरासने ॥ 15cd
सपञ्चरत्नवस्त्राढ्यकुम्भे गन्धादिभिर्हरिम् । 16ab
वर्द्धन्यां हेमगर्भायां यजेदस्त्रञ्च वामतः ॥ 16cd
तत्समीपे वास्तुलक्ष्मीं भूविनायकमर्च्चयेत् । 17ab
स्नपनं कल्पयेद्विष्णोः सङ्क्रान्त्यादौ तथैव च ॥ 17cd
पूर्णकुम्भान् नव स्थाप्य नवकोणेषु निर्व्रणान् । 18ab
पाद्यमर्घ्यमाचमनीयं पञ्चगव्यञ्च निःक्षिपेत् ॥ 18cd
पूर्वादिकलसेग्न्यादौ पञ्चामृतजलादिकम् । 19ab
दधि क्षीरं मधूष्णीदं पाद्यं स्याच्चतुरङ्गकम् ॥ 19cd
पद्मश्यामाकदूर्वाश्च विष्णुपत्नी च पाद्यकम् । 20ab
तथाष्टाङ्गार्घ्यमाख्यातं यवगन्धफलाक्षतम् ॥ 20cd
कुशाः सिद्धार्थपुष्पानि तिला द्रव्याणि चार्हणम्[1] । 21ab
लवङ्गकक्कोलयुतं दद्यादाचमनीयकम् ॥ 21cd
स्नापयेन्मूलमन्त्रेण देवं पञ्चामृतैरपि । 22ab
शुद्धोदं मध्यकुम्भेन देवमूर्द्ध्नि विनिःक्षिपेत् ॥ 22cd
कलशान्निःसृतं तोयं कूर्चाग्रं[2] संस्पृशेन्नरः । 23ab
शुद्धोदकेन पाद्यञ्च अर्घ्यमाचमनन्ददेत् ॥ 23cd
परिमृज्य पटेनाङ्गं सवस्त्रं मण्डलं नयेत् । 24ab
तत्राभ्यर्च्याचरेद्धोमं कुण्डादौ प्राणसंयमी ॥ 24cd
प्रक्षाल्य हस्तौ रेखाश्च तिस्रः पूर्वाग्रगामिनीः । 25ab

1 चार्हणा इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 दूर्वाग्रमिति ङ, चिह्नितपुस्तकपाठः ।

दक्षिणादुत्तरान्तराश्च तिस्रश्चैवोत्तराग्रगाः ॥ 25cd
अर्घ्योदकेन सम्प्रोक्ष्य योनिमुद्राम्प्रदर्शयेत् । 26ab
ध्यात्वाग्निरूपञ्चाग्निन्तु योन्यां कुण्डे क्षिपेन्नरः ॥ 26cd
पात्राण्यासादयेत् पश्चाद्दर्भस्रुक्स्रुवकादिभिः । 27ab
बाहुमात्राः परिधय इध्मव्रश्चनमेव च ॥ 27cd
प्रणीता प्रोक्षणीपात्रमाज्यस्थाली घृतादिकम् । 28ab
प्रस्थद्वयं तण्डुलानां युग्मं युग्ममधोमुखम् ॥ 28cd
प्रणीताप्रोक्षणीपात्रे न्यसेत् प्रागग्रगं कुशम् । 29ab
अद्भिः पूर्य्यप्रणीतान्तु ध्यात्वा देवं प्रपूज्य च ॥ 29cd
प्रणीतां स्थापयेदग्रे द्रव्याणाञ्चैव मध्यतः । 30ab
प्रोक्षणीमद्भिः सम्पूर्य्य प्राच्र्य दक्षे तु विन्यसेत् ॥ 30cd
चरुञ्च श्रपयेदग्नौ ब्रह्माणं दक्षिणे न्यसेत् । 31ab
कुशानास्तीर्य्य पूर्वादौ परिधीन् स्थापयेत्ततः ॥ 31cd
वैष्णवीकरणं कुर्याद् गर्भाधानादिना नरः । 32ab
गर्भाधानं पुंसवनं सीमन्तोन्नयनञ्जनिः ॥ 32cd
नामादिसमावर्त्तनान्तं जुहुयादष्ट चाहुतीः । 33ab
पूर्णाहुतीः प्रतिकर्म्म श्रुचा स्रुवसुयुक्तया ॥ 33cd
कुण्डमध्ये ऋतुमतीं लक्ष्मीं सञ्चिन्त्य होमयेत् । 34ab
कुण्डलक्ष्मीः समाख्याता प्रकृतिस्त्रिगुणात्मिका ॥ 34cd
सा योनिः सर्वभूतानां विद्यामन्त्रगणस्य च । 35ab
विमुक्तेः कारणं वह्निः परमात्मा च मुक्तिदः ॥ 35cd
प्राच्यां शिरः समाख्यातं बाहू कोणे व्यवस्थितौ । 36ab
ईशानाग्नेयकोणे तु जङ्घे वायव्यनैर्ऋते ॥ 36cd
उदरं कुण्डमित्युक्तं योनिर्योनिर्विधीयते । 37ab
गुणत्रयं मेखलाःस्युर्ध्यात्वैवं समिधो दश ॥ 37cd

पञ्चाधिकांस्तु जुहुयात् प्रणवान्मुष्टिमुद्रया[1] । 38ab
पुनराघारौ जुहुयाद्वाय्वग्न्यन्तं ततः श्रपेत् ॥ 38cd
ईशान्तं मूलमन्त्रेण आज्यभागौ तु होमयेत् । 39ab
उत्तरे द्वादशान्तेन दक्षिणे तेन मध्यतः ॥ 39cd
व्याहृत्या पद्ममध्यस्थं ध्यायेद्वह्निन्तु संस्कृतम् । 40ab
वैष्णवं सप्तजिह्वं च सूर्यकोटिसमप्रभम् ॥ 40cd
चन्द्रवक्त्रञ्च[2] सूर्याक्षं जुहुयाच्छतमष्ट च । 41ab
तदर्द्धञ्चाष्ट मूलेन अङ्गानाञ्च दशांशतः ॥ 41cd

इत्यादिमहापुराणे आग्नेये अग्निकार्यकथनं नाम चतुर्त्रिंशो ऽध्यायः ॥

## 35

### अथ पञ्चत्रिंशो ऽध्यायः ।

पवित्राधिवासनादिविधिः ।
अग्निरुवाच ।
सम्पाताहुतिनासिच्य[2] पवित्राण्यधिवासयेत् । 1ab
नृसिंहमन्त्रजप्तानि गुप्तान्यस्त्रेण तानि तु ॥ 1cd
वस्त्रसंवेष्टितान्येव पात्रस्थान्यभिमन्त्रयेत् । 2ab
विल्वाद्यद्भिः प्रोक्षितानि मन्त्रेण चैकधा द्विधा[4] ॥ 2cd
कुम्भपार्श्वे तु संस्थाप्य रक्षां विज्ञाप्य देशिकः । 3ab
दन्तकाष्ठञ्चामलकं पूर्वे सङ्कर्षणेन तु ॥ 3cd
प्रद्युम्नेन भस्मतिलान् दक्षे गोमयमृत्तिकां । 4ab

---

1 स्वस्तिमुद्रयेति ङ, चिह्नितपुस्तकपाठः ।
2 पञ्चवक्त्रञ्चएति ङ, चिह्नितपुस्तकपाठः ।
3 सङ्घाताहुतिना ऽऽसिच्येति ङ, चिह्नितपुस्तकपाठः ।
4 मन्त्राणां चैकधा द्विधेति ख, चिह्निनतपुस्तकपाठः ।

वारुणेन चानिरुद्धेन सौम्ये नारायणेन च ॥ 4cd
दर्भोदकञ्चाथ हृदा अग्नौ कुङ्कुमरोचनं । 5ab
ऐशान्यां शिरसा धूपं शिखया नैर्ऋतेप्यथ ॥ 5cd
मूलपुष्पाणि दिव्यानि कवचेनाथ वायवे । 6ab
चन्दनाम्ब्वक्षतदधिदूर्वाश्च पुटिकास्थिताः ॥ 6cd
गृहं त्रिसूत्रेणावेष्ट्य पुनः सिद्धार्थकान् क्षिपेत् । 7ab
दद्यात्पूजाक्रमेणाथ स्वैः स्वैर्गन्धपवित्रकं ॥ 7cd
मन्त्रैर्वै द्वारपादिभ्यो विष्णुकुम्भे त्वनेन च । 8ab
विष्णुतेजोभवं रम्यं सर्वपातकनाशनं ॥ 8cd
सर्वकामप्रदं देवं तवाङ्गे धारयाम्यहं । 9ab
सम्पूज्य धूपदीपाद्यैर्व्रजेद्वारसमीपतः ॥ 9cd
गन्धपुष्पाक्षतोपेतं पवित्रञ्चाखिलेर्प्पयेत् [1] । 10ab
पवित्रं वैष्णवं तेजो महापातकनाशनं ॥ 10cd
धर्म्मकामार्थसिद्ध्यर्थं स्वकेङ्गे धारयाम्यहं । 11ab
आसने परिवारादौ गुरौ दद्यात् पवित्रकं ॥ 11cd
गन्धादिभिः समभ्यर्च्य गन्धपुष्पाक्षतादिमत् । 12ab
विष्णुतेजोभवेत्यादिमूलेन हरयेर्पयेत् ॥ 12cd
वह्निस्थाय ततो दत्वा देवं सम्प्रार्थयेत्ततः । 13ab
क्षीरोदधिमहानागशय्यावस्थितविग्रह ॥ 13cd
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव केशव । 14ab
इन्द्रादिभस्ततो दत्वा विष्णुपार्षदके बलिं ॥ 14cd
ततो देवाग्रतः कुम्भं वासोयुगसमन्वितं । 15ab
रोचनाचन्द्रकाश्मीरगन्धाद्युदकसंयुतं ॥ 15cd
गन्धपुष्पादिनाभूष्य मूलमन्त्रेण पूजयेत् । 16ab

1 पवित्रं पार्श्वतो नयेदिति ङ, चिह्नितपुस्तकपाठः ।

मण्डपाद्बहिरागत्य विलिप्ते मण्डलत्रये ॥ 16cd
पञ्चगव्यञ्चरुन्दन्तकाष्ठञ्चैव क्रमाद्भवेत् । 17ab
पुराणश्रवणं स्तोत्रं पठन् जागरणं निशि ॥ 17cd
परप्रेषकबालानां स्त्रीणां भोगभुजां तथा । 18ab
सद्योधिवासनं कुर्य्याद्विना गन्धपवित्रकं ॥ 18cd

इत्यादिमहापुराणे आग्नेये पवित्राधिवासनं नाम पञ्चत्रिंशो ऽध्यायः ॥

# 36

## अथ षट्त्रिंशो ऽध्यायः ।

पवित्रारोपणविधानं ।
अग्निरुवाच ।
प्रातःस्नानादिं कृत्वा द्वारपालान्[1] प्रपूज्य च । 1ab
प्रविश्य गुप्ते देशे च समाकृष्याथ धारयेत् ॥ 1cd
पूर्वाधिवासितं द्रव्यं वस्त्राभरणगन्धकं । 2ab
निरस्य सर्वनिर्म्माल्यं देवं संस्थाप्य पूजयेत् ॥ 2cd
पञ्चामृतैः कषायैश्च शुद्धगन्धोदकैस्ततः । 3ab
पूर्वाधिवासितं दद्याद्वस्त्रं गन्धं च पुष्पकं ॥ 3cd
अग्नौ हुत्वा नित्यवच्च देवं सम्प्रार्थयेन्नमेत्[2] । 4ab
समर्प्य कर्म्म देवाय पूजां नैमित्तिकीं चरेत् ॥ 4cd
द्वारपालविष्णुकुम्भवर्द्धनीः प्रार्थयेद्धरिं । 5ab
अतो देवेति मन्त्रेण मूलमन्त्रेण कुम्भके ॥ 5cd
कृष्ण कृष्ण नमस्तुभ्यं गृह्णीष्वेदं पवित्रकं । 6ab

1 लोकपालानिति ख, चिह्नितपुस्तकपाठः ।
2 प्रार्थयेन्नयसेदिति ग, चिह्नितपुस्तकपाठः ।

पवित्रीकरणार्थाय वर्षपूजाफलप्रदं ॥ 6cd
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं । 7ab
शुद्धो भवाम्यहं देव त्वत्प्रसादात् सुरेश्वर ॥ 7cd
पवित्रञ्च हृदाद्यैस्तु आत्मानमभिषिच्य च । 8ab
विष्णुकुम्भञ्च सम्प्रोक्ष्य व्रजेद्देवसमीपतः ॥ 8cd
पवित्रमात्मने दद्याद्रक्षाबन्धं विसृज्य च[1] । 9ab
गृहाण ब्रह्मसूत्रञ्च यन्मया कल्पितं प्रभो ॥ 9cd
कर्म्मणां पूरणार्थाय यथा दोषो न मे भवेत् । 10ab
द्वारपालासनगुरुमुख्यानाञ्च पवित्रकम् ॥ 10cd
कनिष्टादि च देवाय वनमालाञ्च मूलतः । 11ab
हृदादिविश्वक्सेनान्ते पवित्राणि समर्पयेत् ॥ 11cd
वह्नौ हुत्वाग्निवर्त्तिभ्यो विष्ण्वादिभ्यः पवित्रकम् । 12ab
प्रार्च्य पूर्णाहुतिं दद्यात् प्रायश्चित्ताय मूलतः ॥ 12cd
अष्टोत्तरशतं वापि पञ्चोपनिषदैस्ततः । 13ab
मणिविद्रुममालाभिर्म्मन्दारकुसुमादिभिः ॥ 13cd
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज । 14ab
वनमाला यथा देव कौस्तुभं सततं हृदि ॥ 14cd
तद्वत् पवित्रतन्तूंश्च पूजां च हृदये वह[2] । 15ab
कामतो ऽकामतो वापि यत्कृतं नियमार्च्चने ॥ 15cd
विधिना विघ्नलोपेन परिपूर्णं तदस्तु मे । 16ab
प्रार्थ्य नत्वा क्षमाप्याथ पवित्रं मस्तके ऽर्प्पयेत् ॥ 16cd
दत्वा बलिं दक्षिणाभिर्वैष्णवन्तोषयेद्गुरुं । 17ab

1 रक्षाबन्धं विमुच्य चेति ख, चिह्नितपुस्तकपाठः । पवित्रं मूलतो दद्याद्रक्षार्थं तद्विसृज्य चेति ङ, चिह्नितपुस्तकपाठः ।

2 पवित्रकं त्वञ्च पूजायां हृदये वहेति ङ, चिह्नितपुस्तकपाठः ।

विप्रान् भोजनवस्त्राद्यैर्द्दिवसं पक्षमेव वा ॥ 17cd
पवित्रं स्नानकाले च अवतार्य्य समर्प्पयेत् । 18ab
अनिवारितमन्नाद्यं दद्याद्भुञ्जीथ च स्वयं ॥ 18cd
विसर्जने ऽह्नि सम्पूज्य पवित्राणि विसर्ज्जयेत् । 19ab
सांवत्सरीमिमां पूजां सम्पाद्य विधिवन्मम ॥ 19cd
व्रज पवित्रकेदानीं विष्णुलोकं विसर्ज्जितः । 20ab
मध्ये सोमेशयोः प्राच्यर्य विष्वक्सेनं हि तस्य च ॥ 20cd
पवित्राणि समभ्यर्च्य ब्राह्मणाय समर्प्पयेत् । 21ab
यावन्तस्तन्तवस्तस्मिन् पवित्रे परिकल्पिताः ॥ 21cd
तावद्युगसहस्राणि विष्णुलोके महीयते । 22ab
कुलानां शतमुद्धृत्य दश पूर्वान् दशापरान् । 22cd
विष्णुलोके तु संस्थाप्य स्वयं मुक्तिमवाप्नुयात् ॥ 22॥ 22ef

इत्यादिमहापुराणे आग्नेये विष्णुपवित्रारोहणं नाम षट्त्रिंशो ऽध्यायः ॥

## 37

### अथ सप्तत्रिंशो ऽध्यायः ।

सर्वदेवपवित्रारोहणविधिः ।
अग्निरुवाच ।
सङ्क्षेपात् सर्वदेवानां पवित्रारोहणं[1] शृणु । 1ab
पवित्रं सर्वलक्ष्म स्यात् खरसानलगं त्वपि ॥ 1cd
जगद्योने समागच्छ परिवारगणैः सह । 2ab
निमन्त्रयाम्यहं प्रातर्द्दद्यान्तुभ्यं पवित्रकं ॥ । 2cd
जगत्सृजे[2] नमस्तुभ्यं गृह्णीष्वेदं पवित्रकं । 3ab

1 पवित्रारोपणमिति ख, चिह्नितपुस्तकपाठः ।
2 जगत्सूते इति ङ, चिह्नितपुस्तकपाठः ।

पवित्रीकरणार्थाय वर्षपूजाफलप्रदं ॥ 3cd
शिवदेव नमस्तुभ्यं गृह्णीष्वेदं पवित्रकं । 4ab
मणिविद्रुममालाभिर्म्मन्दारकुसुमादिभिः ॥ 4cd
इयं सांवत्सरी पूजा तवास्तु वेदवित्पते । 5ab
सांवत्सरीमिमां पूजां सम्पाद्य विधिवन्मम ॥ 5cd
व्रज पवित्रकेदानीं स्वर्गलोकं विसर्ज्जितः । 6ab
सूर्य्यदेव नमस्तुभ्यं गृह्णीष्वेदं पवित्रकं ॥ 6cd
पवित्रीकरणार्थाय वर्षपूजाफलप्रदं । 7ab
शिवदेव नमस्तुभ्यं गृह्णीष्वेदं पवित्रकं ॥ 7cd
पवित्रीकरणार्थाय वर्षपूजाफलप्रदं । 8ab
वाणेश्वर[1] नमस्तुभ्यं गृह्णीष्वेदं पवित्रकं ॥ 8cd
पवित्रीकरणार्थाय वर्षपूजाफलप्रदं । 9ab
शक्तिदेव नमस्तुभ्यं गृह्णीष्वेदं पवित्रकं ॥ 9cd
पवित्रीकरणार्थाय वर्षपूजाफलप्रदं । 10ab
नारायणमयं सूत्रमनिरुद्धमयं वरं[2] ॥ 10cd
धनधान्यायुरारोग्यप्रदं सम्प्रददामि ते । 11ab
कामदेवमयं सूत्रं सङ्कर्षणमयं वरं ॥ 11cd
विद्यासन्ततिसौभाग्यप्रदं सम्प्रददामि ते । 12ab
वासुदेवमयं सूत्रं धर्म्मकामार्थमोक्षदं ॥ 12cd
संसारसागरोत्तारकारणं प्रददामि ते । 13ab
विश्वरूपमयं सूत्रं सर्व्वदं पापनाशनं ॥ 13cd

1 गणेश्वर इति ग, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।
2 परमिति ङ, चिह्नितपुस्तकपाठः ।

अतीतानागतकुलसमुद्धारं ददामि ते । 14ab
कनिष्ठादीनि चत्वारि मनुभिस्तु क्रमाद्ददे ॥ 14cd

इत्यादिमहापुराणे आग्नेये सङ्क्षेपपवित्रारोहणं नाम सप्तत्रिंशो ऽध्यायः ॥

# 38

## अथ अष्टत्रिंशो ऽध्यायः ।

देवालयनिर्म्माणफलं ।
अग्निरुवाच ।
वासुदेवाद्यालयस्य कृतौ वक्ष्ये फलादिकं । 1ab
चिकीर्षोर्द्देवधामादि सहस्रजनिपापनुत् ॥ 1cd
मनसा सद्मकर्तॄणां शतजन्माघनाशनं । 2ab
येनुमोदन्ति कृष्णस्य क्रियमाणं नरा गृहं[1] ॥ 2cd
तेपि पापैर्व्विनिर्मुक्ताः प्रयान्त्यच्युतलोकतां । 3ab
समतीतं भविष्यञ्च कुलानामयुतं नरः ॥ 3cd
विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहं । 4ab
वसन्ति[2] पितरो दृष्ट्वा[3] विष्णुलोके ह्यलङ्कृताः ॥ 4cd
विमुक्ता नारकैर्दुःखैः कर्त्तुः कृष्णस्य मन्दिरं । 5ab
ब्रह्महत्यादिपापौघघातकं देवतालयं ॥ 5cd
फलं यन्नाप्यते यज्ञैर्द्धाम कृत्वा तदाप्यते । 6ab
देवागारे कृते सर्व्वतीर्थस्नानफलं लभेत् ॥ 6cd
देवाद्यर्थे हतानाञ्च रणे यत्तत्फलादिकं । 7ab
शाठ्येन पांशुना वापि कृतं धाम च नाकदं ॥ 7cd

---

1 गृहादिकं ग, घ, चिह्नितपुस्तकद्वयपाठः ।
2 नन्दन्ति इति ख, ग, चिह्नितपुस्तकद्वयपाठः । वल्गन्ति इति ङ, चिह्नितपुस्तकपाठः ।
3 हृष्टा इति ख, ग, चिह्नितपुस्तकद्वयपाठः ।

एकायतनकृत् स्वर्गी त्र्यगारी ब्रह्मलोकभाक् । 8ab
पञ्चागारी शम्भुलोकमष्टागाराद्धरौ स्थितिः ॥ 8cd
षोडशालयकारी तु[1] भुक्तिमुक्तिमवाप्नुयात् । 9ab
कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहं ॥ 9cd
स्वर्गं च वैष्णवं लोकं मोक्षमाप्नोति च क्रमात् । 10ab
श्रेष्ठमायतनं विष्णोः कृत्वा यद्धनवान् लभेत् ॥ 10cd
कनिष्ठेनैव तत् पुण्यं प्राप्नोत्यधनवान्नरः । 11ab
समुत्पाद्य धनं कृत्या स्वल्पेनापि[2] सुरालयं ॥ 11cd
कारयित्वा हरेः पुण्यं सम्प्राप्नोत्यधिकं वरं । 12ab
लक्षेणाथ सहस्रेण शतेनार्द्धेन वा हरेः ॥ 12cd
कारयन् भवनं याति यत्रास्ते गरुडध्वजः । 13ab
बाल्ये तु क्रीड़माणा ये पांशुभिर्भवनं हरेः ॥ 13cd
वासुदेवस्य कुर्व्वन्ति तेपि तल्लोकगामिनः । 14ab
तीर्थे चायतने पुण्ये सद्धक्षेत्रे तथाष्टमे ॥ 14cd
कर्त्तुरायतनं विष्णोर्यथोक्तात्त्रिगुणं फलं । 15ab
बन्धूकपुष्पविन्यासैः सुधापङ्केन वैष्णवं ॥ 15cd
ये विलिम्पन्ति भवनं ते यान्ति भगवत्पुरं । 16ab
पतितं पतमानन्तु तथार्द्धपतितं नरः ॥ 16cd
समुद्धृत्य हरेर्द्धाम प्राप्नोति द्विगुणं फलं । 17ab
पतितस्य तु यः कर्त्ता पतितस्य च रक्षिता ॥ 17cd
विष्णोरायतनस्येह नरो विष्णुलोकभाक् । 18ab
इष्टकानिचयस्तिष्ठेद् यावदायतने हरेः ॥ 18cd
सकुलस्तस्य वै कर्त्ता विष्णुलोके महीयते । 19ab

1 षोडशागारकारी तु इति ग, चिह्नितपुस्तकपाठः ।
2 स्वल्पेनैवेति ख, चिह्नितपुस्तकपाठः ।

स एव पुण्यवान् पूज्य इह लोके परत्र च ॥ 19cd
कृष्णस्य वासुदेवस्य यः कारयति केतनं । 20ab
जातः स एव सुकृती कुलन्तेनैव पावितं ॥ 20cd
विष्णुरुद्रार्कदेव्यादेर्गृहकर्त्ता स कीर्त्तिभाक् । 21ab
किं तस्य वित्तनिचयैर्मूढस्य परिरक्षिणः ॥ 21cd
दुःखार्ज्जितैर्यः कृष्णस्य न कारयति केतनं । 22ab
नोपभोग्यं धनं यस्य पितृविप्रदिवौकसां ॥ 22cd
नोपभोगाय बन्धूनां व्यर्थस्तस्य धनागमः । 23ab
यथा धृवो नृणां मृत्युर्वित्तनाशस्तथा धृवः ॥ 23cd
मूढस्तत्रा ऽनुबध्नाति जीवितेथ चले धने । 24ab
यदा वित्तं न दानाय नोपभोगाय देहिनां ॥ 24cd
नापि कीर्त्यै न धर्म्मार्थं तस्य स्वाम्येथ को गुणः । 25ab
तस्माद्वित्तं समासाद्य दैवाद्वा पौरुषादथ ॥ 25cd
दद्यात् सम्यग् द्विजाग्र्येभ्यः कीर्त्तनानि च कारयेत् । 26ab
दानेभ्यश्चाधिकं यस्मात् कीर्त्तनेभ्यो वरं यतः ॥ 26cd
अतस्तत्कारयेद्धीमान् विष्ण्वादेर्म्मन्दिरादिकं । 27ab
विनिवेश्य हरेर्द्धाम भक्तिमद्भिर्न्नरोत्तमैः ॥ 27cd
निवेशितं भवेत् कृत्स्नं त्रैलोक्यं सचराचरं । 28ab
भूतं भवयं भविष्यञ्च स्थूलं सूक्ष्मं तथेतरत्[1] ॥ 28cd
आब्रह्मस्तम्बपर्य्यन्तं सर्व्वं विष्णोः समुद्भवं । 29ab
तस्य देवादिदेवस्य सर्वगस्य[2] महात्मनः ॥ 29cd
निवेश्य भवनं विष्णोर्न्न भूयो भुवि जायते । 30ab
यथा विष्णोर्द्धामकृतौ फलं तद्वद्दिवौकसां ॥ 30cd

---

1 तथैव च इति ग, चिह्नितपुस्तकपाठः ।
2 सर्व्वेशस्य इति ख, चिह्नितपुस्तकपाठः ।

शिवब्रह्मार्कविघ्नेशचण्डीलक्ष्म्यादिकात्मनां । 31ab
देवालयकृतेः पुण्यं प्रतिमाकरणेधिकं ॥ 31cd
प्रतिमास्थापने यागे फलस्यान्तो न विद्यते । 32ab
मृण्मयाद्दारुजे पुण्यं दारुजादिष्टकाभवे ॥ 32cd
इष्टकोत्थाच्छैलजे स्याद्धेमादेरधिकं फलं । 33ab
सप्तजन्मकृतं पापं प्रारम्भादेव नश्यति ॥ 33cd
देवालयस्य स्वर्गी स्यान्नरकं न स गच्छति । 34ab
कुलानां शतमुद्धृत्य विष्णुलोकं नयेन्नरः ॥ 34cd
यमो यमभटानाह देवमन्दिरकारिणः । 35ab
यम उवाच ।
प्रतिमापूजादिकृतो नानेया नरकं नराः ॥ 35cd
देवालयाद्यकर्त्तार आनेयास्ते तु गोचरे[1] । 36ab
विचरध्वं यथान्यायन्नियोगो मम पाल्यतां [2] ॥ 36cd
नाज्ञाभङ्गं करिष्यन्ति भवतां जन्तवः क्वचित् । 37ab
केवलं ते जगत्तातमनन्तं समुपाश्रिताः ॥ 37cd
भवद्भिः परिहर्त्तव्यास्तेषां नात्रास्ति संस्थितिः । 38ab
ये च भागवता लोके तच्चित्तास्तत्परायणाः ॥ 38cd
पूजयन्ति सदा विष्णुं ते वस्त्याज्याः सुदूरतः । 39ab
यस्तिष्ठन् प्रस्वपन् गच्छन्नुत्तिष्ठन् स्खलिते स्थिते[3] ॥ 39cd
सङ्कीर्त्तयन्ति गोविन्दं ते वस्त्याज्याः सुदूरतः । 40ab
नित्यनैमित्तिकैर्देवं ये यजन्ति जनार्द्दनम् ॥ 40cd
नावलोक्या भवद्भिस्ते तद्गता यान्ति तद्गतिम् । 41ab

1 आनेयास्त्वविशेषत इति ग, चिह्नितपुस्तकपाठः ।
2 नियमो मे ऽनुपाल्यतामिति ख, चिह्नितपुस्तकपाठः ।
3 जन्तवः क्वचिदिति ख, चिह्नितपुस्तकपाठः ।

ये पुष्पधूपवासोभिर्भूषणैश्चातिवल्लभैः ॥ 41cd
अर्च्चयन्ति न ते ग्राह्या नराः कृष्णालये गताः[1] । 42ab
उपलेपनकर्त्तारः सम्मार्जनपराश्च ये ॥ 42cd
कृष्णालये परित्यज्यास्तेषां पुत्रास्तथा कुलम् । 43ab
येन चायतनं विष्णोः कारितं तत्कुलोद्भवम् ॥ 43cd
पुंसां शतं नावलोक्यं भवद्भिर्दुष्टचेतसा । 44ab
यस्तु देवालयं विष्णोर्द्दारुशैलमयं तथा ॥ 44cd
कारयेन्मृण्मयं वापि सर्वपापैः प्रमुच्यते । 45ab
अहन्यहनि यज्ञेन यजतो यन् महाफलम् ॥ 45cd
प्राप्नोति तत् फलं विष्णोर्यः कारयति केतनं । 46ab
कुलानां शतमागामि समतीतं तथा शतं ॥ 46cd
कारयन् भगवद्धाम नयत्यच्युतलोकतां । 47ab
सप्तलोकमयो विष्णुस्तस्य यः कुरुते गृहं ॥ 47cd
तारयत्यक्षयांल्लोकानक्षयान् प्रतिपद्यते । 48ab
इष्टकाचयविन्यासो यावन्त्यब्दानि तिष्ठति ॥ 48cd
तावद्वर्षसहस्राणि तत्कर्त्तुर्द्दिवि संस्थितिः । 49ab
प्रतिमाकृद्विष्णुलोकं स्थापको लीयते हरौ । 49cd
देवसद्मप्रतिकृतिप्रतिष्ठाकृत्तु गोचरे ॥ 49॥ 49ef
अग्निरुवाच ।
यमोक्ता नानयंस्तेथ प्रतिष्ठादिकृतं हरेः । 50ab
हयशीर्षः प्रतिष्ठार्थं[2] देवानां ब्रह्मणे ऽब्रवीत् ॥ 50cd

इत्यादिमहापुराणे आग्नेये देवालयादिमाहात्म्यवर्णनं नाम अष्टत्रिंशोध्यायः ॥

1 कृष्णाश्रये गता इति ख, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।
2 प्रतिष्ठाद्यमिति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

# 39

## अथोनचत्वारिंशो ऽध्यायः ।

भूपरिग्रहविधानं ।
हयग्रीव उवाच ।
विष्ण्वादीनां प्रतिष्ठादि वक्ष्ये ब्रह्मन् शृणुष्व मे । 1ab
प्रोक्तानि पञ्चरात्राणि सप्तरात्राणि वै मया ॥ 1cd
व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसङ्ख्यया । 2ab
हयशीर्षं तन्त्रमाद्यं तन्त्रं त्रैलोक्यमोहनं ॥ 2cd
वैभवं पौष्करं तन्त्रं प्रह्लादङ्गार्ग्यगालवं । 3ab
नारदीयञ्च सम्प्रश्नं शाण्डिल्यं वैश्वकं[1] तथा ॥ 3cd
सत्योक्तं शौनकं तन्त्रं वासिष्ठं ज्ञानसागरं । 4ab
स्वायम्भुवं कपिलञ्च तार्क्ष्यं नारायणीयकं ॥ 4cd
आत्रेयं नारसिंहाख्यमानन्दाख्यं तथारुणं । 5ab
बौधायनं तथार्षं तु[2] विश्वोक्तं तस्य सारतः ॥ 5cd
प्रतिष्ठां हि द्विजः कुर्य्यान्मध्यदेशादिसम्भवः । 6ab
नकच्छदेशसम्भूतः कावेरीकोङ्कणोद्गतः ॥ 6cd
कामरूपकलिङ्गोत्थः काञ्चीकाश्मीरकोशलः[3] । 7ab
आकाशवायुतेजोम्बु भूरेताः पञ्च रात्रयः ॥ 7cd
अचैतन्यास्तमोद्रिक्ताः पञ्चरात्रविवर्जितं । 8ab
ब्रह्माहं विष्णुरमल इति विद्यात्स देशिकः ॥ 8cd
सर्व्वलक्षणहीनोपि स गुरुस्तन्त्रपारगः । 9ab

---

1 चैश्वरं तथेति ग, ङ, घ, चिह्नितपुस्तकत्रयपाठः ।
2 तथाष्टाङ्गमिति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
3 काश्मीरके स्थित इति ग, चिह्नितपुस्तकपाठः ।

नगराभिमुखाः स्थाप्या देवा न च पराङ्मुखाः ॥ 9cd
कुरुक्षेत्रे गयादौ च नदीनान्तु[1] समीपतः । 10ab
ब्रह्मा मध्ये तु नगरे पूर्वे शक्रस्य शोभनं ॥ 10cd
अग्नावग्नेश्च मातॄणां भूतानाञ्च यमस्य च । 11ab
दक्षिणे चण्डिकायाश्च पितृदैत्यादिकस्य च ॥ 11cd
नैर्ऋते मन्दिरं कुर्यात् वरुणादेश्च वारुणे । 12ab
वायोर्न्नागस्य वायव्ये सौम्ये यक्षगुहस्य च ॥ 12cd
चण्डीशस्य महेशस्य ऐशे विष्णोश्च सर्वशः । 13ab
पूर्वदेवकुलं पीड्य प्रासादं स्वल्पकं त्वथ ॥ 13cd
समं वाप्यधिकं वापि न कर्त्तव्यं विजानता । 14ab
उभयोर्द्विगुणां सीमां त्यक्त्वा चोच्छ्रयसम्मितां ॥ 14cd
प्रासादं कारयेदन्यं नोभयं पीड़येद्बुधः । 15ab
भूमौ तु शोधितायां तु कुर्याद्भूमिपरिग्रहं ॥ 15cd
प्राकारसीमापर्य्यन्तं ततो भुतबलिं हरेत् । 16ab
माषं हरिद्राचूर्णन्तु सलाजं दधिसक्तुभिः ॥ 16cd
अष्टाक्षरेण सक्तूंश्च पातयित्वाष्टदिक्षु च । 17ab
राक्षसाश्च पिशाचाश्च येस्मिंस्तिष्ठन्ति भूतले ॥ 17cd
सर्व्वे ते व्यपगच्छन्तु स्थानं कुर्य्यामहं हरेः । 18ab
हलेन वाहयित्वा गां गोभिश्चैवावदारयेत् ॥ 18cd
परमाण्वष्टकेनैव रथरेणुः प्रकीर्तितः । 19ab
रथरेण्वष्टकेनैव त्रसरेणुः प्रकीर्त्यते ॥ 19cd
तैरष्टभिस्तु बालाग्रं लिख्या तैरष्टभिर्मता । 20ab
ताभिर्यूकाष्टभिः ख्याता ताश्चाष्टौ यवमध्यमः ॥ 20cd

1 नद्यद्रिषु इति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।

यवाष्टकैरङ्गुलं स्याच्चतुर्विंशाङ्गुलः करः । 21ab
चतुरङ्गुलसंयुक्तः स हस्तः[1] पद्महस्तकः ॥ 21cd

इत्यादिमहापुराणे आग्नेये प्रतिष्ठायां भूपरिग्रहो नामोनच-त्वारिंशोध्यायः ॥

## 40

### अथ चत्वारिंशो ऽध्यायः ।

अर्घ्यदानविधानं ।
भगवानुवाच ।
पूर्वमासित् महद्भूतं सर्व्वभूतभयङ्करं । 1ab
तद्देवैर्न्निहितं भुमौ स वास्तुपुरुषः स्मृतः ॥ 1cd
चतुःषष्टिपदे क्षेत्रे ईशं कोणार्द्धसंस्थितं । 2ab
घृताक्षतैस्तर्प्पयेत्तं पर्ज्जन्यं पदगतं ततः ॥ 2cd
उत्पलादिभिर्जयन्तञ्च द्विपदस्थं पताकया । 3ab
महेन्द्रञ्चैककोष्ठस्थं सर्व्वरक्तैः पदे रविं ॥ 3cd
वितानेनार्द्धपदगं सत्यं पदे भृशं घृतैः । 4ab
व्योम शाकुनमांसेन[2] कोणार्द्धपदसंस्थितं ॥ 4cd
स्रुचा चार्द्धपदे वह्निं पूषाणं लाजयैकतः । 5ab
स्वर्णेन वितथं द्विष्ठ मथनेन गृहाक्षतं ॥ 5cd
मांसौदनेन धर्म्मेशमेकैकस्मिन् स्थितं द्वयं । 6ab
गन्धर्वं द्विपदं गन्धैर्भृशं शाकुनजिह्वया ॥ 6cd
एकस्थमूर्द्धसंस्थञ्च मृगं नीलपटैस्तथा । 7ab
पितॄन् कृशरयार्द्धस्थं दन्तकाष्ठैः पदस्थितं ॥ 7cd

---

1 नृहस्त इति ख, चिह्नितपुस्तकपाठः ।
2 व्योम शाकुलमांसेनेति ख, चिह्नितपुस्तकपाठः ।

दौवारिकं द्विसंस्थञ्च सुग्रीवं यावकेन तु । 8ab
पुष्पदन्तं कुशस्तम्बैः पद्मैर्व्वरुणमेकतः ॥ 8cd
असुरं सुरया द्विष्ठं पदे शेषं घृताम्भसा । 9ab
यवैः पापं पदार्द्धस्थं रोगमर्द्धे च मण्डकैः ॥ 9cd
नागपुष्पैः पदे नागं मुख्यं भक्ष्यैर्द्विसंस्थितं । 10ab
मुद्गौदनेन भल्लाटं पदे सोमं पदे तथा ॥ 10cd
मधुना पायसेनाथ शालूकेन ऋषिं द्वये । 11ab
पदे दितिं लोपिकाभिरर्द्धे दितिमथापरं ॥ 11cd
पूरिकाभिस्ततश्चापमीशाधः पयसा पदे । 12ab
ततोधश्चापवत्सन्तु दध्ना चैकपदे स्थितं ॥ 12cd
लड्डुकैश्च मरीचिन्तु पूर्वकोष्ठचतुष्टये[1] । 13ab
सवित्रे रक्तपुष्पाणि ब्रह्माधःकोणकोष्ठके ॥ 13cd
तदधःकोष्ठके दद्यात् सावित्र्यै च कुशोदकं । 14ab
विवस्वते ऽरुणं दद्याच्चन्दनञ्चतुरङ्घ्रिषु ॥ 14cd
रक्षोधःकोणकोष्ठे तु इन्द्रायान्नं निशान्वितं । 15ab
इन्द्रजयाय तस्याधो घृतान्नं कोणकोष्ठके ॥ 15cd
चतुष्पदेषु दातव्यमिन्द्राय गुडपायसं । 16ab
वाय्वधःकोणदेशे तु रुद्राय पक्कमांसकं ॥ 16cd
तदधःकोणकोष्ठे तु यक्षायार्द्रं फलन्तथा । 17ab
महीधराय मांसान्नं माषञ्च चतुरङ्घ्रिषु ॥ 17cd
मध्ये चतुष्पदे स्थाप्या ब्रह्मणे तिलतण्डुलाः । 18ab
चरकीं माषसर्प्पिर्भ्यां स्कन्दं कृशरयासृजा ॥ 18cd
रक्तपद्मैर्विदारीञ्च कन्दर्पञ्च पलोदनैः । 19ab
पूतनां पलपित्ताभ्यां मांसासृग्भ्याञ्च जम्भकं ॥ 19cd

1 मध्यचतुष्टये इति ख, चिह्नितपुस्तकपाठः ।

पित्तासृगस्थिभिः पापां पिलिपिञ्जं[1] स्रजासृजा । 20ab
ईशाद्यान् रक्तमांसेन अभावादक्षतैर्यजेत् ॥ 20cd
रक्षोमातृगणेभ्यश्च पिशाचादिभ्य एव च । 21ab
पितृभ्यः क्षेत्रपालेभ्यो बलीन् दद्यात् प्रकामतः ॥ 21cd
अहुत्वैतानसन्तर्प्य प्रासादादीन्न कारयेत् । 22ab
ब्रह्मस्थाने हरिं लक्ष्मीं गणं पश्चात् समर्च्चयेत् ॥ 22cd
महीश्वरं वास्तुमयं[2] वर्द्धन्या सहितं घटं । 23ab
ब्रह्माणं मध्यतः कुम्भे ब्रह्मादींश्च दिगीश्वरान् ॥ 23cd
दद्यात् पूर्णाहुतिं पश्चात् स्वस्ति वाच्य प्रणम्य च । 24ab
प्रगृह्य कर्करीं सम्यक् मण्डलन्तु प्रदक्षिणं ॥ 24cd
सूत्रमार्देण हे ब्रह्मंस्तोयधाराञ्च भ्रामयेत् । 25ab
पूर्ववत्तेन मार्गेण सप्त वीजानि वापयेत् ॥ 25cd
प्रारम्भं तेन मार्गेण तस्य खातस्य कारयेत् । 26ab
ततो गर्त्तं खनेन्मध्ये हस्तमात्रं प्रमाणतः ॥ 26cd
चतुरङ्गुलकं चाधश्चोपलिप्यार्च्चयेत्ततः । 27ab
ध्यात्वा चतुर्भुजं विष्णुमर्घ्यं दद्यात्तु कुम्भतः ॥ 27cd
कर्कर्या पूरयेत् श्वभ्रं शुक्लपुष्पाणि च न्यसेत् । 28ab
दक्षिणावर्त्तकं श्रेष्ठं वीजैर्म्मृद्भिश्च पूरयेत् ॥ 28cd
अर्घ्यदानं विनिष्पाद्य गोवस्त्रादीन्ददेद्गुरौ । 29ab
कालज्ञाय स्थपतये वैष्णवादिभ्य अर्च्चयेत् ॥ 29cd
ततस्तु खानयेद्यत्नाज्जलान्तं यावदेव तु । 30ab
पुरुषाधःस्थितं शल्यं[3] न गृहे दोषदं भवेत् ॥ 30cd

1 पिलिपिच्छमिति ङ, चिह्नितपुस्तकपाठः ।
2 महीधरं वास्तुमयमिति ख, ङ, चिह्नितपुस्तकपाठः ।
3 पुरुषाधिष्ठितं शल्यमिति ग, चिह्नितपुस्तकपाठः ।

अस्थिशल्ये विद्यते वै भित्तिर्वै गृहिणो ऽसुखं । 31ab
यन्नामशब्दं शृणुयात्तत्र शल्यं तदुद्भवं ॥ 31cd

इत्यादिमहापुराणे आग्नेये अर्घ्यदानकथनं नाम चत्वारिंशो ऽध्यायः ॥

# 41

## अथैकचत्वारिंशो ऽध्यायः ।

शिलाविन्यासविधानं
भगवानुवाच ।
पादप्रतिष्ठां वक्षामि शिलाविन्यासलक्षणं । 1ab
अग्रतो मण्डपः कार्य्यः कुण्डानान्तु चतुष्टयं ॥ 1cd
कुम्भन्यासेष्टकान्यासो द्वारस्तम्भोच्छ्रयं शुभं । 2ab
पादोनं पूरयेत् खातं तत्र वास्तुं यजेत् समे ॥ 2cd
इष्टकाश्च सुपक्काः स्युर्द्वादशाङ्गुलसम्मिताः । 3ab
सविस्तारत्रिभागेन वैपुल्येन[1] समन्विताः ॥ 3cd
करप्रमाणा श्रेष्ठा स्याच्छिलाप्यथ शिलामये[2] । 4ab
नव कुम्भांस्ताम्रमयान् स्थापयेदिष्टकाघटान् ॥ 4cd
अद्भिः पञ्चकषायेण सर्व्वौषधिजलेन च । 5ab
गन्धतोयेन च तथा कुम्भैस्तोयसुपूरितैः ॥ 5cd
हिरण्यव्रीहिसंयुक्तैर्गन्धचन्दनचर्च्चितैः । 6ab
आपो हि ष्ठेति तिसृभिः शन्नो देवीति चाप्यथ ॥ 6cd
तरत् समन्दीरिति च[3] पावमानीभिरेव च । 7ab
उदुत्तमं वरुणमिति कयानश्च तथैव च ॥ 7cd

---

1 सुविस्तारं विभागेन नैपुण्यनेति ख, चिह्नितपुस्तकपाठः ।
2 शिला स्यान्न शिलामये इति ग, चिह्नितपुस्तकपाठः ।
3 भवतत्समन्दीरितीति ख, ग, ङ, चिह्नितपुस्तकद्वयपाठः ।

वरुणस्येति मन्त्रेण हंसः शुचिषदित्यपि । 8ab
श्रीसूक्तेन तथा शिलाः संस्थाप्य संघटाः[1] ॥ 8cd
शय्यायां मण्डपे प्राच्यां मण्डले हरिमर्च्चयेत् । 9ab
जुहुयाज्जनयित्वाग्निं समिधो द्वादशीस्ततः ॥ 9cd
आघारावाज्यभागौ तु प्रणवेनैव कारयेत् । 10ab
अष्टाहुतीस्तथाष्टान्तैराज्यं[2] व्याहृतिभिः क्रमात् ॥ 10cd
लोकेशानामग्नये वै सोमायावग्रहेषु च[3] । 11ab
पुरुषोत्तमायेति च व्याहृतीर्जुहुयात्ततः ॥ 11cd
प्रायश्चित्तं ततः पूर्णां मूर्त्तिमांसघृतांस्तिलान् । 12ab
वेदाद्यैर्द्वादशान्तेन[4] कुम्भेषु च पृथक् पृथक् ॥ 12cd
प्राङ्मुखस्तु गुरुः कुर्य्यादष्टदिक्षु विलिप्य च । 13ab
मध्ये चैकां शिलां कुम्भं न्यसेदेतान् सुरान् क्रमात् ॥ 13cd
पद्मं चैव महापद्मं मकरं कच्छपं तथा । 14ab
कुमुदञ्च तथा नन्दं पद्मं शङ्खञ्च पद्मिनीं ॥ 14cd
कुम्भान्न चालयेत्तेषु न्यसेदष्टेष्टकाः क्रमात् । 15ab
ईशानान्ताश्च पूर्व्वादाविष्टकां प्रथमं न्यसेत् ॥ 15cd
शक्तयो विमलाद्यास्तु इष्टकानान्तु देवताः । 16ab
न्यसनीया यथा योगं मध्ये न्यस्या त्वनुग्रहा ॥ 16cd
अव्यङ्गे चाक्षत पूर्णे मुनेरङ्गिरसः सुते । 17ab
इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहं ॥ 17cd
मन्त्रेणानेन विन्यस्य इष्टका देशिकोत्तमः । 18ab

1 संयुता इति ङ, चिह्नितपुस्तकपाठः .।
2 अष्टाहुतीस्तथा पूर्णैराज्यमिति ग, घ, ङ, इति पुस्तकत्रयपाठः ।
3 सोमाय च ग्रहाय चेति ङ, चिह्नितपुस्तकपाठः ।
4 द्वादशार्णेन इति ख, चिह्नितपुस्तकपाठः ।

गर्भाधानं ततः कुर्य्यान्मध्यस्थाने समाहितः ॥ 18cd
कुम्भोपरिष्टादेवेशं पद्मिनीं न्यस्य देवतां । 19ab
मृत्तिकाश्चैव पुष्पाणि धातवो रत्नमेव च[1] ॥ 19cd
लौहानि दिक्पतेरस्त्रं यजेद्वै गर्भभाजने । 20ab
द्वादशाङ्गुलविस्तारे चतुरङ्गुलकोच्छ्रये ॥ 20cd
पद्माकारे ताम्रमये भाजने पृथिवीं यजेत् । 21ab
एकान्ते सर्वभूतेशे पर्वतासनमण्डिते ॥ 21cd
समुद्रपरिवारे त्वं देवि गर्भं समाश्रय । 22ab
नन्दे नन्दय वासिष्ठे वसुभिः प्रजया[2] सह ॥ 22cd
जये भार्गवदायादे प्रजानां विजयावहे । 23ab
पूर्णेङ्गिरसदायादे पूर्णकामं कुरुष्व मां ॥ 23cd
भद्रे काश्यपदायादे कुरु भद्रां मतिं मम । 24ab
सर्ववीजसमायुक्ते सर्व्वरत्नौषधीवृते ॥ 24cd
जये सुरुचिरे नन्दे वासिष्ठे रम्यतामिह । 25ab
प्रजापतिसुते देवि चतुरस्रे महीयसि ॥ 25cd
सुभगे सुप्रभे भद्रे गृहे काश्यपि रम्यतां । 26ab
पूजिते परमाश्चर्य्ये गन्धमाल्यैरलङ्कृते ॥ 26cd
भवभूतिकरी देवि गृहे भार्गवि रम्यतां । 27ab
देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे ॥ 27cd
मनुष्यादिकतुष्ट्यर्थं पशुवृद्धिकरी भव । 28ab
एवमुक्त्वा ततः खातं गोमूत्रेण तु सेचयेत् ॥ 28cd
कृत्वा निधापयेद्गर्भं गर्भाधानं भवेन्निशि । 29ab
गोवस्त्रादि प्रदद्याच्च गुरवेन्येषु भोजनं ॥ 29cd

1 रसमेव चेति ग, घ, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 प्रिययेति ग, चिह्नितपुस्तकपाठः ।

गर्भं न्यस्येष्टका न्यस्य ततो गर्भं प्रपूरयेत् । 30ab
पीठबन्धमतः कुर्य्यान्मितप्रासादमानतः[1] ॥ 30cd
पीठोत्तमञ्चोच्छ्रयेण प्रासादस्यार्द्धविस्तरात् । 31ab
पादहीनं मध्यमं स्यात् कनिष्ठं चोत्तमार्द्धतः ॥ 31cd
पीठबन्धोपरिष्टात्तु वास्तुयागं पुनर्यजेत् । 32ab
पादप्रतिष्ठाकारी तु निष्पापो दिवि मोदते ॥ 32cd
देवागारं करोमीति मनसा यस्तु चिन्तयेत् । 33ab
तस्य कायगतं पापं तदह्ना हि प्रणश्यति ॥ 33cd
कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु । 34ab
अष्टेष्टकसमायुक्तं यः कुर्य्याद्देवतालयं ॥ 34cd
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् । 35ab
अनेनैवानुमेयं हि फलं प्रासादविस्तरात् ॥ 35cd
ग्राममध्ये च पूर्वे च प्रत्यग्द्वारं प्रकल्पयेत् । 36ab
विदिशासु च सर्वासु ग्रामे प्रत्यङ्मुखो भवेत् । 36cd
दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखो भवेत् ॥ 36॥ 36ef

इत्यादिमहापुराणे आग्नेये पातालयोगकथनं नाम एकचत्वारिंशो ऽध्यायः ॥

## 42

### अथ द्वाचत्वारिंशो ऽध्यायः ।

प्रासादलक्षणकथनं ।
हयग्रीव उवाच ।
प्रासादं सम्प्रवक्ष्यामि सर्वसाधारणं शृणु । 1ab
चतुरस्रीकृतं क्षेत्रं भजेत् षोडशधा बुधः ॥ 1cd
मध्ये तस्य चतुर्भिस्तु कुर्य्यादायसमन्वितं । 2ab

1 समप्रासादमानत इति ङ, चिह्नितपुस्तकपाठः ।

द्वादशैव तु भागानि भित्त्यर्थं परिकल्पयेत् ॥ 2cd
जङ्घोच्छ्रायन्तु कर्त्तव्यं चतुर्भागेण चायतं[1] । 3ab
जङ्घायां द्विगुणोच्छ्रायं मञ्जर्य्याः कल्पयेद् बुधः ॥ 3cd
तुर्य्यभागेन मञ्जर्य्याः कार्य्यः सम्यक् प्रदक्षिणः[2] । 4ab
तन्माननिर्गमं कार्य्यमुभयोः पार्श्वयोः समं ॥ 4cd
शिखरेण समं कार्य्यमग्रे जगति विस्तरं । 5ab
द्विगुणेनापि कर्त्तव्यं यथाशोभानुरूपतः ॥ 5cd
विस्तारान्मण्डपस्याग्रे गर्भसूत्रद्वयेन तु । 6ab
दैर्घ्यात्पादाधिकं कुर्य्यान्मध्यस्तम्भैर्विभूषितं ॥ 6cd
प्रासादगर्भमानं वा कुर्व्वीत मुखमण्डपं । 7ab
एकाशीतिपदैर्व्वास्तुं पश्चात् मण्डपमारभेत् ॥ 7cd
शुकान् प्राग्द्वारविन्यासे पादान्तःस्थान् यजेत् सुरान् । 8ab
तथा प्राकारविन्यासे यजेद् द्वात्रिंशदन्तगान्[3] ॥ 8cd
सर्वसाधारणं चैतत् प्रासादस्य च लक्षणं । 9ab
मानेन प्रतिमाया वा प्रासादमपरं शृणु ॥ 9cd
प्रतिमायाः प्रमाणेन कर्त्तव्या पिण्डिका शुभा । 10ab
गर्भस्तु पिण्डिकार्द्धेन गर्भमानास्तु भित्तयः ॥ 10cd
भित्तेरायाममानेन उत्सेधन्तु प्रकल्पयेत् । 11ab
भित्त्युच्छ्रायात्तु द्विगुणं शिखरं कल्पयेद् बुधः ॥ 11cd
शिखरस्य तु तुर्य्येण भ्रमणं परिकल्पयेत् । 12ab
शिखरस्य चतुर्थेन व्यग्रतो मुखमण्डपं ॥ 12cd

---

1 चतुर्भागेण वा युतमिति ख, चिह्नितपुस्तकपाठः । चतुर्भागेण संयुतमिति ग, चिह्नितपुस्तकपाठः ।

2 सम्यक् कुर्य्यात् प्रदक्षिणमिति ख, चिह्नितपुस्तकपाठः ।

3 द्वात्रिंशदन्तरे इति ख, चिह्नितपुस्तकपाठः ।

अष्टमांसेन गर्भस्य रथकानान्तु निर्गमः । 13ab
परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत् ॥ 13cd
तत्तृतीयेण[4] वा कुर्य्याद्रथकानान्तु निर्गमं । 14ab
वामत्रयं स्थापनीयं रथकत्रितये सदा ॥ 14cd
शिखरार्थं हि सूत्राणि चत्वारि विनिपातयेत् । 15ab
शुकनाशोर्द्धतः सूत्रं तिर्य्यग्भूतं निपातयेत् ॥ 15cd
शिखरस्यार्द्धभागस्थं सिंहं तत्र तु कारयेत् । 16ab
शुकनासां स्थिरीकृत्य मध्यसन्धौ निधापयेत् ॥ 16cd
अपरे च तथा पार्श्वे तद्वत् सूत्रं निधापयेत् । 17ab
तदूर्द्धन्तु भवेद्वेदी सकण्ठा मनसारकं ॥ 17cd
स्कन्धभग्नं न कर्त्तव्यं विकरालं तथैव च । 18ab
ऊर्द्धं च वेदिकामानात् कलशं परिकल्पयेत् ॥ 18cd
विस्ताराद्द्विगुणं द्वारं कर्त्तव्यं तु सुशोभनं । 19ab
उदुम्बरौ तदूर्ध्वञ्च न्यसेच्छाखां सुमङ्गलैः ॥ 19cd
द्वारस्य तु चतुर्थांशे कार्य्यौ चण्डप्रचण्डकौ । 20ab
विश्वक्सेनवत्सदण्डौ शिखोर्द्धोडुम्बरे श्रियं ॥ 20cd
दिग्गजैः स्नाप्यमानान्तां घटैः साब्जां सुरूपिकां । 21ab
प्रासादस्य चतुर्थांशैः प्राकारस्योच्छ्रयो भवेत् ॥ 21cd
प्रासादात् पादहीनस्तु गोपुरस्योच्छ्रयो भवेत् । 22ab
पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका ॥ 22cd
गारुडं मण्डपञ्चाग्रे एकं भौमादिधाम च । 23ab
कुर्य्याद्धि प्रतिमायान्तु दिक्षु चाष्टासु चोपरि ॥ 23cd
पूर्वे वराहं दक्षे च नृसिंहं श्रीधरं जले । 24ab
उत्तरे तु हयग्रीवनाग्नेय्यां जामदग्न्यकं ॥ 24cd

1 तत्तुरीयेणेति ख, चिह्नितपुस्तकपाठः ।

नैर्ऋत्यां रामकं वायौ वामनं वासुदेवकं । 25ab
ईशे प्रासादरचना देया वस्वर्ककादिभिः । 25cd
द्वारस्य चाष्टमाद्यंशं त्यत्का बेधो न दोषभाक् ॥ 25॥ 25ef

इत्यादिमहापुराणे आग्नेये प्रासादलक्षणं नाम द्वाचत्त्वारिंशो ऽध्यायः ।

## 43

### अथ त्रिचत्वारिंशो ऽध्यायः ।

प्रासाददेवतास्थापनं ।
भगवानुवाच ।
प्रासादे देवताः स्थाप्या वक्ष्ये ब्रह्मन् शृणुष्व मे । 1ab
पञ्चायतमध्ये तु वासुदेवं निवेशयेत् ॥ 1cd
वामनं नृहरिञ्चाश्वशीर्षं तद्वच्च शूकरं । 2ab
आग्नेये नैर्ऋते चैव वायव्ये चेशगोचरे ॥ 2cd
अथ नारायणं मध्ये आग्नेय्यामम्बिकां न्यसेत् । 3ab
नैर्ऋत्यां भास्करं वायौ ब्रह्माणं लिङ्गमीशके ॥ 3cd
अथवा रुद्ररूपन्तु अथवा नवधामसु । 4ab
वासुदेवं न्यसेन्मध्ये पूर्वादौ वामवामकान् ॥ 4cd
इन्द्रादीन् लोकपालांश्च अथवा नवधामसु । 5ab
पञ्चायतनकं कुर्य्यात् मध्ये तु पुरुषोत्तमं ॥ 5cd
लक्ष्मीवैश्रवणौ पूर्वं दक्षे मातृगणं न्यसेत् । 6ab
स्कन्दं गणेशमीशानं सूर्य्यादीन् पश्चिमे ग्रहान् ॥ 6cd
उत्तरे दश मत्स्यादीनाग्नेय्यां चण्डिकां तथा । 7ab
नैर्ऋत्यामम्बिकां स्थाप्य वायव्ये तु सरस्वतीं ॥ 7cd
पद्मामैशे वासुदेवं मध्ये नारायणञ्च वा । 8ab
त्रयोदशालये मध्ये विश्वरूपं न्यसेद्धरिं ॥ 8cd

पूर्वादौ केशवादीन् वा अन्यधामस्वयं हरिं[1] । 9ab
मृण्मयी दारुघटिता लोहजा रत्नजा तथा ॥ 9cd
शैलजा गन्धजा चैव कौसुमी[2] सप्तधा स्मृता । 10ab
कौसुमी गन्धजा चैव मृण्मयी प्रतिमा तथा ॥ 10cd
तत्कालपूजिताश्चैताः सर्वकामफलप्रदाः । 11ab
अथ शैलमयीं वक्ष्ये शिला यत्र च गृह्यते ॥ 11cd
पर्वतानामभावे च गृह्णीयाद्भूगतां शिलां । 12ab
पाण्डरा ह्यरुणा पीता कृष्णा शस्ता तु वर्णिनां ॥ 12cd
न यदा लभ्यते सम्यग् वर्णिनां वर्णतः शिला । 13ab
वर्णाद्यापादनं तत्र जुहुयात् सिंहविद्यया ॥ 13cd
शिलायां शुक्लरेखाग्र्या कृष्णाग्र्या सिंहहोमतः । 14ab
कांस्यघण्टानिनादा स्यात् पुंलिङ्गा विस्फुलिङ्गिका ॥ 14cd
तन्मन्दलक्षणा[3] स्त्री स्याद्रूपाभावान्नपुंसका । 15ab
दृश्यते मण्डलं यस्यां सगर्भा तां विवर्जयेत् ॥ 15cd
प्रतिमार्थं वनं गत्वा व्रजयागं समाचरेत् । 16ab
तत्र खात्वोपलिप्याथ मण्डपे तु हरिं यजेत् ॥ 16cd
बलिं दत्वा कर्म्मशस्त्रं टङ्कादिकमथार्च्चयेत् । 17ab
हुत्वाथ शालितोयेन अस्त्रेण प्रोक्षयेच्छिलां ॥ 17cd
रक्षां कृत्वा नृसिंहेन मूलमन्त्रेण पूजयेत्[4] । 18ab
हुत्वा पूर्णाहुतिं दद्यात्ततो भूतबलिं गुरुः ॥ 18cd

1 अन्यधामसु यज्ञविदिति ख, चिह्नितपुस्तकपाठः । युग्मधामस्वयं हरिमिति घ, चिह्नितपुस्तकपाठः ।
2 कौमुदी इति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
3 उन्मत्तलक्षणा इति ङ, चिह्नितपुस्तकपाठः ।
4 मन्त्रयेदिति ख, चिह्नितपुस्तकपाठः ।

अत्र ये संस्थिताः सत्त्वा यातुधानाश्च गुह्यकाः । 19ab
सिद्धादयो वा ये चान्ये तान् सम्पूज्य क्षमापयेत् ॥ 19cd
विष्णुबिम्बार्थमस्माकं[1] यात्रैषा केशवाज्ञया । 20ab
विष्णवर्थं यद्भवेत् कार्य्यं युष्माकमपि तद्भवेत् ॥ 20cd
अनेन बलिदानेन प्रीता भवत सर्वथा । 21ab
क्षेमेण गच्छतान्यत्र मुक्त्वा स्थानमिदं त्वरात् ॥ 21cd
एवं प्रबोधिताः सत्त्वा यान्ति तृप्ता यथासुखं । 22ab
शिल्पिभिश्च चरुं प्राश्य स्वप्नमन्त्रं जपेन्निशि ॥ 22cd
ओं नमः सकललोकाय विष्णवे प्रभविष्णवे । 23ab
विश्वाय विश्वरूपाय स्वप्नाधिपतये[2] नमः ॥ 23cd
आचक्ष्व देवदेवेश प्रसुप्तोस्मि[3] तवान्तिकं । 24ab
स्वप्ने सर्वाणि कार्य्याणि हृदिस्थानि तु यानि मे ॥ 24cd
ओं ओं ह्रूं फट् विष्णवे स्वाहा (4) ।
शुभे स्वप्ने शुभं सर्वं ह्यशुभे सिंहहोमतः । 25ab
प्रातरर्घ्यं शिलायां तु दत्वास्त्रेणास्त्रकं यजेत् ॥ 25cd
कुद्दालटङ्कशस्त्राद्यं मध्वान्याक्तमुखञ्चरेत् । 26ab
आत्मानं चिन्तयेद्विष्णुं शिल्पिनं विश्वकर्म्मकं[5] ॥ 26cd
शस्त्रं विष्णवात्मकं[6] दद्यात् मुखपृष्ठादि दर्शयेत् । 27ab
जितेन्द्रियः टङ्कहस्तः शिल्पी तु चतुरस्रकां ॥ 27cd

1 लोकसिद्ध्यर्थमस्माकमिति ख, चिह्नितपुस्तकपाठः ।
2 विश्वाधिपतये इति ख, चिह्नितपुतकपाठः ।
3 प्रपन्नो ऽस्मि इति ख, चिह्नितपुस्तकपाठः ।
4 ओं ओं ह्रीं फडिति ग, चिह्नितपुस्तकपाठः ।
5 विश्वकर्म्मणिमिति ख, ग, चिह्नितपुतकपाठः ।
6 विश्वात्मकमिति ग, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।

शिलां कृत्वा पिण्डिकार्थं किञ्चिन्नयूनान्तु कल्पयेत् । 28ab
रथे स्थाप्य समानीय सवस्त्रां कारुवेश्मनि । 28cd
पूजयित्वाथ घटयेत् प्रतिमां स तु कर्म्मकृत् ॥ 28॥ 28ef

इत्यादि महापुराणे आग्नेये शान्त्यादिवर्णनं नाम त्रिचत्वा-रिंशो ऽध्यायः ॥

## 44

अथ चतुश्चत्वारिंशो ऽध्यायः ।
वासुदेवादिप्रतिमालक्षणविधिः ।
भगवानुवाच ।
वासुदेवादिप्रतिमालक्षणं प्रवदामि ते । 1ab
प्रासादस्योत्तरे पूर्वमुखीं वा चोत्तराननां ॥ 1cd
संस्थाप्य पूज्य च बलिं दत्वाथो मध्यसूत्रकं । 2ab
शिलां शिल्पी तु नवधा विभज्य नवमे ऽंशके ॥ 2cd
सूर्पभक्तैः शिलायां तु भागं स्वाङ्गुलमुच्यते । 3ab
द्व्यङ्गुलं गोलकं नाम्ना कालनेत्रं तदुच्यते ॥ 3cd
भागमेकं त्रिधा भक्ता पार्ष्णिभागं प्रकल्पयेत् । 4ab
भागमेकं तथा जानौ ग्रीवायां भागमेव च ॥ 4cd
मुकुटं तालमात्रं स्यात्तालमात्रं तया मुखं । 5ab
तालेनैकेन कण्ठन्तु तालेन हृदयं तथा ॥ 5cd
नाभिमेढ्रान्तरन्तालं द्वितालावूरुकौ तथा । 6ab
तालद्वयेन जङ्घा स्यात् सूत्राणि शृणु साम्प्रतं ॥ 6cd
कार्य्यं सूत्रद्वयं पादे जङ्घामध्ये तथापरं । 7ab
जानौ सूत्रद्वयं कार्य्यमूरूमध्ये तथापरं ॥ 7cd
मेढ्रे तथापरं कार्य्यं कट्यां सूत्रन्तथापरं । 8ab
मेखलाबन्धसिद्ध्यर्थं नाभ्यां चैवापरन्तथा ॥ 8cd

हृदये च तथा कार्य्यं कण्ठे सूत्रद्वयं तथा । 9ab
ललाते चापरं कार्य्यं मस्तके च तथापरं ॥ 9cd
मुकुटोपरि कर्त्तव्यं सूत्रमेकं विचक्षणैः । 10ab
सूत्राण्यूर्द्धं प्रदेयानि सप्तैव कमलोद्भव[1] ॥ 10cd
कक्षात्रिकान्तरेणैव षट् सूत्राणि प्रदापयेत् । 11ab
मध्यसूत्रं तु सन्त्यज्य सूत्राण्येव निवेदयेत् ॥ 11cd
ललाटं नासिकावक्त्रं कर्त्तव्यञ्चतुरङ्गुलं । 12ab
ग्रीवाकर्णौ तु कर्त्तव्यौ आयामाच्चतुरङ्गुलौ ॥ 12cd
द्व्यङ्गुले हनुके कार्य्ये विस्ताराच्चिवुकन्तथा । 13ab
अष्टाङ्गुलं ललाटन्तु विस्तारेण प्रकीर्त्तितम् ॥ 13cd
परेण द्व्यङ्गुलौ शङ्खौ कर्त्तव्यावलकान्वितौ । 14ab
चतुरङ्गुलमाख्यातमन्तरं कर्णनेत्रयोः ॥ 14cd
द्व्यङ्गुलौ पृथुकौ कर्णौ कर्णापाङ्गार्द्धपञ्चमे । 15ab
भ्रूसमेन तु सूत्रेण कर्णश्रोत्रं प्रकीर्त्तितम् ॥ 15cd
विद्धं षडङ्गुलं कर्णमविद्धञ्चतुरङ्गुलम् । 16ab
चिवुकेन समं विद्धमविद्धं वा षड़ङ्गुलम् ॥ 16cd
गन्धपात्रं तथावर्त्तं शष्कुलीं कल्पयेत्तथा । 17ab
द्व्यङ्गुलेनाधरः कार्यस्तस्यार्द्धेनोत्तराधरः ॥ 17cd
अर्द्धाङ्गुलं तथा नेत्रं[2] वक्त्रन्तु चतुरङ्गुलम् । 18ab
आयामेन तु वैपुल्यात् सार्द्धमङ्गुलमुच्यते ॥ 18cd
अव्यात्तमेवं स्याद्वक्त्रं व्यात्तं त्र्यङ्गुलमिष्यते । 19ab
नासावंशसमुच्छ्रायं मूले त्वेकाङ्गुलं मतम् ॥ 19cd
उच्छ्राया द्व्यङ्गुलं चाग्रे करवीरोपमाः स्मृताः । 20ab

---

1 मुकुटोपरि इति ख, चिह्नितपुस्तकपाठः ।
2 तथा गोजी इति ख, चिह्नितपुस्तकपाठः ।

अन्तरं चक्षुषोः कार्यं चतुरङ्गुलमानतः ॥ 20cd
द्व्यङ्गुलं चाक्षिकोणं च द्व्यङ्गुलं चान्तरं तयोः । 21ab
तारा नेत्रत्रिभागेण दृक्तारा पञ्चमांशिका ॥ 21cd
त्र्यङ्गुलं नेत्रविस्तारं द्रोणी चार्द्धाङ्गुला मता । 22ab
तत्समाणा भ्रुवोर्लेखा भ्रुवौ चैव समे मते ॥ 22cd
भ्रूमध्यं द्व्यङ्गुलं कार्यं भ्रूदैर्घ्यं चतुरङ्गुलम्[1] । 23ab
षट्त्रिंशदङ्गुलायामम्मस्तकस्य तु वेष्टनम् ॥ 23cd
मूर्त्तीनां केशवादीनां द्वात्रिंशद्वेष्टनं भवेत् । 24ab
पञ्चनेत्रा त्वधोग्रीवा विस्ताराद्वेष्टनं पुनः ॥ 24cd
त्रिगुणं तु भवेदूर्द्ध्वं विस्तृताष्टाङ्गुलं पुनः । 25ab
ग्रीवात्रिगुणमायामं ग्रीवावक्षोन्तरं भवेत् ॥ 25cd
स्कन्धावष्टाङ्गुलौ कार्यौ त्रिकलावंशकौ शुभौ । 26ab
सप्तनेत्रौ स्मृतौ बाहू प्रबाहू षोडशाङ्गुलौ ॥ 26cd
त्रिकलौ विस्तृतौ बाहू प्रबाहू चापि तत्समौ । 27ab
बाहुदण्डोर्द्ध्वतो ज्ञेयः परिणाहः कला नव ॥ 27cd
सप्तदशाङ्गुलो मध्ये कूर्प्परोर्द्ध्वे च षोडश । 28ab
कूर्परस्य भवेन्नाहः त्रिगुणः कमलोद्भव ॥ 28cd
नाहः प्रबाहुमध्ये तु षोडशाङ्गुल उच्यते । 29ab
अग्रहस्ते परीणाहो द्वादशाङ्गुल उच्यते ॥ 29cd
विस्तरेण करतलं कीर्त्तितं तु षडङ्गुलम् । 30ab
दैर्घ्यं सप्ताङ्गुलं कार्यं मध्या पज्चाङ्गुला मता ॥ 30cd
तर्ज्जन्यनामिका चैव तस्मादर्द्धाङ्गुलं विना । 31ab
कनिष्ठाङ्गुष्ठकौ कार्यौ चतुरङ्गुलसम्मितौ ॥ 31cd

1 भ्रूदैर्घ्याच्चतुरङ्गुला इति ङ, चिह्नितपुस्तकपाठः ।

द्विपर्वोङ्गुष्ठकः कार्यः शेषाङ्गुल्यस्त्रिपर्विकाः । 32ab
सर्वासां पर्वणोर्द्धेन नखमानं विधीयते ॥ 32cd
वक्षसो यत् प्रमाणन्तु जठरं तत्प्रमाणतः । 33ab
अङ्गुलैकं भवेन्नाभी वेधेन च प्रमाणतः ॥ 33cd
ततो मेढ्रान्तरं कार्यं तालमात्रं प्रमाणतः । 34ab
नाभिमध्ये प्रीणाहो द्विचत्वारिंशदङ्गुलैः ॥ 34cd
अन्तरं स्तनयोः कार्य्यं तालमात्रं प्रमाणतः । 35ab
चिवुकौ[1] यवमानौ तु मण्डलं द्विपदं भवेत् ॥ 35cd
चतुःषष्ट्यङ्गुलं कार्यं वेष्टनं वक्षसः स्फुटम् । 36ab
चतुर्मुखञ्च तदधोवेष्टनं परिकीर्त्तितम् ॥ 36cd
परिणाहस्तथा कट्यां चतुःपञ्चाशदङ्गुलैः । 37ab
विस्तारश्चोरुमूले तु प्रोच्यते द्वादशङ्गुलः ॥ 37cd
तस्मादभ्यधिकं मध्ये ततो निम्नतरं क्रमात् । 38ab
विस्तृताष्टाङ्गुलं जानुत्रिगुणा परिणाहतः ॥ 38cd
जङ्घामध्ये तु विस्तारः सप्ताङ्गुल उदाहृतः । 39ab
त्रिगुणा परिधिश्चास्य जङ्घाग्रं पञ्चविस्तरात् ॥ 39cd
त्रिगुणा परिधिश्चास्य पादौ तालप्रमाणकौ । 40ab
आयामादुत्थितौ पादौ चतुरङ्गुलमेव च ॥ 40cd
गुल्फात् पूर्वं तु कर्त्तव्यं प्रमाणाच्चतुरङ्गुलम् । 41ab
त्रिकलं विस्तृतौ पादौ त्र्यङ्गुलो गुह्यकः स्मृतः ॥ 41cd
पञ्चाङ्गुलस्तु नाहोस्य दीर्घा तद्वत् प्रदेशिनी । 42ab
अष्टमाष्टांशतोन्यूनः शेषाङ्गुल्यः क्रमेण तु ॥ 42cd
सपादाङ्गुलमुत्सेधमङ्गुष्टस्य प्रकीर्त्तितं । 43ab
यवोनमङ्गुलं कार्यमङ्गुष्ठस्य नखं तथा ॥ 43cd

1 चूचुकौ इति ङ, चिह्नितपुस्तकपाठः ।

अर्द्धाङ्गुलं तथान्यासां[1] क्रमान् न्यूनं तु कारयेत् । 44ab
अङ्गुलौ वृषणौ कार्यौ मेढ्रं तु चतुरङ्गुलम् ॥ 44cd
परिणाहोत्र कोषाग्रं कर्त्तव्यञ्चतुरङ्गुलम् । 45ab
षडङ्गुलपरीणाहौ वृषणौ परिकीर्त्तितौ ॥ 45cd
प्रतिमा भूषणाढ्या स्यादेतदुद्देशलक्षणम् । 46ab
अनयैव दिशा कार्यं लोके दृष्ट्वा तु लक्षणम् ॥ 46cd
दक्षिणे तु करे चक्रमधस्तात् पद्ममेव च । 47ab
वामे शङ्खं गदाधस्ताद्वासुदेवस्य लक्षणात् ॥ 47cd
श्रीपुष्टौ वापि कर्त्तव्ये पद्मवीणाकरान्विते । 48ab
ऊरुमात्रोच्छ्रितायामे मालाविद्याधरौ[2] तथा ॥ 48cd
प्रभामण्डलसंस्थौ तौ प्रभा हस्त्यादिभूषणा । 49ab
पद्माभं पादपीठन्तु प्रतिमास्वेवमाचरेत् ॥ 49cd

इत्यादिमहापुराणे आग्नेये प्रतिमालक्षणं नाम चतुश्चत्वारिंशोध्यायः ॥

## 45

### अथ पञ्चचत्वारिंशोध्यायः ।

पिण्डिकालक्षणकथनं ।
भगवानुवाच ।
पिण्डिकालक्षणं वक्ष्ये दैर्घ्येण प्रतिमासमा । 1ab
उच्छ्रायं प्रतिमार्द्धन्तु चतुःषष्टिपुटां[2] च ताम् ॥ 1cd
त्यक्त्वा पङ्क्तिद्वयं चाधस्तदूर्द्ध्वं यत्तु कोष्ठकम् । 2ab

1 सार्द्धाङ्गुलं तथायाममिति ङ, चिह्नितपुस्तकपाठः ।
2 मणिविद्याधराविति घ, चिह्नितपुस्तकपाठः ।
3 चतुःषष्टिपदामिति ङ, चिह्नितपुस्तकपाठः ।

समन्तादुभयोः पार्श्वे अन्तस्थं परिमार्जयेत् ॥ 2cd
ऊर्द्ध्वं पङ्ग्क्तिद्वयं त्यक्त्वा अधस्ताद् यत्तु कोष्ठकम् । 3ab
अन्तः सम्मार्जयेत् यत्नात् पार्श्वयोरुभयोः समम् ॥ 3cd
तयोर्मध्यगतौ तत्र चतुष्कौ मार्जयेत्ततः । 4ab
चतुर्द्धा भाजयित्वा तु ऊर्द्धपङ्क्तिद्वयं बुधः ॥ 4cd
मेखला भागमात्रा स्यात् खातं तस्यार्द्धमानतः । 5ab
भागं भागं परित्यज्य पार्श्वयोरुभयोः समं ॥ 5cd
दत्वा चैकं पदं वाह्ये प्रमाणं कारयेद् बुधः । 6ab
त्रिभागेण च भागस्याग्रे स्यात्तोयविनिर्गमः ॥ 6cd
नानाप्रकारभेदेन भद्रेयं[1] पिण्डिका शुभा । 7ab
अष्टताला तु कर्त्तव्या देवी लक्ष्मीस्तथा स्त्रियः ॥ 7cd
भ्रुवौ यवाधिके कार्य्ये यवहीना तु नासिका । 8ab
गोलकेनाधिकं वक्रमूर्द्धं तिर्य्यग्विवर्जितं ॥ 8cd
आयते नयने कार्य्ये त्रिभागोनैर्यवैस्त्रिभिः । 9ab
तदर्द्धेन तु वैपुल्यं नेत्रयोः परिकल्पयेत् ॥ 9cd
कर्णपाशो ऽधिकः कार्य्यः सृक्कणीसमसूत्रतः । 10ab
नम्रं कलाविहीनन्तु कुर्य्याद्दंशद्वयं तथा ॥ 10cd
ग्रीवा सार्द्धकला कार्य्या तद्विस्तारोपशोभिता । 11ab
नेत्रं विना तु विस्तारौ ऊरू जानू च पिण्डिका ॥ 11cd
अङ्घ्रिपृष्ठौ स्फिचौ कट्यां यथायोगं प्रकल्पयेत् । 12ab
सप्तांशोनास्तथाङ्गुल्यो दीर्घं विष्कम्भनाहतं ॥ 12cd
नेत्रैकवर्जितायामा जङ्घोरू च तथा कटिः । 13ab
मध्यपार्श्वं च तद्वृत्तं घनं पीनं कुचद्वयं ॥ 13cd

1 तत्रेयमिति ङ, चिह्नितपुस्तकपाठः ।

तालमात्रौ स्तनौ कर्य्यौ कटिः सार्द्धकलाधिका । 15ab
लक्ष्म शेषं पुरावत्स्यात् दक्षिणे चामुबुजं करे ॥ 15cd
वामे वित्त्वं स्त्रियौ पार्श्वे शुभे चामरहस्तके । 16ab
दीर्घघोणस्तु गरुडश्चक्राङ्गाद्यानथो वदे ॥ 16cd

इत्यादिमहापुराणे आग्नेये पिण्डिकालक्ष्मादिलक्षणं नाम पञ्चचत्वारिंशो ऽध्यायः ।

## 46

### अथ षट्चत्वारिंशो ऽध्यायः ।

शालग्रामादिमूर्त्तिलक्षणकथनं ।
भगवानुवाच ।
शालग्रामादिमूर्त्तेश्च वक्ष्येहं भुक्तिमुक्तिदाः । 1ab
वासुदेवो ऽसितो द्वारे शिलालग्नद्विचक्रकः ॥ 1cd
ज्ञेयः सङ्कर्षणो लग्नद्विचक्रो रक्त उत्तमः । 2ab
सूक्ष्मचक्रो बहुच्छिद्रः प्रद्युम्नो नीलदीघवः ॥ 2cd
पीतो निरुद्धः पद्माङ्गो वर्त्तुलो द्वित्रिरेखवान् । 3ab
कृष्णो नारायणो नाभ्युन्नतः शुषिरदीर्घवान् ॥ 3cd
परमेष्ठो साब्जचक्रः पृष्ठच्छिद्रश्च[1] विन्दुमान् । 4ab
स्थूलचक्रो ऽसितो विष्णुर्म्मध्ये रेखा गदाकृतिः ॥ 4cd
नृसिंहः कपिलः स्थूलवक्रः स्यात् पञ्चविन्दुकः । 5ab
वराहः शक्तिलिङ्गः स्यात् तच्चक्रौ विषमौ सृतौ ॥ 5cd
इन्द्रनीलनिभः स्थूलस्त्रिरेखालाञ्छितः शुभः । 6ab
कूर्मस्तथोन्नतः पृष्ठे वर्त्तुलावर्त्तको ऽसितः ॥ 6cd
हयग्रीवोङ्कुशावाररेखो नीलः सविन्दुकः । 7ab

1 पृथुच्छिद्रश्चेति ङ, चिह्नितपुस्तकपाठः ।

वैकुण्ठः एकचक्रो ऽब्जी मणिभः पुच्छरेखकः ॥ 7cd
मत्स्यो दीर्घस्त्रिविन्दुः स्यात् काचवर्णस्तु पूरितः । 8ab
श्रीधरो वनमालाङ्कः पञ्चरेखस्तु वर्त्तुलः ॥ 8cd
वामनो वर्त्तुलश्चातिह्रस्वो नीलः सविन्दुकः । 9ab
श्यामस्त्रिविक्रमो दक्षरेखो वामेन विन्दुकः ॥ 9cd
अनन्तो नागभोगाङ्गो नैकाभो नैकमूर्त्तिमान् । 10ab
स्थूलो दामोदरो मध्यचक्रो द्वाःसूक्ष्मविन्दुकः[1] ॥ 10cd
सुदर्शनस्त्वेकचक्रो लक्ष्मीनारायणो द्वयात् । 11ab
त्रिचक्रश्चाच्युतो देवस्त्रिचक्रो वा त्रिविक्रमः ॥ 11cd
जनार्द्दनश्चतुश्चक्रो वासुदेवश्च पञ्चभिः । 12ab
षट्वक्रश्चैव प्रद्युम्नः सङ्कर्षणश्च सप्तभिः ॥ 12cd
पुरुषोत्तमोष्टचक्रो नवव्यूहो नवाङ्कितः । 13ab
दशावतारो दशभिर्द्दशैकेनानिरुद्धकः । 13cd
द्वादशात्मा द्वादशभिरत ऊर्द्धमनन्तकः ॥ 13॥ 13ef

इत्यादिमहापुराणे आग्नेये शालग्रामादिमूर्त्तिलक्षणं नाम षट्चत्वारिंशो ऽध्यायः ।

## 47

### अथ सप्तचत्वारिंशो ऽध्यायः ।

शालग्रामादिपूजाकथनं
भगवानुवाच ।
शालग्रामादिचक्राङ्कपूजाः सिद्ध्यै वदामि ते । 1ab
त्रिविधा स्याद्धरेः पूजा काम्याकाम्योभयात्मिका ॥ 1cd
मीनादीनान्तु पञ्चानां काम्याथो वोभयात्मिका[2] । 2ab

1 मध्यचक्राधः सूक्ष्मविन्दुक इति ङ, चिह्नितपुस्तकपाठः ।
2 काम्यार्थेवोभयात्मकेति घ, चिह्नितपुस्तकपाठः ।

वराहस्य नृसिंहस्य वामनस्य च मुक्तये ॥ 2cd
चक्रादीनां त्रयाणान्तु शालग्रामार्च्चनं शृणु । 3ab
उत्तमा निष्फला पूजा कनिष्ठा सफलार्चना ॥ 3cd
मध्यमा मूर्त्तिपूजा स्याच्चक्राब्जे चतुरस्रके । 4ab
प्रणवं हृदि विन्यस्य षडङ्गङ्करदेहयोः ॥ 4cd
कृतमुद्रात्रयश्चक्राद् वहिः पूर्वे गुरुं यजेत् । 5ab
आप्ये गणं वायवे च धातारं नैर्ऋते यजेत् ॥ 5cd
विधातारञ्च कर्त्तारं हर्त्तारं दक्षसौम्ययोः । 6ab
विश्वक्सेनं यजेदीशे आग्नेये क्षेत्रपालकम् ॥ 6cd
ऋगादिवेदान् प्रागादौ आधारानन्तकं भुवं । 7ab
पीठं पद्मं चार्कचन्द्रवह्न्याख्यं मण्डलत्रयं ॥ 7cd
आसनं द्वादशार्णेन तत्र स्थाप्य शिलां यजेत् । 8ab
व्यस्तेन च समस्तेन स्ववीजेन यजेत् क्रमात् ॥ 8cd
पूर्वादावथ वेदाद्यैर्गायत्रीभ्यां जितादिना । 9ab
प्रणवेनार्च्चयेत् पश्चान्मुद्रास्तिस्रः प्रदर्शयेत् ॥ 9cd
विश्वक्सेनस्य चक्रस्य क्षेत्रपालस्य दर्शयेत् । 10ab
शालग्रामस्य प्रथमा पूजाथो निष्फलोच्यते ॥ 10cd
पूर्ववत् षोडशारञ्च सपद्मं मण्डलं लिखेत् । 11ab
शङ्खचक्रगदाखड्गैर्गुर्वाद्यं पूर्ववद्यजेत्[1] ॥ 11cd
पूर्वे सौम्ये धनुर्वाणान् वेदाद्यैरासनं ददेत् । 12ab
शिलां न्यसेद् द्वादशार्णैस्तृतीयं पूजनं शृणु ॥ 12cd
अष्टारमब्जं विलिखेत् गुर्वाद्यं[2] पूर्ववद्यजयेत् । 13ab

1 चतुर्भिः पूर्व्ववद्यजेदिति ङ, चिह्नितपुस्तकपाठः ।
2 गन्धाद्यैरिति ङ, चिह्नितपुस्तकपाठः ।

अष्टार्णेनासनं दत्वा तेनैव च शिलां न्यसेत् । 13cd
पूजयेद्दशधा तेन गायत्रीभ्यां जितं तथा[1] ॥ 13॥ 13ef

इत्यादिमहापुराणे आग्नेये शालग्रामादिपूजाकथनं नाम सप्तचत्वारिंशो ऽध्यायः ॥

# 48

## अथाष्टाचत्वारिंशो ऽध्यायः ।

चतुर्विंशतिमूर्त्तिस्तोत्रकथनं ।
भगवानुवाच ।
ओंरूपः केशवः पद्मशङ्खचक्रगदाधरः । 1ab
नारायणः शङ्खपद्मगदाचक्री प्रदक्षिणं ॥ 1cd
ततो गदो माधवोरिशङ्खपद्मी नमामि तं । 2ab
चक्रकौमोदकीपद्मशङ्खी गोविन्द ऊर्जितः ॥ 2cd
मोक्षदः श्रीगदी पद्मी शङ्खी विष्णुश्च चक्रधृक् । 3ab
शङ्खचक्राब्जगदिनं मधुसूदनमानमे ॥ 3cd
भक्त्या त्रिविक्रमः पद्मगदी चक्री च शङ्ख्यपि । 4ab
शङ्खचक्रगदापद्मी वामनः पातु मां सदा ॥ 4cd
गदितः श्रीधरः पद्मी चक्रशार्ङ्गी च शङ्ख्यपि[2] । 5ab
हृषीकेशो गदाचक्री पद्मी शङ्खी च पातु नः ॥ 5cd
वरदः पद्मनाभस्तु शङ्खाब्जारिगदाधरः । 6ab
दामोदरः पद्मशङ्खगदाचक्री नमामि तं ॥ 6cd
तेने गदी शङ्खचक्री वासुदेवोब्जभृज्जगत् । 7ab
सङ्कर्षणो गदी शङ्खी पद्मी चक्री च पातु वः ॥ 7cd

---

1 जितं तत इति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।
2 चक्री गद्यथ शङ्ख्यपि इति ङ, चिह्नितपुस्तकपाठः ।

गदी चक्री शङ्खगदी [1] प्रद्युम्नः पद्मभृत् प्रभुः । 8ab
अनिरुद्धश्चक्रगदी शङ्खी पद्मी च पातु नः ॥ 8cd
सुरेशोर्यब्जशङ्खाढ्यः श्रीगदी पुरुषोत्तमः । 9ab
अधोक्षजः पद्मगदी शङ्खी चक्री च पातु वः ॥ 9cd
देवो नृसिंहश्चक्राब्जगदाशङ्खी नमामि तम् । 10ab
अच्युतः श्रीगदी पद्मी चक्री शङ्खी च पातु वः ॥ 10cd
बालरूपी शङ्खगदी उपेन्द्रश्चक्रपद्म्यपि । 11ab
जनार्द्दनः पद्मचक्री शङ्खधारी गदाधरः ॥ 11cd
शङ्खी पद्मी च चक्री च हरिः कौमोदकीधरः । 12ab
कृष्णः शङ्खी गदी पद्मी चक्री मे भुक्तिमुक्तिदः ॥ 12cd
आदिमूर्त्तिर्वासुदेवस्तस्मात् सङ्कर्षणोभवत् । 13ab
सङ्कर्षणाच्च प्रद्युम्नः प्रद्युम्नादनिरुद्धकः ॥ 13cd
केशवादिप्रभेदेन ऐकैकस्य त्रिधा क्रमात् । 14ab
द्वादशाक्षरकं स्तोत्रं चतुर्विंशतिमूर्त्तिमत् । 14cd
यः पठेच्छृणुयाद्वापि निर्मलः सर्वमाप्नुयात् ॥ 14॥ 14ef

इत्यादिमहापुराणे आग्नेये चतुर्विंशतिमूर्त्तिस्तोत्रं नाम अष्टाचत्वारिंशो ऽध्यायः ॥

## 49

### अथोनपञ्चाशो ऽध्यायः ।

मत्स्यादिलक्षणवर्णनम् ।
भगवानुवाच ।
दशावतारं मत्स्यादिलक्षणं प्रवदामि ते । 1ab
मत्स्याकारस्तु मत्स्यः स्यात् कूर्म्मः कूर्म्माकृतिर्भवेत् ॥ 1cd

1 शङ्खपद्मी इति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।

नराङ्गो वाथ कर्त्तव्यो भूवराहो गदादिभृत् । 2ab
दक्षिणे वामके शङ्खं लक्ष्मीर्वा पद्ममेव वा ॥ 2cd
श्रीर्वामकूर्प्परस्था तु क्ष्मानन्तौ चरणानुगौ । 3ab
वराहस्थापनाद्राज्यं भवाब्धितरणं भवेत् ॥ 3cd
नरसिंहो विवृत्तास्यो वामोरुक्षतदानवः[1] । 4ab
तद्वक्षो दारयन्माली स्फुरच्चक्रगदाधरः ॥ 4cd
छत्री दण्डी वामनः स्यादथवा स्याच्चतुर्भुजः । 5ab
रामश्चापेषुहस्तः स्यात् कड्गी परशुनान्वितः ॥ 5cd
रामश्चापी शरी खड्गी शङ्खी वा द्विभुजः स्मृतः । 6ab
गदालाङ्गलधारी च रामो वाथ चतुर्भुजः ॥ 6cd
वामोर्द्ध्वे लाङ्गलं दद्यादधः शङ्खं सुशोभनं । 7ab
मुषलं दक्षिणोर्द्ध्वे तु चक्रञ्चाधः सुशोभनं ॥ 7cd
शान्तात्मा लम्बकर्णश्च गौराङ्गश्चाम्बरावृतः[2] । 8ab
ऊर्द्ध्वपद्मस्थितो बुद्धो वरदाभयदायकः ॥ 8cd
धनुस्तूणान्वितः[3] कल्की म्लेच्छोत्सादकरो द्विजः । 9ab
अथवाश्वस्थितः खड्गी शङ्खचक्रशरान्वितः ॥ 9cd
लक्षणं वासुदेवादिनवकस्य वदामि ते । 10ab
दक्षिणोर्द्ध्वे गदा वामे वामोर्द्ध्वे चक्रमुत्तमं ॥ 10cd
ब्रह्मेशौ पार्श्वगौ नित्यं वासुदेवोस्ति पूर्ववत् । 11ab
शङ्खी स वरदो वाथ द्विभुजो वा चतुर्भुजः ॥ 11cd
लाङ्गली मुषली रामो गदापद्मधरः स्मृतः । 12ab

1 वामोरुहृतदानव इति ङ, चिह्नितपुस्तकपाठः ।
2 गौराङ्गश्चायुधावृत इति ख, ग, चिह्नितपुस्तकद्वयपाठः ।
3 धनुर्वाणान्वित इति ङ, चिह्नितपुस्तकपाठः ।

प्रद्युम्नो दक्षिणे वज्रं[1] शङ्खं वामे धनुः करे ॥ 12cd
गदानाभ्यावृतः[2] ग्रीत्या प्रद्युम्नो वा धनुःशरी । 13ab
चतुर्भुजोनिरुद्धः स्यात्तथा नारायणो विभुः ॥ 13cd
चतुर्मुखश्चतुर्ब्बाहुर्वृहज्जठरमण्डलः । 14ab
लम्बकूर्च्चो[3] जटायुक्तो व्रह्मा हंसाग्रवाहनः ॥ 14cd
दक्षिणे चाक्षसूत्रञ्च स्रुवो वामे तु कुण्डिका । 15ab
आज्यस्थाली सरस्वती सावित्री वामदक्षिणे ॥ 15cd
विष्णुरष्टभुजस्तार्क्षे करे खड्गस्तु दक्षिणे । 16ab
गदाशरश्च वरदो वामे कार्मुकखेटके ॥ 16cd
चक्रशङ्खौ चतुर्बाहुर्न्नरसिंहश्चतुर्भुजः । 17ab
शङ्खचक्रधरो वापि विदारितमहासुरः ॥ 17cd
चतुर्बाहुर्वराहस्तु शेषः पाणितले धृतः । 18ab
धारयन् बाहुना पृथ्वीं वामेन कमलाधरः[4] ॥ 18cd
पादलग्ना धरा कार्य्या पदा लक्ष्मीर्व्यवस्थिता । 19ab
त्रैलोक्यमोहनस्तार्क्ष्ये अष्टबाहुस्तु दक्षिणे ॥ 19cd
चक्रं खड्गं च मुषलं अङ्कुशं वामके करे । 20ab
शङ्खशार्ङ्गगदापाशान् पद्मवीणासमन्विते ॥ 20cd
लक्ष्मीः सरस्वती कार्य्ये विश्वरूपो ऽथ दक्षिणे । 21ab
मुद्गरं च तथा पाशं शक्तिशूलं शरं करे ॥ 21cd
वामे शङ्खञ्च शार्ङ्गञ्च गदां पाशं च तोमरं । 22ab

---

1 दक्षिणे चक्रमिति ङ, चिह्नितपुस्तकपाठः ।
2 गदी रत्यावृत इति ङ, चिह्नितपुस्तकपाठः ।
3 लम्बभ्रुव इति ङ, चिह्नितपुस्तकपाटः ।
4 धारयन्नाकुलां पृथ्वीं वामेन कमलामध इति ङ, चिह्नितपुस्तकपाठः
।

लाङ्गलं परशुं दण्डं छुरिकां चर्म्मक्षेपणं[1] ॥ 22cd
विंशद्बाहुश्चतुर्व्वक्त्रो दक्षिणस्थोथ वामके । 23ab
त्रिनेत्रे वामपार्श्वे न शयितो जलशाय्यपि ॥ 23cd
श्रिया धृतैकचरणो विमलाद्याभिरीडितः । 24ab
नाभिपद्मचतुर्व्वक्त्रो हरिशङ्करको हरिः ॥ 24cd
शूलर्ष्टिधारी दक्षे च गदाचक्रधरो पदे । 25ab
रुद्रकेशवलक्ष्माङ्गो गौरी लक्ष्मीसमन्वितः ॥ 25cd
शङ्खचक्रगदावेदपाणिश्चाश्वशिरा हरिः । 26ab
वामपादो धृतः शेषे दक्षिणः कूर्म्मपृष्ठगः ॥ 26cd
दत्तात्रेयो द्विबाहुः स्याद्वामोत्सङ्गे श्रिया सह । 27ab
विश्वक्सेनश्चक्रगदी हली शङ्खी हरेर्गणः ॥ 27cd

इत्यादिमहापुराणे आग्नेये प्रतिमालक्षणं नाम ऊनपञ्चाशो ऽध्यायः ॥

## 50

**अथ पञ्चाशोध्यायः** । देवीप्रतिमालक्षणकथनं ।
भगवानुवाच ।
चण्डी विंशतिबाहुः स्याद्बिभ्रती दक्षिणैः करः । 1ab
शूलासिशक्तिचक्राणि पाशं खेटायुधाभयं ॥ 1cd
डमरुं शक्तिकां वामैर्न्नागपाशञ्च खेटकं । 2ab
कुठाङ्कुशचापांश्च घण्टाध्वजगदास्तथा ॥ 2cd
आदर्शमुद्गरान् हस्तैश्चण्डी वा दशबाहुका । 3ab
तदधो महिषश्छिन्नमूर्द्धा पतितमस्तकः ॥ 3cd

1 चर्म चोत्तममिति ङ, चिह्नितपुस्तकपाठः ।

शस्त्रोद्यतकरः क्रुद्धस्तद्ग्रीवासम्भवः पुमान् । 4ab
शूलहस्तो वमद्रक्तो रक्तस्रङ्मूर्द्धजेक्षणः ॥ 4cd
सिंहेनास्वाद्यमानस्तु पाशबद्धो गले भृशं । 5ab
याम्याङ्घ्य्राक्रान्तसिंहा च सव्याङ्घ्रिर्नीचगासुरे ॥ 5cd
चण्डिकेयं त्रिनेत्रा च सशस्त्रा रिपुमर्द्दनी । 6ab
नवपद्मात्मके स्थाने पूज्या दुर्गा स्वमूर्त्तितः ॥ 6cd
आदौ मध्ये तथेन्द्रादौ नवातत्त्वात्मभिः[1] क्रमात् । 7ab
अष्टादशभुजैका तु दक्षे मुण्डं च खेटकं ॥ 7cd
आदर्शतर्जनीचापं ध्वजं डमरुकं तथा । 8ab
पाशं वामे बिभ्रती च शक्तिमुद्गरशूलकं ॥ 8cd
वज्रखड्गाङ्कुशशरान् चक्रन्देवी शलाकया । 9ab
एतैरेवायुधैर्युक्ता शेषाः षोडशबहुकाः ॥ 9cd
डमरुं तर्जनीं त्यक्त्वा रुद्रचण्डादयो नव । 10ab
रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ॥ 10cd
चण्डा चण्दवती चैव चण्डरूपातिचण्डिका । 11ab
उग्रचण्डा च मध्यस्था रोचनाभारुणासिता ॥ 11cd
नीला शुक्ला धूम्रिका च पीता श्वेता च सिंहगाः । 12ab
महिषोथ पुमान् शस्त्री तत्कचग्रहमुष्टिकाः ॥ 12cd
आलीढा नव[2] दुर्गाः स्युः स्थाप्याः पुत्रादिवृद्धये । 13ab
तथा गौरी च चण्डिकाद्या कुण्ड्यक्षररदाग्निधृक् ॥ 13cd
सैव रम्भा वने सिद्धा ऽग्निहीना ललिता तथा । 14ab
स्कन्धमूर्द्धकरा वामे द्वितीये धृतदर्प्पणा ॥ 14cd

---

1 नवतत्वादिभिरिति ङ,चिह्नितपुस्तकपाठः ।
2 शालासु नव इति ङ, चिह्नितपुस्तकपाठः ।

याम्ये फलाञ्जलिहस्ता सौभाग्या तत्र चोर्द्धिका । 15ab
लक्ष्मीर्याम्यकराम्भोजा वामे श्रीफलसंयुता ॥ 15cd
पुस्ताक्षमालिकाहस्ता वीणाहस्ता सरस्वती । 16ab
कुम्भाब्जहस्ता श्वेताभा मकरोपरि जाह्नवी [1]॥ 16cd
कूर्म्मगा यमुना कुम्भकरा श्यामा च पूज्यते । 17ab
सवीणस्तुम्बुरुः शुक्लः शूली मात्रग्रतो वृषे ॥ 17cd
गौरी चतुर्मुखी ब्राह्मी अक्षमालासुरान्विता । 18ab
कुण्डाक्षपात्रिणी वामे हंसगा शाङ्करी सिता ॥ 18cd
शरचापौ दक्षिणे ऽस्या वामे चक्रं[2] धनुर्वृषे । 19ab
कौमारी शिखिगा रक्ता शक्तिहस्ता द्विबाहुका ॥ 19cd
चक्रशङ्खधरा सव्ये वामे लक्ष्मीर्गदाब्जधृक् । 20ab
दण्डशङ्खासि[3] गदया वाराहो महिषस्थिता ॥ 20cd
ऐन्द्री वामे वज्रहस्ता सहस्राक्षी तु सिद्धये । 21ab
चामुण्डा कोटराक्षी स्यान्निर्म्मांसा तु त्रिलोचना ॥ 21cd
निर्म्मांसा अस्थिसारा वा ऊर्द्ध्वकेशी कृशोदरी । 22ab
द्वीपिचर्म्मधरा वामे कपालं पट्टिशङ्करे ॥ 22cd
शूलं कर्त्री दक्षिणे ऽस्याः शवारूढास्थितभूषणा । 23ab
विनायको नराकारो वृहत्कुक्षिर्गजाननः ॥ 23cd
वृहच्छुण्डो ह्युपवीतो मुखं सप्तकलं भवेत् । 24ab
विस्ताराद्दैर्घ्यतश्चैव शुण्डं षट्त्रिंशदङ्गुलं ॥ 24cd
कला द्वादश नाडी तु ग्रीवा सार्द्धकलोच्छ्रिता । 25ab
षट्त्रिंशदङ्गुलं कण्ठं गुह्यमध्यर्द्धमङ्गुलं ॥ 25cd

---

1 मकरेद्धरि जाह्ननीति ख, घ, ङ, चिह्नितपुस्तत्रयकपाठः ।
2 वामे वज्रमिति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 शङ्खारि इति ख, चिह्नितपुस्तकपाठः ।

नाभिरूरू द्वादशञ्च जङ्घे पादे तु दक्षिणे । 26ab
स्वदन्तं परशुं वामे लड्डुकञ्चोत्पलं शये ॥ 26cd
सुमुखी च विडालाक्षी पार्श्वे स्कन्दो मयूरगः । 27ab
स्वामी शाखो विशाखश्च द्विभुजो बालरूपधृक् ॥ 27cd
दक्षे शक्तिः कुक्कुटोथ एकवक्त्रोथ षण्मुखः । 28ab
षड्भुजो वा द्वादशभिर्ग्रामेरण्ये द्विबाहुकः ॥ 28cd
शक्तीषुपाशनिस्त्रिंशतोत्रदोस्तर्जनीयुतः । 29ab
शक्त्या दाक्षिणहस्तेषु षट्सु वामे करे तथा ॥ 29cd
शिखिपिच्छन्धनुः खेटं पताकाभयकुक्कुटे । 30ab
कपालकर्तरीशूलपाशभृद्याम्यसौम्ययोः ॥ 30cd
गजचर्म्मभृदूर्द्धास्यपादा स्यात् रुद्रचर्चिका । 31ab
सैव चाष्टभुजा देवी शिरोडमरुकान्विता ॥ 31cd
तेन सा रुद्रचामुण्डा नाटेश्वर्य्यथ नृत्यती । 32ab
इयमेव महालक्ष्मीरुपविष्टा चतुर्मुखी ॥ 32cd
नृवाजिमहिषेभांश्च खादन्ती च करे स्थितान् । 33ab
दशबाहुस्त्रिनेत्रा च शस्त्रासिडमरुत्रिकं ॥ 33cd
बिभ्रती दक्षिणे हस्ते वामे घण्टां च खेटकं । 34ab
खट्वाङ्गं च त्रिशूलञ्च सिद्धचामुण्डकाह्वया ॥ 34cd
सिद्धयोगेश्वरी देवी सर्वसिद्धप्रदायिका । 35ab
एतद्रूपा भवेदन्या पाशाङ्कुशयुतारुणा ॥ 35cd
भैरवी रूपविद्या तु भुजैर्द्वादशभिर्युता । 36ab
एताः श्मशानजा रौद्रा अम्बाष्टकमिदं[1] स्मृतं ॥ 36cd

1 आद्याष्टकमिदमिति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।

क्षमा शिवावृता[1] वृद्धा द्विभुजा विवृतानना । 37ab
दन्तुरा क्षेमकरी स्याद्भूमौ जानुकरा स्थिता ॥ 37cd
यक्षिण्यस्तब्धदीर्घाक्षाः शाकिन्यो वक्रदृष्टयः[2] । 38ab
पिङ्गाक्षाः स्युर्म्महारम्या रूपिण्योप्सरसः[3] सदा ॥ 38cd
साक्षमाली त्रिशूली च नन्दीशो द्वारपालकः । 39ab
महाकालोसिमुण्डी स्याच्छूलखटकवांस्तथा ॥ 39cd
कृशो भङ्गी च नृत्यन् वै कुष्माण्डस्थूलखर्ववान् । 40ab
गजगोकर्णवक्त्राद्या वीरभद्रादयो गणाः ॥ 40cd
घण्टाकर्णोष्टदशदोः पापरोगं विदारयन् । 41ab
वज्रासिदण्डचक्रेषुमुषलाङ्कुशमुद्गरान् ॥ 41cd
दक्षिणे तर्जनीं खेटं शक्तिं मुण्डञ्च पाशकं । 42ab
चापं घण्टां कुठारञ्च द्वाभ्याञ्चैव त्रिशूलकं । 42cd
घण्टामालाकुलो देवो विस्फोटकविमर्दनः[4] ॥ 42॥ 42ef

इत्यादिमहापुराणे आग्नेये देवीप्रतिमालक्षणं नाम पञ्चाशो ऽध्यायः ॥

# 51

## अथ एकपञ्चाशो ऽध्यायः ।

सूर्य्यादिप्रतिमालक्षणं ।
भगवानुवाच ।
ससप्ताश्वे सैकचक्रे रथे सूर्य्यो द्विपद्मधृक् । 1ab
मसीभाजनलेखन्यौ बिभ्रत्कुण्डी तु दक्षिणे ॥ 1cd
वामे तु पिङ्गलो द्वारि दण्डभृत् स रवेर्गणः । 2ab

1 शिवाच्युतेति ख, चिह्नितपुस्तकपाठः ।
2 वज्रदृष्टय इति ख, चिह्नितपुस्तकपाठः ।
3 महारथ्यो रूपिण्यो ऽप्सरस इति ख, चिह्नितपुस्तकपाठः ।
4 विस्फोटकरुणर्द्दन इति ग, ङ, चिह्नितपुस्तकपाठः ।

बालव्यजनधारिण्यौ पार्श्वे राज्ञी च निष्प्रभा ॥ 2cd
अथवाश्वासमारूढः कार्य्य एकस्तु भास्करः । 3ab
वरदा द्व्यब्जिनः सर्वे दिक्पालास्त्रकराः क्रमात् ॥ 3cd
मुद्गरशूलचक्राब्जभृतोग्न्यादिविदिक्स्थिताः । 4ab
सूर्य्यार्यमादिरक्षोन्ताश्चतुर्हस्ता द्विषड्दले ॥ 4cd
वरुणः सूर्यनामा च सहस्रांशुस्तथापरः । 5ab
धाता तपनसञ्ज्ञश्च सविताथ गभस्तिकः ॥ 5cd
रविश्चैवाथ पर्ज्जन्यस्त्वष्टा मित्रोथ विष्णुकः । 6ab
मेषादिराशिसंस्थाश्च मार्गादिकार्त्तिकान्तकाः ॥ 6cd
कृष्णो रक्तो मनाग्रक्तः पीतः पाण्डरकः सितः । 7ab
कपिलः पीतवर्णश्च शुकाभो धवलस्तथा ॥ 7cd
धूम्रो नीलः क्रमाद्वर्णाः शक्तयः केशराग्रगाः । 8ab
इडा सुषुम्णा विश्वार्च्चिरिन्दुसञ्ज्ञा प्रमर्दिनी[1] ॥ 8cd
प्रहर्षिणी महाकाली कपिला च प्रबोधनी । 9ab
नीलाम्बरा घनान्तस्था अमृताख्या च शक्तयः ॥ 9cd
वरुणादेश्च तद्वर्णाः केशराग्रेषु विन्यसेत् । 10ab
तेजश्चण्डो महावक्रो[2] द्विभुजः पद्मखड्गभृत्[3] ॥ 10cd
कुण्डिकाजप्यामालीन्दुः कुजः शक्त्यक्षमालिकः । 11ab
बुधश्चापाक्षपाणिः स्याज्जीवः कुण्ड्यक्षमालिकः ॥ 11cd

1 विश्वाची विन्दुसञ्ज्ञाप्रवर्द्धनी इति ङ, चिह्नितपुस्तकपाठः ।

2 महारक्त इति ख, चिह्नितपुस्तकपाठः । मार्त्तण्डश्च महारक्त इति ङ, चिह्नितपुस्तकपाठः ।

3 पद्मखड्गधृगिति ग, घ, चिह्नितपुस्तकपुस्तकपाठः । खड्गचर्म्मभृदिति ङ, चिह्नितपुस्तकपाठः ।

शुक्रः कुण्ड्यक्षमाली स्यात् किण्किणीसूत्रवाञ्छनिः[1] । 12ab

अर्द्धचन्द्रधरो राहुः केतुः खड्गी च दीपभृत् ॥ 12cd
अनन्तस्तक्षकः कर्क्कः पद्मो महाब्जः शङ्ककः । 13ab
कुलिकः सूत्रिणः सर्वे फणवक्त्रा महाप्रभाः ॥ 13cd
इन्द्रो वज्री गजारूढश्छागगोग्निश्च शक्तिमान् । 14ab
यमो दण्डी च महिषे नैर्ऋतः खड्गवान् करे ॥ 14cd
मकरे वरुणः पाशी वायुर्ध्वजधरो मृगे । 15ab
गदी[2] कुवेरो मेषस्थ ईशानश्च जटी वृषे ॥ 15cd
द्विबाहवो लोकपाला विश्वकर्म्माक्षसूत्रभृत् । 16ab
हनूमान् वज्रहस्तः स्यात् पद्भ्यां सम्पीड़िताश्रयः ॥ 16cd
वीणाहस्ताः किन्नराः स्युर्मालाविद्याधराश्च खे[3] । 17ab
दुर्बलाङ्गाः पिशाचाः स्युर्वेताला विकृताननाः[4] । 17cd
क्षेत्रपालाः शूलवन्तः[5] प्रेता महोदराः कृशाः ॥ 17॥ 17ef

इत्यादिमहापुराणे आग्नेये प्रतिमालक्षणं नाम एकपञ्चाशो ऽध्यायः ॥

## 52

### अथ द्विपञ्चोशो ऽध्यायः ।

देवीप्रतिमालक्षणं ।
भगवानुवाच ।
योगिन्यष्टाष्टकं वक्ष्ये ऐन्द्रादीशान्ततः क्रमात् । 1ab

1 शिखिनीसूत्रवान् शनिरिति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
2 खड्गो इति घ, चिह्नितपुस्तकपाठः ।
3 मणिविद्याधराश्च खे इति ख, चिहितपुस्तकपाठः ।
4 विस्तृताननना इति ख, चिह्नितपुस्तकपाठः ।
5 शूलयुता इति ग, घ, ङ, चिह्नितपुस्तकपाठः ।

अक्षोभ्या रूक्षकर्णो च राक्षसी कृपणाक्षया[1] ॥ 1cd
पिङ्गाक्षी च क्षया क्षेमा इला लीलालया तथा । 2ab
लोला लक्ता बलाकेशी[2] लालसा विमला पुनः[3] ॥ 2cd
हुताशा च विशालाक्षी हुङ्कारा वडवामुखी । 3ab
महाक्रूरा क्रोधना तु भयङ्करी महानना ॥ 3cd
सर्वज्ञा तरला तारा ऋग्वेदा तु हयानना । 4ab
साराख्या रुद्रशङ्ग्राही[4] सम्बरा तालजङ्घिका ॥ 4cd
रक्ताक्षी सुप्रसिद्धा तु विद्युज्जिह्वा करङ्किणी । 5ab
मेघनादा प्रचण्डोग्रा कालकर्णी[5] वरप्रदा ॥ 5cd
चन्द्रा चन्द्रावली[6] चैव प्रपञ्चा प्रलयान्तिका । 6ab
शिशुवक्त्रा पिशाची च पिशिताशा च लोलुपा ॥ 6cd
धमनी तापनी चैव रागिणी[7] विकृतानना । 7ab
वायुवेगा वृहत्कुक्षिर्विकृता विश्वरूपिका ॥ 7cd
यमजिह्वा जयन्ती च दुर्जया च जयान्तिका । 8ab
विडाली रेवती चैव पूतना विजयान्तिका ॥ 8cd
अष्टहस्ताश्चतुर्हस्ता इच्छास्त्राः सर्वसिद्धिदाः । 9ab

1 क्षपणा क्षमा इति ख, चिह्नितपुस्तकपाठः । क्षपणा क्षपा इति ग, घ, चिह्नितपुस्तकद्वयकपाठः ।
2 लोला रक्ता च लोकेशो इति ग, घ, ङ, चिह्निअपुस्तकत्रयपाठः ।
3 विमला तत इति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
4 रससङ्ग्राही इति ख, चिह्नितपुस्तकपाठः । वसुसङ्ग्राही इति घ, चिह्नितपुस्तकपाठः ।
5 कालवर्णी इति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
6 चण्डा चण्दवतीति ङ, चिह्नितपुस्तकपाठः ।
7 वामनी इति ख, ग, ङ, चिह्नितपुस्तकपाठः ।

भैरवश्चार्कहस्तः स्यात् कूर्परास्यो[1] जटेन्दुभृत् ॥ 9cd
खड्गाङ्कुशकुठारेषुविश्वाभयभृदेकतः । 10ab
चापत्रिशूलखट्वाङ्गपाशकार्द्धवरोद्यतः ॥ 10cd
गजचर्मधरो द्वाभ्यां कृत्तिवासोहिभूषतः । 11ab
प्रेताशनो मातृमध्ये पूज्यः पञ्चाननोथवा ॥ 11cd
अविलोमाग्निपर्यन्तं दीर्घाष्टकैकभेदितं । 12ab
तत्षडङ्गानि जात्यन्तैरन्वितं च क्रमाद् यजेत् ॥ 12cd
मन्दिराग्निदलारूढं[2] सुवर्णरसकान्वितं । 13ab
नादविन्द्वन्दुसंयुक्तं मातृनाथाङ्गदीपितं ॥ 13cd
वीरभद्रो वृषारूढो मात्रग्रे स चतुर्मुखः । 14ab
गौरीं तु द्विभुजा त्र्यक्षा शूलिनी दर्पणान्विता ॥ 14cd
शूलं गलन्तिका कुण्डी[3] वरदा च चतुर्भुजा । 15ab
अब्जस्था ललिता स्कन्दगणादर्शशलाकया[4] ॥ 15cd
चण्डिका सशहस्ता स्यात् खड्गशूलारिशक्तिधृक् । 16ab
दक्षे वामे नागपाशं चर्म्माग्कुशकुठारकं । 16cd
धनुः सिंहे च महिषः शूलेन प्रहतोग्रतः ॥ 16॥ 16ef

इत्यादिमहापुराणे आग्नेये प्रतिमालक्षणं नाम द्विपञ्चाशत्तमो ऽध्यायः ॥

---

1 दन्तुरास्य इति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
2 मण्डलाग्निदलारूढमिति ङ, चिह्नितपुस्तकपाठः ।
3 शूलं गलन्ती कुण्डी चेति ख, चिह्नितपुस्तकपाठः ।
4 स्कन्दगणा दश विनायका इति ख, चिहिनितपुस्तकपाठः ।
5 अत्र चण्डिकादशहस्तेषु खड्गशूलारिशक्तिधृगिति युक्तःपाठः ।
अस्मल्लब्धपुस्तकपञ्चकेषु नायं पाठः ।

# 53

## अथ त्रिपञ्चाशत्तमोध्यायः ।

लिङ्गलक्षणं ।
भगवानुवाच ।
लिङ्गादिलक्षणं वक्ष्ये कमलोद्भव तच्छृणु । 1ab
दैर्घ्यार्द्धं वसुभिर्भक्त्वा त्यक्त्वा भागत्रयं ततः ॥ 1cd
विष्कम्भं भूतभागैस्तु चतुरस्रन्तु कारयेत् । 2ab
आयामं मूर्त्तिभिर्भक्त्वा एकद्वित्रिक्रमान् न्यसेत् ॥ 2cd
ब्रह्मविष्णुशिवांशेषु वर्द्धमानोयमुच्यते । 3ab
चतुरस्रेस्य वर्णार्द्धं गुह्यकोणेषु लाञ्छयेत् ॥ 3cd
अष्टाग्रं वैष्णवं भागं सिध्यत्येव न संशयः । 4ab
षोडशास्रं ततः कुर्य्याद्द्वात्रिंशास्रं ततः पुनः ॥ 4cd
चतुःषष्ट्यस्रकं कृत्वा वर्त्तुलं साधयेत्ततः । 5ab
कर्तयेदथ लिङ्गस्य शिरो वै देशिकोत्तमः ॥ 5cd
विस्तारमथ लिङ्गस्य अष्टधा संविभाजयेत् । 6ab
भागार्द्धार्द्धन्तु सन्त्यज्य च्छत्राकारं शिरो भवेत् ॥ 6cd
त्रिषु भागेषु सदृशमायामं यस्य विस्तरः । 7ab
तद्द्विभागसमं लिङ्गं सर्वकामफलप्रदं ॥ 7cd
दैर्घ्यस्य तु चतुर्थेन विष्कम्भं देवपूजिते । 8ab
सर्वेषामेव लिङ्गानां लक्षणं शृणु साम्प्रतं ॥ 8cd
मध्यसूत्रं समासाद्य ब्रह्मरुद्रान्तिकं[1] बुधः । 9ab
षोडशाङ्गुललिङ्गस्य षड्भागैर्भाजितो यथा ॥ 9cd
तद्वैयमनसूत्राभ्यां मानमन्तरमुच्यते । 10ab
यवाष्टमुत्तरे कार्यं शेषाणां यवहानितः ॥ 10cd
अधोभागं त्रिधा कृत्वा त्वर्द्धमेकं परित्यजेत् । 11ab

1 व्रजेदात्यन्तिकमिति ग, चिह्नितपुस्तकपाठः ।

अष्टधा तद्द्वयं कृत्वा ऊर्द्ध्वभागत्र्यं त्यजेत् ॥ 11cd
ऊर्ध्वञ्च पञ्चमाद्भागाद् भ्राम्य रेखां प्रलम्बयेत् । 12ab
भागमेकं परित्यज्य सङ्गमं कारयेत्तयोः ॥ 12cd
एतत् साधारणं प्रोक्तं लिङ्गानां लक्षणं मया । 13ab
सर्वसाधारणं वक्ष्ये पिण्डिकान्तान्निबोध मे ॥ 13cd
ब्रह्मभागप्रवेशञ्च ज्ञात्वा लिङ्गस्य चोच्छ्रयं । 14ab
न्यसेद् ब्रह्मशिलां विद्वान् सम्यक्कर्मशिलोपरि ॥ 14cd
तथा समुच्छ्रयं ज्ञात्वा पिण्डिकां प्रविभाजयेत् । 15ab
द्विभागमुच्छ्रितं पीठं विस्तारं लिङ्गसम्मितम् ॥ 15cd
त्रिभागं मध्यतः खातं कृत्वा पीठं[1] विभाजयेत् । 16ab
स्वमानार्द्धत्रिभागेण बाहुल्यं परिकल्पयेत् ॥ 16cd
बाहुल्यस्य त्रिभागेण मेखलामथ कल्पयेत् । 17ab
खातं स्यान्मेखलातुल्यं क्रमान्निम्नन्तु कारयेत् ॥ 17cd
मेखलाषोडशांशेन खातं वा तत्प्रमाणतः । 18ab
उच्छ्रायं तस्य पीठस्य विकाराङ्गं तु[2] कारयेत् ॥ 18cd
भूमौ प्रविष्टमेकं तु भागैकेन[3] पिण्डिका । 19ab
कण्ठं भागैस्त्रिभिः कार्यं भागेनैकेन पट्टिका ॥ 19cd
द्व्यंशेन चोर्द्धपट्टन्तु[4] एकांशाः शेषपट्टिका । 20ab
भागं भागं प्रविष्टन्तु यावत् कण्ठं ततः पुनः ॥ 20cd
निर्गमं भागमेकं तु यावद्वै शेषपट्टिका । 21ab
प्रणालस्य त्रिभागेन निर्गमस्तु त्रिभागतः ॥ 21cd

---

1 मध्यतः कृत्वा ततः पीठमिति घ, चिह्नितपुस्तकपाठः ।
2 विकारांशांश्चेति घ, चिह्नितपुस्तकपाठः ।
3 भागेनैकेनेति ग, चिह्नितपुस्तकपाठः ।
4 चार्द्धपट्टन्तु इति ख, ग, चिह्नितपुस्तकपाठः ।

मूलेङ्गुल्यग्रविस्तारमग्रे त्र्यंशेन चार्द्धतः । 22ab
ईषन्निम्नन्तु कुर्वीत खातं तच्चोत्तरेण वै । 22cd
पिण्डिकासहितं लिङ्गमेतत् साधारणं स्मृतम् ॥ 22॥ 22ef

इत्यादिमहापुराणे आग्नेये लिङ्गलक्षणं नाम त्रिपञ्चाशत्तमोध्यायः ॥

## 54

### अथ चतुःपञ्चाशत्तमोध्यायः ।

लिङ्गमानादिकथनं ।
भगवानुवाच ।
वक्ष्याम्यन्यप्रकारेण[1] लिङ्गमानादिकं शृणु । 1ab
वक्ष्ये लवणजं लिङ्गं घृतजं बुद्धिवर्द्धनम् ॥ 1cd
भूतये वस्त्रलिङ्गन्तु लिङ्गन्तात्कालिकं विदुः । 2ab
पक्कापक्कं मृण्मयं स्यादपक्कात् पक्कजं वरं ॥ 2cd
ततो दारुमयं पुण्यं दारुजात् शैलजं वरं । 3ab
शैलाद्वरं तु मुक्ताजं ततो लौहं सुवर्णजं ॥ 3cd
राजतं कीर्त्तितं ताम्रं पैत्तलं भुक्तिमुक्तिदं । 4ab
रङ्गजं [2] रसलिङ्गञ्च भुक्तिमुक्तिप्रदं वरं ॥ 4cd
रसजं रसलोहादिरत्नगर्भन्तु वर्धयेत् । 5ab
मानादि नेष्टं सिद्धादि स्थापितेथ स्वयम्भुवि ॥ 5cd
वामे च स्वेच्छया तेषां पीठप्रासादकल्पना । 6ab
पूजयेत् सूर्य्यविम्बस्थं दर्पणे प्रतिविम्बितं ॥ 6cd
पूज्यो हरस्तु सर्वत्र लिङ्गे पूर्णार्च्चनं भवेत् । 7ab
हस्तोत्तरविधं शैलं[3] दारुजं तद्वदेव हि ॥ 7cd

1 प्रवक्ष्ये ऽहं प्रकारेणेति ग, चिह्नितपुस्तकपाठः ।
2 रत्नजमिति ख, चिह्नितपुस्तकपाठः ।
3 हस्ते तु विविधं शैलमिति ग, चिह्नितपुस्तकपाठः ।

चलमङ्गुलमानेन द्वारगर्भकरैः स्थितम्[1] । 8ab
अङ्गुलाद् गृहलिङ्गं स्याद्यावत् पञ्चशाङ्गुलम् ॥ 8cd
द्वारमानात् त्रिसङ्ख्याकं नवधा गर्भमानतः । 9ab
नवधा गर्भमानेन लिङ्गन्धाम्नि च पूजयेत् ॥ 9cd
एवं लिङ्गानि षट्त्रिंशत् ज्ञेयानि ज्येष्ठमानतः । 10ab
मध्यमानेन षट्त्रिंशत् षट्त्रिंशदधमेन च ॥ 10cd
इत्थमैक्येन लिङ्गानां शतमष्टोत्तरं भवेत् । 11ab
एकाङ्गुलादिपञ्चान्तं कन्यसञ्चलमुच्यते ॥ 11cd
षदादिदशपर्यन्तञ्चलं लिङ्गञ्च मध्यमं । 12ab
एकादशाङ्गुलादि स्यात् ज्येष्ठं पञ्चदशान्तकम् ॥ 12cd
षडङ्गुलं महारत्नै रत्नैरन्यैर्न्नवाङ्गुलम् । 13ab
रविभिर्हेमभारोत्थं लिङ्गं शेषैस्त्रिपञ्चभिः ॥ 13cd
षोडशांशे च वेदांशे युगं लुप्त्वोर्द्धदेशतः । 14ab
द्वात्रिंशत्षोडशांशांश्च[2] कोणयोस्तु विलोपयेत् ॥ 14cd
चतुर्निवेशनात् कण्ठो विंशतिस्त्रियुगैस्तथा[3] । 15ab
पार्श्वाभ्यां तु विलुप्ताभ्यां चललिङ्गं भवेद्वरं[4] ॥ 15cd
धाम्नो युगर्त्तुनागांशैर्द्वारं हीनादितः क्रमात् । 16ab
लिङ्गद्वारोच्छ्रयादर्वाग् भवेत् पादोनतः क्रमात् ॥ 16cd
गर्भार्द्धेनाधमं लिङ्गं भूतांशैः स्यात् त्रिभिर्वरं । 17ab
तयोर्म्मध्ये च सूत्राणि सप्त सम्पातयेत् समं ॥ 17cd

---

1 वनमङ्गुलमानेन द्वारगर्भकरे स्थितमिति ग, चिह्नितपुस्तकपाठः ।
2 द्वात्रिंशत्षोडशार्द्धञ्चेति ग, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।
3 विंशतिस्त्रिगुणैस्तथेति घ, चिह्नितपुसुतकपाठः ।
4 वनलिङ्गं भवेद्वरमिति ग, घ, चिह्नितपुस्तकपाठः । चललिङ्गं भवेद् ध्रुवमिति ख, चिह्नितपुस्तकपाठः ।

एवं स्युर्नव सूत्राणि भूतसूत्रैश्च मध्यमं । 18ab
द्व्यन्तरो वामवामञ्च[1] लिङ्गानां दीर्घता नव ॥ 18cd
हस्ताद्द्विवर्द्धते हस्तो यावत्स्युर्न्नव पाणयः । 19ab
हीनमध्योत्तमं लिङ्गं त्रिविधं त्रिविधात्मकम् ॥ 19cd
एकैकलिङ्गमध्येषु त्रीणि त्रीणि च पादशः । 20ab
लिङ्गानि घटयेद्धीमान् षट्सु चाष्टोत्तरेषु च ॥ 20cd
स्थिरदीर्घप्रमेयात्तु द्वारगर्भकरात्मिका । 21ab
भागेशञ्चाप्यमीशञ्च देवेज्यन्तुल्यसंज्ञितं ॥ 21cd
चत्वारि लिङ्गरूपाणि विष्कम्भेण तु लक्षयेत् । 22ab
दीर्घमायान्वितं कृत्वा लिङ्गं कुर्य्यात् त्रिरूपकं ॥ 22cd
चतुरष्टाष्टवृत्तञ्च तत्त्वत्रयगुणात्मकं । 23ab
लिङ्गानामीप्सितं दैर्घ्यं तेन कृत्वाङ्गुलानि वै ॥ 23cd
ध्वजाद्यायैः सुरैर्भूतैः शिखिभिर्व्वा हरेत् कृतिं । 24ab
तान्यङ्गुलानि यच्छेषं लक्षयेच्च शुभाशुभं ॥ 24cd
ध्वजाद्या ध्वजसिंहेभवृषाः ज्येष्ठाः परे शुभाः । 25ab
स्वरेषु षड्जगान्धारपञ्चमाः शुभदायकाः ॥ 25cd
भूतेषु च शुभा भूः स्यादग्निष्वाहवनीयकः । 26ab
उक्तायामस्य चार्द्धांशे नागांशैर्भाजिते क्रमात् ॥ 26cd
रसभूतांशषष्ठांशत्र्यंशाधिकशरैर्भवेत् । 27ab
आद्यानाद्यसुरेज्यार्कतुल्यानाञ्चतुरस्रता ॥ 27cd
पञ्चमं वर्द्धमानाख्यं व्यासान्नाहप्रवृद्धितः । 28ab
द्विधा भेदा बहून्यत्र वक्ष्यन्ते विश्वकर्म्मतः ॥ 28cd
आद्यादीनां त्रिधा स्थौल्याद्यवधूतं तदष्टधा[2] । 29ab

1 अन्तरे वामवामे चेति ङ, चिह्नितपुस्तकपाठः ।
2 स्थौल्याद् यववृद्ध्या तदष्टधा इति ख, चिह्नितपुस्तकपाठः ।

त्रिधा हस्ताज्जिनाख्यञ्च युक्तं सर्वसमेन च[1] ॥ 29cd
पञ्चविंशतिलिङ्गानि नाद्ये[2] देवार्च्चिते तथा । 30ab
पञ्चसप्तभिरेकत्वाज्जिनैर्भक्तैर्भवन्ति हि ॥ 30cd
चतुर्दशसहस्राणि चतुर्दशशतानि च । 31ab
एवमष्टाङ्गुलविस्तारो[3] नवैककरगर्भतः ॥ 31cd
तेषां कोणार्द्धकोणस्थैश्चिन्त्यात् कोणानि[4] सूत्रकैः । 32ab
विस्तारं मध्यतः कृत्वा स्थाप्यं वा मध्यतस्त्रयं ॥ 32cd
विभागादूर्द्धमष्टास्रो[5] द्व्यष्टास्रः स्याच्छिवांशकः । 33ab
पादाज्जान्वन्तको ब्रह्मा नाभ्यन्तो विष्णुरित्यतः ॥ 33cd
मूर्द्धान्तो भूतभागेशो व्यक्ते ऽव्यक्ते च तद्वति । 34ab
पञ्चलिङ्गव्यवस्थायां शिरो वर्त्तुलमुच्यते ॥ 34cd
छत्राभं कुक्कुटाभं वा बालेन्दुप्रतिमाकृतिः[6] । 35ab
एकैकस्य चतुर्भेदैः[7] काम्यभेदात् फलं वदे ॥ 35cd
लिङ्गमस्तकविस्तारं वसुभक्तन्तु कारयेत् । 36ab
आद्यभागं चतुर्द्धा तु[8] विस्तारोच्छ्रायतो भजेत् ॥ 36cd
चत्वारि तत्र सूत्राणि[9] भागभागानुपातनात् । 37ab

---

1 पूजयेत् सर्व्वमेव चेति ङ, चिह्नितपुस्तकपाठः ।

2 नाद्ये देवार्च्चित इति ख, ग, चिह्नितपुस्तकपाठः ।

3 एवमष्टाङ्गुलविन्यास इति ग, घ, चिह्नितपुस्तकपाठः ।

4 छिन्द्यात् कोणानीति ख, चिह्नितपुस्तकपाठः । छिन्द्यात् कोषाणि इति ङ, चिह्नितपुस्तकपाठः ।

5 द्विभागादूर्द्धवमष्टास्र इति ख, ङ, चिह्नितपुस्तकपाठः ।

6 बालेन्दुत्रपुषाकृतिरिति ख, ग, घ, चिह्नितपुस्तकपाठः ।

7 चतुर्भागैरिति ख, चिह्नितपुस्तकपाठः ।

8 अन्त्यभागमिति ग, घ, चिह्नितपुस्तकपाठः ।

9 चत्वारि तत्र छत्राणि इति ग, घ, ङ, चिह्नितपुस्तकचतुष्टयपाठः ।

पुण्डरीकन्तु भागेन विशालाख्यं विलोपनात् ॥ 37cd
त्रिशातनात्तु श्रीवत्सं शत्रुकृद्वेदलोपनात् । 38ab
शिरः सर्वसमे श्रेष्ठं कुक्कुटाभं सुराह्वये[1] ॥ 38cd
चतुर्भागात्मके लिङ्गेत्रपुषं द्वयलोपनात् । 39ab
अनाद्यस्य शिरः प्रोक्तमर्द्धचन्द्रं शिरः शृणु ॥ 39cd
अंशात् प्रान्ते युगांशैश्च त्वेकहान्यामृताक्षकं[2] । 40ab
पूर्णबालेन्दुकुमुदं द्वित्रिवेदक्षयात् क्रमात् ॥ 40cd
चतुस्त्रिरेकवदनं मुखलिङ्गमतः शृणु । 41ab
पूजाभागं प्रकर्त्तव्यं मूर्त्त्यग्निपदकल्पितं[3] ॥ 41cd
अर्क्कांशं पूर्ववत् त्यक्त्वा षट् स्थानानि विवर्त्तयत् । 42ab
शिरोन्नतिः प्रकर्त्तव्या ललाटं नासिका ततः ॥ 42cd
वदनं चिवुकं ग्रीवा युगभागैर्भुजाक्षिभिः । 43ab
कराभ्यां मुकुलीकृत्य[4] प्रतिमायाः प्रमाणतः ॥ 43cd
मुखं प्रति समः कार्यो विस्तारादष्टमांशतः । 44ab
चतुर्मुखं मया प्रोक्तं त्रिमुखञ्चोच्यते शृणु ॥ 44cd
कर्णपादाधिकास्तस्य ललाटादीनि निर्दिशेत् । 45ab
भुजौ चतुर्भिर्भागैस्तु कर्त्तव्यौ पश्चिमोर्जितं ॥ 45cd
विस्तरादष्टमांशेन मुखानां प्रतिनिर्गमः । 46ab
एकवक्त्रं तथा कार्य्यं पूर्वस्यां सौम्यलोचनं ॥ 46cd
ललाटनासिकावक्त्रग्रीवायाञ्च विवर्त्तयेत् । 47ab

1 कुक्कुटाण्डं सुधाह्वये इति ख, चिह्नितपुस्तकपाठः ।
2 द्वैकहान्या सुताह्वयमिति ख, चिह्नितपुस्तकपाठः ।
3 ऋत्वग्निपदकल्पितमिति ख, चिह्नितपुस्तकपाठः, मुखभागं प्रकर्त्त-व्यं मूलाग्निपदकल्पितमिति ङ, चिह्नितपुस्तकपाठः ।
4 कर्णाभ्यां कुण्डलीकृत्वेति ग, चिह्नितपुस्तकपाठः ।

भुजाच्च पञ्चमांशेन[1] भुजहीनं विवर्तयेत् ॥ 47cd
विस्तारस्य षडंशेन मुखैर्निर्गमनं हितं । 48ab
सर्वेषां मुखलिङ्गानां त्रपुषं वाथ कुक्कुटं ॥ 48cd

इत्यादिमहापुराणे आग्नेये व्यक्ताव्यक्तलक्षणं नाम चतुःपञ्चाशत्तमो ऽध्यायः ।

# 55

## अथ पञ्चपञ्चाशत्तमो ऽध्यायः ।

पिण्डिकालक्षणकथनं ।
भगवानुवाच ।
अतः परं प्रवक्ष्यामि प्रतिमानान्तु पिण्डिकाम् । 1ab
दैर्घ्येण प्रतिमातुल्या तदर्द्धेन तु विस्तृता ॥ 1cd
उच्छ्रितायामतोर्द्धेन सुविस्ताराद्धभागतः । 2ab
तृतीयेन तु वा तुल्यं[2] तत्त्रिभागेण मेखला ॥ 2cd
खातं च तत्प्रमाणं तु किञ्चिदुत्तरतो नतम् । 3ab
विस्तारस्य चतुर्थेन प्रणालस्य विनिर्गमः ॥ 3cd
सममूलस्य विस्तारमग्रे कुर्य्यात्तदर्द्धतः । 4ab
विस्तारस्य तृतीयेन तोयमार्गन्तु कारयेत् ॥ 4cd
पिण्डिकार्द्धेन वा तुल्यं[3] दैर्घ्यमीशस्य[4] कीर्तितम् । 5ab
ईशं वा[5] तुल्यदीर्घञ्च ज्ञात्वा सूत्रं प्रकल्पयेत् ॥ 5cd

1 भुजार्द्धपञ्चमांशेनेति ङ, चिह्नितपुस्तकपाठः ।
2 त्रिभागेन तु बाहुल्यमिति ङ, चिह्नितपुस्तकपाठः ।
3 पिण्डिकार्द्धेन बाहुल्यमिति ङ, चिह्नितपुस्तकपाठः ।
4 दैर्घ्यं कुशस्येति ग, ङ, चिह्नितपुस्तकपाठः ।
5 कुशम्बाहुल्यदीर्घञ्चेति ङ, चिह्नितपुस्तकपाठः ।

उच्छ्रायं पूर्ववत् कुर्य्याद्भागषोडशसङ्ख्यया । 6ab
अधः षड्कं द्विभागन्तु कण्ठं कुर्यात्त्रिभागकम् ॥ 6cd
शेषास्त्वेकैकशः कार्याः प्रतिष्ठानिर्गमास्तथा । 7ab
पट्टिका पिण्डिका चेयं सामान्यप्रतिमासु च ॥ 7cd
प्रासादद्वारमानेन प्रतिमाद्वारमुच्यते[1] । 8ab
गजव्यालकसंयुक्ता प्रभा स्यात् प्रतिमासु च ॥ 8cd
पिण्डिकापि यथाशोभं कर्त्तव्या सततं हरेः । 9ab
सर्वेषामेव देवानां शिष्णूक्तं मानमुच्यते । 9cd
देवीनामपि सर्वासां लक्ष्म्युक्तं मानमुच्यते ॥ 9॥ 9ef

इत्यादिमहापुराणे आग्नेये पिण्डिकालक्षणं नाम पञ्चपञ्चाशत्तमो ऽध्यायः ॥

## 56

### अथ षट्पञ्चाशत्तमो ऽध्यायः ।

दिक्पालयागकथनं ।
भगवानुवाच ।
प्रतिष्ठापञ्चकं वक्ष्ये प्रतिमात्मा तु पूरुषः । 1ab
प्रकृतिः पिण्डिका लक्ष्मीः प्रतिष्ठा योगकस्तयोः ॥ 1cd
इच्छाफलार्थिभिस्तस्मात्प्रतिष्ठा क्रियते नरैः । 2ab
गर्भसूत्रं तु निःसार्य[2] प्रासादस्याग्रतो गुरुः ॥ 2cd
अष्टषोडशविंशान्तं मण्डपञ्चाधमादिकम् । 3ab
स्नानार्थं कलशार्थञ्च यागद्रव्यार्थमर्द्धतः ॥ 3cd
त्रिभागेणार्द्धभागेन वेदिं कुर्य्यात्तु शोभनाम् । 4ab

1 प्रतिमाद्रव्यमुच्यते इति ख, ङ, चिह्नितपुस्तकपाठः ।
2 गर्भसूत्रन्तु निर्म्मायेति ङ, चिह्नितपुस्तकपाठः ।

कलशैर्घटिकाभिश्च वितानाद्यैश्च भूषयेत् ॥ 4cd
पञ्चगव्येन सम्प्रोक्ष्य सर्वद्रव्याणि धारयेत् । 5ab
अलङ्कृतो गुरुर्विष्णुं ध्यात्वात्मानं प्रपूजयेत् ॥ 5cd
अङ्गुलीयप्रभृतिभिर्मूर्त्तिपान् वलयादिभिः । 6ab
कुण्डे कुण्डे स्थापयेच्च मूर्त्तिपांस्तत्र पारगान् ॥ 6cd
चतुष्कोणे चार्द्धकोणे वर्त्तुले पद्मसन्निभे । 7ab
पूर्वादौ तोरणार्थन्तु पिप्पलोडुम्बरौ वटं ॥ 7cd
प्लक्षं सुशोभनं पूर्वं सुभद्रन्दक्षतोरणं । 8ab
सुकर्म च सुहोत्रञ्च आप्ये सौम्ये समुच्छ्रयम् ॥ 8cd
पञ्चहस्तं तु संस्थाप्य स्योनापृथ्वीति पूजयेत् । 9ab
तोरणस्तम्भमूले तु कलशान्मङ्गलाङ्कुरान् ॥ 9cd
प्रदद्यादुपरिष्टाच्च कुर्य्याच्चक्रं सुदर्शनं । 10ab
पञ्चहस्तप्रमाणन्तु ध्वजं कुर्य्याद्विचक्षणः ॥ 10cd
वैपुल्यं चास्य कुर्वीत षोड़शाङ्गुलसम्मितं । 11ab
सप्तहस्तोच्छ्रितं वास्य कुर्य्यात् कुण्डं सुरोत्तम[1] ॥ 11cd
अरुणोग्निनिभश्चैव कृष्णः शुक्लोथ पीतकः । 12ab
रक्तवर्णस्तथा श्वेतः श्वेतवर्णादिकक्रमात्[2] ॥ 12cd
कुमुदः कुमुदाक्षश्च पुण्डरीकोथ वामनः । 13ab
शङ्कुकर्णः सर्व्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥ 13cd
पूज्या कोटिगुणैर्युक्ताः पूर्व्वाद्या ध्वजदेवताः । 14ab
जलाढकसुपूरास्तु पक्वविम्बोपमा घटाः ॥ 14cd

1 समाहित इति ङ, चिह्नितपुस्तकपाठः ।

2 श्वेतवर्नक्रमात् ध्वजा इति ङ, चिह्नितपुस्तकपाठः । कृष्णवर्णः क्रमाद्ध्वजा इति ङ, चिह्नितपुस्तकपाठः ।

अष्टाविंशाधिकशतं कालमण्डनवर्जिताः । 15ab
सहिरण्या वस्त्रकण्ठाः सोदकास्तोरणाद्बहिः ॥ 15cd
घटाः स्थाप्याश्च पूर्वादौ वेदिकायाश्च कोणगान् । 16ab
चतुरः स्थापयेत् कुम्भानाजिघ्रेति च मन्त्रतः ॥ 16cd
कुम्भेष्वावाह्य शक्रादीन् पूर्वादौ पूजयेत् क्रमात् । 17ab
इन्द्रागच्छ देवराज वज्रहस्त गजस्थित ॥ 17cd
पूर्वद्वारञ्च मे रक्ष देवैः सह नमोस्तु ते । 18ab
त्रातारमिन्द्रमन्त्रेण अर्चयित्वा यजेद् बुधः ॥ 18cd
आगच्छाग्ने शक्तियुत[1] छागस्थ बलसंयुत । 19ab
रक्षाग्नेयीं दिशं देवैः पूजां गृह्ण नमोस्तु ते ॥ 19cd
अग्निमूर्द्धेतिमन्त्रेण[2] यजेद्वा आग्नेय नमः । 20ab
महिषस्थ यमागच्छ दण्डहस्त महाबल ॥ 20cd
रक्ष त्वं दक्षिणद्वारं वैवस्वत नमोस्तु ते । 21ab
वैवस्वतं सङ्गमनमित्यनेन यजेद्यमं ॥ 21cd
नैर्ऋतागच्छ खड्गाढ्य बलवाहनसंयुत[3] । 22ab
इदमर्घ्यमिदं पाद्यं रक्ष त्वं नैर्ऋतीं दिशं ॥ 22cd
एष ते नैर्ऋते मन्त्रेण यजेदर्घ्यादिभिर्न्नरः । 23ab
मकरारूढ वरुण पाशहस्त महाबल ॥ 23cd
आगच्छ पश्चिमं द्वारं रक्ष रक्ष नमोस्तु ते । 24ab
उरुं हि राजा वरुणं यजेदर्घ्यादिभिर्गुरुः ॥ 24cd
आगच्छ वायो सबल ध्वजहस्त सवाहन । 25ab
वायव्यं रक्ष देवैस्त्वं समरुद्भिर्न्नमोस्तु ते ॥ 25cd

1 शक्तिहस्त इति ङ, चिह्नितपुस्तकपाठः ।
2 अग्निमूर्द्धेति अर्घ्याद्यैरिति ख, चिह्नितपुस्तकपाठः ।
3 नरवाहनसंयुत इति ख, ङ, चिह्नितपुस्तकपाठः ।

वात इत्यादिभिश्चार्वेदोन्नमो वायवेपि वा । 26ab
आगच्छ सोम सबला गदाहस्त सवाहन ॥ 26cd
रक्ष त्वमुत्तरद्वारं सकुवेर नमोस्तु ते । 27ab
सोमं राजानमिति वा यजेत्सोमाय वै नमः ॥ 27cd
आगच्छेशान सबल शूलहस्त वृषस्थित । 28ab
यज्ञमण्डपस्यैशानीं दिशं रक्ष नमोस्तु ते ॥ 28cd
ईशानमस्येति यजेदीशानाय नमोपि वा । 29ab
ब्रह्मन्नागच्छ हंसस्थ स्रुक्स्रुवव्यग्रहस्तक ॥ 29cd
सलोकोर्द्धां दिशं रक्ष यज्ञस्याज नमोस्तु ते । 30ab
हिरण्यगर्भेति यजेन्नमस्ते ब्रह्मणेपि वा ॥ 30cd
अनन्तागच्छ चक्राढ्य कूर्म्मस्थाहिगणेश्वर । 31ab
अधोदिशं रक्ष रक्ष अनन्तेश नमोस्तु ते । 31cd
नमोस्तु सर्पेति यजेदनन्ताय नमोपि वा ॥ 31॥ 31ef

इत्यादिमहापुराणे आग्नेये दिक्पतियागो नाम षट्पञ्चाशत्तमोध्यायः ॥

## 57

अथ सप्तपञ्चाशोध्यायः ।

कुम्भाधिवासविधिः ।

भगवानुवाच ।

भूमेः परिग्रहं कुर्य्यात् क्षिपेद्व्रीहींश्च सर्षपान् । 1ab
नारसिंहेन रक्षोघ्नान् प्रोक्षयेत् पञ्चगव्यतः ॥ 1cd
भूमिं घटे तु सम्पूज्य सरत्ने साङ्गकं हरिं । 2ab
अस्त्रमन्त्रेण करक[1] तत्र चाष्टशतं यजेत् ॥ 2cd
अच्छिन्नधारया सिञ्चन् ब्रीहीन् संस्कृत्य धारयेत् । 3ab

1 अस्त्रमन्त्रेण कवचमिति ङ, चिह्नितपुस्तकपाठः ।

प्रदक्षिणं परिभ्राम्य कलशं विकिरोपरि ॥ 3cd
सवस्त्रे कलशे भूयः पूजयेदच्युतं श्रियं । 4ab
योगे योगेति मन्त्रेण न्यसेच्छय्यान्तु मण्डले ॥ 4cd
कुशोपरि तूलिकाञ्च शय्यायां दिग्विदिक्षु च । 5ab
विद्याधिपान् यजेद्विष्णुं मधुघातं त्रिविक्रमं ॥ 5cd
वामनं दिक्षु वाय्वादौ[1] श्रीधरञ्च हृषीकपं । 6ab
पद्मनाभं दामोदरमैशान्यां स्नानमण्डपे ॥ 6cd
अभ्यर्च्य पश्चादैशान्यां चतुष्कुम्भे[2] सवेदिके । 7ab
स्नानमण्डपके सर्वद्रव्याण्यानीय निक्षिपेत् ॥ 7cd
स्नानकुम्भेषु कुम्भांस्तांश्चतुर्द्दिक्ष्वधिवासयेत् । 8ab
कलशाः स्थापनीयास्तु अभिषेकार्थमादरात् ॥ 8cd
वटोदुम्बरकाश्वत्थांश्चम्पकाशोकश्रीद्रुमान्[3] । 9ab
पलाशार्जुनप्लक्षांस्तु कदम्बवकुलाम्रकान् ॥ 9cd
पल्लवांस्तु समानीय पूर्वकुम्भे[4] विनिक्षिपेत् । 10ab
पद्मकं रोचनां दूर्व्वां दर्भपिञ्जलमेव च ॥ 10cd
जातीपुष्पं कुन्दपुष्पचन्दनं रक्तचन्दनं । 11ab
सिद्धार्थं तगरञ्चैव तण्डुलं दक्षिणे न्यसेत् ॥ 11cd
सुवर्णं रजतञ्चैव कूलद्वयमृदन्तथा । 12ab
नद्याः समुद्रगामिन्या विशेषात् जाह्नवीमृदं ॥ 12cd
गोमयञ्च यवान् शालींस्तिलांश्चैवापरे न्यसेत् । 13ab
विष्णुपर्णींश्यामलतां भृङ्गराजं शतावरीं ॥ 13cd

1 दिक्षु वह्न्यादाविति ङ, चिह्नितपुस्तकपाठः ।
2 चतुस्तम्भे इति ग, चिह्नितपुस्तकपाठः ।
3 पद्मकाशोकश्रीद्रुमानिति ग, चिह्नितपुस्तकपाठः ।
4 पर्णकुम्भ इति ङ, चिह्नितपुस्तकपाठः ।

सहदेवां महादेवीं[1] बलां व्यघ्रीं सलक्ष्मणां । 14ab
ऐशान्यामपरे कुम्भे मङ्गल्यान्विनिवेशयेत् ॥ 14cd
वल्मीकमृत्तिकां सप्तस्थानोत्थामपरे न्यसेत् । 15ab
जाह्नवीवालुकातोयं विन्यसेदपरे घटे ॥ 15cd
वराहवृषनागेन्द्रविषाणोद्धृतमृत्तिकां । 16ab
मृत्तिकां पद्ममूलस्य कुशस्य त्वपरे न्यसेत् ॥ 16cd
तीर्थपर्वतमृद्भिश्च युक्तमप्यपरे न्यसेत् । 17ab
नागकेशरपुष्पञ्च काश्मीरमपरे न्यसेत् ॥ 17cd
चन्दनागुरुकर्पूरैः पुष्पं चैवापरे न्यसेत् । 18ab
वैदूर्यं विद्रुमं मुक्तां स्फटिकं वज्रमेव च ॥ 18cd
एतान्येकत्र निक्षिप्य स्थापयेद्देवसत्तम । 19ab
नदीनदतडागानां सलिलैरपरं न्यसेत् ॥ 19cd
एकाशीतिपदे चान्यान्मण्डपे कलशान् न्यसेत् । 20ab
गन्धोदकाद्यैः सम्पूर्णान् श्रीसूक्तेनाभिमन्त्रयेत् ॥ 20cd
यवं सिद्धार्थकं गन्धं कुशाग्रं चाक्षतं तथा । 21ab
तिलान् फलं तथा पुष्पमर्घ्यार्थं पूर्वतो न्यसेत् ॥ 21cd
पद्मं श्यामलतां दूर्वां विष्णुपर्णींकुशांस्तथा । 22ab
पाद्यार्थं दक्षिणे भागे मधुपर्कं तु दक्षिणे[2] ॥ 22cd
कक्कोलकं लवङ्गञ्च तथा जातीफलं शुभं । 23ab
उत्तरे ह्याचमनाय अग्नौ दूर्वाक्षतान्वितं ॥ 23cd
पात्रं नीराजनार्थं च तथोद्वर्त्तनमानिले । 24ab
गन्धपुष्पान्वितं पात्रमैशान्यां पात्रके न्यसेत् ॥ 24cd

---

1 सहदेवां सिंहपुच्छीमिति ख, चिह्नितपुस्तकपाठः । सहदेवां जवां सिंहीमिति ङ, चिह्नितपुस्तकपाठः ।

2 मधुपर्कन्तु पश्चिमे इति ङ, चिह्नितपुस्तकपाठः ।

मुरामांसी चामलकं सहदेवां निशादिकं । 25ab
षष्टिदीपान्नयसेदष्टौ न्यसेन्नीराजनाय च ॥ 25cd
शङ्खं चक्रञ्च श्रीवत्सं कुलिशं पङ्कजादिकं । 26ab
हेमादिपात्रे कृत्वा तु नानावर्णादिपुष्पकं ॥ 26cd

इत्यादिमहापुराणे आग्नेये कलशाधिवासो नाम सप्तपञ्चा-शत्तमो ऽध्यायः ॥

## 58

### अथ अष्टपञ्चाशत्तमो ऽध्यायः ।

स्नानादिविधिः ।
भगवानुवाच ।
ऐशान्यां जनयेत् कुण्डं गुरुर्व्वह्निञ्च वैष्णवं । 1ab
गायत्र्याष्टशतं हुत्वा सम्पातविधिना घटान् ॥ 1cd
प्रोक्षयेत् कारुशालायां शिल्पिभिर्मूर्त्तिपैर्व्रजेत् । 2ab
तूर्य्यशब्दैः कौतुकञ्च बन्धयेद्दक्षिणे करे ॥ 2cd
विष्णवे शिपिविष्टेति ऊर्णासूत्रेण सर्षपैः । 3ab
पट्टवस्त्रेण कर्त्तव्यं देशिकस्यापि कौतुकं ॥ 3cd
मण्डपे[1] प्रतिमां स्थाप्य सवस्त्रां पूजितान् स्तुवन् । 4ab
नमस्तेर्च्ये सुरेशानि प्रणीते विश्वकर्म्मणा ॥ 4cd
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः । 5ab
त्वयि सम्पूजयामीशे नारायणमनामयं ॥ 5cd
रहिता शिल्पिदोषैस्त्वमृद्धियुक्ता सदा भव । 6ab
एवं विज्ञाप्य प्रतिमां नयेत्तां स्नानमण्डपं ॥ 6cd
शिल्पिनन्तोषयेद्द्रव्यैर्गुरवे गां प्रदापयेत् । 7ab
चित्रं देवेति मन्त्रेण नेत्रे चोन्मीलयेत्ततः ॥ 7cd

1 मण्डले इति ग, चिह्नितपुस्तकपाठः ।

अग्निर्ज्योतीति दृष्टिञ्च दद्याद्वै भद्रपीठके । 8ab
ततः शुक्लानि पुष्पाणि घृतं सिद्धार्थकं तथा ॥ 8cd
दूर्व्वां कुशाग्रं देवस्य दद्याच्छिरसि देशिकः । 9ab
मधुवातेति मन्त्रेण नेत्रे चाभ्यञ्जयेद्गुरुः ॥ 9cd
हिरण्यगर्भमन्त्रेण इमं मेति च कीर्त्तयेत् । 10ab
घृतेनाभ्यञ्जयेत् पश्चात् पठन् घृतवतीं पुनः ॥ 10cd
मसूरपिष्टे नोद्वर्त्य[1] अतो देवेति कीर्त्तयन् । 11ab
क्षालयेदुष्णतोयेन सप्त ते ऽग्नेति देशिकः ॥ 11cd
द्रुपदादिवेत्यनुलिम्पेदापो हि ष्ठेति सेचयेत् । 12ab
नदीजैस्तीर्थजैः स्नानं पावमानीति रत्नजैः ॥ 12cd
समुद्रं गच्छ चन्दनैस्तीर्थमृत्कलशेन च । 13ab
शन्नो देवीः स्नापयेच्च गायत्र्याप्युष्णवारिणा[2] ॥ 13cd
पञ्चमृद्भिर्हिरण्येति स्नापयेत्परमेश्वरं । 14ab
सिकताद्भिरिमं मेति वल्मीकोदघटेन च ॥ 14cd
तद्विष्णोरिति ओषध्यद्भिर्या ओषधीति मन्त्रतः । 15ab
यज्ञायज्ञेति काषायैः पञ्चभिर्गव्यकैस्ततः ॥ 15cd
पयः पृथिव्यां मन्त्रेण याः फलिनी फलाम्बुभिः । 16ab
विश्वतश्चक्षुः सौम्येन पूर्वेण कलसेन च ॥ 16cd
सोमं राजानमित्येवं विष्णो रराटं दक्षतः । 17ab
हंसः शुचिः पश्चिमेन कुर्य्यादुद्वर्त्तनं हरेः ॥ 17cd
मूर्द्धानन्दिवमन्त्रेण धात्रीं मांसीं च के ददेत्[3] । 18ab
मानस्तोकेति मन्त्रेण गन्धद्वारेति गन्धकैः ॥ 18cd

1 मयूरपिच्छेनोद्वर्त्य इति घ, चिह्नितपुस्तकपाठः ।
2 गायत्र्या गन्धवारिणा इति ग, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।
3 धात्रीमांस्युदकेन चेति घ, चिह्नितपुस्तकपाठः ।

इदमापेति च घटैरेकाशीतिपदस्थितैः । 19ab
एह्येहि भगवन् विष्णो लोकानुग्राहकारक ॥ 19cd
यज्ञभागं गृहाणेमं वासुदेव नमोस्तु ते । 20ab
अनेनावाह्य देवेशं कुर्यात् कौतुकमोचनं ॥ 20cd
मुञ्चामि त्वेति सूक्तेन देशिकस्यापि मोचयेत् । 21ab
हिरण्मयेन पाद्यं दद्यादतो देवेति चार्घ्यकं ॥ 21cd
मधुवाता मधुपर्कं मयि गृह्णामि चाचमेत् । 22ab
अक्षन्नमीमदन्तेति किरेद्दर्वाक्षतं बुधः ॥ 22cd
काण्डान्निर्म्मञ्छनं कुर्य्याद्गन्धं गन्धवतीति च । 23ab
उन्नयामीति[1] माल्यञ्च इदं विष्णुः पवित्रकं ॥ 23cd
वृहस्पते वस्त्रयुग्मं वेदाहमित्युत्तरीयकं । 24ab
महाव्रतेन सकलीपुष्पं चौषधयः क्षिपेत् ॥ 24cd
धूपं दद्याद्धूरसीति विभ्राट्सूक्तेन चाञ्जनं । 25ab
युञ्जन्तीति च तिलकं दीर्घायुष्ट्वेति माल्यकं ॥ 25cd
इन्द्रच्छत्रेति छत्रन्तु आदर्शन्तु विराजतः । 26ab
चामरन्तु विकर्णेन भूषां रथन्तरेण च ॥ 26cd
व्यजनं वायुदैवत्यैर्मुञ्चामि त्वेति पुष्पकं । 27ab
वेदाद्यैः संस्तुतिं कुर्य्याद्धरेः पुरुषसूक्ततः ॥ 27cd
सर्वमेतत्समं कुर्य्यात् पिण्डिकादौ हरादिके । 28ab
देवस्योत्थानसमये सौपर्णं सूक्तमुच्चरेत् ॥ 28cd
उत्तिष्ठेति समुत्थाप्य शय्याया मण्डपे नयेत् । 29ab
शाकुनेनैव सूक्तेन देवं ब्रह्मरथादिना ॥ 29cd
अतो देवेति सूक्तेन प्रातिमां पिण्डिकां तथा । 30ab
श्रीसूक्तेन च शय्यायां विष्णोस्तु शकलीकृतिः ॥ 30cd

1 तत्त्वायामीति घ, चिह्नितपुस्तकपाठः ।

मृगराजं वृषं नागं व्यजनं कलशं तथा । 31ab
वैजयन्तीं तथा भेरीं दीपमित्यष्टमङ्गलं ॥ 31cd
दर्शयेदश्वसूक्तेन पाददेशे त्रिपादिति । 32ab
उखां पिधानकं पात्रमम्बिकां दर्व्विकां ददेत् ॥ 32cd
मुषलोलूखलं दद्याच्छिलां सम्मार्जनीं तथा । 33ab
तथा भोजनभाण्डानि गृहोपकारणानि च ॥ 33cd
शिरोदेशे च निद्राख्यं वस्त्ररत्नयुतं घटं । 34ab
खण्डखाद्यैः पूरयित्वा स्नपनस्य विधिः स्मृतः ॥ 34cd

इत्यादिमहापुराणे आग्नेये स्नपनादिविधानं नाम अष्टपञ्चाशो ऽध्यायः ॥

## 59

### अथोनषष्टितमो ऽध्यायः ।

अधिवासनकथनं ।
भगवानुवाच ।
हरेः सान्निध्यकरणमधिवासनमुच्यते । 1ab
सर्व्वज्ञं सर्वगं ध्यात्वा आत्मानं पुरुषोत्तमं ॥ 1cd
ओंकारेण समायोज्य चिच्छक्तिमभिमानिनीं[1] । 2ab
निःसार्य्यात्मैकतां कृत्वा स्वस्मिन्[2] सर्वगते विभौ ॥ 2cd
योजयेन्मरुता पृथ्वीं वह्निवीजेन दीपयेत् । 3ab
संहरेद्वायुना चाग्निं वायुमाकाशतो नयेत् ॥ 3cd

---

1 मतिशालिनीमिति ख, चिह्नितपुस्तकपाठः ।
2 कृत्वा पुंसीति ङ, चिह्नितपुस्तकपाठः ।

अधिभूतादिदेवैस्तु साध्याख्यैर्विभवैः[1] सह । 4ab
तन्मात्रपात्रकान् कृत्वा संहरेत्तत् क्रमाद् बुधः ॥ 4cd
आकाशं मनसाहृत्य मनोहङ्करणे कुरु[2] । 5ab
अहङ्कारञ्च महति तञ्चाप्यव्याकृते नयेत् ॥ 5cd
अव्याकृतं ज्ञानरूपे वासुदेवः स ईरितः[3] । 6ab
स तामव्याकृतिं मायामवष्टभ्य सिसृक्षया ॥ 6cd
सङ्कर्षणं सं शब्दात्मा स्पर्शाख्यमसृजत् प्रभुः । 7ab
क्षोभ्य मायां स प्रद्युम्नं तेजोरूपं स चासृजत् ॥ 7cd
अनिरुद्धं रसमात्रं ब्रह्माणं गन्धरूपकं । 8ab
अनिरुद्धः स च ब्रह्मा अप आदौ ससर्ज ह ॥ 8cd
तस्मिन् हिरण्मयञ्चाण्डं सो ऽसृजत् पञ्चभूतवत् । 9ab
तस्मिन् सङ्क्रामिते जीवे[4] शक्तिरात्मोपसंहृता ॥ 9cd
प्राणो जीवेन संयुक्तो वृत्तिमानिति शब्द्यते । 10ab
जीवोव्याहृतिसञ्ज्ञस्तु प्राणेष्वाध्यात्मिकः स्मृतः ॥ 10cd
प्राणैर्युक्ता ततो बुद्धिः सञ्जाता चाष्टमूर्त्तिकी[5] । 11ab
अहङ्कारस्ततो जज्ञे मनस्तस्मादजायत ॥ 11cd
अर्थाः प्रजज्ञिरे पञ्च सङ्कल्पादियुतास्ततः । 12ab
शब्दः स्पर्शश्च रूपञ्च रसो गन्ध इति स्मृता ॥ 12cd
ज्ञानशक्तियुतान्येतैरारब्धानीन्द्रियाणि तु । 13ab

---

1 साध्यार्थैर्विभवैरिति ख, ग, चिह्नितपुस्तकपाठः ।
साध्याद्यैर्विभवैरिति ङ, चिह्नितपुस्तकपाठः ।
2 मनसाहृत्य मनो ऽहङ्करणे क्षरे इति घ, चिह्नितपुस्तकपाठः ।
3 वासुदेवे समाहित इति ङ, इति चिह्नितपुस्तकपाठः ।
4 सङ्क्रमते जीव इति ख, चिह्नितपुस्तकपाठः ।
5 चाष्टवृत्तिकीति ङ, चिह्नितपुस्तकपाठः ।

त्वक्श्रोत्रघ्राणचक्षूंषि जिह्वाबुद्धीन्द्रियाणि तु ॥ 13cd
पादौ पायुस्तथा पाणी वागुपस्थश्च पञ्चमः । 14ab
कर्म्मेन्द्रियाणि चैतानि पञ्चभूतान्यतः शृणु ॥ 14cd
आकाशवायुतेजांसि सलिलं पृथिवी तथा । 15ab
स्थूलमेभिः शरीरन्तु सर्वाधारं प्रजायते ॥ 15cd
एतेषां वाचका मन्त्रा न्यासायोच्यन्त उत्तमाः । 16ab
जीवभूतं मकारन्तु देवस्य[1] व्यापकं न्यसेत् ॥ 16cd
प्राणतत्त्वं भकारन्तु जीवोपाधिगतं न्यसेत् । 17ab
हृदयस्थं बकारन्तु बुद्धितत्त्वं न्यसेद् बुधः ॥ 17cd
फकारमपि तत्रैव अहङ्कारमयं न्यसेत् । 18ab
मनस्तत्त्वं पकारन्तु न्यसेत्सङ्कल्पसम्भवं ॥ 18cd
शब्दतन्मात्रतत्त्वन्तु नकारं मस्तके न्यसेत् । 19ab
स्पर्शात्मकं धकारन्तु वक्त्रदेशे तु विन्यसेत् ॥ 19cd
दकारं रूपतत्त्वन्तु हृद्देशे विनिवेशयेत्[2] । 20ab
थकारं वस्तिदेशे तु रसतन्मात्रकं न्यसेत् ॥ 20cd
तकारं गन्धतन्मात्रं जङ्घयोर्व्विनिवेशयेत् । 21ab
णकारं श्रोत्रयोन्नर्यस्य ढकारं विन्यसेत्त्वचि ॥ 21cd
डकारं नेत्रयुग्मे तु रसनायां ठकारकं । 22ab
टकारं नासिकायान्तु ञकारं वाचि विन्यसेत् ॥ 22cd
झकारं करयोन्नर्यस्य पाणितत्त्वं विचक्षणः । 23ab
जकारं पदयोन्नर्यस्य छं पायौ चमुपस्थके ॥ 23cd
विन्यसेत् पृथिवीतत्त्वं ङकारं पादयुग्मके । 24ab
वस्तौ घकारं गं तत्त्वं तैजसं हृदि विन्यसेत् ॥ 24cd

1 मकारन्तद्देहस्येति ङ, चिह्नितपुस्तकपाठः ।
2 विनियोजयेदिति ङ, चिह्नितपुस्तकपाठः ।

खकारं वायुतत्त्वञ्च नासिकायां निवेशयेत् । 25ab
ककारं विन्यसेन्नित्यं खतत्त्वं मस्तके बुधः ॥ 25cd
हृत्पुण्डरीके विन्यस्य यकारं सूर्य्यदैवतं । 26ab
द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ॥ 26cd
कलाषोडशसंयुक्तं मकारं तत्र विन्यसेत् । 27ab
तन्मध्ये चिन्तयेन्मन्त्री विन्दुं वह्नेस्तु मण्डलं ॥ 27cd
हकारं[1] विन्यसेत्तत्र प्रणवेन सुरोत्तमः । 28ab
ओं आं परमेष्ठ्यात्मने आं नमः पुरुषात्मने ॥ 28cd
ओं वां मनोनिवृत्त्यात्मने नाञ्च विश्वात्मने नमः । 29ab
ओं वं नमः सर्वात्मने इत्युक्ताः पञ्च शक्तयः[2] ॥ 29cd
स्थाने तु प्रथमा योज्या द्वितीया आसने मता । 30ab
तृतीया शयने तद्वच्चतुर्थी पानकर्म्मणि[3] ॥ 30cd
प्रत्यर्च्चायां[4] पञ्चमी स्यात्पञ्चोपनिषदः स्मृताः । 31ab
हूङ्कारं[5] विन्यसेन्मध्ये ध्यात्वा मन्त्रमयं हरिं ॥ 31cd
यां मूर्त्तिं स्थापयेत्तस्मात्[6] मूलमन्त्रं न्यसेत्ततः । 32ab
ओं नमो भगवते वासुदेवाय मूलकं ॥ 32cd
शिरोघ्राणललाटेषु मुखकण्ठहृदि क्रमात् । 33ab
भुजयोर्जङ्घयोरङ्घ्र्योः केशवं शिरसि न्यसेत् ॥ 33cd
नारायणं न्यसेद्वक्त्रे ग्रीवायां माधवं न्यसेत् । 34ab

---

1 क्रूंकारमिति ङ, चिह्नितोपुस्तकपाठः ।

2 ओं षं परमेष्ठ्यात्मने यन्नमः पुरुषात्मने । लं नमो विश्वात्मने वं निवृत्त्यात्मने नमः ॥ नं नमः सर्वात्मने इत्युक्ताः पञ्च शक्तयः इति ङ, चिह्नितपुस्तकपाठः ।

3 दानकर्म्मणि इति ङ, चिह्नितपुस्तकपाठः ।

4 अभ्यर्च्चायामिति ख, चिह्नितपुस्तकपाठः ।

5 क्षकारमिति ख, चिह्नितपुस्तकपाठः ।

6 या मूर्त्तिः स्थाप्यते तस्यामिति ख, चिह्नितपुस्तकपाठः ।

गोविन्दं भुजयोर्न्यस्य विष्णुं च हृदये न्यसेत् ॥ 34cd
मधुसूदनकं पृष्ठे वामनं जठरे न्यसेत् । 35ab
कट्यान्त्रिविक्रमं न्यस्य जङ्घायां श्रीधरं न्यसेत् ॥ 35cd
हृषीकेशं दक्षिणायां पद्मनाभं तु गुल्फके । 36ab
दामोदरं पादयोश्च हृदयादिषडङ्गकं ॥ 36cd
एतत् साधारणं प्रोक्तमादिमूर्त्तेस्तु सत्तम । 37ab
अथवा यस्य देवस्य प्रारब्धं स्थापनं भवेत् ॥ 37cd
तस्यैव मूलमन्त्रेण सजीवकरणं भवेत् । 38ab
यस्या मूर्त्तेस्तु यन्नाम तस्याद्यं चाक्षरं च यत् ॥ 38cd
तत् स्वरैर्द्वादशैर्भेद्य ह्यङ्गानि परिकल्पयेत् । 39ab
हृदयादीनि देवेश मूलञ्च दशमाक्षरं ॥ 39cd
यथा देवे तथा देहे[1] तत्त्वानि विनियोजयेत् । 40ab
चक्राब्जमण्दले विष्णुं यजेद्गन्धादिना तथा[2] ॥ 40cd
पूर्व्ववच्चासनं ध्यायेत्सगात्रं[3] सपरिच्छदं । 41ab
शुभञ्चक्रं द्वादशारं ह्युपरिष्टाद्विचिन्तयेत् ॥ 41cd
त्रिनाभिचक्रं द्विनेमि स्वरैस्तच्च समन्वितं । 42ab
पृष्ठदेशे ततः प्राज्ञः प्रकृत्यादीन्निवेशयेत् ॥ 42cd
पूजयेदारकाग्रेषु[4] सूर्य्यं द्वादशधा पुनः । 43ab

1 यथा तत्त्वे तथा देहे इति ख, ग, घ, ङ, चिह्नितपुस्तकपाठः ।

2 यजेद् गन्धादिना तत इति ख, चिह्नितपुस्तकपाठः । यजेदाहुति-भिस्तथा इति ग, चिह्नितपुस्तकपाठः ।

3 ध्यायेत् तन्मात्रमिति ग, चिहिह्नतपुस्तकपाठः । ध्यायेत् समात्र-मिति ख, चिह्नितपुस्तकपाठः ।

4 पूजयेद् द्वादशाग्रेषु इति ख, चिह्नितपुस्तकपाठः । पूजयेद् द्वाद-शारेषु इति घ, चिह्नितपुस्तकपाठः ।

कलाषोडशसंयुक्तं सोमन्तत्र विचिन्तयेत् ॥ 43cd
सबलं त्रितयं नाभौ चिन्तयेद्देशिकोत्तमः । 44ab
पद्मञ्च द्वादशदलं पद्ममध्ये विचिन्तयेत् ॥ 44cd
तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्य च दिशिकः[1] । 45ab
प्रतिमायां हरिं न्यस्य तत्र तं पूजयेत् सुरान्[2] ॥ 45cd
गन्धपुष्पादिभिः सम्यक् साङ्गं सावरणं क्रमात् । 46ab
द्वादशाक्षरवीजैस्तु केशवादीन् समर्च्चयेत् ॥ 46cd
द्वादशारे मण्डले तु लोकपालादिकं क्रमात् । 47ab
प्रतिमामर्च्चयेत् पश्चाद्गन्धपुष्पादिभिर्द्विजः ॥ 47cd
पौरुषेण तु सूक्तेन श्रियाः सूक्तेन पिण्डिकां । 48ab
जननादिक्रमात् पश्चाज्जनयेद्वैष्णवानलं ॥ 48cd
हुत्वाग्निं वैष्णवैर्म्मन्त्रैः कुर्य्याच्छान्त्युदकं बुधः । 49ab
तत् सिक्त्वा प्रतिमामूर्द्ध्नि वह्निप्रणयनं चरेत् ॥ 49cd
दक्षिणेग्निं हुतमिति कुण्डेग्निं प्रणयेद्बुधः । 50ab
अग्निमग्नीति पूर्वे तु कुण्डेग्निं प्रणयेद्बुधः ॥ 50cd
उत्तरे प्रणयेदग्निमग्निमग्नी हवामहे । 51ab
अग्निप्रणयने मन्त्रस्त्वमग्ने ह्यग्निरुच्यते ॥ 51cd
पलाशसमिधानान्तु अष्टोत्तरसहस्रकं । 52ab
कुण्डे कुण्डे होमयेच्च व्रीहीन् वेदादिकैस्तथा ॥ 52cd
साज्यांस्तिलान् व्याहृतिभिर्मूलमन्त्रेण वै घृतं । 53ab
कुर्य्यात्ततः शान्तिहोमं मधुरत्रितयेन च ॥ 53cd
द्वादशार्णैः स्पृशेत् पादौ नाभिं हृन् मस्तकं ततः । 54ab
घृतं दधि पयो हुत्वा स्पृशेन्मूर्द्धन्यथो ततः ॥ 54cd

1 ध्यात्वा पश्चात्तु देशिक इति ङ, चिह्नितपुस्तकपाठः ।
2 तत्र तान् पूजयेत् सुरामिति ग, चिह्नितपुस्तकपाठः ।

स्पृष्ट्वा शिरोनाभिपादांश्चतस्रः स्थापयेन्नदीः[1] । 55ab
गङ्गा च यमुना गोदा क्रमान्नाम्ना सरस्वती ॥ 55cd
दहेत्तु विष्णुगायत्र्या गायत्र्या श्रपयेच्चरुं । 56ab
होमयेच्च बलिं दद्यादुत्तरे भोजयेद्द्विजान् ॥ 56cd
सामाधिपानां तुष्ट्यर्थं हेमगां गुरवे ददेत् । 57ab
दिक्पतिभ्यो बलिं दत्त्वा रात्रौ कुर्य्याच्च जागरं । 57cd
ब्रह्मगीतादिशब्देन सर्वभागधिवासनात् ॥ 57॥ 57ef

इत्यादिमहापुराणे आग्नेये अधिवासनं नाम ऊनषष्टितमो ऽध्यायः ॥

## 60

### अथ षष्टितमोध्यायः ।

वासुदेवप्रतिष्ठादिविधिः ।
भगवानुवाच ।
पिण्डिकास्थापनार्थन्तु गर्भागारं तु सप्तधा । 1ab
विभजेद् ब्रह्मभागे तु प्रतिमां स्थापयेद् बुधः ॥ 1cd
देवमनुषपैशाचभागेषु न कदाचन । 2ab
ब्रह्मभागं परित्यज्य किञ्चिदाश्रित्य चाण्डज ॥ 2cd
देवमानुषभागाभ्यां स्थाप्या यत्नात्तु पिण्डिका[3] । 3ab
नपुंसकशिलायान्तु रत्नन्यासं समाचरेत् ॥ 3cd
नारसिंहेन हुत्वाथ रत्नन्यासं[4] च तेन वै । 4ab

1 चतस्रः स्थापयेच्च गा इति ग, घ, ङ, चिह्नितपुस्तकत्रयपठः ।
2 घोषयेच्च ततो मखे इति ग, चिह्नितपुस्तकपाठः ।
3 स्थापयेदाशु पिण्डिकामिति ङ, चिह्नितपुस्तकपाठः ।
4 वर्णन्यासमिति ग, चिह्नितपुस्तकपाठः ।

व्रीहीन् रत्नांस्त्रिधातूंश्च लोहादींश्चन्दनादिकान् ॥ 4cd
पूर्वादिनवगर्त्तेषु न्यसेन् मध्ये यथारुचि । 5ab
अथ चेन्द्रादिमन्त्रैश्च गर्त्तो गुग्गुलुनावृतः ॥ 5cd
रत्नन्यासविधिं कृत्वा प्रतिमामालभेद्गुरुः । 6ab
सशलाकैर्दर्भपुञ्जैः सहदेवैः समन्वितैः ॥ 6cd
सवाह्यन्तैश्च संस्कृत्य पञ्चगव्येन शोधयेत् । 7ab
प्रोक्षयेद्दर्भतोयेन[1] नदीतीर्थोदकेन च ॥ 7cd
होमार्थे स्थण्डिलं कुर्य्यात् सिकताभिः समन्ततः । 8ab
सार्द्धहस्तप्रमाणं तु चतुरस्रं सुशोभनं ॥ 8cd
अष्टदिक्षु यथान्यासं कलशानपि विन्यसेत् । 9ab
पूर्वाद्यानष्टवर्णेन अग्निमानीय संस्कृतं ॥ 9cd
त्वमग्नेद्युभिरिति गायत्र्या समिधो हुनेत् । 10ab
अष्टार्णेनाष्टशतकं[2] आज्यं पूर्णां प्रदापयेत् ॥ 10cd
शान्त्युदकं आम्रपत्रैः[3] मूलेन शतमन्त्रितं । 11ab
सिञ्चेद्देवस्य तन्मूर्द्ध्नि श्रीश्च ते ह्यनया ऋचा ॥ 11cd
ब्रह्मयानेन[4] चोद्धृत्य उत्तिष्ठ ब्रह्मणस्पते । 12ab
तद्विष्णोरिति मन्त्रेण प्रासादाभिमुखं नयेत् ॥ 12cd
शिविकायां हरिं स्थाप्य भ्रामयीत पुरादिकं । 13ab
गीतवेदादिशब्दैश्च[5] प्रासादद्वारि धारयेत् ॥ 13cd

1 प्रोक्षयेद् गन्धतोयेनेति ख, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।
2 अष्टान्तेनाष्टशतकमिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।
3 शान्त्युदकमाज्यपात्रैरिति ख, चिह्नितपुस्तकपाठः ।
4 ब्रह्मपात्रेणेति ङ, चिह्नितपुस्तकपाठः ।
5 गीतवाद्यादिशब्दैश्च इति ङ, चिह्नितपुस्तकपाठः ।

स्त्रीभिर्विप्रैर्मङ्गलाष्टघटैः[1] संस्नापयेद्धरिं । 14ab
ततो गन्धादिनाभ्यर्च्य मूलमन्त्रेण देशिकः ॥ 14cd
अतो देवेति वस्त्राद्यमष्टाङ्गार्घ्यं निवेद्य च । 15ab
स्थिरे लग्ने पिण्डिकायां देवस्य त्वेति धारयेत् ॥ 15cd
ओं त्रैलोक्यविक्रान्ताय नमस्तेस्तु त्रिविक्रम । 16ab
संस्थ्याप्य पिण्डिकायान्तु स्थिरं कुर्य्याद्विचक्षणः ॥ 16cd
ध्रुवा द्यौरिति मन्त्रेण विश्वतश्चक्षुरित्यपि । 17ab
पञ्चगव्येन संस्नाप्य क्षाल्य गन्धदकेन च ॥ 17cd
पूजयेत् सकलीकृत्य साङ्गं सावरणं हरिं । 18ab
ध्यायेत् स्वं तस्य मूर्त्तिन्तु पृथिवी तस्य पीठिका ॥ 18cd
कल्पयेद्विग्रहं तस्य तैजसैः परमाणुभिः । 19ab
जीवमावाहयिष्यामि पञ्चविंशतितत्त्वगं ॥ 19cd
चैतन्यं परमानन्दं जाग्रत्स्वप्नविवर्जितं । 20ab
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितं ॥ 20cd
ब्रह्मादिस्तम्बपर्य्यन्तं हृदयेषु व्यवस्थितं । 21ab
हृदयात् प्रतिमाविम्बे स्थिरो भव परेश्वर ॥ 21cd
सजीवं कुरु बिम्बं त्वं सवाह्याभ्यन्तरस्थितः । 22ab
अङ्गुष्ठमात्रः पुरुषो देहोपाधिषु संस्थितः ॥ 22cd
ज्योतिर्ज्ञानं परं ब्रह्म एकमेवाद्वितीयकं । 23ab
सजीवीकरणं कृत्वा प्रणवेन निबोधयेत् ॥ 23cd
सान्निध्यकरणन्नाम हृदयं स्पृश्य वै जपेत् । 24ab
सूक्तन्तु पौरुषं ध्यायन् इदं गुह्यमनुं जपेत् ॥ 24cd
नमस्तेस्तु सुरेशाय सन्तोषविभवात्मने । 25ab

1 मङ्गलाष्टघटे इति ख, ग, चिह्नितपुस्तकद्वयपाठः ।

ज्ञानविज्ञानरूपाय ब्रह्मतेजोनुयायिने ॥ 25cd
गुणातिक्रान्तवेशाय[1] पुरुषाय महात्मने । 26ab
अक्षयाय पुराणाय विष्णो सन्निहितो भव ॥ 26cd
यच्च ते परमं तत्त्वं[2] यच्च ज्ञानमयं वपुः । 27ab
तत् सर्वमेकतो लीनमस्मिन्देहे विबुध्यतां ॥ 27cd
आत्मानं सन्निधीकृत्य ब्रह्मादिपरिवारकान् । 28ab
स्वनाम्ना स्थापयेदन्यानायुधादीन् स्वमुद्रया ॥ 28cd
यात्रावर्षादिकं दृष्ट्वा[3] ज्ञेयः सन्निहितो हरिः । 29ab
नत्वा स्तुत्वा स्तवाद्यैश्च जप्त्वा चाष्टाक्षरादिकं ॥ 29cd
चण्डप्रचण्डौ द्वारस्थौ निर्गत्याभ्यर्चयेद्गुरुः । 30ab
अग्निमण्डपमासाद्य गरुडं स्थाप्य पूजयेत् ॥ 30cd
दिगीशान् दिशि देवांश्च स्थाप्य सम्पूज्य देशिकः । 31ab
विश्वक्सेनं तु संस्थाप्य शङ्खचक्रादि पूजयेत् ॥ 31cd
सर्वपार्षदकेभ्यश्च बलिं भूतेभ्य अर्पयेत् । 32ab
परमवस्त्रसुवर्णादि गुरवे दक्षिणां ददेत् ॥ 32cd
यागोपयोगिद्रव्याद्यमाचार्य्याय नरोर्पयेत् । 33ab
आचार्य्यदक्षिणार्द्धन्तु ऋत्विग्भ्यो दक्षिणां ददेत् ॥ 33cd
अन्येभ्यो दक्षिणां दद्याद्भोजयेद् ब्राह्मणांस्ततः । 34ab
अवारितान् फलान्[4] दद्याद्यजमानाय वै गुरुः ॥ 34cd
विष्णुं नयेत् प्रतिष्ठाता[5] चात्मना सकलं कुलं । 35ab

1 गुणातिक्रान्तरूपाय इति ख, चिह्नितपुस्तकपाठः ।
2 यच्च ते परमं गुह्यमिति ङ, चिह्नितपुस्तकपाठः ।
3 यात्रावर्षादिकं कृत्वेति ख, चिह्नितपुस्तकपाठः ।
4 अवारितफलमिति ङ, चिह्नितपुस्तकपाठः ।
5 प्रतिष्ठाकृदिति ख, ग, घ, ङ, चिह्नितपुस्तकचतुष्टयपाठः ।

सर्वेषामेव देवानामेष साधारणो विधिः । 35cd
मूलमन्त्राः पृथक्तेषां शेषं कार्य्यं समानकं ॥ 35॥ 35ef

इत्यादिमहापुराणे आग्नेये वासुदेवप्रतिष्ठादिकथनं नाम षष्टि-
तमो ऽध्यायः ॥

## 61

### अथ एकषष्टितमो ऽध्यायः ।

द्वारप्रतिष्ठाध्वजारोहाणादिविधिः ।
भगवानुवाच ।
वक्षे चावभृतस्नानं विष्णोर्न्नत्वेति[1] होमयेत् । 1ab
एकाशीतिपदे कुम्भान् स्थाप्य संस्थापयेद्धरिं ॥ 1cd
पूजयेद् गन्धपुष्पाद्यैर्बलिं दत्वा गुरुं यजेत् । 2ab
द्वारप्रतिष्ठां वक्ष्यामि द्वाराधो हेम वै ददेत् ॥ 2cd
अष्टभिः कलशैः स्थाप्य शाखोदुम्बरकौ गुरुः । 3ab
गन्धादिभिः समभ्यर्च्य मन्त्रैर्वेदादिभिर्गुरुः ॥ 3cd
कुण्डेषु होमयेद्वह्निं समिल्लाजतिलादिभिः । 4ab
दत्वा शय्यादिकञ्चाधो दद्यादाधारशक्तिकां ॥ 4cd
शाखयोर्विन्यसेन्मूले देवौ चण्डप्रचण्दकौ । 5ab
ऊर्द्धोदुम्बरके देवीं लक्ष्मीं सुरगणार्चितां ॥ 5cd
न्यस्याभ्यर्च्य[3] यथान्यायं श्रीसूक्तेन चतुर्मुखं । 6ab
दत्वा तु श्रीफलादीनि आचार्यादेस्तु दक्षिणां ॥ 6cd
प्रतिष्ठासिद्धद्वारस्य त्वाचार्य्यः स्थापयेद्धरिं । 7ab

---

1 विष्णुर्नुकेति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 समिदाज्यतिलादिभिरिति ङ, चिह्नितपुस्तकपाठः ।
3 अथाभ्यर्च्येति ङ, चिह्नितपुस्तकपाठः ।

प्रासादस्य प्रतिष्ठन्तु ह्रत्प्रतिष्ठेति तां शृणु ॥ 7cd
समाप्तौ शुकनाशाया[1] वेद्याः प्राग्दर्भमस्तके । 8ab
सौवर्णं राजतं कुम्भमथवा शुक्लनिर्म्मितं[2] ॥ 8cd
अष्टरत्नौषधीधातुवीजलौहान्वितं शुभं । 9ab
सवस्त्रं पूरितं चाद्भिर्म्मण्डले चाधिवासयेत् ॥ 9cd
सपल्लवं नृसिंहेन हुत्वा सम्पातसञ्चितं । 10ab
नारायणाख्यतत्त्वेन प्राणभूतं न्यसेत्ततः ॥ 10cd
वैराजभूतन्तं[3] ध्यायेत् प्रासादस्य सुरेश्वर । 11ab
ततः पुरुषवत्सर्व्वं प्रासादं चिन्तयेद् बुधः ॥ 11cd
अधो दत्वा सुवर्णं तु तद्वद् भूतं[4] घटं न्यसेत् । 12ab
गुर्वादौ दक्षिणां दद्याद् ब्राह्मणादेश्च भोजनं ॥ 12cd
ततः पश्चाद्वेदिबन्धं तदूर्ध्वं कण्ठबन्धनं । 13ab
कण्ठोपरिष्टात् कर्त्तव्यं विमलामलसारकं ॥ 13cd
तदूर्द्ध्वं वृकलं[5] कुर्य्याच्चक्रञ्चाद्यं सुदर्शनं । 14ab
मूर्त्तिं श्रीवासुदेवस्य ग्रहगुप्तां निवेदयेत् ॥ 14cd
कलशं वाथ कुर्व्वीत तदूर्द्ध्वं चक्रमुत्तमं । 15ab
वेद्याश्च परितः स्थाप्या अष्टौ विघ्नेश्वरास्त्वज[6] ॥ 15cd

---

1 वनमालायामिति ङ, चिह्नितपुस्तकपाठः ।

2 शुक्लनिर्म्मलमिति ग, घ, चिह्नितपुस्तकद्वयपाठः । शुल्वनिर्म्मित-मिति ङ, चिह्नितपुस्तकपाठः ।

3 वैराजरूपं तमिति ङ, चिह्नितपुस्तकपाठः ।

4 तत्त्वभूतमिति घ, ङ, चिह्नितपुस्तकपाठः ।

5 तदूर्द्ध्वं चूर्णकं कुर्य्यादिति ग, ङ, चिह्नितपुस्तकपाठः । तदूर्द्ध्वं चुल्वकं कुर्य्यादिति ख, घ, चिह्नितपुस्तकद्वयपाठः ।

6 अष्टौ विद्येश्वरास्त्वज इति ग, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।

चत्वारो वा चतुर्द्दिक्षु स्थापनीया गरुत्मतः । 16ab
ध्वजारोहं च वक्ष्यामि येन भूतादि नश्यति ॥ 16cd
प्रासादविम्बद्रव्याणां यावन्तः परमाणवः । 17ab
तावद्वर्षसहस्राणि तत्कर्त्ता विष्णुलोकभाक् ॥ 17cd
कुम्भाण्डवेदिविम्बानां भ्रमणाद्वायुनानघ । 18ab
कण्ठस्यावेष्टनाज् ज्ञेयं फलं कोटिगुणं ध्वजात् ॥ 18cd
पताकां प्रकृतिं विद्धि दण्डं पुरुषरूपिणं । 19ab
प्रासादं वासुदेवस्य मूर्त्तिभेदं[1] निबोध मे ॥ 19cd
धारणाद्धरणीं[2] विद्धि आकाशं शुषिरात्मकं । 20ab
तेजस्तत् पावकं विद्धि वायुं स्पर्शगतं तथा ॥ 20cd
पाषाणादिष्वेव जलं पार्थिवं पृथिवीगुणं[3] । 21ab
प्रतिशब्दोद्भवं शब्दं स्पर्शं स्यात् कर्क्कशादिकं ॥ 21cd
शुक्लादिकं भवेद्रूपं रसमन्नादिदर्शनं[4] । 22ab
धूपादिगन्धं गन्धन्तु वाग् भेर्य्यादिषु संस्थिता ॥ 22cd
शुकनासाश्रिता नासा बाहू तद्रथकौ स्मृतौ । 23ab
शिरस्त्वण्डं निगदितं कलशं मूर्द्धजं स्मृतम् ॥ 23cd
कण्ठं कण्ठमिति ज्ञेयं स्कन्धं वेदी निगद्यते । 24ab
पायूपस्थे प्रणाले तु त्वक् सुधा परिकीर्त्तिता ॥ 24cd
मुखं द्वारं भवेदस्य प्रतिमा जीव उच्यते । 25ab
तच्छक्तिं पिण्डिकां विद्धि प्रकृतिं च तदाकृतिं ॥ 25cd

---

1 मूर्त्तिभूतमिति ख, ङ, चिह्नितपुस्तकपाठः ।

2 धरणाद्वारुणीं विद्धि इति ख, चिह्नितपुस्तकपाठः । धरणाद्वारुणीं देवीमिति ग, चिह्नितपुस्तकपाठः । धारणीं धरणीं विद्धि इति ङ, चिह्नितपुस्तकपाठः ।

3 पार्थिवं पृथिवीतलमिति ख, चिह्नितपुस्तकपाठः । पार्थिवं पृथिवीजलमिति ग, चिह्नितपुस्तकपाठः ।

4 रसमास्थाय दर्शनं रसमाह्लादि दर्शनमिति ख, चिह्नितप्सुतकपाठः ।

निश्चलत्वञ्च गर्भोस्या अधिष्ठाता तु केशवः । 26ab
एवमेष हरिः साक्षात्प्रासादत्वेन संस्थितः ॥ 26cd
जङ्घा त्वस्य शिवो ज्ञेयः स्कन्धे धाता व्यवस्थितः । 27ab
ऊर्द्धभागे स्थितो विष्णुरेवं तस्य स्थितस्य हि ॥ 27cd
प्रासादस्य प्रतिष्ठान्तु ध्वजरूपेण मे शृणु । 28ab
ध्वजं कृत्वा सुरैर्दैत्या जिताः शस्त्रादिचिह्नितं[1] ॥ 28cd
अण्डोर्द्धे कलशं न्यस्य तदूर्द्धे विन्यसेद्ध्वजं । 29ab
विम्बार्द्धमानं दण्डस्य[2] त्रिभागेनाथ कारयेत् ॥ 29cd
अष्टारं द्वादशारं वा मध्ये मूर्त्तिमतान्वितं । 30ab
नारसिंहेन ताक्ष्येण ध्वजदण्डस्तु निर्व्रणः ॥ 30cd
प्रासादस्य तु विस्तारो मानं दण्डस्य कीर्त्तितं । 31ab
शिखरार्द्धेन वा कुर्य्यात् तृतीयार्द्धेन वा पुनः ॥ 31cd
द्वारस्य दैर्घ्याद् द्विगुणं दण्डं वा परिकल्पयेत् । 32ab
ध्वजयष्टिर्द्देवगृहे ऐशान्यां वायवेथवा ॥ 32cd
क्षौमाद्यैश्च ध्वजं कुर्य्याद्विचित्रं वैकवर्णकं[3] । 33ab
घण्टाचामरकिङ्किण्या भूषितं पापनाशनं ॥ 33cd
दण्डाग्राद्धरणीं यावद्धस्तैकं विस्तरेण तु । 34ab
महाध्वजः सर्व्वदः स्यात्तुर्य्यांशार्द्धीनतोर्चितः ॥ 34cd
ध्वजे चार्द्धेन विज्ञेया पताका मानवर्ज्जिता । 35ab
विस्तरेण ध्वजः कार्य्यो विंशदङ्गुलसन्निभः ॥ 35cd
अधिवासविधानेन चक्रं दण्डं ध्वजं तथा । 36ab

---

1 जिताः शक्त्यादिचिह्नितमिति ख, चिह्नितपुस्तकपाठः । जिताः शक्रादिचिह्नितमिति ग, चिह्नितपुस्तकपाठः ।

2 विम्बार्द्धमानं चक्रन्तु इति ख, ङ, चिह्नितपुस्तकपाठः ।

3 विचित्रञ्चैव वर्णकमिति ख, चिह्नितपुस्तकपाठः ।

देववत् सकलं कृत्वा मण्डपस्नपनादिकं ॥ 36cd
नेत्रोन्मीलनकं त्यक्ता पूर्वोक्तं सर्वमाचरेत् । 37ab
अधिवासयेच्च विधिना शय्यायां स्थाप्य देशिकः ॥ 37cd
ततः सहस्रशीर्षेति सूक्तं चक्रे न्यसेद् बुधः । 38ab
तथा सुदर्शनं मन्त्रं मनस्तत्त्वं निवेशयेत् ॥ 38cd
मनोरूपेण तस्यैव सजीवकरणं स्मृतं । 39ab
अरेषु मूर्त्तयो न्यस्याः केशवाद्याः सुरोत्तम ॥ 39cd
नाभ्यब्जप्रतिनेमीषु न्यसेत्तत्त्वानि देशिकः । 40ab
नृसिंहं विश्वरूपं वा अब्जमध्ये निवेशयेत् ॥ 40cd
सकलं विन्यसेद्दण्डे सूत्रात्मानं सजीवकं । 41ab
निष्कलं परमात्मानं ध्वजे ध्यायन् न्यसेद्धरिं ॥ 41cd
तच्छक्तिं व्यापिनीं ध्यायेद् ध्वजरूपां बलाबलां[1] । 42ab
मण्डपे[2] स्थाप्य चाभ्यर्च्य होमं कुण्डेषु कारयेत् ॥ 42cd
कलशे स्वर्णकलशं न्यस्य रत्नानि पञ्च च । 43ab
स्थापयेच्चक्रमन्त्रेण स्वर्णचक्रमधस्ततः[3] ॥ 43cd
पारदेन तु सम्प्लाव्य नेत्रपट्टेन छादयेत्[4] । 44ab
ततो निवेशयेच्चक्रं तन्मध्ये नृहरिं स्मरेत् ॥ 44cd
ओं क्षों नृसिंहाय[5] नमः पूजयेत् स्थापयेद्धरिं । 45ab
ततो ध्वजं गृहीत्वा तु यजमानः सबान्धवः ॥ 45cd

---

1 चलाचलामिति ख, ङ, चिह्नितपुस्तकपाठः, सुलोचनमिति ग, चिह्नितपुस्तकपाठः ।

2 मण्डले इति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।

3 स्वर्णचक्रन्तु मध्यत इति ङ, चिह्नितपुस्तकपाठः ।

4 नेत्रं यत्नेन च्छादयेदिति ङ, चिह्नितपुस्तकपाठः ।

5 ओं क्षौं नृसिंहाय नम इति ख, चिह्नितपुस्तकपाठः ।

दधिभक्तयुते पात्रे ध्वजस्याग्रं निवेशयेत् । 46ab
धुवाद्येन फडन्तेन ध्वजं मन्त्रेण पूजयेत् ॥ 46cd
शिरस्याधाय तत् पात्रं नारायनमनुस्मरन् । 47ab
प्रदक्षिणं तु कुर्व्वीत तुर्य्यमङ्गलनिःस्वनैः ॥ 47cd
ततो निवेशयेत् दण्डं मन्त्रेणाष्टाक्षरेण तु । 48ab
मुञ्चामि त्वेति सूक्तेन ध्वजं मुञ्चेद्विचक्षणः ॥ 48cd
पात्रं ध्वजं कुञ्जरादि दद्यादाचार्य्यके द्विजः । 49ab
एष साधारणः प्रोक्तो ध्वजस्यारोहणे विधिः ॥ 49cd
यस्य देवस्य यच्चिह्नं तन्मन्त्रेण स्थिरं चरेत् । 50ab
स्वर्गत्वा ध्वजदानात्तु राजा बली भवेत् ॥ 50cd

इत्यादिमहापुराणे आग्नेये ध्वजारोहणं नाम एकषष्टितमो ऽध्यायः ।

# 62

## अथ द्विषष्टितमो ऽध्यायः ।

लक्ष्मीप्रतिष्ठाविधिः ।
भगवानुवाच ।
समुदायेन देवादेः प्रतिष्ठां प्रवदामि ते । 1ab
लक्ष्म्याः प्रतिष्ठा प्रथमं तथा देवीगणस्य च ॥ 1cd
पूर्ववत् सकलं कुर्य्यान्मण्डपस्नपनादिकं[1] । 2ab
भद्रपीठे श्रियं न्यस्य स्थापयेदष्ट वै घटान्[2] ॥ 2cd
घृतेनाभ्यज्य मूलेन स्नपयेत् पञ्चगव्यकैः । 3ab
हिरण्यवर्णा हरिणी नेत्रे चोन्मीलयेच्छ्रियाः ॥ 3cd

---

1 मण्डलस्नपनादिकमिति ङ, चिह्नितपुस्तकपाठः ।
2 स्थापयेद्वरुणे घटानिति घ, ङ, चिह्नितपुस्तकपाठः ।

तन्म आवह[1] इत्येवं प्रदद्यान्मधुरत्रयम् । 4ab
अश्वपूर्वेति पूर्वेण तां कुम्भेनाभिषेचयेत्[2] ॥ 4cd
कामोस्मितेति याम्येन पश्चिमेनाभिषेचयेत् । 5ab
चन्द्रं प्रभासामुच्चार्य्यादित्यवर्णेति चोत्तरात् ॥ 5cd
उपैतु मेति चाग्नेयात् क्षुत्पिपासेति नैरृतात् । 6ab
गन्धद्वारेति वायव्यां मनसः काममाकृतिम् ॥ 6cd
ईशानकलशेनैव शिरः सौवर्णकर्द्दमात् । 7ab
एकाशीतिघटैः स्नानं मन्त्रेणापः सृजन् क्षितिम्[3] ॥ 7cd
आर्द्रां पुष्करिणीं गन्धैरार्द्रामित्यादिपुष्पकैः । 8ab
तन्मयावह मन्त्रेण य आनन्द ऋचाखिलं[4] ॥ 8cd
शायन्तीयेन शय्यायां श्रीसूक्तेन च सन्निधिम् । 9ab
लक्ष्मीवीजेन चिच्छक्तिं विन्यस्याभ्यर्चयेत् पुनः ॥ 9cd
श्रीसूक्तेन मण्डपेथ कुण्डेष्वब्जानि होमयेत् । 10ab
करवीराणि वा हुत्वा सहस्रं शतमेव वा ॥ 10cd
गृहोपकरणान्तादि श्रीसूक्तेनैव चार्पयेत् । 11ab
ततः प्रासादसंस्कारं सर्वं कृत्वा तु पूर्ववत् ॥ 11cd
मन्त्रेण पिण्डिकां कृत्वा प्रतिष्ठानं ततः श्रियः[5] । 12ab
श्रीसूक्तेन च सान्निध्यं पूर्ववत् प्रत्यृचं जपेत्[6] ॥ 12cd
चिच्छक्तिं बोधयित्वा तु मूलात् सान्निध्यकं चरेत् । 13ab

1 अस्मिन्नावह इति ख, चिह्नितपुस्तकपाठः ।
2 अश्वमूर्द्धेति मन्त्रेण तां कुम्भेभिनिवेशयेदिति ङ, चिह्नितपुस्तकपाठः ।
3 मन्त्रेण चासृजत् क्षितिमिति ख, चिह्नतपुस्तकपाठः ।
4 य आनन्देति वाससमिति ङ, चिह्नितपुस्तकपाठः ।
5 मन्त्रेण पिण्डिकां कृत्वा प्रतिमां स्थापयन् श्रिय इति ङ, चिहन्तपुस्तकपाठः ।
6 प्रत्यृचं यजेदिति ङ, चिह्नितपुस्तकपाठः ।

भूस्वर्णवस्त्रगोन्नादि[1] गुरवे ब्रह्मणेर्पयेत् । 13cd
एवं देव्यो ऽखिलाः स्थाप्यावाह्य स्वर्गादि भावयेत् ॥ 13॥ 13ef

इत्यादिमहापुराणे आग्नेये लक्ष्मीस्थापनं नाम द्विषष्टितमो ऽध्यायः ।

# 63

## अथ त्रिषष्टितमो ऽध्यायः ।

सुदर्शनचक्रादिप्रतिष्ठाकथनं ।
भगवानुवाच ।
एवं तार्क्ष्यस्य चक्रस्य ब्रह्मणो नृहरेस्तथा । 1ab
प्रतिष्ठा विष्णुवत् कार्या स्वस्वमन्त्रेण तां शृणु ॥ 1cd
सुदर्शन महाचक्र शान्त दुष्टभयङ्कर । 2ab
च्छिन्द छिन्द भिन्द भिन्द विदारय विदारय परमन्त्रान् ग्रस ग्रस भक्षय भक्षय भूतान् त्रासय त्रासय हूं फट् सुदर्शनाय नमः ॥
अभ्यर्च्य चक्रं चानेन रणे दारयते रिपून् ॥ 2cd
ओं क्षौं नरसिंह उग्ररूप ज्वल ज्वल प्रज्वल प्रज्वल स्वाहा ॥
नरसिंहस्य मन्त्रोयं पातालाख्यस्य वच्मि ते[2] । 3ab
ओं क्षौं नमो भगवते नरसिंहाय प्रदीप्तसूर्यकोटिसहस्रसमतेजसे वज्रनखदंष्ट्रायुधायं स्फुटविकटविकीर्णकेसरसटाप्रक्षुभितमहार्णवाम्भोददुन्दुभिनिर्घोषाय सर्वमन्त्रोत्तारणाय एह्येहि भगवन्नरसिंह पुरुषपरापरब्रह्मसत्येन स्फुर स्फुर विजृम्भ विजृम्भ आक्रम गर्ज गर्ज मुञ्च मुञ्च सिंहनादान् विदारय विदारय विद्रावय विद्रावय आविश

1 भूस्वर्णगवान्नादि इति ङ, चिह्नितपुस्तकपाठः ।
2 पातालाख्यस्य वक्ष्यते इति ङ, चिह्नितपुस्तकपाठः ।

आविश सर्वमन्त्ररूपाणि सर्व्वमन्त्रजातयश्च हन हन छिन्द छिन्द सङ्क्षिप सङ्क्षिप सर सर(1) दारय दारय स्फुट स्फुट स्फोटय स्फोटय ज्वालामालासङ्घातमय सर्वतो ऽनन्तज्वालावज्राशनिचक्रेण सर्वपातालान् उत्सादय उत्सादय सर्वतो ऽनतज्वालावज्रशरपञ्जरेण सर्वपातालान् परिवारय परिवारय सर्वपातालासुरवासिनां हृदयान्याकर्षय आकर्षय शीघ्रं दह दह पच पच मथ मथ शोषय शोषय निकृन्तय निकृन्तय तावद्यावन्मे वशमागताः पातालेभ्यः फट् असुरेभ्यः फट् मन्त्ररूपेभ्यः फट् मन्त्रजातिभ्यः फट् संशयान्मां भगवन्नरसिंहरूप विष्णो सर्वापद्भ्यः सर्वमन्त्ररूपेभ्यो रक्ष रक्ष हूं फट्(2) नमो ऽस्तु ते ॥

नरसिंहस्य विद्येयं हरिरूपार्थसिद्धिदा[3] ॥ 3cd
त्रिलोक्यमोहनैर्मन्त्रैः स्थाप्यस्त्रैलोक्यमोहनः । 4ab
गदी दक्षे शान्तिकरो द्विभुजो वा चतुर्भुजः ॥ 4cd
वामोर्द्धे कारयेच्चक्रं पाञ्चजन्यमथो ह्यधः । 5ab
श्रीपुष्टिसंयुतं कुर्य्याद् बलेन सह भद्रया ॥ 5cd
प्रासादे स्थापयेद्विष्णुं गृहे वा मण्डपे ऽपि वा । 6ab
वामनं चैव वैकुण्ठं हयास्यमनिरुद्धकं ॥ 6cd
स्थापयेज्जलशय्यास्थं मत्स्यादींश्चावतारकान् । 7ab
सङ्कर्षणं विश्वरूपं लिङ्गं वै रुद्रमूर्तिकं ॥ 7cd
अर्द्धनारीश्वरं तद्वद्धरिशङ्करमातृकाः । 8ab
भैरवं च तथा सूर्य्यं ग्रहांस्तद्विनायकम् ॥ 8cd

---

1 दर दर इति ख, ग, ङ, इति चिह्नितपुस्तकपाठः ।

2 रक्ष रक्ष ओं फट् इति ख, चिह्नितपुस्तकपाठः । रक्ष रक्ष ह्रीं फडिति ग, चिह्नितपुस्तकपाठः ।

3 हरिरूपा सुमिद्धिदा इति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।

गौरीमिन्द्रादिकां लेप्यां[1] चित्रजां च बलाबलां । 9ab
पुस्तकानां प्रतिष्ठां च वक्ष्ये लिखनतद्विधिं ॥ 9cd
स्वस्तिके मण्डले ऽभ्यर्च्य शरपत्रासने स्थितं[2] । 10ab
लेख्यञ्च लिखितं पुस्तं गुरुर्व्विद्यां हरिं यजेत् ॥ 10cd
यजमानो गुरुं विद्यां हरिं लिपिकृतं नरं । 11ab
प्राङ्मुखः पद्मिनीं ध्यायेत् लिखित्वा श्लोकपञ्चकं ॥ 11cd
रौप्यस्थमस्या हैम्या च लेखन्या नागराक्षरं[3] । 12ab
ब्राह्मणान् भोजयेच्छक्त्या शक्त्या दद्याच्च दक्षिणां[4] ॥ 12cd
गुरुं विद्यां हरिं प्राच्र्य पुराणादि लिखेन्नरः । 13ab
पूर्ववन्मण्डलाद्ये[5] च ऐशान्यां भद्रपीठके ॥ 13cd
दर्प्पणे पुस्तकं दृष्ट्वा सेचयेत् पूर्व्ववद् घटैः । 14ab
नेत्रोन्मीलनकं कृत्वा शय्यायां तु न्यसेन्नरः ॥ 14cd
न्यसेत्तु पौरुषं सूक्तं देवाद्यं तत्र पुस्तके । 15ab
कृत्वा सजीवीकरणं प्राच्र्य हुत्वा चरुं ततः ॥ 15cd
सम्प्राश्य दक्षिणाभिस्तु गुर्व्वादीन् भोजयेद्विजान् । 16ab
रथेन हस्तिना वापि भ्राम्येत् पुस्तकं नरैः[6] ॥ 16cd
गृहे देवालयादौ तु पुस्तकं स्थाप्य पूजयेत् । 17ab
वस्त्रादिवेष्टितं पाठादादावन्ते समर्च्चयेत्[7] ॥ 17cd

1 इन्द्रादिकां जप्यमिति ग, घ, चिह्नितपुस्तकपाठः ।
2 शरयन्त्रासने स्थितमिति ख, घ, चिह्नितपुस्तकपाठः ।
3 रौप्यमय्या ऽथ हैम्या वा लेखन्याथ वराक्षरमिति ङ, चिह्नितपुस्तकपाठः ।
4 प्राङ्मुखः पद्मिनीं ध्यायेत् लिखित्वा च प्रदापयेत् । ब्राह्मणान् भोजयेच्छक्त्या शक्त्यादद्याच्च दक्षिणामिति ग, चिह्नितपुस्तकपाठः ।
5 पूर्वमण्डपपार्श्वे इति ङ, चिह्नितपुस्तकपाठः ।
6 पुस्तकं नर इति ख, चिह्नितपुस्तकपाठः ।
7 अन्ते सदार्च्चयेदिति ख, ग, चिह्नितपुस्तकपाठः ।

जगच्छान्तिञ्चावधार्य्य पुस्तकं वाचयेन्नरः । 18ab
अध्यायमेकं कुम्भाद्भिर्यजमानादि सेचयेत् ॥ 18cd
द्विजाय पुस्तकं दत्वा फलस्यान्तो न विद्यते । 19ab
त्रीण्याहुरतिदानानि गावः पृथ्वीं सरस्वती ॥ 19cd
विद्यादानफलं दत्वा मस्यन्तं पत्रसञ्चयं । 20ab
यावत्तु पत्रसङ्ख्यानमक्षराणां तथा ऽनघ ॥ 20cd
तावद्वर्षसहस्राणि विष्णुलोके महीयते । 21ab
पञ्चरात्रं पुराणानि भारतानि ददन्नरः । 21cd
कुलैकविंशमुद्धृत्य परे तत्त्वे तु लीयते ॥ 21॥ 21ef

इत्यादिमहापुराणे आग्नेये देवादिप्रतिष्ठापुस्तकप्रतिष्ठाकथनं नाम त्रिषष्टितमोध्यायः ।

## 64

### अथ चतुःषष्टितमोध्यायः ।

कूपादिप्रतिष्ठाकथनं ।
भगवानुवाच ।
कूपवापीतडागानां प्रतिष्ठां वच्मि तां शृणु । 1ab
जलरूपेण हि हरिः सोमो वरुण उत्तम ॥ 1cd
अग्नीषोममयं विश्वं विष्णुरापस्तु कारणं । 2ab
हैमं रौप्यं रत्नजं वा वरुणं कारयेन्नरः ॥ 2cd
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदं । 3ab
वामेन नागपाशं तं नदीनागादिसंयुतं ॥ 3cd
यागमण्डपमध्ये स्याद्वेदिका कुण्डमण्डिता । 4ab
तोरणं वारुणं कुम्भं न्यसेच्च करकान्वितं ॥ 4cd
भद्रके चार्द्धचन्द्रे वा स्वस्तिके द्वारि कुम्भकान् । 5ab
अग्न्याधानं चाप्यकुण्डे कृत्वा पूर्णां प्रदापयेत् ॥ 5cd

वरुणं स्नानपीठे तु ये ते शतेति संस्पृशेत् । 6ab
घृतेनाभ्यञ्जयेत् पश्चान्मूलमन्त्रेण देशिकः ॥ 6cd
शन्नो देवीति प्रक्षाल्य शुद्धवत्या शिवोदकैः । 7ab
अधिवासयेदष्टकुम्भान् सामुद्रं पूर्वकुम्भके ॥ 7cd
गाङ्गमग्नौ वर्षतोयं दक्षे रक्षस्तु नैर्ज्झरं । 8ab
नदीतोयं पश्चिमे तु वायव्ये तु नदोदकं ॥ 8cd
औद्भिज्जं चोत्तरे स्थाप्य ऐशान्यां तीर्थसम्भवं । 9ab
अलाभे तु नदीतोयं[1] यासां राजेति मन्त्रयेत्[2] ॥ 9cd
देवं निर्म्मार्ज्य निर्मञ्छ्य दुर्मित्रियेति विचक्षणः[3] । 10ab
नेत्रे चोन्मीलयेच्चित्रं तच्चक्षुर्मधुरत्रयैः ॥ 10cd
ज्योतिः सम्पूरयेद्धैम्यां गुरवे गामथार्प्पयेत् । 11ab
समुद्रज्येष्ठेत्यभिषिञ्चेद्वरुणं पूर्वकुम्भतः ॥ 11cd
समुद्रं गच्छ गाङ्गेयात् सोमो धेन्विति वर्षकात् । 12ab
देवीरापो निर्ज्झराद्भिर्न्नदाद्भिः पञ्चनद्यतः ॥ 12cd
उद्भिदद्भ्यश्चोद्भिदेन पावमान्या ऽथ तीर्थकैः । 13ab
आपो हि ष्ठा पञ्चगव्याद्धिरण्यवर्णेति स्वर्णजात् ॥ 13cd
आपो अस्मेति वर्षोत्थैर्व्याहृत्या कूपसम्भवैः । 14ab
वरुणञ्च तड़ागोत्थैर्वरुणाद्भिस्तु वश्यतः ॥ 14cd
आपो देवीति गिरिजैरेकाशीतिघटैस्ततः । 15ab
स्नापयेद्वरुणस्येति त्वन्नो वरुण चार्घ्यकं ॥ 15cd
व्याहृत्या मधुपर्कन्तु वृहस्पतेति वस्त्रकं । 16ab
वरुणेति पवित्रन्तु प्रणवेनोत्तरीयकं ॥ 16cd

1 नदीक्षोदमिति ख, चिह्नितपुस्तकपाठः ।
2 आसां रुद्रेति कीर्त्तयेदिति ङ, ग, चिह्नितपुस्तकपाठः ।
3 इन्द्रियेति विचक्षण इति ग, घ, चिह्नितपुस्तकपाठः ।

यद्वारण्येन पुष्पादि प्रदद्याद्वरुणाय तु । 17ab
चामरं दर्पणं छत्रं व्यजनं वैजयन्तिकां ॥ 17cd
मूलेनोत्तिष्ठेत्युत्थाप्य तां रात्रिमधिवासयेत् । 18ab
वरुणञ्चेति सान्निध्यं यद्वारण्येन पूजयेत् ॥ 18cd
सजीवीकरणं मूलात् पुनर्गन्धादिना यजेत् । 19ab
मण्डपे[1] पूर्ववत् प्रार्च्य कुण्डेषु समिदादिकं ॥ 19cd
वेदादिमन्त्रैर्गन्धाद्याश्चतस्रो धेनवो दुहेत् । 20ab
दिक्ष्वथो वै यवचरुं ततः संस्थाप्य होमयेत्[2] ॥ 20cd
व्याहृत्या वाथ गायत्र्या मूलेनामन्त्रयेत्तथा । 21ab
सूर्याय प्रजापतये द्यौः स्वाहा चान्तरिक्षकः ॥ 21cd
तस्यै पृथिव्यै देहधृत्यै इह स्वधृतये ततः । 22ab
इह रत्यै चेह रमत्या उग्रो भीमश्च रौद्रकः ॥ 22cd
विष्णुश्च वरुणो धाता रायस्पोषो महेन्द्रकः[3] । 23ab
अग्निर्यमो नैर्ऋतो ऽथ वरुणो वायुरेव च ॥ 23cd
कुवेर ईशो ऽनन्तो ऽथ ब्रह्मा राजा जलेश्वरः । 24ab
तस्मै स्वाहेदं विष्णुश्च तद्विप्रासेति होमयेत् ॥ 24cd
सोमो धेन्विति षड् हुत्वा इमं मेति च होमयेत् । 25ab
आपो हि ष्ठेति तिसृभिरिमा रुद्रेति होमयेत् ॥ 25cd
दशादिक्षु बलिं दद्यात् गन्धपुष्पादिना ऽर्चयेत् । 26ab
प्रतिमां तु समुत्थाप्य मण्डले विन्यसेद् बुधः ॥ 26cd
पूजयेद्गन्धपुष्पाद्यैर्हेमपुष्पादिभिः क्रमात् । 27ab

1 मण्डले इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 मूले त्वग्नौ च होमयेदिति ङ, चिह्नितपुस्तकपाठः ।
3 वायुः सोमो महेन्द्रक इति ङ, चिह्नितपुस्तकपाठः ।

जलाशयांस्तु दिग्भागे वितस्तिद्वयसम्मितान् ॥ 27cd
कृत्वा ऽष्टौ स्थण्डिलान् रम्यान् सैकतान् देशिकोत्तमः । 28ab
वरुणस्येति मन्त्रेण साज्यमष्टशतं ततः ॥ 28cd
चरुं यवमयं हुत्वा[1] शान्तितोयं समाचरेत् । 29ab
सेचयेन्मूर्द्ध्नि देवं तु सजीवकरणं चरेत् ॥ 29cd
ध्यायेत्तु वरुणं युक्तं गौर्या नदनदीगणैः । 30ab
ओं वरुणाय नमो ऽभ्यर्च्य ततः सान्निध्यमाचरेत् ॥ 30cd
उत्थाप्य[2] नागपृष्ठाद्यैर्भ्रामयेत्तैः समङ्गलैः । 31ab
आपो हि ष्ठेति च क्षिपेत्त्रिमध्वाक्ते घटे जले ॥ 31cd
जलाशये मध्यगतं सुगुप्तं विनिवेशयेत् । 32ab
स्नात्वा ध्यायेच्च वरुणं सृष्टिं ब्रह्माण्डसञ्ज्ञिकां ॥ 32cd
अग्निवीजेन सन्दग्ध्य तद्भस्म स्नावयेद्धरां । 33ab
सर्वमापोमयं लोकं ध्यायेत् तत्र जलेश्वरं ॥ 33cd
तोयमध्यस्थितं देवं ततो यूपं निवेशयेत् । 34ab
चतुरस्रमथाष्टास्रं वर्त्तुलं वा प्रवर्तितं[3] ॥ 34cd
आराध्य देवतालिङ्गं दशहस्तं तु कूपके । 35ab
यूपं यज्ञीयवृक्षोत्थं मूले हैमं फलं न्यसेत् ॥ 35cd
वाप्यां पञ्चदशकरं पुष्करिण्यां तु विंशकं । 36ab
तड़ागे पञ्चविंशाख्यं जलमध्ये निवेशयेत् ॥ 36cd
यागमण्डपाङ्गेण वा यूपव्रस्केति मन्त्रतः [4] । 37ab
स्थाप्य तद्वेष्टयेद्वस्त्रैर्यूपोपरि पताकिकां ॥ 37cd

---

1 चरुं सचमसं हुत्वेति ख, चिह्नितपुस्तकपाठः ।
2 उत्थाय इति ख, ग, घ, चिह्नितपुस्तकपाठः ।
3 सुवर्त्तितमिति ङ, चिह्नितपुस्तकपाठः ।
4 यूपस्थानेति मन्त्रत इति ग, घ, ङ, चिह्नितपुस्तकपाठः ।

तदभ्यर्च्य च गन्धाद्यैर्जगच्छान्तिं समाचरेत् । 38ab
दक्षिणां गुरवे दद्याद्भूगोहेमाम्बुपात्रकं ॥ 38cd
द्विजेभ्यो दक्षिणा देया आगतान् भोजयेत्तथा । 39ab
आब्रह्मस्तम्बपर्य्यन्ता ये केचित्सलिलार्थिनः ॥ 39cd
ते तृप्तिमुपगच्छन्तु तड़ागस्थेन वारिणा । 40ab
तोयमुत्सर्जयेदेवं[1] पञ्चगव्यं विनिक्षिपेत् ॥ 40cd
आपो हि ष्ठेति तिसृभिः शान्तितोयं द्विजैः कृतं । 41ab
तीर्थतोयं क्षिपेत् पुण्यं गोकुलञ्चार्प्पयेद्द्विजान्[2] ॥ 41cd
अनिवारितमन्नाद्यं सर्व्वजन्यञ्च कारयेत् । 42ab
अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ॥ 42cd
एकाहं स्थापयेत्तोयं तत्पुण्यमयुतायुतं । 43ab
विमाने मोदते स्वर्गे नरकं न स गच्छति ॥ 43cd
गवादि पिवते यस्मात्तस्मात् कर्त्तुर्न्न पातकं । 44ab
तोयदानात्सर्वदानफलं प्राप्य दिवं यजेत् ॥ 44cd

इत्यादिमहापुराणे आग्नेये कूपवापीतड़ागादिप्रतिष्ठाकथनं नाम चतुःषष्टितमो ऽध्यायः ॥

## 65

### अथ पञ्चषष्टितमो ऽध्यायः ।

सभास्थापनकथनं ।
भगवानुवाच ।
सभादिस्थापनं वक्ष्ये तथैतेषां प्रवर्त्तनं । 1ab
भूमौ परीक्षितायाञ्च वास्तुयागं समाचरेत् ॥ 1cd
स्वेच्छया तु सभां कृत्वा स्वेच्छया स्थापयेत् सुरान् । 2ab

1 तोयं समुत्सृजेदेवमिति ख, चिह्नितपुस्तकपाठः ।
2 गोकुलं पाययेद् द्विजानिति ङ, चिह्नितपुस्तकपाठः ।

चतुष्पथे ग्रामादौ[1] च न शून्ये कारयेत् सभां ॥ 2cd
निर्मलः कुलमुद्धृत्य कर्त्ता स्वर्गे विमोदते । 3ab
अनेन विधिना कुर्यात् सप्तभौमं हरेर्गृहं ॥ 3cd
यथा राज्ञां तथा ऽन्येषां पूर्वाद्याश्च ध्वजादयः । 4ab
कोणभुजान् वर्जयित्वा चतुःशालं तु वर्त्तयेत् ॥ 4cd
त्रिशालं वा द्विशालं वा एकशालमथापि वा । 5ab
व्ययाधिकं न कुर्व्वीत व्ययदोषकरं हि तत् ॥ 5cd
आयाधिके भवेत् पीडा तस्मात् कुर्य्यात् समं द्वयं । 6ab
करराशिं समस्तन्तु कुर्य्याद्वसुगुणं गुरुः ॥ 6cd
सप्तार्च्चिषा हृते भागे गर्गविद्याविचक्षणः । 7ab
अष्टधा भाजिते तस्मिन् यच्छेषं स व्ययो गतः ॥ 7cd
अथवा करराशिं तु हन्यात् सप्तार्च्चिषा बुधः । 8ab
वसुभिः संहृते भागे पृथ्व्यादि[2] परिकल्पयेत् ॥ 8cd
ध्वजो धूम्रस्तथा सिंहः श्वा वृषस्तु खरो गजः । 9ab
तथा ध्वाङ्क्षस्तु पूर्व्वादावुद्भवन्ति विकल्पयेत् ॥ 9cd
त्रिशालकत्रयं शस्तं उदक्पूर्व्वविवर्जितं । 10ab
याम्यां परगृहोपेतं द्विशालं लभ्यते सदा ॥ 10cd
याम्ये शालैकशालं तु प्रत्यक्शालमथापि वा । 11ab
एकशालद्वयं शस्तं शेषास्त्वन्ये भयावहाः ॥ 11cd
चतुःशालं सदा शस्तं सर्व्वदोषविवर्जितं । 12ab
एकभौमादि कुर्वीत भवनं सप्तभौमकं ॥ 12cd
द्वारवेद्यादिरहितं पूरणेन विवर्जितं । 13ab
देवगृहं देवतायाः प्रतिष्ठाविधिना सदा ॥ 13cd

1 पूश्चतुष्पथग्रामादाविति ख, चिह्नितपुस्तकपाठः ।
2 ध्वजादि इति ख, चिह्नितपुस्तकपाठः ।

संस्थाप्य मनुजानाञ्च समुदायोक्तकर्मणा । 14ab
प्रातः सर्वौषधीस्नानं कृत्वा शुचिरतन्द्रितः ॥ 14cd
मधुरैस्तु द्विजान् भोज्य पूर्णकुम्भादिशोभितं । 15ab
सतोरणं स्वस्ति वाच्य द्विजान् गोष्ठहस्तकः[1] ॥ 15cd
गृही गृहं प्रविशेच्च दैवज्ञान् प्राच्य[2] संविशेत् । 16ab
गृहे पुष्टिकरं मन्त्रं पठेच्चेमं समाहितः ॥ 16cd
ओं नन्दे नन्दय वाशिष्ठे वसुभिः प्रजया सह । 17ab
जये भार्गवदायादे प्रजानां विजयावहे ॥ 17cd
पूर्णे ऽङ्गिरसदायादे पूर्णकामं कुरुध्व मां । 18ab
भद्रे काश्यपदायादे कुरु भद्रां मतिं मम ॥ 18cd
सर्व्वबीजौषधीयुक्ते सर्वरत्नौषधीवृते । 19ab
रुचिरे नन्दने नन्दे वासिष्ठे रम्यतामिह ॥ 19cd
प्रजापतिसुते देवि चतुरस्रे महीयसि । 20ab
सुभगे सुव्रते देवि गृहे काश्यपि रम्यतां ॥ 20cd
पूजिते परमाचार्य्यैर्गन्धमाल्यैरलङ्कृते । 21ab
भवभूतिकरे देवि गृहे भार्गवि रम्यतां ॥ 21cd
अव्यक्ते व्याकृते पूर्णे मुनेरङ्गिरसः सुते । 22ab
इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहं ॥ 22cd
देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे । 23ab
मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव ॥ 23cd

इत्यादिमहापुराणे आग्नेये सभागृहस्थापनं नाम पञ्चषष्टि-
तमो ऽध्यायः ॥

1 गोपुच्छहस्तक इति घ, चिह्नितपुस्तकपाठः ।
2 देवाज्ञां प्राप्य इति ग, चिह्नितपुस्तकपाठः ।

## 66

# अथ षट्षष्टितमो ऽध्यायः ।

साधारणप्रतिष्ठाविधानं ।
भगवानुवाच ।
समुदायप्रतिष्ठाञ्च वक्ष्ये सा वासुदेववत् । 1ab
आदित्या वसवो रुद्राः साध्या विश्वे ऽश्विनौ तथा ॥ 1cd
ऋषयश्च तथा सर्वे वक्ष्ये तेषां विशेषकं । 2ab
यस्य देवस्य यन्नाम तस्याद्यं गृह्य चाक्षरं ॥ 2cd
मात्राभिर्भेदयित्वा तु दीर्घाण्यङ्गानि भेदयेत्[1] । 3ab
प्रथमं कल्पयेद्बीजं सविन्दुं प्रणवं नतिं[2] ॥ 3cd
सर्वेषां मूलमन्त्रेण पूजनं स्थापनं तथा । 4ab
नियमव्रतकृच्छ्राणां मठसङ्क्रमवेश्मनां ॥ 4cd
मासोपवासं द्वादश्यां इत्यादिस्थापनं वदे । 5ab
शिलां पूर्णघटं कांस्यं सम्भारं स्थापयेत्ततः ॥ 5cd
ब्रह्मकूर्चं समाहृत्य श्रपेद् यवमयं चरुं । 6ab
क्षीरेण कपिलायास्तु तद्विष्णोरिति साधकः ॥ 6cd
प्रणवेनाभिघार्य्यैव दर्व्या सङ्घट्टयेत्ततः । 7ab
साधयित्वा ऽवतार्य्याथ विष्णुमभ्यर्च्य होमयेत् ॥ 7cd
व्याहृत्या चैव गायत्र्या तद्विप्रासेति होमयेत् । 8ab
विश्वतश्चक्षुर्व्वेदाद्यैर्भूरग्नये तथैव च ॥ 8cd
सूर्य्याय प्रजापतये अन्तरिक्षाय होमयेत् । 9ab
द्यौः स्वाहा ब्रह्मणे स्वाहा पृथिवी महाराजकः ॥ 9cd
तस्मै सोमञ्च राजानं इन्द्राद्यैर्होममाचरेत् । 10ab

---

1 अङ्गानि कल्पयेदिति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 प्रणवं गतिमिति ख, चिह्नितपुस्तकपाठः ।

एवं हुत्वा[1] चरोर्भागान् दद्याद्दिग्बलिमादरात् ॥ 10cd
समिधो ऽष्टशतं हुत्वा पालाशांश्चाज्यहोमकं । 11ab
कुर्य्यात् पुरुषसूक्तेन इरावती तिलाष्टकं ॥ 11cd
हुत्वा तु ब्रह्मविष्ण्वीशदेवानामनुयायिनां । 12ab
ग्रहाणामाहुतीर्हुत्वा लोकेशानामथो पुनः ॥ 12cd
पर्वतानां नदीनाञ्च समुद्राणां तथा ऽऽहुतीः । 13ab
हुत्वा च व्याहृतीर्दद्यात् स्रुवपूर्णाहुतित्रयं ॥ 13cd
वौषडन्तेन मन्त्रेण वैष्णवेन पितामह । 14ab
पञ्चगव्यं चरुं प्राश्य दत्वाचार्याय दक्षिणां ॥ 14cd
तिलपात्रं हेमयुक्तं सवस्त्रं गामलङ्कृतां । 15ab
प्रीयतां भगवान् विष्णुरित्युत्सृजेद्व्रतं बुधः ॥ 15cd
मासोपवासादेरन्यां प्रतिष्ठां वच्मि पूर्णतः । 16ab
यज्ञेनातोष्य देवेशं श्रपयेद्वैष्णवं चरुं ॥ 16cd
तिलतण्डुलनीवारैः श्यामाकैरथवा यवैः । 17ab
आज्येनाधार्य चोत्तार्य्य होमयेन्मूर्त्तिमन्त्रकैः ॥ 17cd
विष्ण्वादीनां मासपानां तदन्ते होमयेत् पुनः । 18ab

ओं विष्णवे स्वाहा । ओं विष्णवे(2) निभूयपाय स्वाहा । ओं विष्णवे शिपिविष्टाय स्वाहा । ओं नरसिंहाय स्वाहा । ओं पुरुषोत्तमाय स्वाहा ।

द्वादशाश्वत्थसमिधो होमयेद्घृतसम्प्लुताः ॥ 18cd
विष्णो रराटमन्त्रेण ततो द्वादश चाहुतीः । 19ab

1 एवं दत्वा इति ख, ङ, चिह्नितपुस्तकपाठः । एतान् दत्वा इति घ, चिह्नितपुस्तकपाठः ।

2 ओं विष्णवे प्रवृषाय स्वाहा इति घ, चिह्नितपुस्तकपाठः ।

इदं विष्णुरिरावती चरोर्द्वादश आहुतीः ॥ 19cd
हुत्वा चाज्याहुतीस्तद्वत्तद्विप्रासेति होमयेत् । 20ab
शेषहोमं ततः कृत्वा दद्यात् पूर्णाहुतित्रयं ॥ 20cd
युञ्जतेत्यनुवाकन्तु[1] जप्त्वा प्राशीत वै चरुं । 21ab
प्रणवेन स्वशब्दान्ते कृत्वा पात्रे तु पैप्पले ॥ 21cd
ततो मासाधिपानान्तु विप्रान् द्वादश भोजयेत् । 22ab
त्रयोदश गुरुस्तत्र तेभ्यो दद्यात्त्रयोदश ॥ 22cd
कुम्भान् स्वाद्वम्बुसंयुक्तान्[2] सच्छत्रोपानहान्वितान् । 23ab
सवस्त्रहेममाल्याद्यान् व्रतयूत्यै त्रयोदश । 23cd
गावः प्रीतिं समायान्तु प्रचरन्तु प्रहर्षिताः । 24ab
इति गोपथमुत्सृज्य यूपं तत्र निवेशयेत् ॥ 24cd
दशहस्तं प्रपा ऽऽराममठसङ्क्रमणादिषु । 25ab
गृहे च होममेवन्तु कृत्वा सर्वं यथाविधि ॥ 25cd
पूर्वोक्तेन विधानेन प्रविशेच्च गृहं गृही । 26ab
अनिवारितमन्नाद्यं सर्वेष्वेतेषु कारयेत् ॥ 26cd
द्विजेभ्यो दक्षिणा देया यथाशक्त्या विचक्षणैः । 27ab
आरामं कारयेद्यस्तु नन्दने स चिरं वसेत् ॥ 27cd
मठप्रदानात् स्वर्ल्लोके शक्रलोके वसेत्ततः । 28ab
प्रपादानाद्वारुणेन सङ्क्रमेण वसेद्दिवि ॥ 28cd
इष्टकासेतुकारी च गोलोके मार्गकृद्भवां । 29ab
नियमव्रतकृद्विष्णुः कृच्छ्रकृत्सर्वपापहा ॥ 29cd
गृहं दत्वा वसेत्स्वर्गे यावदाभूतसम्प्लवं । 30ab

1 अञ्जतेत्यनुवाकस्तु इति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 स्वाद्वन्नसंयुक्तानिति ख, ग, घ, ङ, चिह्नितपुस्तकचतुष्टयपाठः ।

समुदायप्रतिष्ठेष्टा शिवादीनां गृहात्मनां ॥ 30cd

इत्यादिमहापुराणे आग्नेये समुदायप्रतिष्ठाकथनं नाम षट्षष्टि-तमो ऽध्यायः ॥

# 67

## अथ सप्तषष्टितमो ऽध्यायः ।

जीर्णोद्धारविधानं ।
भगवानुवाच ।
जीर्णाद्धारविधिं वक्ष्ये भूषितां स्नपयेद्गुरुः[1] । 1ab
अचलां विन्यसेद्गेहे अतिजीर्णां परित्यजेत् ॥ 1cd
व्यङ्गां भग्नां च शैलाद्यां न्यसेदन्यां च पूर्ववत् । 2ab
संहारविधिना तत्र तत्त्वान् संहृत्य देशिकः ॥ 2cd
सहस्रं नारसिंहेन हुत्वा तामुद्धरेद् गुरुः । 3ab
दारवीं दारयेद्वह्नौ शैलजां प्रक्षिपेज्जले ॥ 3cd
धातुजां रत्नजां वापि अगाधे वा जले ऽम्बुधौ । 4ab
यानमारोप्य जीर्णाङ्गं छाद्य वस्त्रादिना नयेत् ॥ 4cd
वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत् । 5ab
यत्प्रमाणा च यद्द्रव्या तन्मानां स्थापयेद्दिने । 5cd
कूपवापीतडागादेर्जीर्णोद्धारे महाफलं ॥ 5॥ 5ef

इत्यादिमहापुराणे आग्नेये जीर्णोद्धारकथनं नाम सप्तषष्टि-तमो ऽध्यायः ॥

---

1 भूषिताञ्च यजेद् गुरुरिति घ, चिह्नितपुस्तकपाठः ।

# 68

## अथ अष्टषष्टितमो ऽध्यायः ।

यात्रोत्सवविधिकथनं ।

भगवानुवाच ।

वक्ष्ये विधिं चोत्सवस्य स्थापिते तु सुरे चरेत् । 1ab
तस्मिन्नब्दे चैकरात्रं त्रिरात्रञ्चाष्टरात्रकं ॥ 1cd
उत्सवेन विना यस्मात् स्थापनं निष्फलं भवेत् । 2ab
अयने विषुवे चापि शयनोपवने गृहे[1] ॥ 2cd
कारकस्यानुकूले वा यात्रान्देवस्य कारयेत् । 3ab
मङ्गलाङ्कुररोपैस्तु गीतनृत्यादिवाद्यकैः ॥ 3cd
शरावघटिकापालीस्त्वङ्कुरारोहणे हिताः । 4ab
यवाञ्छालींस्तिलान् मुद्गान् गोधूमान् सितसर्षपान् ॥ 4cd
कुलत्थमाषनिष्पावान् क्षालयित्वा तु वापयेत् । 5ab
पूर्वादौ च बलिं दद्यात् भ्रमन् दीपैः पुरं निशि ॥ 5cd
इन्द्रादेः कुमुदादेश्च सर्वभूतेभ्य एव च । 6ab
अनुगच्छन्ति ते तत्र प्रतिरूपधराः पुनः ॥ 6cd
पदे पदे ऽश्वमेधस्य फलं तेषां न संशयः । 7ab
आगत्य देवतागारं देवं विज्ञापयेद् गुरुः ॥ 7cd
तीर्थयात्रा तु या देव श्वः कर्त्तव्या सुरोत्तम । 8ab
तस्यारम्भमनुज्ञातुमर्हसे देव सर्वथा ॥ 8cd
देवमेवन्तु विज्ञाप्य ततः कर्म्म समारभेत्[2] । 9ab
प्ररोहघटिकाभ्यान्तु वेदिकां भूषितां व्रजेत् ॥ 9cd

---

1 शयनोत्थापने गृहे इति ख, चिह्नितपुस्तकपाठः । शयनोत्थापने हरेरिति ङ, चिह्नितपुस्तकपाठः ।

2 समाचरेदिति ग, चिह्नितपुस्तकपाठः ।

चतुःस्तम्भान्तु तन्मध्ये स्वस्तिके प्रतिमां न्यसेत् । 10ab
काम्यार्थां लेख्यचित्रेषु स्थाप्य तत्राधिवासयेत् ॥ 10cd
वैष्णवैः सह कुर्वीत घृताभ्यङ्गन्तु मूलतः । 11ab
घृतधाराभिषेकं वा सकलां शर्वरीं बुधः ॥ 11cd
दर्पणं दर्श्य नीराजं गीतवाद्यैश्च मङ्गलं । 12ab
व्यजनं पूजनं दीपं गन्धपुष्पादिभिर्यजेत् ॥ 12cd
हरिद्रामुद्गकाश्मीरशुक्लचूर्णादि मूर्द्धि । 13ab
प्रतिमायाश्च भक्तानां सर्वतीर्थफलं धृते ॥ 13cd
स्नापयित्वा समभ्यर्च्य यात्राविम्बं रथे स्थितं । 14ab
नयेद्गुरुर्नदीर्नादैश्छत्राद्यै राष्ट्रपालिकाः ॥ 14cd
निम्नगायोजनादर्वाक् तत्र वेदीन्तु कारयेत् । 15ab
वाहनादवतार्य्यैनं तस्यां वेद्यान्निवेशयेत् ॥ 15cd
चरुं वै श्रपयेत् तत्र पायसं होमयेत्ततः । 16ab
अब्लिङ्गैः[1] वैदिकैर्मन्त्रैस्तीर्थानावाहयेत्ततः ॥ 16cd
आपो हिष्ठोपनिषदैः पूजयेदर्घ्यमुख्यकैः । 17ab
पुनर्देवं समादाय तोये कृत्वा ऽघमर्षणं ॥ 17cd
स्नायान्महाजनैर्व्विप्रैर्वेद्यामुत्तार्य्य तं न्यसेत् । 18ab
पूजयित्वा तदह्ना च प्रासादं तु नयेत्ततः । 18cd
पूजयेत् पावकस्थन्तु गुरुः स्याद्भुक्तिमुक्तिकृत् ॥ 18॥ 18ef

इत्यादिमहापुराणे आग्नेये देवयात्रोत्सवकथनं नाम अष्टष-
ष्टितमो ऽध्यायः ॥

1 अर्च्चिकैरिति ग, चिह्नितपुस्तकपाठः ।

## 69

अथोनसप्ततितमो ऽध्यायः ।

स्नानविधानं ।

अग्निरुवाच ।

ब्रह्मन् शृणु प्रवक्षामि स्नपनोत्सवविस्तरं । 1ab
प्रासादस्याग्रतः कुम्भान्मण्डपे मण्डले न्यसेत् ॥ 1cd
कुर्य्याद् ध्यानार्च्चनं होमं हरेरादौ च कर्म्मसु । 2ab
सहस्रं वा शतं वापि होमयेत् पूर्णया सह ॥ 2cd
स्नानद्रव्याण्यथाहृत्य कलशांश्चापि विन्यसेत् । 3ab
अधिवास्य सूत्रकण्ठान् धारयेन्मण्डले घटान् ॥ 3cd
चतुरस्रं पुरं कृत्वा रुद्रैस्तं प्रविभाज्येत्[1] । 4ab
मध्येन तु चरुं स्थाप्य पार्श्वे पङ्क्तिं प्रमार्जयेत् ॥ 4cd
शालिचूर्णादिनापूर्य्य पूर्व्वादिनवकेषु च । 5ab
कुम्भमुद्रां ततो बध्वा घटं तत्रानयेद् बुधः ॥ 5cd
पुण्डरीकाक्षमन्त्रेण दर्भांस्तांस्तु विसर्ज्जयेत् । 6ab
अद्भिः पूर्णं सर्वरत्नयुतं मध्ये न्यसेद् घटं ॥ 6cd
यवव्रीहितिलांश्चैव नीवारान् श्यामकान् क्रमात् । 7ab
कुलत्थमुद्गसिद्धार्थांस्तच्छुक्लानष्टदिक्षु च ॥ 7cd
ऐन्द्रे तु नवके मध्ये घृतपूर्णं घटं न्यसेत् । 8ab
पलाशाश्वत्थन्यग्रोधविल्वोदुम्बरशीर्षां ॥ 8cd
जम्बूशमीकपित्थानां त्वक्कषायैर्घटाष्टकं । 9ab
आग्नेयनवके मध्ये मधुपूर्णं घटं न्यसेत् ॥ 9cd
गोशृङ्गनश्वगङ्गागजेन्द्रदशनेषु च । 10ab
तीर्थक्षेत्रखलेष्वष्टौ मृत्तिकाः स्युर्घटाष्टके ॥ 10cd

---

1 प्रविभावयेदिति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।

याम्ये तु नवके मध्ये तिलतैलघटं न्यसेत् । 11ab
नारङ्गमथ जम्बीरं खर्जूरं मृद्विकां क्रमात् ॥ 11cd
नारिकेलं न्यसेत् पूगं दाडिमं पनसं फलं । 12ab
नैर्ऋते नवके मध्ये क्षीरपूर्णं घटं न्यसेत् ॥ 12cd
कुङ्कुमं नागपुष्पञ्च चम्पकं मालतीं क्रमात् । 13ab
मल्लिकामथ पुन्नागं करवीरं महोत्पलं ॥ 13cd
पुष्पाणि चाप्ये नवके मध्ये वै नारिकेलकम् । 14ab
नादयेमथ सामुद्रं सारसं कौपमेव च ॥ 14cd
वर्षजं हिमतोयञ्च नैर्ज्झरङ्गाङ्गमेव च । 15ab
उदकान्यथ वायव्ये नवके कदलीफलं ॥ 15cd
सहदेवीं कुमारीं च सिंहीं व्याघ्रीं तथा ऽमृतां । 16ab
विष्णुपर्णींशतशिवां वचां दिव्यौषधीर्न्यसेत् ॥ 16cd
पूर्व्वादौ सौम्यनवके मध्ये दधिघटं न्यसेत् । 17ab
पत्रमेलां त्वचं कुष्ठं बालकं चन्दनद्वयं ॥ 17cd
लतां कस्तूरिकां चैव कृष्णागुरुमनुक्रमात् । 18ab
सिद्धद्रव्याणि पूर्वादौ शान्तितोयमथैकतः ॥ 18cd
चन्द्रतारं क्रमाच्छुक्लं गिरिसारं त्रपु न्यसेत् । 19ab
घनसारं[1] तथा शीर्षं पूर्वादौ रत्नमेव च ॥ 19cd
घृतेनाभ्यज्य चोद्वर्त्य स्नपयेन्मूलमन्त्रतः । 20ab
गन्धाद्यैः पूजयेद्वह्नौ हुत्वा पूर्णाहुतिं चरेत् ॥ 20cd
बलिञ्च सर्वभूतेभ्यो भोजयेद्दत्तदक्षिणः । 21ab
देवैश्च मुनिभिर्भूपैर्देवं[2] संस्थाप्य चेश्वराः ॥ 21cd

1 घोषसारमिति ख, ग, घ, चिह्नितपुस्तकत्रयपाठः ।
2 देवैश्च मुनिभिः सार्द्धमिति ङ, चिह्नितपुस्तकपाठः । दिव्यैश्च बलिभिर्धूपैर्देवमिति घ, चिह्नितपुस्तकपाठः ।

बभूवुः स्थापित्वेत्थं स्नपनोत्सवकं चरेत् । 22ab
अष्टोत्तरसहस्रेण घटानां सर्वभाग् भवेत् ॥ 22cd
यज्ञावभृथस्नानेन पूर्णसंस्नापनं कृतम् । 23ab
गौरीलक्ष्मीविवाहादि चोत्सवं स्नानपूर्वकम् ॥ 23cd

इत्यादिमहापुराणे आग्नेये यज्ञावभृतस्नानं नाम ऊनसप्ततितमो ऽध्यायः ॥

## 70

### अथ सप्ततितमो ऽध्यायः ।

वृक्षादिप्रतिष्ठाकथनं ।
भगवानुवाच ।
प्रतिष्ठां पादपानाञ्च वक्ष्ये ऽहं भुक्तिमुक्तिदां । 1ab
सर्वौषध्युदकैर्लिप्तान् पिष्टातकविभूषितान् ॥ 1cd
वृक्षान्माल्यैरलङ्कृत्य वासोभिरभिवेष्टयेत् । 2ab
सूच्या सौवर्णया कार्य्यं सर्वेषां कर्णवेधनम् ॥ 2cd
हेमशलाकया ऽञ्जनञ्च वेद्यान्तु फलसप्तकम् । 3ab
अधिवासयेच्च प्रत्येकं घटान् बलिनिवेदनं ॥ 3cd
इन्द्रादेरधिवासो ऽथ होमः कार्य्यो वनस्पतेः । 4ab
वृक्षमध्यादुत्सृजेद्गां ततो ऽभिषेकमन्त्रतः ॥ 4cd
ऋग्यजुःसाममन्त्रैश्च वारुणैर्मङ्गलै रवैः[1] । 5ab
वृक्षवेदिककुम्भकैश्च[2] स्नपनं द्विजपुङ्गवाः ॥ 5cd
तरूणां यजमानस्य कुर्य्युश्च यजमानकः । 6ab
भूषितो दक्षिणां दद्याद्गोभूभूषणवस्त्रकं ॥ 6cd

1 वारुणमनुभिर्वरैरिति ङ, चिह्नितपुस्तकपाठः ।
2 वृक्षवेदीशकुम्भैस्तु इति ङ, चिह्नितपुस्तकपाठः ।

क्षीरेण भोजनं दद्याद्यावह्निचतुष्टयं । 7ab
होमस्तिलाद्यैः कार्यस्तु पलाशसमिधैस्तथा ॥ 7cd
आचार्ये द्विगुणं दद्यात् पूर्ववन् मण्डपादिकम् । 8ab
पापनाशः परा सिद्धिर्वृक्षारामप्रतिष्ठया ॥ 8cd
स्कन्दायेशो यथा प्राह प्रतिष्ठाद्यं तथा शृणु । 9ab
सूर्येशगणशक्त्यादेः परिवारस्य वै हरेः ॥ 9cd

इत्यादिमाहापुराणे आग्नेये पादपारामप्रतिष्ठाकथनं नाम सप्ततितमो ऽध्यायः ॥

# 71

## अथ एकसप्ततितमो ऽध्यायः ।

गणेशपूजाविधिः ।
ईश्वर उवाच ।
गणपूजां प्रवक्ष्यामि निर्विघ्नामखिलार्थदां[1] । 1ab
गणाय स्वाहा हृदयमेकदंष्ट्राय वै शिरः ॥ 1cd
गजकर्णिने च[2] शिखा गजवक्त्राय वर्म च । 2ab
महोदराय स्वदन्तहस्तायाक्षि[3] तथा ऽस्त्रकम् ॥ 2cd
गणो गुरुः पादुका च शक्त्यनन्तौ च धर्मकः । 3ab
मुख्यास्थिमण्डलं[4] चाधश्चोर्द्ध्वच्छदनमर्चयेत् ॥ 3cd
पद्मकर्णिकवीजांश्च ज्वालिनीं नन्दया ऽर्च्चयेत् । 4ab
सूर्येशा कामरूपा च उदया कामवर्तिनी ॥ 4cd

1 निर्विघ्नां पापनाशिनीमिति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
2 बलकर्णिने चेति ख, ग, घ, ङ, चिह्नितपुस्तकपाठः ।
3 महोदराये दण्डहस्तायाक्षि इति ङ, चिह्नितपुस्तकपाठः ।
4 मुख्यास्तिमण्डलमिति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

सत्या च विघ्ननाशा च आसनं गन्धमृत्तिका । 5ab
यं शोषो रं च दहनं प्लवो लं वं तथा ऽमृतम् ॥ 5cd
लम्बोदराय विद्महे महोदराय धीमहि तन्नो दन्ती प्रचोद-
यात् । 6ab
गणपतिर्गणाधिपो गणेशो गणनायकः । 6cd
गणक्रीडो वक्रतुण्ड एकदंष्ट्रो महोदरः ॥ 6॥ 6ef
गजवक्त्रो लम्बकु क्षिर्विकटो विघ्ननाशनः[1] । 7ab
धूम्रवर्णा महेन्द्राद्याः पूज्या गणपतेः स्मृताः ॥ 7cd

इत्यादिमहापुराणे आग्नेये विनायकपूजाकथनं नाम एक-
सप्ततितमो ऽध्यायः ॥

# 72

## अथ द्विसप्ततितमो ऽध्यायः ।

स्नानविशेषादिकथनं ।
ईश्वर उवाच ।
वक्ष्यामि स्कन्द नित्याद्यं स्नानं पूजां प्रतिष्ठया । 1ab
खात्वा ऽसिना समुद्धृत्य मृदमष्टाङ्गुलां ततः ॥ 1cd
सर्वात्मना समुद्धृत्य पुनस्तेनैव पूरयेत् । 2ab
शिरसा पयसस्तीरे निधायास्त्रेण शोधयेत्[2] ॥ 2cd
तृणानि शिखयोद्धृत्य वर्म्मणा विभजेत्त्रिधा । 3ab
एकया नाभिपादान्तं प्रक्षाल्य पुनरन्यया ॥ 3cd
अस्त्राभिलब्धयालभ्य दीप्तया सर्वविग्रहं । 4ab
निरुद्धाक्षाणि पाणिभ्यां प्राणान् संयम्य वारिणि ॥ 4cd
निमज्यासीत हृद्यस्त्रं स्मरन् कालानलप्रभं । 5ab

1 विघ्नराजक इति ङ, चिह्नितपुस्तकपाठः ।
2 निजास्त्रेण विशोधयेदिति ख, ग, चिह्नितपुस्तकपाठः ।

मलस्नानं विधायेत्थं समुत्थाय जलान्तरात् ॥ 5cd
अस्त्रसन्ध्यामुपास्याथ विधिस्नानं समाचरेत् । 6ab
सारस्वतादितीर्थानां एकमङ्कुशमुद्रया ॥ 6cd
हृदाकृष्य तथा स्नाप्य पुनः संहारमुद्रया । 7ab
शेषं मृद्भागमादाय प्रविश्य नाभिवारिणि ॥ 7cd
वामपाणितले कुर्याद्भागत्रयमुदङ्मुखः । 8ab
अङ्गैर्दक्षिणमेकाद्यं पूर्वमस्त्रेण सप्तधा ॥ 8cd
शिवेन दशधा सौम्यं जपेद्भागत्रयं क्रमात् । 9ab
सर्वदिक्षु क्षिपेत् पूर्वं हूं फडन्तशरात्मना[1] ॥ 9cd
कुर्याच्छिवेन सौम्येन शिवतीर्थं भुजक्रमात् । 10ab
सर्वाङ्गमङ्गजप्तेन मूर्द्धादिचरणावधि ॥ 10cd
दक्षिणेन समालभ्य पठन्नङ्गचतुष्टयम् । 11ab
पिधाय खानि सर्वाणि सम्मुखीकरणेन च ॥ 11cd
शिवं स्मरन्निमज्जेत हरिं गङ्गेति वा स्मरन् । 12ab
वौषडन्तषडङ्गेन के कुर्यादभिषेचनं ॥ 12cd
कुम्भमात्रेण रक्षार्थं पूर्वादौ निक्षिपेज्जलं । 13ab
स्नात्वा राजोपचारेण सुगन्धामलकादिभिः ॥ 13cd
स्नात्वा चोत्तीर्य तत्तीर्थं संहारिण्योपसंहरेत् । 14ab
अथातो विधिशुद्धेन संहितामन्त्रितेन च ॥ 14cd
निवृत्यादिविशुद्धेन भस्मना स्नानमाचरेत् । 15ab
शिरस्तः पादपर्यन्तं हूं फडन्तशरात्मना[2] ॥ 15cd
तेन कृत्वा मलस्नानं विधिस्नानं समाचरेत् । 16ab

1 क्रूं फडन्तशरात्मना इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 क्रूं फडन्तशरात्मना इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

ईशतत्पुरुषाघोरगुह्यकाजातसञ्चरैः[1] ॥ 16cd
क्रमेणोद्धूनयेन्मूर्द्धि वक्त्रहृद्गुह्यविग्रहान् । 17ab
सन्ध्यात्रये निशीथे च वर्षापूर्वावसानयोः ॥ 17cd
सुप्त्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिकम् । 18ab
स्त्रीपुन्नपुंसकं शूद्रं विडालशशमूषिकम् ॥ 18cd
स्नानमाग्नेयकं स्पृष्ट्वा शुचा वुद्धूलकं चरेत् । 19ab
सूर्यांशुवर्षसम्पर्कैः प्राङ्मुखेनोर्द्धबाहुना ॥ 19cd
माहेन्द्रं स्नानमैशेन कार्यं सप्तपदावधि । 20ab
गोसङ्घमध्यगः कुर्यात् खुरोत्खातकरेणुभिः[2] ॥ 20cd
पावनं नवमन्त्रेण स्नानन्तद्धर्मणा ऽथवा । 21ab
सद्योजातादिभिर्म्मन्त्रैरम्भोभिरभिषेचनम् ॥ 21cd
मन्त्रस्नानं भवेदेवं वारुणाग्नेययोरपि । 22ab
मनसा मूलमन्त्रेण प्राणायामपुरःसरम् ॥ 22cd
कुर्वीत मानसं स्नानं सर्वत्र विहितं च यत् । 23ab
वैष्णवादौ च तन्मन्त्रैरेवं स्नानादि कारयेत् ॥ 23cd
सन्ध्याविधिं प्रवक्ष्यामि मन्त्रैर्भिन्नैः समं गुह । 24ab
संवीक्ष्य त्रिः पिवेदम्बु ब्रह्मतीर्थेन शङ्करैः ॥ 24cd
स्वधान्तैरात्मतत्त्वाद्यैस्ततः खानि स्पृशेद्धृदा । 25ab
शकलीकरणं कृत्वा प्राणायामेन संस्थितः ॥ 25cd
त्रिः समावर्तयेन् मन्त्री मनसा शिवसंहितां । 26ab
आचम्य न्यस्य सन्ध्याञ्च ब्राह्मीं प्रातः स्मरेन्नरः[3] ॥ 26cd
हंसपद्मासनां रक्तां चतुर्वक्त्रां चतुर्भुजां । 27ab

1 गुह्यकाजातसंरवैरिति ख, चिह्नितपुस्तकपाठः ।
2 तत्खरोत्खातरेणुभिरिति ख, चिह्नितपुस्तकपाठः ।
3 स्मरेत्तत इति ग, चिह्नितपुस्तकपाठः ।

प्रस्कन्दमालिनीं दक्षे वामे दण्डकमण्डलुं ॥ 27cd
तार्क्ष्यपद्मासनां ध्यायेन्मध्याह्ने वैष्णवीं सितां । 28ab
शङ्खचक्रधरां वामे दक्षिणे सगदाभयं ॥ 28cd
रौद्रीं ध्यायेद् वृषाब्जस्थां त्रिनेत्रां शशिभूषितां । 29ab
त्रिशूलाक्षधरां दक्षे वामे साभयशक्तिकां ॥ 29cd
साक्षिणीं कर्मणां सन्ध्यां[1] आत्मानं तत्प्रभानुगं । 30ab
चतुर्थी ज्ञानिनः सन्ध्या निशीथादौ विभाव्यते ॥ 30cd
हृद्बिन्दुब्रह्मरन्ध्रेषु अरूपा तु परे स्थिता । 31ab
शिवबोधपरा या तु सा सन्ध्या मरमोच्यते ॥ 31cd
पैत्र्यं मूले प्रदेशिन्याः कनिष्ठायाः प्रजापतेः । 32ab
ब्राह्मचमङ्गुष्ठमूलस्थं तीर्थं दैवं कराग्रतः ॥ 32cd
सव्यपाणितले वह्नेस्तीर्थं सोमस्य वामतः । 33ab
ऋषीणां तु समग्रेषु अङ्गुलीपर्व्वसन्धिषु ॥ 33cd
ततः शिवात्मकैर्म्मन्त्रैः कृत्वा तीर्थं शिवात्मकं । 34ab
मार्ज्जनं संहितामन्त्रैस्तत्तोयेन समाचरेत् ॥ 34cd
वामपाणिपतत्तोययोजनं सव्यपाणिना । 35ab
उत्तमाङ्गे क्रमान्मन्त्रैर्मार्जनं समुदाहृतं ॥ 35cd
नीत्वा तद्रुपनासाग्रं दक्षपाणिपुटस्थितं । 36ab
बोधरूपं सितं तोयं वाममाकृष्य स्तम्भयेत्[2] ॥ 36cd
तत्पापं कज्जलाभासम्पिङ्गयारिच्य मुष्टिना । 37ab
क्षिपेद्वज्रशिलायान्तु तद्भवेदघमर्षणं ॥ 37cd
स्वाहान्तशिवमन्त्रेण कुशपुष्पाक्षतान्वितं । 38ab
शिवायार्घ्याञ्जलिन्दत्वा गायत्रीं शक्तितो जपेत् ॥ 38cd

1 दाक्षिण्यः कर्म्मणां सन्ध्या इति ख, चिह्नितपुस्तकपाठः ।
2 कुम्भयेदिति ख, ङ, चिह्नितपुस्तकपाठः ।

तर्पणं सम्प्रवक्ष्यामि देवतीर्थेन मन्त्रकात् । 39ab
तर्पयेद्धौं शिवायेति स्वाहान्यान् स्वाहया युतान् ॥ 39cd
ह्रां हृद्याय ह्रीं शिरसे ह्रूं शिखायै ह्रैं कवचाय । 40ab
अस्त्रायाष्टौ देवगणान् हृदादित्येभ्य एव च ॥ 40cd
हां वसुभ्यो ऽथ रुद्रेभ्यो विश्वेभ्यश्चैव मरुद्भ्यः । 41ab
भृगुभ्यो हामङ्गिरोभ्य ऋषीन् कण्ठोपवीत्यथ ॥ 41cd
अत्रेये ऽथ वसिष्ठाय नमश्चाथ पुलस्तये[1] । 42ab
क्रतवे भारद्वाजाय विश्वामित्राय वै नमः ॥ 42cd
प्रचेतसे मनुष्यांश्च सनकाय वषट् तथा । 43ab
हां सनन्दाय वषट् सनातनाय वै वषट् ॥ 43cd
सनत्कुमाराय वषट् कपिलाय तथा वषट् । 44ab
पञ्चशिखाय द्युभवे संलग्नकरमूलतः ॥ 44cd
सर्व्वेभ्यो भूतेभ्यो वौषट् भूतान् देवपितॄनथ । 45ab
दक्षस्कन्धोपवीती च कुशमूलाग्रतस्तिलैः ॥ 45cd
कव्यबालानलायाथ सोमाय च यमाय च । 46ab
अर्य्यम्णे चाग्निसोमाय वर्हिषद्भ्यः स्वधायुतान् ॥ 46cd
आज्यपाय च सोमाय विशेषसुरवत् पितॄन् । 47ab
ओं हां ईशानाय पित्रे स्वधा दद्यात् पितामहे[2] ॥ 47cd
शान्तप्रपितामहाय तथाप्रेतपितॄंस्तथा । 48ab
पितृभ्यः पितामहेभ्यः स्वधा ऽथ प्रपितामहे ॥ 48cd
वृद्धप्रपितामहेभ्यो मातृभ्यश्च स्वधा तथा । 49ab
हां मातामहेभ्यः स्वधा हां प्रमातामहेभ्यश्च ॥ 49cd
वृद्धप्रमातामहेभ्यः सर्वेभ्यः पितृभ्यस्तथा । 50ab

---

1 मरीचये पुलस्त्यायेति ङ, चिह्नितपुस्तकपाठः ।
2 हां ईशानाय पित्रे च सदाज्याय पितामहायेति ख, चिह्नितपुस्तकपाठः ।

सर्वेभ्यः स्वधा ज्ञातिभ्यः सर्वाचार्य्येभ्य एव च । 50cd
दिशां दिक्पतिसिद्धानां मातॄणां ग्रहरक्षसां ॥ 50॥ 50ef

इत्यादिमहापुराणे आग्नेये स्नानादिविधिर्नाम द्विसप्ततितमो ऽध्यायः ॥

## 73

### अथ त्रिसप्ततितमो ऽध्यायः ।

सूर्यपूजाविधिः ।
ईश्वर उवाच ।
वक्ष्ये सूर्य्यार्चनं स्कन्द कराङ्गन्यासपूर्वकं । 1ab
अहं तेजोमयः सूर्य्य इति ध्यात्वा ऽर्घ्यमर्चयेत् ॥ 1cd
पूरयेद्रक्तवर्णेन ललाटाकृष्टविन्दुना । 2ab
तं संपूज्य रवेरङ्गैः कृत्वा रक्षावगुण्ठनं ॥ 2cd
सम्प्रोक्ष्य तज्जलैर्द्रव्यं पूर्वास्यो भानुमर्चयेत् । 3ab
ओं अं हृद्बीजादि[1] सर्वत्र पूजनं दण्डिपिङ्गलौ ॥ 3cd
द्वारि दक्षे वामपार्श्वे ईशाने अं गणाय च । 4ab
अग्नौ गुरुं पीठमध्ये प्रभूतं चासनं यजेत् ॥ 4cd
अग्न्यादौ विमलं सारमाराध्यं परमं सुखं । 5ab
सितरक्तपीतनीलवर्णान् सिंहनिभान् यजेत् ॥ 5cd
पद्ममध्ये रां च दीप्तां रीं सूक्ष्मां रं जयां क्रमात्[2] । 6ab
रूं भद्रां रें विभूतीश्च विमलां रैममोघया ॥ 6cd
रों रौं विद्युता शक्तिं पूर्वाद्याः सर्वतोमुखाः । 7ab

---

1 ओं हां हृद्बीजादीति ख, चिह्नितपुस्तकपाठः ।
2 रुं जयां क्रमादिति ख, चिह्नितपुस्तकपाठः ।

रं मध्ये अर्कासनं स्यात् सूर्य्यमूर्त्तिं षडक्षरं ॥ 7cd
ओं हं खं खोल्कायेति यजेदावाह्य भास्करं । 8ab
ललाटाकृष्टमञ्जल्यां ध्यात्वा रक्तं न्यसेद्रविं ॥ 8cd
ह्रां ह्रीं सः[1] सूर्य्याय नमो मुद्रयावाहनादिकं । 9ab
विधाय प्रीतये विम्बमुद्रां गन्धादिकं ददेत् ॥ 9cd
पद्ममुद्रां विल्वमुद्रां प्रदर्श्याग्नौ हृदीरितं । 10ab
ओं आं हृदयाय नमः अर्क्काय शिरसे तथा ॥ 10cd
भूर्भुवः स्वः सुरेशाय शिखायै[2] नैर्ऋते यजेत् । 11ab
हुं कवचाय[3] वायव्ये ह्रां नेत्रायेति[4] मध्यतः ॥ 11cd
वः अस्त्रायेति पूर्वादौ ततो मुद्राः प्रदर्शयेत् । 12ab
धेनुमुद्रा हृदादीनां गोविषाणा च नेत्रयोः ॥ 12cd
अस्त्रस्य त्रासनी योज्या ग्रहाणां च नमस्क्रिया । 13ab
सों सोमं बुं बुधं वृञ्च जीवं भं भार्गवं यजेत् ॥ 13cd
दले पूर्वादिके ऽग्न्यादौ अं भौमं शं शनैश्चरं । 14ab
रं राहुं कें केतवे च गन्धाद्यैश्च खखोल्कया ॥ 14cd
मूलं जप्त्वार्घ्यपात्राम्बु दत्वा सूर्याय संस्तुतिः । 15ab
नत्वा पराङ्मुखञ्चार्कं[5] क्षमस्वेति ततो वदेत् ॥ 15cd
शराणुना फडन्तेन समाहृत्याणुसंहृतिं[6] । 16ab

1 ह्रीं ह्रं ह्रैं स इति घ, चिह्नितपुस्तकपाठः ।

2 सुरेशाय ज्वालिनिशिखायै इति ख, चिह्नितपुस्तकपाठः ।

3 क्रूं कवचाय इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

4 ह्रीं नेत्रायेतीति ख, चिह्नितपुस्तकपाठः । भां नेत्रायेति ग, चिह्नितपुस्तकपाठः ।

5 पराङ्मुखञ्चार्घ्यमिति ख, ग, चिह्नितपुस्तकपाठः ।

6 शवानुना फडन्तेन समाहृत्यानुसंहृतिमिति ख, चिह्नितपुस्तकद्वयपाठः । शवाणुना फडन्तेन समहृत्यार्थं संहृतिमिति ग, चिह्नितपुस्तकपाठः ।

हृत्पद्मे शिवसूर्येतिसंहारिण्योपसंस्कृतिं[1] ॥ 16cd
योजयेत्तेजश्चण्डाय रविनिर्म्माल्यमर्प्पयेत् । 17ab
अभ्यर्च्यैशे[2] जपाद्ध्यानाद्धोमात्सर्वं रवेर्भवेत् ॥ 17cd

इत्यादिमहापुराणे आग्नेये सूर्यपूजा नाम त्रिसप्ततितमोऽध्यायः ॥

## 74

### अथ चतुःसप्ततितमोऽध्यायः ।

शिवपूजाकथनं ।
ईश्वर उवाच ।
शिवपूजां प्रवक्ष्यामि आचम्य प्रणवार्घ्यवान् । 1ab
द्वारमस्त्राम्बुना प्रोक्ष्य होमादिद्वारपान्यजेत् ॥ 1cd
गणं सरस्वतीं लक्ष्मीमूर्द्धोदुम्बरके यजेत् । 2ab
नन्दिगङ्गे दक्षिणे ऽथ स्थिते[3] वामगते यजेत् ॥ 2cd
महाकालं च यमुनां दिव्यदृष्टिनिपातितः । 3ab
उत्सार्य्य दिव्यान् विघ्नांश्च पुष्पाक्षेपान्तरिक्षगान् ॥ 3cd
दक्षपार्ष्णित्रिभिर्घातैर्भूमिष्ठान्यागमन्दिरं । 4ab
देहलीं लङ्घयेद्वामशाखामाश्रित्य वै विशेत् ॥ 4cd
प्रविश्य दक्षपादेन विन्यस्यास्त्रमुदुम्बरे । 5ab
ओं हां वास्त्वधिपतये ब्रह्मणे मध्यतो यजेत् ॥ 5cd

---

1 संहारिण्योपसंहृतमिति ख, चिह्नितपुस्तकपाठः । संहारिण्योपसंहृतमिति ग, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 अभ्यर्च्य चेति ङ, चिह्नितपुस्तकपाठः ।
3 दक्षशाखास्थिते इति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।

निरीक्षणादिभिः शस्त्रैः शुद्धानादाय गड्डुकान्[1] । 6ab
लब्धानुज्ञः शिवान्मौनी गङ्गादिकमनुव्रजेत् ॥ 6cd
पवित्राङ्गः प्रजप्तेन वस्त्रपूतेन वारिणा । 7ab
पूरयेदम्बुधौ तांस्तान् गायत्र्या हृदयेन वा ॥ 7cd
गन्धकाक्षत[2] पुष्पादिसर्व्वद्रव्यसमुच्चयं । 8ab
सन्निधीकृत्य पूजार्थं भूतशुद्धादि कारयेत् ॥ 8cd
देवदक्षे ततो न्यस्य सौम्यास्यश्च शरीरतः[3] । 9ab
संहारमुद्रयादाय मूर्द्ध्नि मन्त्रेण[4] धारयेत् ॥ 9cd
भोग्यकर्म्मोपभोगार्थं पाणिकच्छपिकाख्यया । 10ab
हृदम्बुजे निजात्मानं द्वादशान्तपदे ऽथवा ॥ 10cd
शोधयेत् पञ्चभूतानि सञ्चिन्त्य शुषिरन्तनौ[5] । 11ab
चरणाङ्गुष्ठयोर्युग्मान् शुषिरान्तर्ब्बहिः स्मरेत् ॥ 11cd
शक्तिं हृद्व्यापिनीं पश्चाद्धूङ्कारे[6] पावकप्रभे । 12ab
रन्ध्रमध्यस्थिते[7] कृत्वा प्राणरोधं हि चिन्तकः ॥ 12cd
निवेशयेद्रेचकान्ते[8] फडन्तेनाथ तेन च । 13ab
हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रे विभिद्य च ॥ 13cd

1 गन्धकान् इति ङ, चिह्नितपुस्तकपाठः । लुड्डुकानिति ख, चिह्नितपुस्तकपाठः ।

2 गुड्डुकाक्षतेति ङ, चिह्नितपुस्तकपाठः । गण्डूकाक्षतेति घ, चिह्नितपुस्तकपाठः ।

3 सौम्यास्यः स्वशरीरत इति घ, चिह्नितपुस्तकपाठः ।

4 मूर्त्तिमन्त्रेणेति ग, घ, ङ, चिहिनितपुस्तकत्रयपाठः ।

5 स्वशिरस्तनौ इति ङ, चिह्नितपुस्तकपाठः ।

6 पश्चादोङ्कारे इति ङ, चिह्नितपुस्तकपाठः ।

7 चन्द्रमध्यस्थिते इति ख, चिह्नितपुस्तकपाठः । चक्रमध्यस्थिते इति ङ, चिह्नितपुस्तकपाठः ।

8 निवोधयेद्रेचकान्ते इति ख, चिह्नितपुस्तकपाठः ।

ग्रन्थीन्निर्भिद्य हूङ्कारं मूर्द्ध्नि विन्यस्य जीवनं । 14ab
सम्पुटं हृदयेनाथ पूरकाहितचेतनं ॥ 14cd
हूं शिखोपरि विन्यस्य शुद्धं विन्द्वात्मकं[1] स्मरेत् । 15ab
कृत्वाथ कुम्भकं शम्भौ एकोद्घातेन योजयेत् ॥ 15cd
रेचकेन वीजवृत्त्या शिवे लीनो ऽथ शोधयेत् । 16ab
प्रतिलोमं स्वदेहे तु[2] विन्द्वन्तं तत्र विन्दुकं ॥ 16cd
लयन्नीत्वा महीवातौ जलवह्नी परस्परं । 17ab
द्वौ द्वौ साध्यौ तथाकाशमविरोधेन तच्छृणु ॥ 17cd
पार्थिवं मण्डलं पीतं कठिनं वज्रलाञ्छितं । 18ab
हौमित्यात्मीयवीजेन[3] तन्निवृत्तिकलामयं ॥ 18cd
पादादारभ्य मूर्द्धानं विचिन्त्य चतुरस्रकं । 19ab
उद्घातपञ्चकेनैव वायुभूतं विचिन्तयेत् ॥ 19cd
अर्द्धचन्द्रं द्रवं सौम्यं शुभ्रसम्भोजलाञ्छितं[4] । 20ab
ह्रीमित्यनेन वीजेन प्रतिष्ठारूपतां गतं ॥ 20cd
संयुक्तं राममन्त्रेण[5] पुरुषान्तमकारणं । 21ab
अर्घ्यञ्चतुर्भिरुद्घातैर्वह्निभूतं विशोधयेत् ॥ 21cd
आग्नेयं मण्डलं त्र्यस्त्रं रक्तं स्वस्तिकलाञ्छितं । 22ab
हूमित्यनेन वीजेन विद्यारूपं विभावयेत् ॥ 22cd
घोराणुत्रिभिरुद्घातैर्जलभूतं विशोधयेत् । 23ab

1 विष्ण्वात्मकमिति ख, चिह्नितपुस्तकपाठः ।

2 स्वहेतौ तु इति ख, चिह्नितपुस्तकपाठः ।

3 हौमित्युन्नीय वीजेनेति ख, चिह्नितपुस्तकपाठः । हौमित्याग्नेयवीजेनेति घ, चिह्नितपुस्तकपाठः ।

4 अर्द्धचन्द्रं ततः सौम्ये शिवं पूर्वेण योजयेदिति ङ, चिह्नितपुस्तकपाठः ।

5 वामं मन्त्रेणेति घ, चिह्नितपुस्तकपाठः । वा समन्त्रेणेति ख, चिह्नितपुस्तकपाठः ।

षडस्रं मण्डलं वायोर्विन्दुभिः षड्भिरङ्कितं ॥ 23cd
कृष्णं ह्वेमिति वीजेन जातं शान्तिकलामयं । 24ab
सञ्चित्योद्घातयुग्मेन पृथ्वीभूतं विशोधयेत् ॥ 24cd
नभोविन्दुमयं वृत्तं विन्दुशक्तिविभूषितं । 25ab
व्योमाकारं सुवृत्तञ्च शुद्धस्फटिकनिर्मलं ॥ 25cd
हौङ्कारेण फडन्तेन शान्त्यतीतकलामयं । 26ab
ध्यात्वैकोद्घातयोगेन सुविशुद्धं विभावयेत् ॥ 26cd
आप्याययेत्ततः सर्वं मूलेनामृतवर्षिणा[1] । 27ab
आधाराख्यामनन्तञ्च धर्म्मज्ञानादिपङ्कजं ॥ 27cd
हृदासनमिदं[2] ध्यात्वा मूर्त्तिमावाहयेत्ततः । 28ab
सृष्ट्या शिवमयं तस्यामात्मानं द्वादशान्ततः ॥ 28cd
अथ तां शक्तिमन्त्रेण वौषडन्तेन सर्वतः । 29ab
दिव्यामृतेन सम्प्लाव्य कुर्वीत सकलीकृतं ॥ 29cd
हृदयादिकरान्तेषु[3] कनिष्ठाद्यङ्गुलीषु च । 30ab
हृदादिमन्त्रविन्यासः सकलीकरणं मतं ॥ 30cd
अस्त्रेण रक्ष्य प्राकारं तन्मन्त्रेणाथ तद्बहिः । 31ab
शक्तिजालमधश्चोर्द्ध्वं महामुद्रां प्रदर्शयेत् ॥ 31cd
आपादमस्तकं यावद् भावपुष्पैः[4] शिवं हृदि । 32ab
पद्मे यजेत् पूरकेण आकृष्टामृतसद्घृतैः ॥ 32cd
शिवमन्त्रैर्न्नाभिकुण्डे तर्पयेत शिवानलं । 33ab

1 मूलेनामृतसेचनादिति ङ, चिह्नितपुस्तकपाठः ।
2 हृद्यासनमिदमिति ङ, चिह्नितपुस्तकपाठः ।
3 हृदयादिषडङ्गेन इति ङ, चिह्नितपुस्तकपाठः ।
4 तावत् पुष्पैरिति ङ, चिह्नितपुस्तकपाठः ।

ललाटे विन्दुरूपञ्च चिन्तयेच्छुभविग्रहं[1] ॥ 33cd
एकं स्वर्णादिपात्राणां पात्रमस्त्राम्बुशोधितं । 34ab
विन्दुप्रसूतपीयूषरूपतोयाक्षतादिना ॥ 34cd
हृदापूर्य्य षडङ्गेन पूजयित्वा ऽभिमन्त्रयेत् । 35ab
संरक्ष्य हेति मन्त्रेण कवचेन विगुण्ठयेत् ॥ 35cd
रचयित्वा ऽर्घ्यमष्टाङ्गं सेचयेद्धेनुमुद्रया[2] । 36ab
अभिषिञ्चेदथात्मानं मूर्द्ध्नि तत्तोयविन्दुना ॥ 36cd
तत्रस्थं यागसम्भारं प्रोक्षयेदस्त्रवारिणा । 37ab
अभिमन्त्र्य हृदा पिण्डैस्तनुत्राणेन वेष्टयेत् ॥ 37cd
दर्शयित्वा ऽमृतां मुद्रां पुष्पं दत्वा निजासने । 38ab
विधाय तिलकं मूर्द्ध्नि पुष्पं मूलेन योजयेत् ॥ 38cd
स्नाने देवार्च्चने होमे भोजने यागयोगयोः । 39ab
आवश्यके जपे धीरः सदा वाचंयमो भवेत् ॥ 39cd
नादान्तोच्चारणान्मन्त्रं शोधयित्वा सुसंस्कृतं । 40ab
पूजने ऽभ्यर्च्य गायत्र्या सामान्यार्घ्यमुपाहरेत् ॥ 40cd
ब्रह्मपञ्चकमावर्त्त्य माल्यमादाय लिङ्गतः । 41ab
ऐशान्यान्दिशि चण्डाय हृदयेन निवेदयेत् ॥ 41cd
प्रक्षाल्य पिण्दिकालिङ्गे अस्त्रतोये ततो हृदा । 42ab
अर्घ्यपात्राम्बुना सिञ्चेदिति लिङ्गविशोधनं ॥ 42cd
आत्मद्रव्यमन्त्रलिङ्गशुद्धौ सर्वान् सुरान्यजेत् । 43ab
वायव्ये गणपतये हां गुरुभ्यो ऽर्च्चयेच्छिवे ॥ 43cd

1 चिन्तयेत् सपरिग्रहमिति ङ, चिह्नितपुस्तकपाठः ।
2 रोचयेद्धेनुमुद्रयेति ख, चिह्नितपुस्तकपाठः ।

आधारशक्तिमङ्कुरनिभां कूर्म्मशिलास्थितां । 44ab
यजेद् ब्रह्मशिलारूढं शिवस्यानन्तमासनं ॥ 44cd
विचित्रकेशप्रख्यानमन्योन्यं पृष्टदर्शिनः । 45ab
कृतत्रेतादिरूपेण शिवस्यासनपादुकां ॥ 45cd
धर्म्मं ज्ञानञ्च वैराग्यमैश्वर्य्यञ्चाग्निदिङ्मुखान् । 46ab
कर्पूरकुङ्कुमस्वर्णकज्जलाभान् यजेत् क्रमात् ॥ 46cd
पद्मञ्च कर्णिकामध्ये पूर्वादौ मध्यतो नव । 47ab
वरदाभयहस्ताश्च शक्तयो धृतचामराः ॥ 47cd
वामा ज्येष्ठा च रौद्री च काली कलविकारिणी । 48ab
बलविकरणी पूज्या बलप्रमथनी क्रमात् ॥ 48cd
हां सर्व्वभूतदमनी केशराग्रे मनोन्मनी । 49ab
क्षित्यादिशुद्धविद्यान्तु तत्त्वव्यापकमासनं ॥ 49cd
न्यसेत् सिंहासने देवं शुक्लं पञ्चमुखं विभुं । 50ab
दशबाहुं च खण्डेन्दुं दधानन्दक्षिणैः करैः ॥ 50cd
शक्त्यृष्टिशूलखट्वाङ्गवरदं वामकैः करैः । 51ab
डमरुं वीजपूरञ्च नीलाब्जं सूत्रकोत्पलं ॥ 51cd
द्वात्रिंशल्लक्षणोपेतां शैवीं मूर्त्तिन्तु मध्यतः । 52ab
हां हं हां शिवमूर्त्तये स्वप्रकाशं शिवं स्मरन् ॥ 52cd
ब्रह्मादिकारणत्यागान्मन्त्रं नीत्वा शिवास्पदं । 53ab
ततो ललाटमध्यस्थं स्फुरत्तारापतिप्रभं ॥ 53cd
षडङ्गेन समाकीर्णं विन्दुरूपं परं शिवं । 54ab
पुष्पाञ्जलिगतं ध्यात्वा लक्ष्मीमूर्त्तौ निवेशयेत् ॥ 54cd
ओं हां हौं शिवाय नम आवाहन्या हृद्दा ततः । 55ab
आवाह्य स्थाप्य स्थापन्या सन्निधायान्तिकं शिवं ॥ 55cd
निरोधयेन्निष्ठुरया कालकान्त्या फडन्ततः । 56ab

विघ्नानुत्सार्य्य विष्ठयाथ[1] लिङ्गमुद्रां नमस्कृतिं ॥ 56cd
हृदावगुण्ठयेत् पश्चादावाहः सम्मुखी ततः । 57ab
निवेशनं स्थापनं स्यात्सन्निधानं तवास्मि भोः ॥ 57cd
आकर्म्मकाण्डपर्य्यन्तं सन्नेधेयोपरिक्षयः । 58ab
स्वभक्तेश्च[2] प्रकाशोयस्तङ्गवेदवगुण्ठनं ॥ 58cd
सकलीकरणं कृत्वा मन्त्रैः षड्भिरथैकतां । 59ab
अङ्गानामङ्गिना सार्द्धं विदध्यादमृतीकृतं ॥ 59cd
चिच्छक्तिहृदयं शम्भोः शिव ऐश्वर्य्यमष्टधा[3] । 60ab
शिखावशित्वं चाभेद्यं तेजः कवचमैश्वरं ॥ 60cd
प्रतापो दुःसहश्चास्त्रमन्तरायापहारकं । 61ab
नमः स्वधा च स्वाहा च वौषट् चेति यथाक्रमं ॥ 61cd
हृत्पुरःसरमुच्चार्य्य पाद्यादीनि निवेदयेत् । 62ab
पाद्यं पादाम्बुजद्वन्द्वे वक्त्रेष्वाचमनीयकं ॥ 62cd
अर्घ्यं शिरसि देवस्य दूर्व्वापुष्पाक्षतानि च । 63ab
एवं संस्कृत्य संस्कारैर्द्दशभिः परमेश्वरं ॥ 63cd
यजेत् पञ्चोपचारेण विधिना कुसुमादिभिः । 64ab
अभ्युक्ष्योद्धर्त्य निर्म्भञ्ज्य राजिकालवणादिभिः ॥ 64cd
अर्घ्योदविन्दुपुष्पाद्यैर्गडूकैः[4] स्नापयेच्छनैः । 65ab
पयोदधिघृतक्षौद्रशर्क्कराद्यैरनुक्रमात् ॥ 65cd
ईशादिमन्त्रितर्द्रव्यैरर्च्य तेषां[5] विपर्य्ययः । 66ab

1 छोत्याथ इति ख, चिह्नितपुस्तकपाठः ।
2 अभुक्तेज्या इति ग, चिह्नितपुस्तकपाठः ।
3 शिवमैश्वर्य्यमष्टधा इति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
4 गन्धकैरिति ख, चिह्नितपुस्तकपाठः ।
5 इत्यादिमन्त्रितैर्भक्ष्यैश्चैषामिति ख, चिह्नितपुस्तकपाठः ।

तोयधूपान्तरैः सर्वैर्मूलेन स्नपयेच्छिवं ॥ 66cd
विरूक्ष्य यवचूर्णेन यथेष्टं शीतलैर्जलैः । 67ab
स्वशक्त्या गन्धतोयेन संस्नाप्य शुचिवाससा ॥ 67cd
निर्म्मार्ज्यार्घ्यं प्रदद्याच्च नोपरि भ्रामयेत् करं । 68ab
न शून्यमस्तकं लिङ्गं पुष्पैः कुर्य्यात्ततो ददेत् ॥ 68cd
चन्दनाद्यैः समालभ्य पुष्पैः प्रार्च्य शिवाणुना[1] । 69ab
धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य शिवाणुना[2] ॥ 69cd
अस्त्रेण पूजितां घण्टां चादाय गुग्गुलं ददेत् । 70ab
दद्यादाचमनं पश्चात् स्वधान्तं हृदयाणुना[3] ॥ 70cd
आरात्रिकं समुत्तार्य्य तथैवाचामयेत् पुनः । 71ab
प्रणम्यादाय देवाज्ञां भोगाङ्गानि प्रपूजयेत् ॥ 71cd
हृदग्नौ चन्द्रभं चैशे शिवं चामीकरप्रभं । 72ab
शिखां रक्ताञ्च नैर्ऋत्ये कृष्णं वर्म्मं च वायवे ॥ 72cd
चतुर्वक्त्रं चतुर्बाहुं[4] दलस्थान्[5] पूजयेदिमान् । 73ab
दंष्ट्राकरालमप्यस्त्रं पूर्वदौ वज्रसन्निभं ॥ 73cd
मूले हौं शिवाय नमः ओं हां हुं हीं हों शिरश्च । 74ab
हृं शिखायै हैं वर्म्मं हश्चास्त्रं परिवारयुताय च ॥ 74cd
शिवाय दद्यात् पाद्यञ्च आचामञ्चार्घ्यमेव च । 75ab
गन्धं पुष्पं धूपदीपं नैवेद्याचमनीयकं ॥ 75cd
करोद्वर्त्तनताम्बूलं मुखवासञ्च दर्पणं । 76ab

1 शिवात्मनेति ख, चिह्नितपुस्तकपाठः ।
2 शिवात्मनेति ख, चिह्नितपुस्तकपाठः ।
3 हृदयात्मनेति ख, चिह्नितपुस्तकपाठः ।
3 चतुर्वक्त्रांश्चतुर्बाहून् इति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।
5 दलाग्रे इति ङ, चिह्नितपुस्तकपाठः ।

शिरस्यारोप्य देवस्य दूर्वाक्षतपवित्रकं ॥ 76cd
मूलमष्टशतं जप्त्वा हृदयेनाभिमन्त्रितं । 77ab
चर्म्मणावेष्टितं खड्गं रक्षितं कुशपुष्पकैः ॥ 77cd
अक्षतैर्मुद्रायाया युक्तं शिवमुद्भवसञ्ज्ञया । 78ab
गुह्यातिगुह्यगुप्त्यर्थं[1] गृहाणास्मत्कृतं जपं ॥ 78cd
सिद्धिर्भवतु मे येन[2] त्वत्प्रसादात्त्वयि स्थिते । 79ab
भोगी श्लोकं पठित्वाद्यं[3] दक्षहस्तेन शम्भवे ॥ 79cd
मूलाणुनार्घ्यतोयेन वरहस्ते[4] निवेदयेत् । 80ab
यत्किञ्चित् कुर्म्महे देव सदा सुकृतदुस्कृतं ॥ 80cd
तन्मे शिवपदस्थस्य हूं क्षः क्षेपय शङ्कर । 81ab
शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत् ॥ 81cd
शिवो जयति सर्वत्र यः शिवः सोहमेव च । 82ab
श्लोकद्वयमधीत्यैवं जपं देवाय चार्प्पयेत् ॥ 82cd
शिवाङ्गानां[5] दशांशञ्च दत्वार्घ्यं स्तुतिमाचरेत् । 83ab
प्रदक्षिणीकृत्य नमेच्चाष्टाङ्गञ्चाष्टमूर्त्तये[6] । 83cd
नत्वा ध्यानादिभिश्चैव यजेच्चित्रे ऽनलादिषु ॥ 83॥ 83ef

इत्यादिमहापुराणे आग्नेये शिवपूजा नाम चतुःसप्ततितमो ऽध्यायः ॥

1 गुह्यातिगुह्यगोप्ता त्वमिति ग, ङ, चिह्नितपुस्तकपाठः ।
2 सिद्धिर्भवतु मे देवेति ख, ग, चिह्नितपुस्तकपाठः ।
3 पठित्वामुमिति ख, चिह्नितपुस्तकपाठः ।
4 हरहस्ते इति ग, चिह्नितपुस्तकपाठः ।
5 शिवज्ञानामिति ख, चिह्नितपुस्तकपाठः ।
6 नमेदष्टाङ्गमूर्तये इति ङ, चिह्नितपुस्तकपाठः ।

# 75

## अथ पञ्चसप्ततितमो ऽध्यायः ।

अग्निस्थापनादिविधिः ।
ईश्वर उवाच ।
अर्घपात्रकरो यायादग्न्यागारं सुसंवृतः । 1ab
यागोपकरणं सर्वं दिव्यदृष्ट्या च कल्पयेत्[1] ॥ 1cd
उदङ्मुखः कुण्डमीक्षेत् प्रोक्षणं ताडनं कुशैः । 2ab
विदध्यादस्त्रमन्त्रेण वर्म्मणाभ्युक्षणं मतं ॥ 2cd
खड्गेन खातमुद्धारं पूरणं समतामपि । 3ab
कुर्वीत वर्म्मणा सेकं कुट्टनन्तु शरात्मना[2] ॥ 3cd
सम्मार्ज्जनं समालेपं कलारूपप्रकल्पनं । 4ab
त्रिसूत्रीपरिधानं च वर्म्मणाभ्यर्च्चनं सदा ॥ 4cd
रेखात्रयमुदक् कुर्य्यादेकां पूर्वाननामधः । 5ab
कुशेन च शिवास्त्रेण यद्वा तासां विपर्य्ययः ॥ 5cd
वज्रीकरणमन्त्रेण हृदा दर्भैश्चतुष्पथं । 6ab
अक्षपात्रन्ततनुत्रेण विन्यसेद्विष्टरं हृदा ॥ 6cd
हृदा वागीश्वरीं तत्र ईशमावाह्य पूजयेत् । 7ab
वह्निं सदाश्रयानीतं शुद्धपात्रोपरिस्थितं ॥ 7cd
क्रव्यादांशं परित्यज्य वीक्षणादिविशोधितं । 8ab
औदर्य्यं चैन्दवं भौतं एकीकृत्यानलत्रयं ॥ 8cd
ओं हूं वह्निचैतन्याय वह्निवीजेन विन्यसेत् । 9ab
संहितामन्त्रितं वह्निं धेनुमुद्रामृतीकृतं ॥ 9cd
रक्षितं हेतिमन्त्रेण कवचेनावगुण्ठितं । 10ab
पूजितन्त्रिः परिभ्राम्य कुण्डस्योर्द्धं प्रदक्षिणं ॥ 10cd

---

1 दिव्यदृष्ट्या विलोकयेदिति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 शराणुनेति ङ, चिह्नितपुस्तकपाठः ।

शिववीजमिति ध्यात्वा वागीशागर्भगोचरे । 11ab
वागीश्वरेण देवेन क्षिप्यमानं विभावयेत् ॥ 11cd
भूमिष्ठजानुको मन्त्री हृदात्मसम्मुखं क्षिपेत् । 12ab
ततो ऽन्तस्थितवीजस्य[1] नाभिदेशे समूहनं ॥ 12cd
सम्भृतिं परिधानस्य शौचमाचमनं हृदा । 13ab
गर्भाग्नेः पूजनं कृत्वा तद्रक्षार्थं शराणुना[2] ॥ 13cd
बध्नीयाद्गर्भजं देव्याः कङ्कणं पाणिपल्लवे । 14ab
गर्भाधानाय सम्पूज्य सद्योजातेन पावकं ॥ 14cd
ततो हृदयमन्त्रेण जुहुयादाहुतित्रयं । 15ab
पुंसवनाय वामेन तृतीये यासि पूजयेत् ॥ 15cd
आहुतित्रितयं दद्याच्छिरसाम्बुकणान्वितं । 16ab
सीमन्तोन्नयनं षष्ठे मासि सम्पूज्य रूपिणा ॥ 16cd
जुहुयादाहुतीस्तिस्रः शिखया शिखयैव तु । 17ab
वक्त्राङ्गकल्पनां कुर्य्याद्वक्त्रोद्घाटननिष्कृती ॥ 17cd
जातकर्म्मनृकर्म्मभ्यां दशमे मासि पूर्ववत् । 18ab
वह्निं सन्धुक्ष्य दर्भाद्यैः[3] स्नानं गर्भमलापहं ॥ 18cd
सुवर्णबन्धनं देव्या कृतं ध्यात्वा हृदार्च्चयेत् । 19ab
सद्यःसूतकनाशाय प्रोक्षयेदस्त्रवारिणा ॥ 19cd
कुम्भन्तु[4] वहिरस्त्रेण ताडयेद्वर्म्मणोक्षयेत् । 20ab
अस्त्रेणोत्तरपूर्व्वाग्रान्मेखलासु वहिः कुशान् ॥ 20cd

---

1 ततोन्तस्थितदेवस्य इति ख, चिह्नितपुस्तकपाठः ।
2 शरात्मना इति ख, चिह्नितपुस्तकपाठः ।
3 गन्धाद्यैरिति ख, चिह्नितपुस्तकपाठः ।
4 कुण्डन्तु इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

आस्थाप्य[1] स्थापयेत्तेषु हृदा परिधिविस्तरं । 21ab
वक्त्राणामस्त्रमन्त्रेण ततो नालापनुत्तये ॥ 21cd
समिधिः पञ्च होतव्याः प्रान्ते मूले घृतप्लुताः । 22ab
ब्रह्माणं शङ्करं विष्णुमनन्तञ्च हृदार्च्चयेत् ॥ 22cd
दूर्वाक्षतैश्च पर्य्यन्तं परिधिस्थाननुक्रमात् । 23ab
इन्द्रादीशानपर्य्यन्तान्विष्टरस्थाननुक्रमात् ॥ 23cd
अग्नेरभिमुखीभूतान् निजदिक्षु हृदार्च्चयेत् । 24ab
निवार्य्य विघ्नसङ्घातं वालकं पालयिष्यथ ॥ 24cd
शैवीमाज्ञाभिमान्तेषां श्रावयेत्तदनन्तरं । 25ab
गृहीत्वा स्रुक्स्रुवावूर्द्धवदनाधोमुखैः क्रमात् ॥ 25cd
प्रताप्याग्नौ त्रिधा दर्भमूलमध्याग्रकैः स्पृशेत् । 26ab
कुशस्पृष्टप्रदेशे तु आत्मविद्याशिवात्मकं ॥ 26cd
क्रमात्तत्त्वत्रयं न्यस्य हां हीं हूं सं[2] रवैः क्रमात् । 27ab
स्रुचि शक्तिं स्रुवे शम्भुं विन्यस्य हृदयाणुना ॥ 27cd
त्रिसूत्रीवेष्टितग्रीवौ पूजितौ कुसुमादिभिः । 28ab
कुशानामुपरिष्टात्तौ स्थापयित्वा स्वदक्षिणे ॥ 28cd
गव्यमाज्यं समादाय वीक्षणादिविशोधितं । 29ab
स्वकां ब्रह्ममयीं मूर्त्तिं सञ्चिन्त्यादाय तद्घृतं ॥ 29cd
कुण्डस्योर्द्ध्वं हृदावर्त्य भ्रामयित्वाग्निगोचरे । 30ab
पुनर्व्विष्णुमयीं ध्यात्वा घृतमीशानगोचरे ॥ 30cd
धृत्वादाय कुशाग्रेण स्वाहान्तं शिरसाणुना[2] । 31ab

---

1 आस्तीर्येति घ, ङ, चिह्नितपुस्तद्वयपाठः ।

2 हां ह्रीं ह्रं समिति ख, चिह्नितपुस्तकपाठः । हूं हां क्रूं समिति ङ, चिह्नितपुस्तकपाठः ।

3 शिरसात्मना इति ख, चिह्नितपुस्तकपाठः ।

जुहुयाद्विष्णवे विन्दुं रुद्ररूपमनन्तरं ॥ 31cd
भावयन्निजमात्मानं नाभौ धृत्वाप्लवेत्ततः । 32ab
प्रादेशमात्रदर्भाभ्यामङ्गुष्ठानामिकाग्रकैः ॥ 32cd
धृताभ्यां सम्मुखं वह्नेरस्त्रेणाप्लवमाचरेत् । 33ab
हृदात्मसम्मुखं तद्वत् कुर्य्यात् सम्प्लवनन्ततः ॥ 33cd
हृदालब्धदग्धदर्भं शस्त्रक्षेपात् पवितयेत् । 34ab
दीप्तेनापरदर्भेण निवाह्यानेन दीपयेत् ॥ 34cd
अस्त्रमन्त्रेण निर्द्दग्धं वह्नौ दर्भं पुनः क्षिपेत् । 35ab
क्षिप्त्वा घृते कृतग्रन्थिकुशं प्रादेशसम्मितं ॥ 35cd
पक्षद्वयमिडादीनां त्रयं चाज्ये विभावयेत् । 36ab
क्रमाद्भागत्रयादाज्यं स्रुवेणादाय होमयेत् ॥ 36cd
स्वेत्यग्नौ हा घृते[1] भागं शेषमाज्यं क्षिपेत् क्रमात् । 37ab
ओं हां अग्नये स्वाहा । ओं हां सोमाय स्वाहा । ओं हां अग्नीषोमाभ्यां स्वाहा ।
उद्घाटनाय नेत्राणां अग्नेर्नेत्रत्रये मुखे ॥ 37cd
स्रुवेण घृतपूर्णेन चतुर्थीमाहुतिं यजेत् । 38ab
ओं हां अग्नये स्विष्टकृते स्वाहा ।
अभिमन्त्र्य षडङ्गेन बोधयेद्धेनुमुद्रया ॥ 38cd
अवगुण्ठ्य तनुत्रेण रक्षेदाज्यं शराणुना[2] । 39ab
हृदाज्यविन्दुविक्षेपात् कुर्य्यादभ्युक्ष्य शोधनं ॥ 39cd
वक्त्राभिघारसन्धानां वक्त्रैकीकरणं तथा । 40ab
ओं हां सद्योजाताय स्वाहा । ओं हां वामदेवाय स्वाहा । ओं हां

---

1 स्वाहेत्यग्नौ घृते इति ङ, चिह्नितपुस्तकपाठः ।
2 शरात्मनेति ण, चिह्नितपुस्तकपाठः ।

अघोराय स्वाहा । ओं तत्पुरुषाय स्वाहा । ओं हां ईशानाय स्वाहा ।

इत्येकैकघृताहुत्या कुर्य्याद्वक्त्राभिघारकं ॥ 40cd

औं हां सद्योजातवामदेवाभ्यां स्वाहा । ओं हां वामदेवाघोराभ्यां स्वाहा । ओं हां अघोरतत्पुरुषाभ्यां स्वाहा । ओं हां तत्पुरुषेशानाभ्यां स्वाहा ।

इतिवक्त्रानुसन्धानं मन्त्रैरेभिः क्रमाच्चरेत् । 41ab
अग्नितो गतया वायुं निर्ऋतादिशिवान्तया ॥ 41cd
वक्त्राणामेकतां कुर्य्यात् स्रुवेण घृतधारया । 42ab

ओं हां सद्योजातवामदेवाघोरतत्पुरुषेशानेभ्यः स्वाहा ॥ 42cd

इतीष्टवक्त्रे वक्त्राणामन्तर्भावस्तदाकृतिः ॥ 42॥ 42ef
ईशेन वह्निमभ्यर्च्य दत्वास्त्रेणाहुतित्रयं । 43ab
कुर्य्यात् सर्व्वात्मना नाम शिवाग्निस्त्वं हुताशन ॥ 43cd
हृदार्च्चितौ विसृष्टाग्नौ पितरौ विधिपूरणीं । 44ab
मूलेन वौषडन्तेन दद्यात् पूर्णां यथाविधि ॥ 44cd
ततो हृदम्बुजे साङ्गं ससेनं भासुरं परं[1] । 45ab
यजेत् पूर्व्ववदावाह्य प्रार्थ्याज्ञान्तर्प्पयेच्छिवं ॥ 45cd
यागाग्निशिवयोः कृत्वा नाडीसन्धानमात्मना । 46ab
शक्त्या मूलाणुना होमं कुर्य्यादङ्गैर्द्दशांशतः ॥ 46cd
घृतस्य कार्षिको होमः क्षीरस्य मधुनस्तथा । 47ab
शुक्तिमात्राहुतिर्द्दध्नः प्रसृतिः पायस्यतु ॥ 47cd
यथावत् सर्व्वभक्षाणां लाजानां मुष्टिसम्मितं । 48ab
खण्डत्रयन्तु मूलानां कलानां स्वप्रमाणतः ॥ 48cd

1 ससेनं भास्करं परमिति ख, चिह्नितपुस्तकपाठः । शासनं भास्करं परमिति ग, चिह्नितपुस्तकपाठः । शाशनं भासुरं परमिति ङ चिह्नितपुस्तकपाठः । शासनं त्र्यक्षरं परमिति घ, चिह्नितपुस्तकपाठः ।

ग्रासार्द्धमात्रमन्नानां सूक्ष्माणि पञ्च होमयेत् । 49ab
इक्षोरापर्व्विकं मानं लतानामङ्गुलद्वयं ॥ 49cd
पुष्पं पत्रं स्वमानेन समिधां तु दशाङ्गुलं । 50ab
चन्द्रचन्दनकाश्मीरकस्तूरीयक्षकर्द्दमान् ॥ 50cd
कलायसम्मितानेनान् गुग्गुलं वदरास्थिवत् । 51ab
कन्दानामष्टमं भागं जुहुयाद्विधिवत् परं ॥ 51cd
होमं निर्वर्त्तयेदेवं ब्रह्मवीजपदैस्ततः । 52ab
घृतेन स्रुचि पूर्णायां निधायाधोमुखं स्रुवं ॥ 52cd
स्रुगग्रे पुष्पमारोप्य पश्चाद्वामेन पाणिना । 53ab
पुनः सव्येन तौ धृत्वा शङ्खसन्निभमुद्रया ॥ 53cd
समुद्गतो ऽर्द्धकायश्च समपादः समित्थितः । 54ab
नाभौ तन्मूलमाधाय स्रुगग्रव्यग्रलोचनः ॥ 54cd
ब्रह्मादिकारणात्यागाद्विनिःसृत्य सुषुम्णया[1] । 55ab
वामस्तनान्तमानीय तयोर्मूलमतन्द्रितः ॥ 55cd
मूलमन्त्रमविस्पष्टं वौषडन्तं समुच्चरेत् । 56ab
तदग्नौ जुहुयादाज्यं यवसम्मितधारया ॥ 56cd
आचामं चन्दनं दत्वा ताम्बूलप्रभृतीनपि । 57ab
भक्त्या तद्भूतिमावन्द्य विदध्यात्प्रणतिं परां ॥ 57cd
ततो वह्निं समभ्यर्च्य पडन्तास्त्रेण संवरान् । 58ab
संहारमुद्रयाहृत्य क्षमस्वेत्यभिधाय च ॥ 58cd
भासुरान्[2] परिधीस्तांश्च पूरकेण हृदा ऽणुना[3] । 59ab

1 विनिःसृत्य स्वपृष्टया इति ख, चिह्नितपुस्तकपाठः । विनिःसृत्य स्वपुष्टया इति ग, चिह्नितपुस्तकपाठः ।
2 भास्वरानिति ख, ग, घ, ङ, चिह्नितपुस्तकपाठः ।
3 हृदात्मनेति ख, ग, चिह्नितपुस्तकपाठः ।

श्रद्धया परयात्मीये स्थापयेत ह्रदम्बुजे ॥ 59cd
सर्वपाकाग्रमादाय कृत्वा मण्डलकद्वयं[1] । 60ab
अन्तर्वहिर्बलिं दद्यादाग्नेय्यां कुण्डसन्निधौ ॥ 60cd
ओं हां रुद्रेभ्यः स्वाहा पूर्वे मातृभ्यो दक्षिणे तथा । 61ab
वारुणे हां गणेभ्यश्च स्वाहा तेभ्यस्त्वयं बलिः ॥ 61cd
उत्तरे हाञ्च यक्षेभ्य ईशाने हां ग्रहेभ्य उ[2] । 62ab
अग्नौ हामसुरेभ्यश्च रक्षोभ्यो नैर्ऋते बलिः ॥ 62cd
वायव्ये हाञ्च नागेभ्यो नक्षत्रेभ्यश्च मध्यतः । 63ab
हां राशिभ्यः[3] स्वाहा वह्नौ विश्वेभ्यो नैर्ऋते तथा ॥ 63cd
वारुण्यां[4] क्षेत्रपालाय अन्तर्बलिरुदाहृतः । 64ab
द्वितीये मण्डले वाह्ये इन्द्रायाग्नियमाय च ॥ 64cd
नैर्ऋताय जलेशाय वायवे धनरक्षिणे । 65ab
ईशानाय च पूर्वादौ ह्रीशाने ब्रह्मणे नमः ॥ 65cd
नैर्ऋते विष्णवे स्वाहा वायसादेर्वहिर्बलिः । 66ab
बलिद्वयगतान्मन्त्रान् संहारमुद्रया ऽऽत्मनि ॥ 66cd

इत्यादिमहापुराणे आग्नेये अग्निकार्य्यं नाम पञ्चसप्ततितमो ऽध्यायः ॥

---

1 कृत्वा च मण्डलद्वयमिति ख, चिह्नितपुस्तकपाठः ।
2 गणेभ्य उ इति ग, चिह्नितपुस्तकपाठः ।
3 हां ऋषिभ्य इति ङ, चिह्नितपुस्तकपाठः ।
4 वायव्यामिति ग, चिह्नितपुस्तकपाठः । नैर्ऋत इति ङ, चिह्नितपुस्तकपाठः ।

# 76

## अथ षट्सप्ततितमो ऽध्यायः ।

चण्दपूजाकथनं ।
ईश्वर उवाच ।
ततः शिवान्तिकङ्गत्वा पूजाहोमादिकं मम । 1ab
गृहाण भगवन् पुण्यफलमित्यभिधाय च ॥ 1cd
अर्घ्योदकेन देवाय मुद्रयोद्भवसञ्ज्ञया । 2ab
हृद्बीजपूर्वमूलेन स्थिरचित्तो निवेदयेत् ॥ 2cd
ततः पूर्ववदभ्यर्च्य स्तुत्वा स्तोत्रैः प्रणम्य च । 3ab
अर्घ्यं पराङ्मुखं दत्वा क्षमस्वेत्यभिधाय च ॥ 3cd
नाराचमुद्रया ऽस्त्रेण फडन्तेनात्मसञ्चयं । 4ab
संहृत्य दिव्यया लिङ्गं मूर्त्तिमन्त्रेण योजयेत् ॥ 4cd
स्थण्डिले त्वर्च्चिते देवे मन्त्रसङ्घातमात्मनि । 5ab
नियोज्य विधिनोक्तेन विदध्याच्चण्डपूजनं ॥ 5cd
ओं चण्डेशानाय नमो मध्यतश्चण्डमूर्त्तये । 6ab
ओं धूलिचण्डेश्वराय[1] हूं फट्[2] स्वाहा तमाह्वयेत् ॥ 6cd
चण्डहृदयाय हूं फट् ओं चण्डशिरसे तथा[3] । 7ab
ओं चण्डशिखायै हूं फट् चण्डायुः[4] कवचाय च ॥ 7cd
चण्डास्त्राय तथा हूं फट् चण्डं रुद्राग्निजं स्मरेत् । 8ab
शूलटङ्कधरं कृष्णं साक्षसूत्रकण्डलुं ॥ 8cd
टङ्काकारे ऽर्द्धचन्द्रे[5] वा चतुर्व्वक्त्रं प्रपूजयेत् । 9ab

---

1 ओं बलिचण्डेश्वराय इति ग, चिह्नितपुस्तकपाठः ।
2 क्रूं फडिति ङ, चिह्नितपुस्तकपाठः ।
3 हूं चण्डशिरसे स्वाहेति ग, चिह्नितपुस्तकपाठः ।
4 हूं फट् चण्दत इति ग, घ, चिह्नितपुस्तकद्वयपाठः ।
5 टङ्कारेणार्द्धचन्द्रे इति ख, चिह्नितपुस्तकपाठः ।

यथाशक्ति जपं कुर्य्यादङ्गानान्तु दशांशतः ॥ 9cd
गोभूहिरण्यवस्त्रादिमणिहेमादिभूषणं । 10ab
विहाय शेषनिर्माल्यं चण्डेशाय निवेदयेत् ॥ 10cd
लेह्यचोष्याद्यनुवरं ताम्बूलं स्रग्विलेपनं । 11ab
निर्म्माल्यं भोजनं तुभ्यं प्रदत्तन्तु शिवाज्ञया ॥ 11cd
सर्वमेतत् क्रियाकाण्डं मया चण्ड तवाज्ञया । 12ab
न्यूनाधिकं कृतं मोहात् परिपूर्णं सदा ऽस्तु मे ॥ 12cd
इति विज्ञाप्य देवेशं दत्वा ऽर्घ्यं तस्य संस्मरन् । 13ab
संहारमूर्त्तिमन्त्रेण शनैः संहारमुद्रया ॥ 13cd
पूरकान्वितमूलेन मन्त्रानात्मनि योजयेत् । 14ab
निर्म्माल्यापनयस्थानं लिम्पेद्गोमयवारिणा । 14cd
प्रोक्ष्यार्घ्यादि विसृज्याथ आचान्तो ऽन्यत्समाचरेत् ॥ 14॥ 14ef

इत्यादिमहापुराणे आग्नेये चण्डपूजाकथनं नाम षट्सप्तति-तमो ऽध्यायः ॥

## 77

### अथ सप्तसप्ततितमो ऽध्यायः ।

कपिलादिपूजाविधनं ।
ईश्वर उवाच ।
कपिलापूजनं वक्ष्ये एभिर्म्मन्त्रैर्यजेच्च गां । 1ab
ओं कपिले नन्दे नमः ओं कपिले भद्रिके नमः ॥ 1cd
ओं कपिले सुशीले नमः कपिले सुरभिप्रभे । 2ab
ओं कपिले सुमनसे नमः ओं भुक्तिमुक्तिप्रदे नमः ॥ 2cd
सौरभेयि जगन्मातर्देवानाममृतप्रदे । 3ab
गृहाण वरदे ग्रासमीप्सितार्थञ्च देहि मे ॥ 3cd

वन्दिता ऽसि वसिष्ठेन विश्वामित्रेण धीमता । 4ab
कपिले हर मे पापं यन्मया दुष्कृतं कृतं ॥ 4cd
गावो ममाग्रतो नित्यं गावः पृष्ठत एव च । 5ab
गावो मे हृदये चापि गवां मध्ये वसाम्यहं ॥ 5cd
दत्तं गृह्णन्तु[1] मे ग्रासं जप्त्वा स्यां निर्म्मलः शिवः । 6ab
प्रार्च्य विद्यापुस्तकानि गुरुपादौ नमेन्नरः ॥ 6cd
यजेत् स्नात्वा तु मध्याह्ने अष्टपुष्पिकया शिवं । 7ab
पीठमूर्त्तिशिवाङ्गानां पूजा स्यादष्टपुष्पिका ॥ 7cd
मध्याह्ने भोजनागारे सुलिप्ते पाकमानयेत् । 8ab
ततो मृत्युञ्जयेनैव वौषडन्तेन सप्तधा ॥ 8cd
जप्तैः सदर्भशङ्खस्थैः सिञ्चेत्तं वारिविन्दुभिः । 9ab
सर्वपाकाग्रमुद्धृत्य शिवाय विनिवेदयेत् ॥ 9cd
अथार्द्धं[2] चुल्लिकाहोमे विधानायोपकल्पयेत्[3] । 10ab
विशोध्य विधिना चुल्लीं तद्वह्निं पूरकाहुतिं ॥ 10cd
हुत्वा नाभ्यग्निना चैकं ततो रेचकवायुना । 11ab
वह्निवीजं समादाय कादिस्थानगतिक्रमात्[4] ॥ 11cd
शिवाग्निस्त्वमिति ध्यात्वा चुल्लिकाग्नौ निवेशयेत् । 12ab
ओं हां अग्नये नमो वै हां सोमाय वै नमः ॥ 12cd
सूर्य्याय वृहस्पतये प्रजानां पतये नमः । 13ab
सर्वेभ्यश्चैव देवेभ्यः सर्वविश्वेभ्य एव च ॥ 13cd

---

1 दत्तं गृहाणेति ग, घ, चिह्नितपुस्तकद्वयपाठः ।

2 अन्यार्द्धमिति ख, चिह्नितपुस्तकपाठः । अन्त्यार्द्धमिति ङ, चिह्नितपुस्तकपाठः ।

3 निधानायोपकल्पयेदिति च, ङ, चिह्नितपुस्तकद्वयपाठः ।

4 हृदि स्थानमतिक्रमेदिति ग, चिह्नितपुस्तकपाठः । कादिस्थानमतिक्रमादिति ख, चिह्नितपुस्तकपाठः ।

ह्रामग्नये स्विष्टिकृते पूर्वादावर्च्चयेदिमान् । 14ab
स्वाहान्तामाहुतिं दत्वा क्षमयित्वा विसर्जयेत् ॥ 14cd
चुल्ल्या दक्षिणबाहौ च यजेद्धर्म्माय वै नमः । 15ab
वामबाहावधर्म्माय काञ्जिकादिकभाण्डके ॥ 15cd
रसपरिवर्त्तमानाय वरुणाय जलाग्नये[1] । 16ab
विघ्नराजो गृहद्वारे पेषण्यां सुभगे नमः ॥ 16cd
ओं रौद्रिके नमो गिरिके[2] नमश्चोलूखले यजेत् । 17ab
बलप्रियायायुधाय नमस्ते मुषले यजेत् ॥ 17cd
सम्मार्ज्जन्यां देवतोक्ते कामाय शयनीयके । 18ab
मध्यस्तम्भे च स्कन्दाय दत्वा वास्तुबलिं ततः ॥ 18cd
भुञ्जीत पात्रे सौवर्णे पद्मिन्यादिदलादिके । 19ab
आचार्य्यः साधकःपुत्र समयी मौनमास्थितः ॥ 19cd
वटाश्वत्थार्क्कवाताविसर्ज्जभल्लातकांस्त्यजेत् । 20ab
अपोशानं पुरादाय प्राणाद्यैः प्रणवान्वितैः ॥ 20cd
स्वाहान्तेनाहुतीः पञ्च दत्वादीप्योदरानलं । 21ab
नागः कूर्म्मो ऽथ कृकरो देवदत्तो धनञ्जयः ॥ 21cd
एतेभ्य उपवायुभ्यः स्वाहापोशानवारिणा । 22ab
भक्तादिकं निवेद्याय पिवेच्छेषोदकं नरः ॥ 22cd
अमृतोपस्तरणमसि प्राणाहुतीस्ततो ददेत् । 23ab
प्राणाय स्वाहा ऽपानाय समानाय ततस्तथा ॥ 23cd
उदानाय च व्यानाय भुक्त्वा चुल्लकमाचरेत् । 24ab

1 जलाशये इति ङ, चिह्नितपुस्तकपाठः ।

2 ओं रौद्रकोटिगिरिके इति ख, ग, घ, ङ, चिह्नितपुस्तकचतुष्टय-पाठः ।

अमृतापिधानमसीति शरीरे ऽन्नादिवायवः[1] ॥ 24cd

इत्यादिमहापुराणे आग्नेये वास्तुपूजाकथनं नाम सप्तसप्ततितमो ऽध्यायः ॥

## 78

### अथष्टसप्ततितमो ऽध्यायः ।

पवित्रारोहणकथनं ।
ईश्वर उवाच ।
पवित्रारोहणं वक्ष्ये क्रियार्च्चादिषु पूरणं । 1ab
नित्यं तन्नित्यमुद्दिष्टं नैमित्तिकमथापरं ॥ 1cd
आषाढादिचतुर्द्दश्यामथ श्रावणभाद्रयोः । 2ab
सितासितासु कर्त्तव्यं चतुर्द्दश्यष्टमीषु तत् ॥ 2cd
कुर्य्याद्वा कार्त्तिकीं यावत्तिथौ प्रतिपादिके । 3ab
वह्निब्रह्माम्बिकेभास्यनागस्कन्दार्क्कशूलिनां ॥ 3cd
दुर्गायमेन्द्रगोविन्दस्मरशम्भुसुधाभुजां[2] । 4ab
सौवर्णं राजतं ताम्रं कृतादिषु यथाक्रमं ॥ 4cd
कलौ कार्प्पासजं चापि पट्टपद्मादिसूत्रकं । 5ab
प्रणवश्चन्द्रमा वह्निर्ब्रह्मा नागो गुहो हरिः[3] ॥ 5cd
सर्वेशः[4] सर्वदेवाः स्युः क्रमेण नवतन्तुषु । 6ab
अष्टोत्तरशतान्यर्द्धं तदर्धं चोत्तमादिकं ॥ 6cd
एकाशीत्या ऽथवा सूत्रैस्त्रिंशता ऽप्यष्टयुक्तया । 7ab

1 शरीरोन्मादवायव इति घ, चिह्नितपुस्तकपाठः ।
2 स्वधाभुजामिति ख, घ, ङ, चिह्नितपुस्तकत्रयपाठः ।
3 गुहो रविरिति ख, ग, घ, ङ, चिह्नितपुस्तकचतुष्टयपाठः ।
4 सदेश इति ख, ग, घ, ङ, चिह्नितपुस्तकपाठः ।

पञ्चाशता वा कर्त्तव्यं तुल्यग्रन्थ्यन्तरालकं ॥ 7cd
द्वादशाङ्गुलमानानि व्यासादष्टाङ्गुलानि च । 8ab
लिङ्गविस्तारमानानि चतुरङ्गुलकानि वा ॥ 8cd
तथैव पिण्डिकास्पर्शं चतुर्थं सर्वदैवतं । 9ab
गङ्गावतारकं कार्य्यं सुजातेन सुधौतकं ॥ 9cd
ग्रन्थिं कुर्य्याच्च वामेन अघोरेणाथ शोधयेत् । 10ab
रञ्जयेत् पुरुषेणैव रक्तचन्दनकुङ्कुमैः ॥ 10cd
कस्तूरीरोचनाचन्द्रैर्हरिद्रागैरिकादिभिः । 11ab
ग्रन्थयो दश कर्त्तव्या अथवा तन्तुसङ्ख्यया ॥ 11cd
अन्तरं वा यथाशोभमेकद्विचतुरङ्गुलं । 12ab
प्रकृतिः पौरुषी वीरा चतुर्थी त्वपराजिता ॥ 12cd
जया ऽन्या विजया षष्ठी अजिता च सदाशिवा । 13ab
मनोन्मनी सर्वमुखी ग्रन्थयो ऽभ्यधिकाः शुभाः ॥ 13cd
कार्य्या वा चन्द्रवह्न्यर्कपवित्रं[1] शिववद्धृदि । 14ab
एकैकं निजमूर्त्तौ वा पुस्तके गुरुके गणे[2] ॥ 14cd
स्यादेकैकं तथा द्वारदिक्पालकलशादिषु । 15ab
हस्तादिनवहस्तान्तं लिङ्गानां स्यात्पवित्रकं ॥ 15cd
अष्टाविंशतितो युद्धं दशभिर्द्दशभिः क्रमात् । 16ab
द्व्यङ्गुलाभ्यन्तरास्तत्र क्रमादेकाङ्गुलान्तराः ॥ 16cd
ग्रन्थयो मानमप्येषां लिङ्गविस्तारसम्मितं । 17ab
सप्तम्यां वा त्रयोदश्यां कृतनित्यक्रियः शुचिः ॥ 17cd
भूषयेत् पुष्पवस्त्राद्यैः सायाह्ने यागमन्दिरं । 18ab

1 चण्डवह्न्यर्कपवित्रमिति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।
2 पुस्तके गुरवे गणो इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।

कृत्वा नैमित्तिकीं सन्ध्यां विशेषेण च तर्प्पणं ॥ 18cd
परिगृहीते भूभागे पवित्रे सूर्य्यमर्च्चयेत्[1] । 19ab
आचम्य सकलीकृत्य प्रणवार्घ्यकरो गुरुः ॥ 19cd
द्वाराण्यस्त्रेण सम्प्रोक्ष्य पूर्वादिक्रमतो ऽर्च्चयेत् । 20ab
हां शान्तिकलाद्वाराय तथा विद्याकलात्मने ॥ 20cd
निवृत्तिकलाद्वाराय प्रतिष्ठाख्यकलात्मने । 21ab
तच्छाखयोः प्रतिद्वारं द्वौ द्वौ द्वाराधिपौ यजेत् ॥ 21cd
नन्दिने महाकालाय भृङ्गिणे ऽथ गणाय च । 22ab
वृषभाय च स्कन्दाय देव्यै चण्डाय च क्रमात् ॥ 22cd
नित्यं च द्वारपालादीन् प्रविश्य द्वारपश्चिमे । 23ab
इष्ट्वा वास्तुं भूतशुद्धिं विशेषार्घ्यकरः शिवः ॥ 23cd
प्रोक्षणाद्यं[2] विधायाथ यज्ञसम्भारकृन्नरः । 24ab
मन्त्रयेद्दर्भदूर्वाद्यैः पुष्पाद्यैश्च हृदादिभिः ॥ 24cd
शिवहस्तं विधायेत्थं[3] स्वशिरस्यधिरोपयेत् । 25ab
शिवो ऽहमादिः सर्वज्ञो मम यज्ञप्रधानता ॥ 25cd
अत्यर्थं भावयेद्देवं ज्ञानखड्गकरो गुरुः । 26ab
नैर्ऋतीं दिशमासाद्य प्रक्षिपेदुदगाननः ॥ 26cd
अर्घ्याम्बु पञ्चगव्यञ्च समस्तान् मखमण्डपे । 27ab
चतुष्पथान्तसंस्कारैर्वीक्षणाद्यैः[4] सुसंस्कृतैः ॥ 27cd
विक्षिप्य विकिरांस्तत्र कुशकूर्च्चोपसंहरेत्[5] । 28ab

1 सूत्रिते सूर्य्यमर्चयेदिति ख, ग, घ, ङ, चिह्नितपुस्तकचतुष्टयपाठः ।

2 प्रोक्षणञ्चेति ग, चिह्नितपुस्तकपाठः ।
3 विधायैकमिति ङ, चिह्नितपुस्तकपाठः ।
4 ब्राह्मणाद्यैरिति ग, चिह्नितपुस्तकपाठः ।
5 दशकूर्च्चोपसंहरेदिति ख, चिह्नितपुस्तकपाठः ।

तानीशदिशि[1] वर्द्धन्यामासनायोपकल्पयेत् ॥ 28cd
नैर्ऋते वास्तुगीर्वाणा द्वारे लक्ष्मीं प्रपूजयेत् । 29ab
पश्चिमाभिमुखं कुम्भं सर्वधान्योपरि स्थितं ॥ 29cd
प्रणवेन वृषारूढं सिंहस्थां वर्द्धनीन्ततः । 30ab
कुम्भे साङ्गं शिवन्देवं वर्द्धन्यामस्त्रमर्च्चयेत्[2] ॥ 30cd
दिक्षु शक्रादिदिक्पालान् विष्णुब्रह्मशिवादिकान्[3] । 31ab
वर्द्धनीं सम्यगादाय घटपृष्टानुगामिनीं ॥ 31cd
शिवाज्ञां श्रावयेन्मन्त्री पूर्वादीशानगोचरं । 32ab
अविच्छिन्नपयोधारां मूलमन्त्रमुदीरयेत् ॥ 32cd
समन्ताद् भ्रामयेदेनां रक्षार्थं शस्त्ररूपिणीं । 33ab
पूर्वं कलशमारोप्य शस्त्रार्थन्तस्य[4] वामतः ॥ 33cd
समग्रासनके कुम्भे यजेद्देवं स्थिरासने । 34ab
वर्द्धन्यां प्रणवस्थायामायुधन्तदनु द्वयोः ॥ 34cd
भगलिङ्गसमायोगं विदध्याल्लिङ्गमुद्रया । 35ab
कुम्भे निवेद्य बोधासिं मूलमन्त्रजपन्तथा ॥ 35cd
तद्दशांशेन वर्द्धन्यां रक्षां विज्ञापयेदपि[5] । 36ab
गणेशं वायवे ऽभ्यर्च्य हरं पञ्चामृतादिभिः ॥ 36cd
स्नापयेत् पूर्ववत् प्रार्च्य[6] कुण्डे च शिवपावकं[7] । 37ab

1 अनीशदिशि इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
2 वर्द्धन्यां शस्त्रमर्च्चयेदिति ग, चिह्नितपुस्तकपाठः ।
3 विष्णुब्रह्मावसानकानिति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
4 शस्त्रालम्भस्येति क, ग, चिह्नितपुस्तकद्वयपाठः ।
5 रक्षां च कारयेत् सदेति ग, चिह्नितपुस्तकपाठः ।
6 पूर्ववत् स्नापयेत् प्रार्च्चेदिति ग, चिह्नितपुस्तकपाठः । स्थापयेत् पूर्ववच्चाग्निमिति ङ, चिह्नितपुस्तकपाठः ।
7 कुम्भे वा शिवमर्च्चयेदिति ग, चिह्नितस्पुस्तकपाठः ।

विधिवच्च चरुं कृत्वा सम्पाताहुतिशोधितं ॥ 37cd
देवाग्न्यात्मविभेदेन दर्व्या तं विभजेत् त्रिधा । 38ab
दत्वा भागौ शिवाग्निभ्यां संरक्षेद्भागमात्मनि ॥ 38cd
शरेण वर्म्मणा देयं पूर्वतो दन्तधावनं । 39ab
तस्माद्घोरशिखाभ्यां वा दक्षिणे पश्चिमे मृदं ॥ 39cd
सद्योजातेन च हृदा चोत्तरे वामनीकृतं[1] । 40ab
जलं[2] वामेन शिरसा ईशे गन्धान्वितं जलं ॥ 40cd
पञ्चगव्यं पलाशादिपुटकं वै समन्ततः । 41ab
ऐशान्यां कुसुमं दद्यादाग्नेय्यां दिशि रोचनां ॥ 41cd
अगुरुं निर्ऋताशायां वायव्यां च चतुःसमं । 42ab
होमद्रव्याणि सर्वाणि सद्योजातैः कुशैः सह ॥ 42cd
दण्डाक्षसूत्रकौपीनभिक्षापात्राणि[3] रूपिणे । 43ab
कज्जलं कुङ्कुमन्तैलं शलाकां केशशोधनीं ॥ 43cd
ताम्बूलं दर्पणं दद्यादुत्तरे रोचनामपि । 44ab
आसनं पादुके पात्रं योगपट्टातपत्रकं ॥ 44cd
ऐशान्यामीशमन्त्रेण दद्यादीशानतुष्टये । 45ab
पूर्वस्याञ्चरुकं साज्यं दद्याद्गन्धादिकं नवे ॥ 45cd
पवित्राणि समादाय प्रोक्षितान्यर्घ्यवारिणा । 46ab
संहितामन्त्रपूतानि नीत्वा पावकसन्निधिं ॥ 46cd
कृष्णाजिनादिना ऽऽच्छाद्य स्मरन् संवत्सरात्मकं । 47ab
साक्षिणं सर्वकृत्यानां गोप्तारं शिवमव्ययं ॥ 47cd

1 सद्योजातेन च हृदा चोत्तरे वामनीयकमिति ख, चिह्नितपुस्तकपाठः । सद्योजातेन च हृदा चोत्तरे धाम निष्फलमिति ग, चिह्नितपुस्तकपाठः ।

2 फलमिति ख, चिह्नितपुस्तकपाठः ।

3 दण्डाक्षसूत्रकौपानतीर्थपात्राणि इति ङ, चिह्नितपुस्तकपाठः ।

स्वेति हेति प्रयोगेण मन्त्रसंहितया पुनः । 48ab
शोधयेच्च पवित्राणि वाराणामेकविंशतिं ॥ 48cd
गृहादि वेष्टयेत्सूत्रैर्गन्धाद्यं [1] रवये ददेत् । 49ab
पूजिताय समाचम्य[2] कृतन्यासः कृतार्घ्यकः ॥ 49cd
नन्द्यादिभ्यो ऽथ[3] गन्धाख्यं[4] वास्तोश्चाथ प्रविश्य च । 50ab
शस्त्रेभ्यो लोकपालेभ्यः स्वनाम्ना शिवकुम्भके ॥ 50cd
वर्द्धन्यै विघ्नराजाय गुरवे ह्यात्मने यजेत् । 51ab
अथ सर्वौषधीलिप्तं धूपितं पुष्पदूर्वया ॥ 51cd
आमन्त्र्य च पवित्रं[5] तत् विधायाञ्जलिमध्यगं । 52ab
ओं समस्तविधिच्छिद्रपूरणे च विधिं प्रति ॥ 52cd
प्रभवामन्त्रयामि त्वां त्वदिच्छावाप्तिकारिकां । 53ab
तत्सिद्धिमनुजानीहि यजतश्चिदचित्पते ॥ 53cd
सर्वथा सर्वदा शम्भो नमस्ते ऽस्तु प्रसीद मे । 54ab
आमन्त्रितो ऽसि देवेश सह देव्या गणेश्वरैः ॥ 54cd
मन्त्रेशैर्ल्लोकपालैश्च सहितः परिचारकैः[6] । 55ab
निमन्त्रयाम्यहन्तुभ्यं प्रभाते तु पवित्रकं ॥ 55cd
नियमञ्च करिष्यामि परमेश तवाज्ञया । 56ab
इत्येवन्देवमामन्त्र्य रेचकेनामृतीकृतं ॥ 56cd
शिवान्तं मूलमुच्चार्य्य तच्छिवाय निवेदयेत् । 57ab

1 गन्धाख्यमिति ख, ग, चिह्नितपुस्तकद्वयपाठः ।
2 पूजनार्थं समाचम्य इति ङ, चिह्नितपुस्तकपाठः ।
3 रव्यादिभ्यो ऽथेति ग, चिह्नितपुस्तकपाठः ।
4 गन्धाद्यमिति ङ, चिह्नितपुस्तकपाठः ।
5 आमन्त्रणपवित्रमिति ख, चिह्नितपुस्तकपाठः ।
6 परिवारकैरिति ग, ङ, चिह्नितपुस्तकपाठः ।

जपं स्तोत्रं प्रणामञ्च कृत्वा शम्भुं क्षमापयेत् ॥ 57cd
हुत्वा चरोस्तृतीयांशं तद्दद्दीत शिवाग्नये[1] । 58ab
दिग्वासिभ्यो दिगीशेभ्यो भूतमातृगणेभ्य उ[2] ॥ 58cd
रुद्रेभ्यो क्षेत्रपादिभ्यो[3] नमः स्वाहा बलिस्त्वयं । 59ab
दिङ्नागाद्यैश्च पूर्वादौ क्षेत्राय चाग्नये बलिः ॥ 59cd
समाचम्य विधिच्छिद्रपूरकं होममाचरेत् । 60ab
पूर्णां व्याहृतिहोमञ्च कृत्वा रुन्धीत पावकं ॥ 60cd
तत ओमग्नये स्वाहा स्वाहा सोमाय चैव हि । 61ab
ओमग्नीषोमाभ्यां स्वाहाग्नये स्विष्टकृते तथा ॥ 61cd
इत्याहुतिचतुष्कन्तु दत्वा कुर्य्यात्तु योजनां । 62ab
वह्निकुण्डार्च्चितं देवं मण्डलाभ्यर्च्चिते शिवे ॥ 62cd
नाडीसन्धानरूपेण विधिना योजयेत्ततः । 63ab
वंशादिपात्रे विन्यस्य अस्त्रञ्च हृदयन्ततः ॥ 63cd
अधिरोप्य पवित्राणि कलाभिर्वा ऽथ मन्त्रयेत् । 64ab
षडङ्गं ब्रह्ममूलैर्व्वा हृद्धर्म्मास्त्रञ्च योजयेत् ॥ 64cd
विधाय सूत्रैः संवेष्ट्य पूजयित्वा ऽङ्गसम्भवैः[4] । 65ab
रक्षार्थं जगदीशाय भक्तिनम्रः समर्पयेत् ॥ 65cd
पूजिते पुष्पधूपाद्यैर्द्दत्वा सिद्धान्तपुस्तके । 66ab
गुरोः पादान्तिकं गत्वा भक्त्या दद्यात् पवित्रकं ॥ 66cd
निर्गत्य वहिराचम्य गोमये मण्डलत्रये । 67ab

---

1 शिवाज्ञया इति ख, चिह्नितपुस्तकपाठः ।
2 भूतमातृगणेषु फडिति ङ, चिह्नितपुस्तकपाठः ।
3 रुद्रेभ्यः क्षेत्रपालेभ्य इति ख, चिह्नितपुस्तकपाठः ।
4 पूजयित्वा ततः शिवमिति ग, चिह्नितपुस्तकपाठः । पूजयित्वा ऽथ सञ्चरैरिति ङ, चिह्नितपुस्तकपाठः ।

पञ्चगव्यञ्चरुन्दन्तधावनञ्च क्रमाद् यजेत् ॥ 67cd
आचान्तो मन्त्रसम्बद्धः कृतसङ्गीतजागरः । 68ab
स्वपेदन्तः स्मरन्नीशं बुभुक्षुर्दर्भसंस्तरे ॥ 68cd
अनेनैव प्रकारेण मुमुक्षुरपि संविशेत् । 69ab
केवलम्भस्मशय्यायां सोपवासः समाहितः ॥ 69cd

इत्यादिमहापुराणे आग्नेये पवित्राधिवासनविधिर्नाम अष्टसप्ततितमो ऽध्यायः ॥

# 79

## अथैकोनाशीतितमो ऽध्यायः ।

पवित्रारोहणविधिः ।
ईश्वर उवाच ।
अथ प्रातः समुत्थाय कृतस्नानः समाहितः । 1ab
कृतसन्ध्यार्च्चनो मन्त्री प्रविश्य मखमण्डपं ॥ 1cd
समादाय पवित्राणि अविसर्जितदैवतः । 2ab
ऐशान्यां भाजने शुद्धे स्थापयेत् कृतमण्डले ॥ 2cd
ततो विसर्ज्य देवेशं निर्म्माल्यमपनीय च । 3ab
पूर्ववद् भूतले शुद्धे कृत्वाह्निकमथ द्वयं ॥ 3cd
आदित्यद्वारदिक्पालकुम्भेशानौ शिवे ऽनले[1] । 4ab
नैमित्तिकीं सविस्तारां कुर्य्यात् पूजां विशेषतः ॥ 4cd
मन्त्राणां तर्पणं प्रायश्चित्तहोमं शरात्मना[2] । 5ab
अष्टोत्तरशतं कृत्वा दद्यात् पूर्णाहुतिं शनैः ॥ 5cd

1 आदित्यद्वारदिक्पालान् स्कन्देशानौ शिवे ऽनले इति ङ, चिह्नितपुस्तकपाठः ।
2 शराणुनेति घ, ङ, चिह्नितपुस्तकद्वयपाठः ।

पवित्रं भानवे दत्वा समाचम्य ददीत च । 6ab
द्वारपालादिदिक्पालकुम्भवर्द्धनिकादिषु ॥ 6cd
सन्निधाने ततः शम्भोरुपविश्य निजासने । 7ab
पवित्रमात्मने दद्याद्गणाय गुरुवह्नये ॥ 7cd
ओं कालात्मना त्वया देव यद्दिष्टं मामके विधौ[1] । 8ab
कृतं क्लिष्टं समुत्सृष्टं कृतं गुप्तञ्च यत् कृतं ॥ 8cd
तदस्तु क्लिष्टमक्लिष्टं कृतं क्लिष्टमसंस्कृतं[2] । 9ab
सर्वात्मना ऽमुना शम्भो पवित्रेण त्वदिच्छया ॥ 9cd
ओं पूरयमखव्रतं नियमेश्वराय स्वाहा । 10ab
आत्मतत्त्वे प्रकृत्यन्ते पालिते पद्मयोनिना ॥ 10cd
मूलं लयान्तमुच्चार्य्य पवित्रेणार्च्चयेच्छिवं । 11ab
विद्यातत्त्वे च विद्यान्ते विष्णुकारणपालिते ॥ 11cd
ईश्वरान्तं समुच्चार्य्य पवित्रमधिरोपयेत् । 12ab
शिवान्ते शिवतत्त्वे च रुद्रकारणपालिते ॥ 12cd
शिवान्तं मन्त्रमुच्चार्य्य तस्मै देयं पवित्रकं । 13ab
सर्वकारणपालेषु शिवमुच्चार्य्य सुव्रतः[3] ॥ 13cd
मूलं लयान्तमुच्चार्य्य दद्याद्गङ्गावतारकं[4] । 14ab
आत्मविद्याशिवैः प्रोक्तं मुमुक्षूणां पवित्रकं ॥ 14cd
विनिर्द्दिष्टं बुभुक्षूणां शिवतत्त्वात्मभिः क्रमात् । 15ab
स्वाहान्तं वा नमो ऽन्तं वा मन्त्रमेषामुदीरयेत् ॥ 15cd
ओं हां आत्मतत्त्वाधिपतये शिवाय स्वाहा ।

1 प्रभुस्त्वं मामकेविधौ इति ङ, चिह्नितपुस्तकपाठः ।
2 हुतं यत्र वषट्कृतमिति ङ, चिह्नितपुस्तकपाठः ।
3 सर्वतत्त्वेषु सुव्रत इति ख, ग, ङ, चिह्नितपुस्तकत्रयपाठः ।
4 दद्यादङ्गावतारकमिति ख, चिह्नितपुस्तकपाठः ।

ओं ह्रां विद्यातत्त्वाधिपतये शिवाय स्वाहा ।
ओं ह्रौं शिवतत्त्वाधिपतये शिवाय स्वाहा ।
ओं ह्रौं सर्वतत्त्वाधिपतये शिवाय स्वाहा ।
नत्वा गङ्गावतारन्तु प्रार्थयेत्तं कृताञ्जलिः । 16ab
त्वङ्गतिः सर्व्वभूतानां संस्थितिस्त्वञ्चराचरे ॥ 16cd
अन्तश्चारेण भूतानां[1] द्रष्टा त्वं परमेश्वर । 17ab
कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्म्मम ॥ 17cd
मन्त्रहीनं क्रियाहीनं द्रव्यहीनञ्च यत् कृतं । 18ab
जपहोमार्च्चनैर्हीनं कृतं नित्यं मया तव ॥ 18cd
अकृतं वाक्यहीनं च तत् पूरय महेश्वर[2] । 19ab
सुपूतस्त्वं परेशान[3] पवित्रं पापनाशनं ॥ 19cd
त्वया पवित्रितं सर्वं जगत् स्थावरजङ्गमं । 20ab
खण्डितं यन्मया देव व्रतं वैकल्पयोगतः ॥ 20cd
एकीभवतु तत् सर्वं तवाज्ञासूत्रगुम्फितं । 21ab
जपं निवेद्य देवस्य भक्त्या स्तोत्रं विधाय च ॥ 21cd
नत्वा तु गुरुणादिष्टं गृह्णीयान्नियमन्नरः । 22ab
चतुर्म्मासं त्रिमासं वा त्र्यहमेकाहमेव च ॥ 22cd
प्रणम्य क्षमयित्वेशं गत्वा कुण्डान्तिकं व्रती । 23ab
पावकस्थे शिवे ऽप्येवं पवित्राणां चतुष्टयं ॥ 23cd
समारोप्य समभ्यर्च्च्य पुष्पधूपाक्षतादिभिः । 24ab
अन्तर्बलिं पवित्रञ्च रुद्रादिभ्यो निवेदयेत् ॥ 24cd
प्रविश्यान्तः शिवं स्तुत्वा सप्रणामं क्षमापयेत् । 25ab

1 अन्तश्चर त्वं भूतानामिति ग, चिह्नितपुस्तकपाठः ।
2 परिपूर्णं करो तु मे इति ग, चिह्नितपुस्तकपाठः ।
3 अमृतस्त्वं परेशान इति ग, चिह्नितपुस्तकपाठः ।

प्रायश्चित्तकृतं होमं कृत्वा हुत्वा च पायसं ॥ 25cd
शनैः पूर्णाहुतिं दत्वा वह्निस्थं विसृजेच्छिवं । 26ab
होमं व्याहृतिभिः कृत्वा रुन्ध्यान्निष्ठुरया ऽनलं ॥ 26cd
अग्न्यादिभ्यस्ततो दद्यादाहुतीनां चतुष्टयं । 27ab
दिक्पतिभ्यस्ततो दद्यात्[1] सपवित्रं वहिर्बलिं ॥ 27cd
सिद्धान्तपुस्तके दद्यात् सप्रमाणं पवित्रकं । 28ab

ओं हां भूः स्वाहा । ओं हां भुवः स्वाहा । ओं हां स्वः स्वाहा । ओं हां भूर्भुवः स्वः स्वाहा ।

होमं व्याहृतिभिः कृत्वा दत्वा ऽऽहुतिचतुष्टयं ॥ 28cd

ओं हां अग्नये स्वाहा । ओं हां सोमाय स्वाहा । ओं हां अग्नीषोमाभ्यां स्वाहा । ओं हां अग्नये स्विष्टकृते स्वाहा ।

गुरुं शिवमिवाभ्यर्च्य वस्त्रभूषादिविस्तरैः । 29ab
समग्रं सफलं तस्य क्रियाकाण्डादि वार्षिकं ॥ 29cd
यस्य तुष्टो गुरुः सम्यगित्याह परमेश्वरः । 30ab
इत्थं गुरोः समारोप्य हृदालम्बिपवित्रकं ॥ 30cd
द्विजातीन् भोजयित्वा तु भक्त्या वस्त्रादिकं ददेत् । 31ab
दानेनानेन देवेश प्रीयतां मे सदा शिवः ॥ 31cd
भक्त्या स्नानादिकं प्रातः कृत्वा शम्भोः समाहरेत् । 32ab
पवित्राण्यष्टपुष्पैस्तं पूजयित्वा विसर्ज्जयेत् ॥ 32cd
नित्यं नैमित्तिकं कृत्वा विस्तरेण यथा पुरा । 33ab
पवित्राणि समारोप्य प्रणम्याग्नौ शिवं यजेत् ॥ 33cd
प्रायश्चित्तं ततो ऽस्त्रेण हुत्वा[2] पूर्णाहुतिं यजेत् । 34ab

---

1 दिक्पालेभ्यस्ततो दत्वेति ख, चिह्नितपुस्तकपाठः ।
2 ततो ऽस्त्रेण कृत्वेति घ, चिह्नितपुस्तकपाठः ।

भुक्तिकामः शिवायाथ कुर्य्यात् कर्म्मसमर्पणं ॥ 34cd
त्वत्प्रसादेन कर्म्मेदं ममास्तु फलसाधकं । 35ab
मुक्तिकामस्तु कर्म्मेदं मा ऽस्तु मे नाथ बन्धकं ॥ 35cd
वह्निस्थं नाडीयोगेन शिवं संयोजयेच्छिवे । 36ab
हृदि न्यस्याग्निसङ्घातं पावकं च विसर्जयेत् ॥ 36cd
समाचम्य प्रविश्यान्तः कुम्भानुगतसंवरान् । 37ab
शिवे संयोज्य साक्षेपं क्षमस्वेति विसर्जयेत् ॥ 37cd
विसृज्य लोकपालादीनादायेशात् पवित्रकं । 38ab
सति चण्डेश्वरे पूजां कृत्वा दत्वा पवित्रकं ॥ 38cd
तन्निर्माल्यादिकं तस्मै सपवित्रं समर्पयेत् । 39ab
अथवा स्थण्डिले चण्डं विधिना पूर्ववद्यजेत् ॥ 39cd
यत् किञ्चिद्वार्षिकं कर्म्म कृतं न्यूनाधिकं मया । 40ab
तदस्तु परिपूर्णं मे चण्ड नाथ तवाज्ञया ॥ 40cd
इति विज्ञाप्य देवेशं नत्वा स्तुत्वा विसर्जयेत् । 41ab
त्यक्तनिर्म्माल्यकः शुद्धः स्नापयित्वा शिवं यजेत् । 41cd
पञ्चयोजनसंस्थो ऽपि पवित्रं गुरुसन्निधौ ॥ 41॥ 41ef

इत्यादिमहापुराणे आग्नेये पवित्रारोहणं नाम एकोनाशीतितमो ऽध्यायः ॥

## 80

### अथ अशीतितमो ऽध्यायः ।

दमनकारोहणविधिः ।
ईश्वर उवाच ।
वक्ष्ये दमनकारोहविधिं पूर्ववदाचरेत् । 1ab
हरकोपात् पुरा जातो भैरवो दमिताः सुराः ॥ 1cd

तेनाथ शप्तो विटपो भवेति त्रिपुरारिणा । 2ab
प्रसन्नेनेरितं चेदं पूजयिष्यन्ति ये नराः ॥ 2cd
परिपूर्णफलं तेषां नान्यथा ते भविष्यति । 3ab
सप्तम्यां वा त्रयोदश्यां दमनं संहितात्मभिः ॥ 3cd
सम्पूज्य बोधयेद्वृक्षं भववाक्येन मन्त्रवित् । 4ab
हरप्रसादसम्भूत त्वमत्र सन्निधीभव ॥ 4cd
शिवकार्य्यं समुद्दिश्य नेतव्यो ऽसि शिवाज्ञया । 5ab
गृहे ऽप्यामन्त्रणं कुर्य्यात् सायाह्ने चाधिवासनं ॥ 5cd
यथाविधि समभ्यर्च्य सूर्य्यशङ्करपावकान् । 6ab
देवस्य पश्चिमे मूलं दद्यात्तस्य मृदा युतं ॥ 6cd
वामेन शिरसा वा ऽथ नालं धात्रीं तथोत्तरे । 7ab
दक्षिणे भग्नपत्रञ्च प्राच्यां पुष्पञ्च धारणं ॥ 7cd
पुटिकास्थं फलं मूलमथैशान्यां यजेच्छिवं । 8ab
पञ्चाङ्गमञ्जलौ कृत्वा आमन्त्र्य शिरसि न्यसेत् ॥ 8cd
आमन्त्रितो ऽसि देवेश प्रातःकाले[1] मया प्रभो । 9ab
कर्त्तव्यस्तपसो लाभः पूर्णं सर्वं तवाज्ञया ॥ 9cd
मूलेन शेषं पात्रस्थं पिधायाथ पवित्रकं । 10ab
प्रातः स्नात्वा जगन्नाथं गन्धपुष्पादिभिर्यजेत्[2] ॥ 10cd
नित्यं नैमित्तिकं कृत्वा दमनैः पूजयेत्ततः । 11ab
शेषमञ्जलिमादाय आत्मविद्याशिवात्मभिः ॥ 11cd
मूलाद्यैरीश्वरान्तैश्च चतुर्थाञ्जलिना ततः । 12ab
ओं हौं मखेश्वराय मखं पूरय शूलपाणये नमः ॥ 12cd

1 देवेश पूजाकाले इति ग, चिह्नितपुस्तकपाठः ।
2 गन्धपुष्पादिनार्च्चयेदिति ख, चिह्नितपुस्तकपाठः ।

शिवं वह्निं च सम्पूज्य गुरुं प्राच्यर्थ बोधयेत् ॥ 12॥ 12ef
भगवन्नतिरिक्तं वा हीनं वा यन्मया कृतं । 13ab
सर्वं तदस्तु सम्पूर्णं यच्च दामनकं मम । 13cd
सकलं चैत्रमासोत्थं फलं प्राप्य दिवं व्रजेत् ॥ 13॥ 13ef

इत्यादिमहापुराणे आग्नेये दमनकारोहणविधिर्नाम अशीतितमो ऽध्यायः ॥

# 81

## अथैकाशीतितमो ऽध्यायः ।

समयदीक्षाविधानं ।
ईश्वर उवाच ।
वाक्ष्यामि भोगमोक्षार्थं दीक्षां पापक्षयङ्करीं । 1ab
मलमायादिपाशानां विश्लेषः क्रियते यया ॥ 1cd
ज्ञानञ्च जन्यते शिष्ये सा दीक्षा भुक्तिमुक्तिदा । 2ab
विज्ञातकलनामैको द्वितीयः प्रलयाकलः[1] ॥ 2cd
तृतीयः सकलः शास्त्रे ऽनुग्राह्यस्त्रिविधो मतः । 3ab
तत्राद्यो मलमात्रेण मुक्तो ऽन्यो मलकर्मभिः ॥ 3cd
कलादिभूमिपर्य्यन्तं स्तवैस्तु सकलो यतः । 4ab
निराधारा ऽथ साधारा दीक्षा ऽपि द्विविधा मता ॥ 4cd
निराधारा द्वयोस्तेषां साधारा सकलस्य तु । 5ab
आधारनिरपेक्षेण क्रियते शम्भुचर्य्यया ॥ 5cd
तीव्रशक्तिनिपातेन निराधारेति सा स्मृता । 6ab
आचार्य्यमूर्त्तिमास्थाय मायातीव्रादिभेदया ॥ 6cd
शक्त्या यां कुरुते शम्भुः सा साधिकरणोच्यते । 7ab

1 प्रलयानल इति ख, चिह्नितपुस्तकपाठः । प्रलयात्मक इति ङ, चिह्नितपुस्तकपाठः ।

इयं चतुर्विधा प्रोक्ता सवीजा वीजवर्जिता ॥ 7cd
साधिकारानधिकारा यथा तदभिधीयते । 8ab
समयाचारसंयुक्ता सवीजा जायते नृणां ॥ 8cd
निर्वीजा त्वसमर्थानां समयाचारवर्ज्जिता । 9ab
नित्ये नैमित्तिके काम्ये यतः स्यादधिकारिता ॥ 9cd
साधिकारा भवेद्दीक्षा साधकाचार्य्ययोरतः । 10ab
निर्वीजा दीक्षितानान्तु यदास मम पुत्रयोः ॥ 10cd
नित्यमात्राधिकारत्वद्दीक्षा निरधिकारिका । 11ab
द्विविधेयं द्विरूपा हि प्रत्येकमुपजायते ॥ 11cd
एका क्रियावती तत्र कुण्डमण्डलपूर्विका । 12ab
मनोव्यापारमात्रेण या सा ज्ञानवती मता ॥ 12cd
इत्थं लब्धाधिकारेण दीक्षा ऽऽचार्य्येण साध्यते । 13ab
स्कन्ददीक्षां गुरुः कुर्य्यात् कृत्वा नित्यक्रियां ततः[1] ॥ 13cd
प्रणवार्घ्यकराम्भोजकृतद्वाराधिपार्च्चणः । 14ab
विघ्नानुत्सार्य्य देहल्यां न्यस्यास्त्रं स्वासने स्थितः ॥ 14cd
कुर्वीत भूतसंशुद्धिं मन्त्रयोगं यथोदितं । 15ab
तिलतण्डुलसिद्धार्थकुशदूर्वाक्षतोदकं ॥ 15cd
सयवक्षीरनीरञ्च विशेषार्घ्यमिदन्ततः । 16ab
तदम्बुना द्रव्यशुद्धिं तिलकं स्वासनात्मनोः ॥ 16cd
पूजनं मन्त्रशुद्धिञ्च पञ्चगव्यञ्च पूर्ववत् । 17ab
लाजचन्दनसिद्धार्थभस्मदूर्वाक्षतं[2] कुशान् ॥ 17cd
विकिरान् शुद्धलाजांस्तान् सधूपानस्त्रमन्त्रितान् । 18ab

1 कृतनित्यक्रियाद्वय इति ख, चिह्नितपुस्तकपाठः ।
2 भस्मदूर्वाक्षतानिति ङ, चिह्नितपुस्तकपाठः ।

शस्त्राम्बु[1]प्रोक्षितानेतान् कवचेनावगुण्ठितान् ॥ 18cd
नानाप्रहरणाकारान् विघ्नौघविनिवारकान् । 19ab
दर्भाणान्तालमानेन कृत्वा षट्त्रिंशता दलैः ॥ 19cd
सप्तजप्तं शिवास्त्रेण वेर्णीं बोधासिमुत्तमं । 20ab
शिवमात्मनि विन्यस्य सृष्ट्याधारमभीप्सितं ॥ 20cd
निष्कलं च शिवं न्यस्य शिवो ऽहमिति भावयेत् । 21ab
उष्णीषं शिरसि न्यस्य अलं कुर्य्यात्स्वदेहकं ॥ 21cd
गन्धमण्डनकं स्वीये विदध्याद्दक्षिणे करे । 22ab
विधिना ऽत्रार्च्चयेदीशमित्थं स्याच्छिवमस्तकं ॥ 22cd
विन्यस्य शिवमन्त्रेण भास्वरं निजमस्तके । 23ab
शिवादभिन्नमात्मानं कर्त्तारं भावयेद्यथा ॥ 23cd
मण्डले कर्म्मणां साक्षी कलशे यज्ञरक्षकः । 24ab
होमाधिकरणं वह्नौ शिष्ये पाशविमोचकः[2] ॥ 24cd
स्वात्मन्यनुगृहीतेति षडाधारो य ईश्वरः । 25ab
सो ऽहमेवेति कुर्वीत भावं स्थिरतरं पुनः ॥ 25cd
ज्ञानखड्गकरः स्थित्वा नैर्ऋत्याभिमुखो नरः । 26ab
सार्घ्याम्बुपञ्चगव्याभ्यां प्रोक्षयेद्यागमण्डपं ॥ 26cd
चतुष्पथान्तसंस्कारैः संस्कुर्य्यादीक्षणादिभिः । 27ab
विक्षिप्य विकिरांस्तत्र कुशकूर्च्चोपसंहरेत् ॥ 27cd
तानीशदिशि वर्द्धन्यामासनायोपकल्पयेत् । 28ab
नैर्ऋते वास्तुगीर्वाणान् द्वारे लक्ष्मीं प्रपूजयेत् ॥ 28cd
आप्ये रत्नैः पूरयन्तीं हृदा मण्डपरूपिणीं । 29ab

---

1 अस्त्राम्बु इति ङ, चिह्नितपुस्तकपाठः ।
2 शिष्ये पापविमोचक इति ङ, चिह्नितपुस्तकपाठः ।

साम्बुवस्त्रे सरत्ने च धान्यस्थे पश्चिमानने ॥ 29cd
ऐशे कुम्भे यजेच्छम्भुं शक्तिं कुम्भस्य दक्षिणे । 30ab
पश्चिमस्यान्तु सिंहस्थां वर्द्धनीं खड्गरूपिणीं ॥ 30cd
दिक्षु शक्रादिदिक्पालान्विष्ण्वन्तान् प्रणवासनान् । 31ab
वाहनायुधसंयुक्तान् हृदा ऽभ्यर्च्य स्वनामभिः ॥ 31cd
प्रथमन्तां समादाय कुम्भस्याग्राभिगामिनीं । 32ab
अविच्छिन्नपयोधरां भ्रामयित्वा प्रदक्षिणं ॥ 32cd
शिवाज्ञां लोकपालानां श्रावयेन्मूलमुच्चरन् । 33ab
संरक्षत यथायोगं कुम्भं धृत्वा ऽथ तां धारेत् ॥ 33cd
ततः स्थिरासने कुम्भे साङ्गं सम्पूज्य शङ्करं । 34ab
विन्यस्य शोध्यमध्वानं वर्द्धन्यामस्त्रमर्च्चयेत् ॥ 34cd

ओं हः अस्त्रासनाय हूं फट् । ओं ओं अस्त्रमूर्त्तये नमः । ओं हूं फट् पाशुपतास्त्राय नमः । ओं ओं हृदयाय हूं फट् नमः । ओं श्रीं शिरसे हूं फट् नमः । ओं यं शिखायै हूं फट् नमः । ओं गूं कवचाय हूं फट् नमः । ओं फट् अस्त्राय हूं फट् नमः (1) ।

चतुर्वक्त्रं सदंष्ट्रञ्च स्मरेदस्त्रं सशक्तिकं । 35ab
समुद्गरत्रिशूलासिं सूर्य्यकोटिसमप्रभं ॥ 35cd
भगलिङ्गसमायोगं विदध्याल्लिङ्गमुद्रया । 36ab

---

1 ओं अं हः अस्त्रासनाय ह्रं फट् । ओं अं अस्त्रमूर्त्तये नमः । ओं पशूं हुं फट् पाशुपतास्त्राय नमः । ओं हृदयाय ह्रं फट् नमः । ओं श्रीं शिरसे ह्रूं फट् नमः । ओं मं शिखायै फट् नमः । ओं अस्त्राय फट् हूं फट् नमः । इति ग, चिह्न्कितपुस्तकपाठः । ओं हः अस्त्रासनाय क्रूं फट् । ओं ओं अस्त्रमूर्त्तये नमः । ओं स्वां स्वं क्रूं फट् पाशुपतास्त्राय स्वाहा । ओं ओं हृदयाय क्रूं फट् नमः । ओं पं शिखायै क्रूं फट् नमः । ओं खं कवचाय क्रूं फट् नमः । ओं हं फट् अस्त्राय फट् नमः । इति ङ, चिह्नितपुस्तकपाठः ।

अङ्गुष्ठेन स्पृशेत् कुम्भं हृदा मुष्ट्यास्त्रवर्द्धनीं ॥ 36cd
भुक्तये मुक्तये त्वादौ मुष्टिना वर्द्धनीं स्पृशेत् । 37ab
कुम्भस्य मुखरक्षार्थं ज्ञानखड्गं समर्पयेत् ॥ 37cd
शस्त्रञ्च मूलमन्त्रस्य शतं कुम्भे निवेशयेत् । 38ab
तद्दशांशेन वर्द्धन्यां रक्षां विज्ञापयेत्ततः ॥ 38cd
यथेदं कृतयत्नेन भगवन्मखमन्दिरं । 39ab
रक्षणीयं जगन्नाथ सर्वाध्वरधर त्वया ॥ 39cd
प्रणवस्थं चतुर्बाहुं वायव्ये गणमर्च्चयेत्[1] । 40ab
स्थण्डिले शिवमभ्यर्च्य सार्घ्यकुण्डं व्रजेन्नरः ॥ 40cd
निविष्टो मन्त्रतृप्त्यर्थमर्घ्यगन्धघृतादिकं । 41ab
वामे ऽसव्ये तु विन्यस्य समिद्दर्भतिलादिकं ॥ 41cd
कुण्डवह्निस्रुगाज्यादि प्राग्वत् संस्कृत्य भावयेत् । 42ab
मुख्यतामूर्द्धवक्त्रस्य हृदि वह्नौ शिवं यजेत् ॥ 42cd
स्वमूर्त्तौ शिवकुम्भे च स्थण्डिले त्वग्निशिष्ययोः । 43ab
सृष्टिन्यासेन विन्यस्य शोध्याध्वानं यथाविधि ॥ 43cd
कुण्डमानं मुखं ध्यात्वा हृदाहुतिभिरीप्सितं । 44ab
वीजानि सप्तजिह्वानामग्नेर्होमाय भण्यते ॥ 44cd
विरेफावन्तिमौवर्णौ रेफषष्ठस्वरान्वितौ । 45ab
इन्दुविन्दुशिखायुक्तौ जिह्वावीजानुपक्रमात् ॥ 45cd
हिरण्या वनका रक्ता कृष्णा तदनु सुप्रभा । 46ab
अतिरिक्ता बहुरूपा रुद्रेन्द्राग्न्याप्यदिङ्मुखा ॥ 46cd
क्षीरादिमधुरैर्होमं कुर्य्याच्छान्तिकपौष्टिके । 47ab
अभिचारे तु पिण्याकसक्तुकञ्चुककाञ्चिकैः ॥ 47cd
लवणैराजिकातक्रकटुतैलैश्च कण्टकैः । 48ab

1 वायव्ये कालमर्च्चयेदिति ग, चिह्नितपुस्तकपाठः ।

समिद्भिरपि वक्राभिः क्रुद्धो भाष्याणुना यजेत् ॥ 48cd
कदम्बकलिकाहोमाद्यक्षिणी सिद्ध्यति ध्रुवं । 49ab
बन्धूककिंशुकादीनि वश्याकर्षाय होमयेत् ॥ 49cd
विल्वं राज्याय लक्ष्म्यर्थं पाटलांश्चम्पकानपि । 50ab
पद्मानि चक्रवर्त्तित्वे भक्ष्यभोज्यानि सम्पदे ॥ 50cd
दूर्वा व्याधिविनाशाय सर्वसत्त्ववशीकृते । 51ab
प्रियङ्गुपाटलीपुष्पं चूतपत्रं ज्वरान्तकं ॥ 51cd
मृत्युञ्जयो मृत्युजित् स्याद् वृद्धिः स्यात्तिलहोमतः । 52ab
रुद्रशान्तिः सर्व्वशान्त्यै अथ प्रस्तुतमुच्यते ॥ 52cd
आहुत्यष्टशतैर्मूलमङ्गानि तु दशांशतः । 53ab
सन्तर्पयेत मूलेन दद्यात् पूर्णां यथा पुरा ॥ 53cd
तथा शिष्यप्रवेशाय प्रतिशिष्यं शतं जपेत् । 54ab
दुर्न्निमित्तापसाराय सुनिमित्तकृते तथा ॥ 54cd
शतद्वयञ्च होतव्यं मूलमन्त्रेण पूर्ववत् । 55ab
मूलाद्यष्टास्त्रमन्त्राणां स्वाहान्तैस्तर्पणं सकृत् ॥ 55cd
शिखासम्पुटितैर्वीजैर्ह्रूं फडन्तैश्च[1] दीपनं । 56ab
ओं हौं शिवाय स्वाहेत्यादिमन्त्रैश्च तर्पणं ॥ 56cd
ओं ह्रूं ह्रौं ह्रीं शिवाय ह्रूं[2] फडित्यादिदीपनं । 57ab
ततः शिवाम्भसा स्थालीं क्षालितां वर्म्मगुण्ठितां[3] ॥ 57cd
चन्दनादिसमालब्धां बध्नीयात् कटकं गले । 58ab
वर्म्मास्त्रजप्तसद्दर्भपत्राभ्यां चरुसिद्धये ॥ 58cd

1 हुं फडन्तैश्च ख, चिह्नितपुस्तकपाठः ।
2 ओं हूं हौं हूं शिवाय हूमिति ख, चिह्नितपुस्तकपाठः । ओं क्रं हौं क्रं शिवाय क्रूं इति ङ, चिह्नितपुस्तकपाठः ।
3 धर्मगुण्ठितामिति ख, चिह्नितपुस्तकपाठः ।

वर्म्माद्यैरासने[1] दत्ते सार्द्धेन्दुकृतमण्डले[2] । 59ab
न्यस्तायां मूर्त्तिभूतायां भावपुष्पैः शिवं यजेत् ॥ 59cd
वस्त्रबद्धमुखायां वा स्थाल्यां पुष्पैर्बहिर्भवैः । 60ab
चुल्ल्यां पश्चिमवक्त्रायां शुद्धायां वीक्षणादिभिः ॥ 60cd
न्यस्ताहङ्कारवीजायां न्यस्तायां कुण्डदक्षिणे । 61ab
धर्म्माधर्म्मशरीरायां जप्तायां मानुषात्मना ॥ 61cd
स्थालीमारोपयेदस्त्रजप्तां गव्याम्बुमार्जितां । 62ab
गव्यं पयो ऽस्त्रसंशुद्धं प्रासादशतमन्त्रितं ॥ 62cd
तण्डुलान् श्यामकादीनां निक्षिपेत्तत्र तद्यथा । 63ab
एकशिष्यविधानाय तेषां प्रसृतिपञ्चकं ॥ 63cd
प्रसृतिं प्रसृतिं पश्चाद्वर्धयेद् द्व्यादिषु क्रमात् । 64ab
कुर्य्याच्चानलमन्त्रेण पिधानं कवचाणुना ॥ 64cd
शिवाग्नौ मूलमन्त्रेण पूर्वास्यश्चरुकं पचेत् । 65ab
सुखिन्ने तत्र तच्चुल्ल्यां स्रुवमापूर्य्य सर्पिषा ॥ 65cd
स्वाहान्तैः संहितामन्त्रैर्द्दत्वा तप्ताभिधारणं । 66ab
संस्थाप्य मण्डले स्थालीं सद्दर्भे ऽस्त्राणुना कृते ॥ 66cd
प्रणवेन पिधायास्यां तद्देहलेपनं हृदा । 67ab
सुशीतलो भवत्येवं प्राप्य शीताभिधारणं ॥ 67cd
विदध्यात्संहितामन्त्रैः शिष्यं प्रति सकृत् सकृत् । 68ab
धर्म्माद्यासनके हुत्वा[3] कुण्डमण्डलपश्चिमे ॥ 68cd
सम्पातञ्च स्रुचा हुत्वा शुद्धिं संहितया चरेत् । 69ab
चरुकं सकृदालभ्य तयैव वषडन्तया ॥ 69cd

1 धर्म्माद्यैरासने इति क, चिह्नितपुस्तकपाठः ।
2 सार्द्राम्बुकृतमण्डले इति ख, चिह्नितपुस्तकपाठः ।
3 धर्म्माद्यासनके धृत्वेति ख, ग, चिह्नितपुस्तकपाठः ।

धेनुमुद्रामृतीभूतं स्थण्डिलेशान्तिकं नयेत्[1] । 70ab
साज्यभागं स्वशिष्याणां भागो देवाय वह्नये ॥ 70cd
कुर्य्यात्तु स्तोकपालादेः समध्वाज्यमितिदं त्रयं । 71ab
नमो ऽन्तेन हृदा दद्यात्तेनैवाचमनीयकं[2] ॥ 71cd
साज्यं मन्त्रशतं हुत्वा दद्यात् पूर्णां यथाविधि । 72ab
मण्डलं कुण्डतः पूर्वे मध्ये वा शम्भुकुम्भयोः ॥ 72cd
रुद्रमातृगणादीनां निर्वर्त्यान्तर्बलिं हृदा । 73ab
शिवमध्ये ऽप्यलब्धाज्ञो विधायैकत्वभावनं ॥ 73cd
सर्वज्ञतादियुक्तो ऽहं समन्ताच्चोपरि स्थितः । 74ab
ममांशो योजनास्थानमधिष्ठा ऽहमध्वरे ॥ 74cd
शिवो ऽहमित्यहङ्कारी निष्क्रमेद् यागमण्डपात् । 75ab
न्यस्तपूर्वाग्रसन्धर्भे शस्त्राणुकृतमण्डले ॥ 75cd
प्रणवासनके शिष्यं शुक्लवस्त्रोत्तरीयकं । 76ab
स्नातञ्चोदङ्मुखं मुक्त्यै पूर्ववक्त्रन्तु भुक्तये ॥ 76cd
ऊर्द्धं कायं समारोप्य पूर्वास्यं प्रविलोकयेत् । 77ab
चरणादिशिखां यावन्मुक्तौ भुक्तौ विलोमतः ॥ 77cd
चक्षुषा सप्रसादेन शैवं धाम विवृण्वता । 78ab
अस्त्रोदकेन सम्मोक्ष्य मन्त्राम्बुस्नानसिद्धये ॥ 78cd
भस्मस्नानाय विघ्नानां शान्तये पापभित्तये[3] । 79ab
सृष्टिसंहारयोगेन ताडयेदस्त्रभस्मना ॥ 79cd
पुनरस्त्राम्बुना प्रोक्ष्य सकलीकरणाय तं । 80ab

1 स्थण्डिलोपान्तिकं नयेदिति ङ, चिह्नितपुस्तकपाठः ।
2 तेनैवाचमनीचयमिति क, ख, ग, चिह्नितपुस्तकत्रयपाठः ।
3 पाशभित्तये इति ग, चिह्नितपुस्तकपाठः ।

नाभेरूर्द्धं कुशाग्रेण मार्जनीयास्त्रमुच्चरन् ॥ 80cd
त्रिधा ऽऽलभेत तन्मूलैरघमर्षाय नाभ्यधः । 81ab
द्वैविध्याय च पाशानां आलभेत शराणुना ॥ 81cd
तच्छरीरे शिवं साङ्गं सासनं विन्यसेत्ततः । 82ab
पुष्पादिपूजितस्यास्य नेत्रे नेत्रेण वा हृदा ॥ 82cd
बध्वामन्त्रितवस्त्रेण सितेन सदशेन च ।. 83ab
प्रदक्षिणक्रमादेनं प्रवेश्य शिवदक्षिणं ॥ 83cd
सवस्त्रमासनं दद्यात् यथावर्णं[1] निवेदयेत् । 84ab
संहारमुद्रयात्मानं मूर्त्या तस्य हृदम्बुजे ॥ 84cd
निरुध्य शोधिते काये न्यासं कृत्वा तमर्चयेत् । 85ab
पूर्व्वाननस्य शिष्यस्य मूलमन्त्रेण मस्तके ॥ 85cd
शिवहस्तं प्रदातव्यं रुद्रेशपददायकं । 86ab
शिवसेवाग्रहोपायं दत्तहस्तं शिवाणुना[2] ॥ 86cd
शिवे प्रक्षेपयेत् पुष्पमपनीयार्च्चकन्तारं[3] । 87ab
तत्पात्रस्थानमन्त्राढ्यं शिवदेवगणानुगं ॥ 87cd
विप्रादीनां क्रमान्नाम कुर्य्याद्वा स्वेच्छया गुरुः । 88ab
प्रणतिं कुम्भवर्द्धन्योः कारयित्वा ऽनलान्तिकं ॥ 88cd
सदक्षिणासने तद्वत्[4] सौम्यास्यमुपवेशयेत् । 89ab
शिष्यदेहविनिष्क्रान्तां सुषुम्णामिव चिन्तयेत् ॥ 89cd
निजविग्रहलीनाञ्च दर्भमूलेन मन्त्रितं । 90ab

---

1 सुवर्णञ्चेति ग, चिह्नितपुस्तकपाठः ।
2 शिवात्मनेति ख, ग, चिह्नितपुस्तकद्वयपाठः ।
3 अपनीयाधिकाम्बरं इति घ, चिह्नितपुस्तकपाठः ।
4 सदक्षिणासन तत्रेति ङ, चिह्नितपुस्तकपाठः ।

दर्भाग्रं दक्षिणे तस्य विधाय करपल्लवे ॥ 90cd
तम्मूलमात्मजङ्घायामग्रञ्चेति शिखिध्वजे । 91ab
शिष्यस्य हृदयं गत्वा रेचकेन शिवाणुना[1] ॥ 91cd
पुरकेण समागत्य स्वकीयं हृद्यान्तरं । 92ab
शिवाग्निना पुनः कृत्वा नाडीसन्धानमीदृशं ॥ 92cd
हृदा तत्सन्निधानार्थञ्जुहुयादाहुतित्रयं । 93ab
शिवहस्तस्थिरत्वार्थं[2] शतं मूलेन होमयेत् । 93cd
इत्थं समयदीक्षायां भवेद्योग्यो भवार्च्चने ॥ 93॥ 93ef

इत्यादिमहापुराणे आग्नेये समयदीक्षाकथनं नाम एकाशीतितमो ऽध्यायः ॥

# 82

## अथ द्व्यशीतितमो ऽध्यायः ।

संस्कारदीक्षाकथनं ।
ईश्वर उवाच ।
वक्ष्ये संस्कारदीक्षाया विधानं शृणु षण्मुख । 1ab
आवाहयेन्महेशस्य वह्निस्थस्य शिरो हृदि ॥ 1cd
संश्लिष्टौ तौ समभ्यर्च्य सन्तर्प्य हृदयात्मना । 2ab
तयोः सन्निधये दद्यात्तेनैवाहुतिपञ्चकं ॥ 2cd
कुसुमेनास्त्रलिप्तेन[3] ताडयेत्त हृदा शिशुं । 3ab
प्रस्फुरत्तारकाकारं चैतन्यं तत्र भावयेत् ॥ 3cd

---

1 शिवात्मनेति ख, ग, चिह्नितपुस्तकद्वयपाठः ।
2 शिवहस्ते च स्थित्यर्थमिति ग, चिह्नितपुस्तकपाठः ।
3 कुसुमेनाष्टजप्तेनेति ङ, चिह्नितपुस्तकपाठः ।

प्रविश्य तत्र हुङ्कारमुक्तं रेचकयोगतः । 4ab
संहारिण्या तदाकृष्य पूरकेण हृदि न्यसेत् ॥ 4cd
ततो वागीश्वरीयौनौ मुद्रयोद्भवसञ्ज्ञया । 5ab
हृत्सम्पुटितमन्त्रेण[1] रेचकेन विनिक्षिपेत् ॥ 5cd
ओं हां हां हां आत्मने नमः(2) ।
जाज्वल्यमाने निर्द्धूमे जुहुयादिष्टसिद्धये । 6ab
अप्रवृद्धे सधूमे तु होमो वह्नौ न सिध्यति ॥ 6cd
स्निग्धः प्रदक्षिणावर्त्तः सुगन्धिः शस्यते ऽनलः । 7ab
विपरीतस्फुलिङ्गी च भूमिस्पर्शः प्रशस्यते ॥ 7cd
इत्येवमादिभिश्चिह्नैर्हुत्वा शिष्यस्य कल्मषं । 8ab
पापभक्षणहोमेन[3] दहेद्वा तं भवात्मना ॥ 8cd
द्विजत्वापादनार्थाय तथा रुद्रांशभावने । 9ab
आहारवीजसंशुद्धौ[4] गर्भाधानाय संस्थितौ ॥ 9cd
सीमन्ते जन्मतो नामकरणाय च होमयेत् । 10ab
शतानि पञ्च मूलेन वौषडादिदशांशतः ॥ 10cd
शिथिलीभूतबन्धस्य शक्तावुत्कर्षणं च यत् । 11ab
आत्मनो रुद्रपुत्त्रत्वे गर्भाधानं तदुच्यते ॥ 11cd
स्वान्तत्र्यात्मगुणव्यक्तिरिह पुंसवनं मतं । 12ab
मायात्मनोर्विवेकेन ज्ञानं सीमन्तवर्द्धनं ॥ 12cd
शिवादितत्त्वशुद्धेस्तु स्वीकारो जननं मतं । 13ab

---

1 हृत्सम्पुटात्ममन्त्रेणेति ङ, चिह्नितपुस्तकपाठः ।

2 ओं हां हां आत्मने नम इति ग, घ, चिह्नितपुस्तकपाठः । ओं हां आत्मने नम इति ङ, चिह्नितपुस्तकपाठः ।

3 पापक्षयेण होमेनेति ङ, चिह्नितपुस्तकपाठः ।

4 वीजसंसिद्धौ इति ङ, चिह्नितपुस्तकपाठः ।

बोधनं यच्छिवत्वेन शिवत्वार्हस्य नो मतं[1] ॥ 13cd
संहारमुद्रयात्मानं स्फुरद्वह्निकणोपमं । 14ab
विदधीत समादाय निजे हृदयपङ्कजे ॥ 14cd
ततः कुम्भयोगेन मूलमन्त्रमुदीरयेत् । 15ab
कुर्य्यात् समवशीभावं तदा च शिवयोर्हृदि ॥ 15cd
ब्रह्मादिकारणात्यागक्रमाद्रेचकयोगतः । 16ab
नीत्वा शिवान्तमात्मानमादायोद्भवमुद्रया ॥ 16cd
हृत्सम्पुटितमन्त्रेण रेचकेन विधानवित् । 17ab
शिष्यस्य हृदयाम्भोजकर्णिकायां विनिक्षिपेत् ॥ 17cd
पूजां शिवस्य वह्नेश्च गुरुः कुर्य्यात्तदोचितां । 18ab
प्रणतिश्चात्मने शिष्यं समयान् श्रावयेत्तथा ॥ 18cd
देवं न निन्देच्छास्त्राणि निर्म्माल्यादि न लङ्घयेत् । 19ab
शिवाग्निगुरुपूजा च कर्त्तव्या जीवितावधि ॥ 19cd
बालबालिशवृद्धस्त्रीभोगभुग्व्याधितात्मनां । 20ab
यथाशक्ति ददीतार्थं[2] समर्थस्य समग्रकान् ॥ 20cd
भूताङ्गानि जटाभस्मदण्डकौपीनसंयमान् । 21ab
ईशानाद्यैर्हृदाद्यैर्वा परिजप्य यथाक्रमात् ॥ 21cd
स्वाहान्तसंहितमन्त्रैः पात्रेष्वारोप्य पूर्ववत् । 22ab
सम्पादितद्रुतं हुत्वा स्थण्डिलेशाय दर्शयेत् ॥ 22cd
रक्षणाय घटाधस्तादारोप्य क्षणमात्रकं । 23ab
शिवादाज्ञां समादाय ददीत व्रतिने गुरुः ॥ 23cd
एवं समयदीक्षायां विशिष्टायां विशेषतः । 24ab

1 वर्द्धनमिति घ, चिह्नितपुस्तकपाठः ।
2 ददीतान्नमिति घ, चिह्नितपुस्तकपाठः ।

वह्निहोमागमज्ञानयोग्यः सञ्जायते शिशुः ॥ 24cd

इत्यादिमहापुराणे आग्नेये समयदीक्षाकथनं नाम द्व्यशीतितमो ऽध्यायः ॥

# 83

## अथ त्र्यशीतितमो ऽध्यायः ।

निर्वाणदीक्षाकथनं ।
ईश्वर उवाच ।
अथ निर्वाणदीक्षायां कुर्य्यान्मूलादिदीपनं । 1ab
पाशबन्धनशक्त्यर्थं ताडनादिकृतेन वा ॥ 1cd
एकैकया तदाहुत्या प्रत्येकं तत्त्रयेण वा । 2ab
वीजगर्भशिखार्द्धन्तु हूं फडन्तधृवादिना ॥ 2cd
ओं ह्रूं ह्रौं हौं ह्रूं फडिति[2] मूलमन्त्रस्य दीपनं । 3ab
ओं ह्रूं हौं हौं ह्रूं फडिति[3] हृदय एवं शिरोमुखे ॥ 3cd
प्रत्येकं दीपनं कुर्य्यात् सर्व्वस्मिन् क्रूरकर्म्मणि । 4ab
शान्तिके पौष्टिके चास्य वषडन्तादिनाणुना[4] ॥ 4cd
वषड्वौषट्समोपेतैः सर्वकाम्योपरि स्थितैः । 5ab
हवनं संवरैः कुर्य्यात् सर्वत्राप्यायनादिषु ॥ 5cd
ततः स्वसव्यभागस्थं मण्डले शुद्धविग्रहं । 6ab

---

1 ह्रीं फडन्तधृवादिना इति ख, चिह्नितपुस्तकपाठः ।
2 ओं हूं हौं हौं हूं फडिति ख, चिह्नितपुस्तकपाठः । ओं हूं हों हों हूं फडिति ग, चिह्नितपुस्तकपाठः ।
3 ओं हूं हां हां हूं फडिति ख, चिह्नितपुस्तकपाठः । ओं ह्रं ह्रीं ह्रं ह्रं फडिति ग, चिह्नितपुस्तकपाठः ।
4 वषडन्तादिनात्मनेति ख, ग, चिह्नितपुस्तकपाठः ।

शिष्यं सम्पूज्य तत् सूत्रं सुषुम्णेति विभावितं ॥ 6cd
मूलेन तच्छिखाबन्धं पादाङ्गुष्ठान्तमानयेत् । 7ab
संहारेण मुमुक्षोस्तु बध्नीयाच्छिष्यकायके ॥ 7cd
पुंसस्तु दक्षिणे भागे वामे नार्य्या नियोजयेत् । 8ab
शक्तिं च शक्तिमन्त्रेण पूजितान्तस्य मस्तके ॥ 8cd
संहारमुद्रया ऽऽदाय सूत्रं तेनैव योजयेत् । 9ab
नाडीन्त्वादाय मूलेन सूत्रे न्यस्य हृदार्च्चयेत् ॥ 9cd
अवगुण्ठ्य तु रुद्रेण हृदयेनाहुतित्रयं । 10ab
प्रदद्यात्सन्निधानार्थं शक्तावप्येवमेव हि ॥ 10cd
ओं हां वर्णाध्वने नमो हां भवनाध्वने नमः । 11ab
ओं हां कलाध्वने नमः[1] शोध्याध्वानं हि सूत्रके ॥ 11cd
न्यस्यास्त्रवारिणा शिष्यं प्रोक्ष्यास्त्रमन्त्रितेन च । 12ab
पुष्पेण हृदि सन्ताड्य शिष्यदेहे प्रविश्य च ॥ 12cd
गुरुश्च तत्र हूङ्कारयुक्तं रेचकयोगतः । 13ab
चैतन्यं हंसवीजस्थं विश्लिष्येदायुधात्मना ॥ 13cd
ओं हौं हूं फट्(2) ।
आच्छिद्य शक्तिसूत्रेण हां हं स्वाहेति चाणुना । 14ab
संहारमुद्रया सूत्रे नाडीभूते नियोजयेत् ॥ 14cd
ओं हां हं हां आत्मने नमः ।
व्यापकं भावयेदेनं तनुत्रेणावगुण्ठयेत्[3] । 15ab

1 ओं हाम् पदाध्वने नमः । ओं हां वर्णाध्वने नमः । ओं हां भवनाध्वने नमः । ओं हां कलाध्वने नमः । इति ग, चिह्नितपुस्तकपाठः । ओं हां पदात्मने नमः । ओं हां वर्णात्मने नमः । ओं हां मन्त्रात्मने नमः । ओं हां कालात्मने नम इति ङ, चिह्नितपुस्तकपाठः ।

2 ओं हां हौं हूं फट् इति ग, चिह्नितपुस्तकपाठः ।

3 तन्मात्रेणावगुण्ठयेदिति ग, चिह्नितपुस्तकपाठः ।

आहुतित्रितयं दद्यात् हृदा सन्निधिहेतवे ॥ 15cd
विद्यादेहञ्च विन्यस्य शान्त्यतीतावलोकनं । 16ab
तस्यामितरतत्त्वाद्यं मन्त्रभूतं विचिन्तयेत् ॥ 16cd

ओं हां हौं शान्त्यतीतकलापाशाय(1) नम इत्यनेनावलोकयेत् ।

हे तत्त्वे मन्त्रमप्येकं पदं वर्णाश्च षोडश । 17ab
तथा ऽष्टौ भुवनान्यस्यां वीजनाडीकथद्वयं ॥ 17cd
विषयञ्च गुणश्चैकं कारणं च सदा शिवं । 18ab
सितायां शान्त्यतीतायामन्तर्भाव्य प्रपीडयेत् ॥ 18cd

ओं हौं शान्त्यतीतकलापाशाय हूं फट् ।

संहारमुद्रया ऽऽदाय विदध्यात् सूत्रमस्तके । 19ab
पूजयेदाहुतीस्तिस्रो दद्यात् सन्निधिहेतवे ॥ 19cd
तत्त्वे द्वे अक्षरे द्वे च वीजनाडीकथद्वयं । 20ab
गुणौ मन्त्रौ तथा ऽब्जस्थमेकं कारणमीश्वरं ॥ 20cd
पदानि भानुसङ्ख्यानि भुवनानि दश सप्त च । 21ab
एकञ्च विषयं शान्तौ कृष्णायामच्युतं स्मरेत् ॥ 21cd
ताडयित्वा समादाय मुखसूत्रे नियोजयेत् । 22ab
जुहुयान्निजवीजेन सान्निध्यायाहुतित्रयं ॥ 22cd
विद्यायां सप्त तत्त्वानि पादानामेकविंशतिं । 23ab
षड् वर्णान् सञ्चरं चैकं लोकानां पञ्चविंशतिं ॥ 23cd
गुणानान्त्रयमेकञ्च विषयं रुद्रकारणं । 24ab
अन्तर्भाव्यातिरिक्तायां जीवनाडीकथद्वयं ॥ 24cd
अस्त्रमादाय दध्याच्च पदं द्व्यधिकविंशतिं । 25ab
लोकानाञ्च कलानाञ्च षष्टिं गुणचतुष्टयं ॥ 25cd

1 ओं हां हौं हों शान्त्यतीतकलापाशायेति ग, चिह्नितपुस्तकपाठः ।

मन्त्राणां त्रयमेकञ्च विषयं कारणं हरिं । 26ab
अन्तर्भाव्य प्रतिष्ठायां शुक्लायान्ताडनादिकं ॥ 26cd
विधाय नाभिसूत्रस्थां सन्निधायाहुतीर्यजेत् । 27ab
ह्रीं भुवनानां[1] शतं साग्रं पदानामष्टविंशतिं[2] । 27cd
वीजनाडीसमीराणां द्वयोरिन्द्रिययोरपि । 28ab
वर्णन्तत्त्वञ्च विषयमेकैकं गुणपञ्चकं ॥ 28cd
हेतुं ब्रह्माण्डमन्त्रस्थं शम्बराणां चतुष्टयं । 29ab
निवृत्तौ पीतवर्णायामन्तर्भाव्य प्रताडयेत् ॥ 29cd
आदौ यत्तत्त्वभागान्ते[3] सूत्रे विन्यस्यपूजयेत् । 30ab
जुहुयादाहुतीस्तिस्रः सन्निधानाय पावके ॥ 30cd
इत्यादाय कलासूत्रे योजयेच्छिष्यविग्रहात् । 31ab
सवीजायान्तु दीक्षायां समयाचारयागतः ॥ 31cd
देहारम्भकरक्षार्थं मन्त्रसिद्धिफलादपि । 32ab
इष्टापूर्त्तादिधर्मार्थं व्यतिरिक्तं प्रबन्धकं ॥ 32cd
चैतन्यबोधकं सूक्ष्मं कलानामन्तरे स्मरेत् । 33ab
अमुनैव क्रमेणाथ कुर्य्यात्तर्पणदीपने ॥ 33cd
आहुतिभिः स्वमन्त्रेण तिसृभिस्तिसृभिस्तथा । 34ab
ओं हौं शान्त्यतीतकलापाशाय स्वाहेत्यादितर्पणं ।
ओं हां हं हां(4) शान्त्यतीतकलापाशाय हूम्फडित्यादि-दीपनं ।
तत् सूत्रं व्याप्तिबोधाय कलास्थानेषु पञ्चसु ॥ 34cd

1 ह्रीं त्रिभुवनाधिपानामिति ख, चिह्नितपुस्तकपाठः ।
2 पदानामूनविंशतिमिति ग, चिह्नितपुस्तकपाठः ।
3 आदौ सतत्त्वभावेनेति ग, चिह्नितपुस्तकपाठः ।
4 ओं हां हौं हौं इति ग, चिह्नितपुस्तकपाठः ।

सङ्गृह्य कुङ्कुमाज्येन[1] तत्र साङ्गं शिवं यजेत् । 35ab
हूम्फडन्तैः कलामन्त्रैर्भित्त्वा पाशाननुक्रमात् ॥ 35cd
नमो ऽन्तैश्च प्रविश्यान्तः कुर्य्याद् ग्रहणबन्धने । 36ab
ओं हूं हां हौं हां हूं फट् शान्त्यतीतकलां गृह्णामि बध्नामि चेत्यादिमन्त्रैः कलानां ग्रहणबन्धनादिप्रयोगः ।
पाशादीनाञ्च स्वीकारो ग्रहणं बन्धनं पुनः ॥ 36cd
पुरुषं प्रति निःशेषव्यापारप्रतिपत्तये । 37ab
उपवेश्याथ तत् सूत्रं शिष्यस्कन्धे निवेशयेत् ॥ 37cd
विस्तृताघप्रमोषाय शतं मूलेन होमयेत् । 38ab
शरावसम्पुटे पुंसः स्त्रियाश्च प्रणितोदरे ॥ 38cd
हृदस्त्रसम्पुटं सूत्रं विधायाभ्यर्च्चयेद्धृदा[2] । 39ab
सूत्रं शिवेन साङ्गेन कृत्वा सम्पातशोधितं ॥ 39cd
निदध्यात् कलशस्याधो रक्षां विज्ञापयेदिति । 40ab
शिष्यं पुष्पं करे दत्वा सम्पूज्य कलशादिकं ॥ 40cd
प्रणमय्य वहिर्यायाद् यागमन्दिरमध्यतः । 41ab
मण्डलत्रितयं कृत्वा मुमुक्षूनुत्तराननान् ॥ 41cd
भुक्तये पूर्व्ववक्त्रांश्च शिष्यांस्तत्र निवेशयेत् । 42ab
प्रथमे पञ्चगव्यस्य प्राशयेच्चुल्लकत्रयं ॥ 42cd
पाणिना कुशयुक्तेन अर्च्चितानन्तरान्तरं । 43ab
चरुन्ततस्तृतीये तु ग्रासत्रितयसम्मितं ॥ 43cd
अष्टग्रासप्रमाणं वा दशनस्पर्शवर्जितं । 44ab
पालाशपुटके मुक्तौ भुक्तौ पिप्पलपत्रके ॥ 44cd

1 कुम्भमाज्येनेति ग, चिह्नितपुस्तकपाठः ।
2 निदध्यान् पूर्ववद्धृदा इति ङ, चिह्नितपुस्तकपाठः ।

हृदा सम्भोजनं दत्वा पूतैराचामयेज्जलैः । 45ab
दन्तकाष्ठं हृदा कृत्वा प्रक्षिपेच्छोभने शुभं ॥ 45cd
न्यूनादिदोषमोषाय मूलेनाष्टोत्तरं शतं । 46ab
विधाय स्थण्डिलेशाय सर्व्वकर्म्मसमर्पणं ॥ 46cd
पूजाविसर्जनञ्चास्य चण्डेशस्य च पूजनं । 47ab
निर्म्माल्यमपनीयाथ शेषमग्नौ यजेच्चरोः ॥ 47cd
कलशं लोकपालांश्च पूजयित्वा विसृज्य च । 48ab
विसृजेद्गणमग्निञ्च रक्षितं यदि वाह्यतः ॥ 48cd
वाह्यतो लोकपालानां दत्वा सङ्क्षेपतो बलिं । 49ab
भस्मना शुद्धतोयैर्वा स्नात्वा या गालयं विशेत्[1] ॥ 49cd
गृहस्थान् दर्भशय्यायां पूर्वशीर्षान् सुरक्षितान् । 50ab
हृदा सद्भस्मशय्यायां यतीन् दक्षिणमस्तकान् ॥ 50cd
शिखाबद्धशिखानस्त्रसप्तमाणवकान्वितान् । 51ab
विज्ञाय स्नापयेच्छिष्यांस्ततो यायात् पुनर्वहिः ॥ 51cd
ओं हिलि हिलि त्रिशूलपाणये स्वाहा ।
पञ्चगव्यञ्चरुं प्राश्य गृहीत्वा दन्तधावनं । 52ab
समाचम्य शिवं ध्यात्वा शय्यामास्थाय पावनीं[2] ॥ 52cd
दीक्षागतङ्क्रियाकाण्डं संस्मरन् संविशेद्गुरुः । 53ab
इति सङ्क्षेपतः प्रोक्तो विधिर्दीक्षाधिवासने ॥ 53cd

इत्यादिमाहापुराणे आग्नेये निर्वाणदीक्षायामधिवासनं नाम त्र्यशीतितमो ऽध्यायः ॥

1 यागालयं व्रजेदिति ङ, चिह्नितपुस्तकपाठः ।
2 विद्यामास्थाय पावनीमिति ङ, चिह्नितपुस्तकपाठः ।

# 84

चतुरशीतितमो ऽध्यायः ।

निर्व्वाणदीक्षाविधानं ।

ईश्वर उवाच ।

अथ प्रातः समुत्थाय कृतस्नानादिको गुरुः । 1ab
दध्यार्द्रमांसमद्यादेः प्रशस्ता ऽभ्यवहारिता ॥ 1cd
गजाश्वारोहणं स्वप्ने शुभं शुक्लांशुकादिकं[1] । 2ab
तैलाभ्यङ्गादिकं हीनं होमो घोरेण शान्तये[2] ॥ 2cd
नित्यकर्म्मद्वयं कृत्वा प्रविश्य मखमण्डपं । 3ab
स्वाचान्तो नित्यवत् कर्म्म कुर्य्यान्नैमित्तिके विधौ ॥ 3cd
ततः संशोध्य चात्मानं शिवहस्तं तथात्मनि । 4ab
विन्यस्य कुम्भगं प्राच्चर्य इन्द्रादीनामनुक्रमात् ॥ 4cd
मण्डले स्थण्डिले वा ऽपि प्रकुर्वीत शिवर्च्चनं । 5ab
तर्पणं पूजनं वह्नेः पूर्णान्तं मन्त्रतर्पणं ॥ 5cd
दुःखप्रदोषमोषाय शस्त्रेणाष्टाधिकं शतं । 6ab
हुत्वा हूं सम्पुटेनैव विदध्यात् मन्त्रदीपनं ॥ 6cd
अन्तर्बलिविधानञ्च मध्ये स्थण्डिलकुम्भयोः । 7ab
कृत्वा शिष्यप्रवेशाय लब्धानुज्ञो वहिर्व्रजेत् ॥ 7cd
कुर्य्यात्समयवत्तत्र मण्डलारोपणादिकं । 8ab
सम्पातहोमं तन्नाडीरूपदर्भकरानुगं ॥ 8cd
तत्सन्निधानाय तिस्रो हुत्वा मूलाणुना ऽऽहुतीः । 9ab
कुम्भस्थं शिवमभ्यच्चर्य पाशसूत्रमुपाहरेत्[3] ॥ 9cd

---

1 शुक्लाम्बरादिकमिति ख, चिह्नितपुस्तकपाठः ।

2 अस्मल्लब्धपञ्चपुस्तकेषु दध्यार्द्रमांसमद्यादेरित्यारभ्य होमो घोरेण शान्तये इत्यन्तः पाठः पूर्वेणानन्वित इव प्रतिभाति ।

3 पाशसूत्रं समाहरेदिति ङ, चिह्नितपुस्तकपाठः ।

स्वदक्षिणोर्द्धकायस्य शिष्यस्याभ्यर्च्चितस्य च । 10ab
तच्छिखायां निबध्नीयात् पादाङ्गुष्ठावलम्बितं ॥ 10cd
तं निवेश्य निवृत्तेस्तु व्याप्तिमालोक्य चेतसा । 11ab
ज्ञेयानि भुवनान्यस्यां शतमष्टाधिकं ततः ॥ 11cd
कपालो ऽजश्च बुद्धश्च वज्रदेहः प्रमर्द्दनः[1] । 12ab
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥ 12cd
अग्नी रुद्रो हुताशो च पिङ्गलः खादको हरः । 13ab
ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षपान्तकौ ॥ 13cd
याम्यमृत्युहरो धाता विधाता कार्य्यरञ्जकः । 14ab
कालो धर्म्मो ऽप्यधर्मश्च संयोक्ता च वियोगकः ॥ 14cd
नैर्ऋतो मारणो[2] हन्ता क्रूरदृष्टिर्भयानकः । 15ab
ऊर्द्धांशको विरूपाक्षो धूम्रलोहितदंष्ट्रवान् ॥ 15cd
बलश्चातिबलश्चैव पाशहस्तो महाबलः । 16ab
श्वेतश्च जयभद्रश्च दीर्घबाहुर्जलान्तकः[3] ॥ 16cd
वडवास्यश्च भीमश्च दशैते वारुणाः स्मृताः । 17ab
शीघ्रो लघुर्व्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षपान्तकः ॥ 17cd
पञ्चान्तकः पञ्चशिखः कपर्द्दी मेघवाहनः । 18ab
जटामुकुटधारी च नानारत्नधरस्तथा ॥ 18cd
निधीशो रूपवान् धन्यो सौम्यदेहः प्रसादकृत् । 19ab
प्रकाशो ऽप्यथ लक्ष्मीवान् कामरूपो दशोत्तरे ॥ 19cd
विद्याधरो ज्ञानधरः सर्वज्ञो वेदपारगः । 20ab
मातृवृत्तश्च पिङ्गाक्षो भूतपालो बलिप्रियः ॥ 20cd

---

1 प्रवर्द्धन इति ङ, चिह्नितपुस्तकपाठः ।
2 वरुण इति ख, चिह्नितपुस्तकपाठः ।
3 जनान्तक इति ङ, चिह्नितपुस्तकपाठः ।

सर्वविद्याविधता च सुखदुःखहरा दश । 21ab
अनन्तः पालको धीरः[1] पातालाधिपतिस्तथा ॥ 21cd
वृषो वृषधरो वीर्य्यो ग्रसनः[2] सर्वतोमुखः । 22ab
लोहितश्चैव विज्ञेया दश रुद्राः फणिस्थिताः ॥ 22cd
शम्भुर्विभुर्गणाध्यक्षस्त्र्यक्षस्त्रिदशवन्दितः । 23ab
संहारश्च विहारश्च लाभो लिप्सुर्विचक्षणः ॥ 23cd
अत्ता कुहककालाग्निरुद्रो[3] हाटक एव च । 24ab
कुष्माण्डश्चैव सत्यश्च ब्रह्मा विष्णुश्च सप्तमः ॥ 24cd
रुद्रश्चाष्टाविमे रुद्राः कटाहाभ्यन्तरे स्थिताः । 25ab
एतेषामेव नामानि भुवनानामपि स्मरेत् ॥ 25cd
भवोद्भवः सर्वभूतः सर्वभूतसुखप्रदः । 26ab
सर्वसान्निध्यकृद् ब्रह्मविष्णुरुद्रशरार्च्चितः ॥ 26cd

संस्तुत पूर्वस्थित ओं साक्षिन् ओं रुद्रान्तक ओं पतङ्ग ओं शब्द ओं सूक्ष्म ओं शिव सर्वसर्व्वद सर्व्वसान्निध्यकर ब्रह्मविष्णुरुद्रकर ओं नमः शिवाय ओं नमो नमः(4) ।

अष्टाविंशति पादानि व्योमव्यापि मनो गुह । 27ab
सद्योहृदस्त्रनेत्राणि मन्त्रवर्णाष्टको मतः ॥ 27cd

---

1 वीर इति ङ, चिह्नितपुस्तकपाठः ।

2 वीर्य्या ऽप्रसन्न इति ख, ग, चिह्नितपुस्तकपाठः ।

3 अथ शुक्लककालाग्निरुद्र इति ख, चिह्नितपुस्तकपाठः ।

4 अनर्चित संस्तुत पूर्वस्थित साक्षिन् तुङ्ग 2 पतङ्ग 2 ज्ञान 2 शब्द सूक्ष्म शिव सर्वदसर्वाध्यक्षकर ब्रह्मविष्णुरुद्र ओं नमः शिवाय ओं नमो नमः ओं नमः शिवाय ओं नमो नमः इति । अनर्चित संस्तुत पूर्वविन्द ओं साक्षिण ओं रुद्रान्तक ओं पतङ्ग ओं ज्ञान ओं शब्द ओं सूक्ष्म ओं शिव ओं सर्व ओं सर्वद ओं सर्वसान्निध्यकर ब्रह्मविष्णु रुद्रकर ओं नमः शिवाय ओं नमो नम इति च, चिह्नितपुस्तकपाठः ।

वीजाकारो मकारश्च[1] नाड्याविडापिङ्गलाह्वये । 28ab
प्राणापानावुभौ वायू घ्राणोपस्थौ तथेन्द्रिये ॥ 28cd
गन्धस्तु विषयः प्रोक्तो गन्धादिगुणपञ्चके । 29ab
पार्थिवं मण्डलं पीतं वज्राङ्कं चतुरस्रकं ॥ 29cd
विस्तारो योजनानान्तु कोटिरस्य शताहता । 30ab
अत्रैवान्तर्गता ज्ञेया योनयो ऽपि चतुर्द्दश ॥ 30cd
प्रथमा सर्वदेवानां मन्वाद्या देवयोनयः । 31ab
मृगपक्षी च पशवश्चतुर्द्धा तु सरीसृपाः ॥ 31cd
स्थावरं पञ्चमं सर्वं योनिः षष्ठी अमानुषी[2] । 32ab
पैशाचं राक्षसं याक्षं गान्धर्व्वं चैन्द्रमेव च ॥ 32cd
सौम्यं प्राणेश्वरं[3] ब्राह्ममष्टमं परिकीर्तितं । 33ab
अष्टानां पार्थिवन्तत्त्वमधिकारास्पदं मतं ॥ 33cd
लयस्तु प्रकृतौ बुद्धौ भोगो ब्रह्मा च कारणं । 34ab
ततो जाग्रदवस्थानैः समस्तैर्भुवनादिभिः ॥ 34cd
निवृत्तिं गर्भितां ध्यात्वा स्वमन्त्रेण नियोज्य च । 35ab

ओं हां ह्रूं हां(4) निवृत्तिकलापाशाय हूं फट् तत ओं हां हां(5) निवृत्तिकलापाशाय स्वाहेत्यनेनाङ्कुशमुद्रया पूरकेणाकृष्य ओं ह्रूं ह्रां ह्रूं(6) निवृत्तिकलापाशाय हूं फडित्यनेन संहारमुद्रया कुम्भकेनाधः -[!!!]

---

1 वीजोङ्कारो मकरश्चेति ग, ङ, चिह्नितपुस्तकपाठः ।

2 योनिः षष्ठी सुमानुषी इति ख, चिह्नितपुस्तकपाठः । योनिः षष्टीषु मानुषी इति ग, ङ, चिह्नितपुस्तकपाठः ।

3 प्रजेश्वरमिति ङ, चिह्नितपुस्तकपाठः ।

4 ओं हां हूं हामिति ख, चिह्नितपुस्तकपाठः ।

5 तत ओं हां हां हामिति ख, चिह्नितपुस्तकपाठः ।

6 ओं हूं ह्रूं हूमिति ख, चिह्नितपुस्तकपाठः ।

स्थानादादाय ओं ओं ह्रां हां(1) निवृत्तिकलापाशाय नम इत्यनेनोद्भवमुद्रया रेचकेन कुम्भे संस्थाप्य ओं हां निवृत्तिकला-पाशाय नम इत्यनेनार्घ्यं दत्वा सम्पूज्य विमुखेनैव स्वाहान्तेनै सन्निधानायाहुतित्रयं सन्तर्पणाहुतित्रयं च दत्वा ओं हां ब्रह्मणे नम इति ब्रह्माणमावाह्य सम्पूज्य च स्वाहान्तेन सन्तर्प्य ।

ब्रह्मन् तवाधिकारे ऽस्मिन् मुमुक्षुं दीक्षयाम्यहं ॥ 35cd
भाव्यं त्वया ऽनुकूलेन विधिं विज्ञापयेदिति । 36ab
आवाहयेत्ततो देवीं रक्षां वागीश्वरीं हृदा ॥ 36cd
इच्छाज्ञानक्रियारूपां षड्विधां ह्येककारणं । 37ab
पूजयेत्तर्पयेद्देवीं प्रकारेणामुना ततः ॥ 37cd
वागीश्वरीं विनिःशेषयोनिविक्षोभकारणं । 38ab
हृत्सम्पुटार्थवीजादिहुं फडन्तशराणुना ॥ 38cd
ताडयेद्धृदये तस्य प्रविशेत्स[2] विधानवित् । 39ab
ततः शिष्यस्य चैतन्यं हृदि वह्निकणोपमं ॥ 39cd
निवृत्तिस्थं युतं पाशैर्ज्येष्ठया विभजेद्यथा । 40ab
ओं हां हूं हः हूं फट्
ओं हां स्वाहेत्यनेनाथ पूरकेणाङ्कुशमुद्रया ॥ 40cd
तदाकृष्य स्वमन्त्रेण गृहीत्वा ऽऽत्मनि योजयेत् । 41ab
ओं हां हूं हां(3) आत्मने नमः ।
पित्रोर्विभाव्य संयोगं चैतन्यं रेचकेन तत् ॥ 41cd
ब्रह्मादिकारणत्यागक्रमान्नीत्वा शिवास्पदं । 42ab

---

1 ओं हुं ह्रीं हामिति ख, चिह्नितपुस्तकपाठः ।
2 प्रविशेच्चेति ख, ङ, चिह्नितपुस्तकपाठः ।
3 ओं हां हां क्षं हामिति ख, चिह्नितपुस्तकपाठः ।

गर्भाधानार्थमादाय युगपत् सर्वयोनिषु ॥ 42cd
क्षिपेद्वागीश्वरीयोनौ वामयोद्भवमुद्रया । 43ab
ओं हां हां हां आत्मने नमः(1) ।
पूजयेदप्यनेनैव तर्पयेदपि पञ्चधा ॥ 43cd
अन्ययोनिषु सर्व्वासु देहशुद्धिं हृदा चरेत् । 44ab
नात्र पुंसवनं स्त्र्यादिशरीरस्यापि सम्भवात् ॥ 44cd
सीमन्तोन्नयनं वापि दैवान्यङ्गानि देहवत् । 45ab
शिरसा जन्म कुर्व्वीत जुगुप्सन् सर्व्वदेहिनां ॥ 45cd
तथैव भावयेदेषामधिकारं शिवाणुना[2] । 46ab
भोगं कवचमन्त्रेण शस्त्रेण विषयात्मना ॥ 46cd
मोहरूपमभेदश्च लयसञ्ज्ञं विभावयेत् । 47ab
शिवेन श्रोतसां शुद्धिं हृदा तत्त्वविशोधनं ॥ 47cd
पञ्च पञ्चाहुतीः कुर्य्यात्[3] गर्भाधानादिषु क्रमात् । 48ab
मायया मलकर्मादिपाशबन्धनिवृत्तये ॥ 48cd
निष्कृत्यैव हृदा पश्चाद् यजेत शतमाहुतीः । 49ab
मलशक्तिनिरोधेन पाशानाञ्च वियोजनं ॥ 49cd
स्वाहान्तायुधमन्त्रेण पञ्चपञ्चाहुतीर्यजेत् । 50ab
मायाद्यन्तस्य पाशस्य सप्तवारास्त्रजप्तया ॥ 50cd
कर्त्तर्य्या छेदनं कुर्य्यात् कल्पशस्त्रेण तद्यथा । 51ab
ओं हूं निवृत्तिकलापाशाय हूं फट् ।

1 ओं हं हं हां आत्मने नम इति ख, चिह्नितपुस्तकपाठः ।
2 शिखात्मने ख, चिह्नितपुस्तकपाठः ।
3 पञ्चपञ्चाहुतीर्दद्यादिति ग, ङ, चिह्नितपुस्तकपाठः ।

बन्धकत्वञ्च निर्वर्त्य हस्ताभ्याञ्च शराणुना[1] ॥ 51cd
विसृज्य वर्त्तुलीकृत्य घृतपूर्णे स्रुवे धरेत् । 52ab
दहेदनुकलास्त्रेण केवलास्त्रेण भस्मसात् ॥ 52cd
कुर्यात् पञ्चाहुतीर्दत्वा पाशाङ्कुशनिवृत्तये । 53ab
ओं हः अस्त्राय हूं फट् ।
प्रायश्चित्तं ततः कुर्य्यादस्त्राहुतिभिरष्टभिः ॥ 53cd
अथावाह्य विधातारं पूजयेत्तर्पयेत्तथा । 54ab

तत ओं हां शब्दस्पर्शशुद्धब्रह्मन् गृहाण स्वाहेत्याहुतित्रयेणाधिकारमस्य समर्पयेत् ।

दग्धनिःशेषपापस्य[2] ब्रह्मन्नस्य पशोस्त्वया ॥ 54cd
बन्धाय न पुनः स्थेयं शिवाज्ञां श्रावयेदिति । 55ab
ततो विसृज्य धातारं नाड्या दक्षिणया शनैः ॥ 55cd
संहारमुद्रयात्मानं कुम्भकेन निजात्मना । 56ab
राहुयुक्तैकदेशेन चन्द्रविम्बेन सन्निभं ॥ 56cd
आदाय योजयेत् सूत्रे रेचकेनोद्भवाख्यया । 57ab
पूजयित्वार्घ्यपात्रस्थतोयविन्दुसुधोपमं ॥ 57cd
विसृज्य पितरौ दद्याद्वौषडन्तशिवाणुना । 58ab
पूरणाय विधिः पूर्णा निवृत्तिरिति शोधिता ॥ 58cd

इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायां निवृत्तिकलाशोधनं नाम चतुरशीतितमो ऽध्यायः ॥

1 शिवात्मनेति ख, चिह्नितपुस्तकपाठः ।
2 दग्धनिःशेषपाशस्य इति ख, ङ, चिह्नितपुस्तकपाठः ।

# 85

## अथ पञ्चाशीतितमो ऽध्यायः ।

प्रतिष्ठाकलाशोधनोक्तिः ।

ईश्वर उवाच

तत्त्वयोरथ सन्धानं कुर्य्याच्छुद्धविशुद्धयोः । 1ab
ह्रस्वदीर्घप्रयोगेण नादनादान्तसङ्गिना ॥ 1cd
ओं हां ह्रूं हां(1)
अप्तेजो वायुराकाशं तन्मात्रेन्द्रियबुद्धयः । 2ab
गुणत्रयमहङ्कारश्चतुर्विंशः पुमानिति ॥ 2cd
प्रतिष्ठायां निविष्टानि तत्त्वान्येतानि भावयेत् । 3ab
पञ्चविंशतिसङ्ख्यानि खादियान्ताक्षराणि च ॥ 3cd
पञ्चाशदधिका षष्टिर्भुवनैस्तुल्यसञ्ज्ञिताः । 4ab
तावन्त एव रुद्राश्च विज्ञेयास्तत्र तद्यथा ॥ 4cd
अमरेशः प्रभावश्च नेमिषः पुष्करो ऽपि च । 5ab
तथा पादिश्च दण्डिश्च भावभूतिरथाष्टमः ॥ 5cd
नकुलीशो हरिश्चन्द्रः श्रीशैलो दशमः स्मृतः । 6ab
अन्वीशो ऽस्रातिकेशश्च[2] महाकालो ऽथ मध्यमः ॥ 6cd
केदारो भैरवश्चैव द्वितीयाष्टकमीरितं । 7ab
ततो गयाकुरुक्षेत्रखलानादिकनादिके ॥ 7cd
विमलश्चाट्टहासश्च[3] महेन्द्रो भाम एव च । 8ab
वस्वापदं रुद्रकोटिरवियुक्तो महावन्तः ॥ 8cd
गोकर्णो भद्रकर्णश्च स्वर्णाक्षः स्थाणुरेव च । 9ab
अजेशश्चैव सर्वज्ञो भास्वरः सूदनान्तरः ॥ 9cd
सुबाहुर्मत्तरूपी च विशालो जटिलस्तथा । 10ab

---

1 ओं हां ह्रूं ह्रूं हामिति ख, चिह्नितपुस्तकपाठः ।
2 अल्पीशो भ्रान्तिकेशश्चेति ङ, चिह्नितपुस्तकपाठः ।
3 विमलश्चण्डहासश्चेति ङ, चिह्नितपुस्तकपाठः ।

रौद्रो ऽथ पिङ्गलाक्षश्च कालदंष्ट्री भवेत्ततः ॥ 10cd
विदुरश्चैव घोरश्च प्राजापत्यो हुताशनः । 11ab
कामरूपी तथा कालः कर्णो ऽप्यथ भयानकः ॥ 11cd
मतङ्गः पिङ्गलश्चैव हरो वै धातृसञ्ज्ञकः । 12ab
शङ्कुकर्णो विधानश्च श्रीकण्ठश्चन्द्रशेखरः ॥ 12cd
सहैतेन च पर्य्यन्ताः कथ्यन्ते ऽथ पदान्यपि । 13ab

व्यापिन् ओं अरूप ओं प्रमथ ओं तेजः ओं ज्योतिः ओं पुरुष ओं अग्ने ओं अधूम ओं अभस्म ओं अनादि ओं नाना ओं धूधू ओं भूः ओं भुवः ओं स्वः अनिधन निधनोद्भव शिव शर्व परमात्मन् महेश्वर महादेव सद्भावेश्वर महातेजः योगाधिपतये मुञ्च प्रथम सर्व सर्वेसर्वेति द्वात्रिंशत् पदानि ।

वीजभावे त्रयो मन्त्रा वामदेवः शिवः शिखा ॥ 13cd
गान्धारी च सुषुम्णा च नाड्यौ द्वौ मारुतौ तथा । 14ab
समानोदाननामानौ रसनापायुरिन्द्रिये ॥ 14cd
रसस्तु विषयो रूपशब्दस्पर्शरसा गुणाः । 15ab
मण्डलं वर्त्तुलं तच्च पुण्डरीकाङ्कितं सितं ॥ 15cd
स्वप्नावस्थाप्रतिष्ठायां कारणं गरुडध्वजं । 16ab
प्रतिष्ठान्तकृतं सर्वं सञ्चिन्त्य भुवनादिकं ॥ 16cd
सूत्रं देहे स्वमन्त्रेण प्रविश्यैनां वियोजयेत् । 17ab

ओं हां ख्रीं हां प्रतिष्ठाकलापाशाय ओं फट् स्वाहान्तेनानैनैव पूरकेणाङ्कुशमुद्रया समाकर्षेत् ततः ओं हां ह्रूं ह्रां ह्रूं (1) प्रतिष्ठा कलापाशाय ह्रूं फडित्यनेन संहारमुद्रया कुम्भकेन हृदयादधो नाडी -[!!!]

1 ओं ह्रीं ह्रं हां हूं इति ख, चिह्नितपुस्तकपाठः ।

सूत्रादादाय ओं हां ह्रूं ह्रां हां(1) प्रतिष्ठाकलापाशाय नम इत्यनेनोद्भवमुद्रया रेचकेन कुम्भे समारोपयेत् ओं हां ह्रीं प्रतिष्ठाकलापाशाय नम इत्यनेनार्च्चयित्वा सम्पूज्य स्वाहान्तेनाहुतीनां त्रयेण सन्निधाय ततः ओं हां विष्णवे नम इति विष्णुमावाह्य सम्पूज्य सन्तर्प्य

विष्णो तवाधिकारे ऽस्मिन् मुमुक्षुं दीक्षयाम्यहं ॥ 17cd
भाव्यं त्वयानुकूलेन विष्णुं विज्ञापयेदिति । 18ab
ततो वागीश्वरीं देवीं वागीशमपि पूर्ववत् ॥ 18cd
आवाह्याभ्यर्च्य सन्तर्प्य शिष्यं वक्षसि ताडयेत् । 19ab
ओं हां हां हं फट्(2)
प्रविशेदप्यनेनैव चैतन्यं विभजेत्ततः ॥ 19cd
शस्त्रेण पाशसंयुक्तं ज्येष्टया ऽङ्कुशमुद्रया । 20ab
ओं हां हं हों ह्रूं फट्(3) ।
स्वाहान्तेन हृदाकृष्य तेनैव पुटितात्मना ॥ 20cd
गृहीत्वा तं नमोन्तेन निजात्मनि नियोजयेत्[4] । 21ab
ओं हां हं हों (5) आत्मने नमः ।
पूर्ववत् पितृसंयोगं भावयित्वोद्भवाख्यया[6] ॥ 21cd
वामया तदनेनैव देवीगर्भे विनिक्षिपेत् । 22ab
ओं हां हं हां आत्मने नमः ।
देहोत्पत्तौ हृदा ह्येवं शिरसा जन्मना तथा ॥ 22cd

1 ओं हूं ह्रां हां इति ख, चिह्नितपुस्तकपाठः ।
2 ओं हां हं हां हः फट् इति ख, ङ, चिह्नितपुस्तकद्वयपाठः ।
3 ओं हां हं हां हूं फट् इति ख, चिह्नितपुस्तकपाठः ।
4 निवेदयेदिति ख, चिह्नितपुस्तकपाठः ।
5 ओं हां हं हां इति ख, ङ, चिह्नितपुस्तकपाठः ।
6 भावयित्वा तु दक्षयेति ख, चिह्नितपुस्तकपाठः ।

शिखया वाधिकाराय भोगाय कवचाणुना । 23ab
तत्त्वशुद्धौ हृदा ह्येवं गर्भाधानाय पूर्ववत् ॥ 23cd
शिरसा पाशशैथिल्ये निष्कृत्यैवं शतं जपेत् । 24ab
एवं पाशवियोगे ऽपि ततः शास्त्रजप्तया ॥ 24cd
छिन्द्यादस्त्रेण कर्त्तर्य्या कलावीजवता यथा । 25ab
ओं ह्रीं प्रतिष्ठाकलापाशाय हः फट् ।
विसृज्य वर्त्तुलीकृत्य[1] पाशमन्त्रेण पूर्ववत् ॥ 25cd
घृतपूर्णे श्रवे दत्वा कलास्त्रेणैव होमयेत् । 26ab
अस्त्रेण जुहुयात् पञ्च पाशाङ्कुरनिवृत्तये ॥ 26cd
प्रायश्चित्तनिषेधार्थं दद्यादष्टाहुतीस्ततः । 27ab
ओं हः अस्त्राय हूं फट् ।
हृदावाह्य हृषीकेशं कृत्वा पूजतर्पणे ॥ 27cd
पूर्व्वोक्तविधिना कुर्य्यादधिकारसमर्पणं । 28ab
ओं हां रसशुल्कं गृहाण स्वाहा ।
निःशेषदग्धपाशस्य पशोरस्य हरे त्वया ॥ 28cd
न स्थेयं बन्धकत्वेन शिवाज्ञां श्रावयेदिति । 29ab
ततो विसृज्य गोविन्दं विद्यात्मानं नियोज्य च ॥ 29cd
बाहुमुक्तार्द्धदृश्येन चन्द्रविम्बेन सन्निभं । 30ab
संहारमुद्रया स्वस्थं[2] विधायोद्भवमुद्रया ॥ 30cd
सूत्रे संयोज्य विन्यस्य तोयविन्दुं यथा पुरा । 31ab
विसृज्य पितरौ वह्नेः पूजितौ कुसुमादिभिः । 31cd

1 वर्द्धनीकृत्येति ख, चिह्नितपुस्तकपाठः ।
2 संहारमद्रयात्मस्थं इति ख, चिह्नितपुस्तकपाठः ।

दद्यात् पूर्णां विधानेन प्रतिष्ठा ऽपि विशोधिता ॥ 31॥ 31ef

इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायां प्रतिष्ठाकलाशोधनं नाम पञ्चाशीतितमो ऽध्यायः ॥

# 86

## अथ षडशीतितमो ऽध्यायः ।

विद्याविशोधनविधानं ।

ईश्वर उवाच ।

सन्धानमथ विद्यायाः प्राचीनकलया सह । 1ab
कुर्वीत पूर्ववत् कृत्वा[1] तत्त्वं वर्णय तद्यथा ॥ 1cd
ओं हों क्ष्मीमिति सन्धानं ।
रागश्च शुद्धविद्या च नियतिः कलया सह । 2ab
कालो माया तथा ऽविद्या तत्त्वानामिति सप्तकं ॥ 2cd
रलवाः शषसाः वर्णाः षड् विद्यायां प्रकीर्त्तिताः । 3ab
पदानि प्रणवादीनि एकविंशतिसङ्ख्यया ॥ 3cd

ओं नमः शिवाय सर्वप्रभवे हं शिवाय(2) ईशानमूर्द्धाय तत्पुरुषवक्त्राय अघोरहृदयाय वामदेवगुह्याय(3) सद्योजातमूर्त्तये(4) ओं नमो नमो गुह्यातिगुह्याय गोप्त्रे अनिधाय सर्वाधिपाय(5) ज्योतिरूपाय परमेश्वाराय भावेन ओं व्योम ।

1 पूर्ववत् धृत्वेति ख, चिह्नितपुस्तकपाठः ।
2 इं शिवाय इति ख, चिह्नितपुस्तकपाठः ।
3 वचोगुह्याय इति ख, चिह्नितपुस्तकपाठः ।
4 सद्योजाताय मूर्त्तये इति ख, चिह्नितपुस्तकपाठः ।
5 अथ निधाय सर्वाधिपतय इति ख, चिह्नितपुस्तकपाठः ।

ओं रुद्राणां भुवनानाञ्च स्वरूपमथ कश्यपे । 4ab
प्रथमो वामदेवः स्यात्ततः सर्वभवोद्भवः ॥ 4cd
वज्रदेहः प्रभुर्द्धाता क्रमविक्रमसुप्रभाः । 5ab
वटुः[1] प्रशान्तनामा च परमाक्षरसञ्ज्ञकः ॥ 5cd
शिवश्च सशिवो बभ्रुरक्षयः शम्भुरेव च । 6ab
अदृष्टरूपनामानौ तथा ऽन्यो रूपवर्द्धनः ॥ 6cd
मनोन्मनो महावीर्य्यश्चित्राङ्गस्तदनन्तरं । 7ab
कल्याण इति विज्ञेयाः पञ्चविंशतिसङ्ख्यया ॥ 7cd
मन्त्रो घोरामरौ वीजे नाड्यौ द्वे तत्र ते यथा । 8ab
पूषा च हस्तिजिह्वा च व्याननागौ प्रभञ्जनौ ॥ 8cd
विषयो रूपमेवैकमिन्द्रिये पादचक्षुषी । 9ab
शब्दः स्पर्शश्च रूपञ्च त्रय एते गुणाः स्मृताः ॥ 9cd
अवस्था ऽत्र सुषुप्तिश्च रुद्रो देवस्तु कारणं । 10ab
विद्यामध्यगतं सर्वं भावयेद्भवनादिकं ॥ 10cd
ताडनं छेदनं तत्र प्रवेशञ्चापि योजनं । 11ab
आकृष्य ग्रहणं कुर्य्याद्विद्यया हृत्प्रदेशतः ॥ 11cd
आत्मन्यारोप्य सङ्गृह्य कलां कुण्डे निवेशयेत् । 12ab
रुद्रं कारणमावाह्य विज्ञाप्य च शिशुं प्रति ॥ 12cd
पित्रोरावाहनं कृत्वा[2] हृदये ताडयेच्छिशुं । 13ab
प्रविश्य पूर्वमन्त्रेण तदात्मनि नियोजयेत् ॥ 13cd
आकृष्यादाय पूर्वोक्तविधिना ऽऽत्मनि योजयेत् । 14ab
वामया योजयेत् योनौ गृहीत्वा द्वादशान्ततः ॥ 14cd

1 बुद्ध इति घ, ङ, चिह्नितपुस्तकपाठः ।
2 आवाहनं कुर्य्यादिति ग, घ, चिह्नितपुस्तकपाठः ।

कुर्व्वीत देहसम्पत्तिं जन्माधिकारमेव च । 15ab
भोगं लयन्तथा श्रोतःशुद्धितत्त्वविशोधनं ॥ 15cd
निःशेषमलकर्म्मादिपाशबन्धनिवृत्तये । 16ab
निष्कृत्यैव विधानेन यजेत शतमाहुतीः ॥ 16cd
अस्त्रेण पाशशैथिल्यं मलशक्तिं तिरोहितां । 17ab
छेदनं मर्द्दनं तेषां वर्त्तुलीकरणं तथा[1] ॥ 17cd
दाहं तदक्षराभावं प्रायश्चित्तमथोदितं । 18ab
रुद्राण्यावाहनं पूजा रूपगन्धसमर्पणं ॥ 18cd
ओं ह्रीं रूपगन्धौ शुल्कं रुद्र गृहाण स्वाहा ।
संश्राव्य शाम्भवीमाज्ञां रुद्रं विसृज्य कारणं । 19ab
विधायात्मनि चैतन्यं पाशसूत्रे निवेशयेत् ॥ 19cd
विन्दुं शिरसि विन्यस्य विसृजेत् पितरौ ततः । 20ab
दद्यात् पूर्णां विधानेन समस्तविधिपूरणीं ॥ 20cd
पूर्वोक्तविधिना कार्य्यं विद्यायां ताडनादिकं । 21ab
स्ववीजन्तु विशेषः स्यादिति विद्या विशोधिता ॥ 21cd

इत्यादिमहापुराणे आग्नेये निर्व्वाणदीक्षायां विद्याशोधनं नाम षडशीतितमो ऽध्यायः ॥

## 87

### अथ सप्ताशीतितमो ऽध्यायः ।

शान्तिशोधनकथनं ।
ईश्वर उवाच ।
सन्दध्यादधुना विद्यां शान्त्या सार्द्धं यथाविधि । 1ab
शान्तौ तत्त्वद्वयं लीनं भावेश्वरसदाशिवौ ॥ 1cd

1 छेदनं भेदनं तेषां बहुलीकरणन्तथा इति ग, चिह्नितपुस्तकपाठः ।

हकारश्च क्षकारश्च द्वौ वर्णौ परिकीर्त्तितौ । 2ab
रुद्राः समाननामानो भुवनैः सह तद्यथा ॥ 2cd
प्रभवः समयः क्षुद्रो विमलः शिव इत्यपि । 3ab
घनौ निरञ्जनाकारौ स्वशिवौ दीप्तिकारणौ ॥ 3cd
त्रिदशेश्वरनामा च त्रिदशः कालसञ्ज्ञकः । 4ab
सूक्ष्माम्बुजेश्वरश्चेति[1] रुद्राः शान्तौ प्रतिष्ठिताः ॥ 4cd

व्योमव्यापिने व्योमव्याप्यरूपाय(2) सर्वव्यापिने शिवाय अनन्ताय अनाथाय अनाश्रिताय धृवाय शाश्वताय योगपीठसंस्थिताय नित्ययोगिने ध्यानाहारायेति(3) द्वादशपादानि ।

पुरुषः कवचौ मन्त्रौ वीजे विन्दूपकारकौ । 5ab
अलम्बुषायसानाड्यौ वायू कृकरकूर्म्मकौ ॥ 5cd
इन्द्रिये त्वङ्करावस्या स्पर्शस्तु विषयो मतः । 6ab
गुणौ स्पर्शनिनादौ द्वावेकः कारणमीश्वरः ॥ 6cd
तुर्य्यावस्थेति शान्तिस्थं सम्भाव्य भुवनादिकं । 7ab
विदध्यात्ताडनं भेदं प्रवेशञ्च वियोजनं ॥ 7cd
आकृष्य ग्रहणं कुर्याच्छान्तेर्वदनसूत्रतः । 8ab
आत्मन्यारोप्य सङ्गृह्य कलां कुण्डे निवेशयेत् ॥ 8cd
ईशं तवाधिकारे ऽस्मिन् मुमुक्षुं दीक्षयाम्यहं । 9ab
भव्यं त्वया ऽनुकूलेन[4] कुर्य्यात् विज्ञापनामिति ॥ 9cd
आवाहनादिकं पित्रोः शिष्यस्य ताडनादिकं । 10ab

1 सूक्ष्मासूक्ष्मेश्वरश्चैव इति ग, चिह्नितपुस्तकपाठः ।

2 व्योमव्यापकरूपाय इति ख, चिह्नितपुस्तकपाठः । व्योमरूपायेति ग, चिह्नितपुस्तकपाठः ।

3 ध्यायपरायेति ख, चिह्नितपुस्तकपाठः । व्यानाहारायेति ग, चिह्नितपुस्तकपाठः ।

4 भाव्यं त्वया च शुद्धेन इति ग, ङ, चिह्नितपुस्तकपाठः ।

विधायादाय चैतन्यं विधिना ऽऽत्मनि योजयेत् ॥ 10cd
पूर्ववत् पितृसंयोगं भावयित्वोद्भवाख्यया । 11ab
हृत्सम्पुटात्मवीजेन देवीगर्भे नियोजयेत् ॥ 11cd
देहोत्पत्तौ हृदा पञ्च शिरसा जन्महेतवे । 12ab
शिखया वा ऽधिकाराय भोगाय कवचाणुना ॥ 12cd
लयाय शस्त्रमन्त्रेण स्रोतःशुद्धौ शिवेन च । 13ab
तत्त्वशुद्धौ हृदा ह्येवं गर्भाधानादि पूर्ववत् ॥ 13cd
वर्म्मणा पाशशैथिल्यं निष्कृत्यैवं शतं जपेत् । 14ab
मलशक्तितिरोधाने शस्त्रेणाहुतिपञ्चकं ॥ 14cd
एवं पाशवियोगे ऽपि[1] ततः सप्तास्त्रजप्तया । 15ab
छिन्द्यादस्त्रेण कर्त्तर्य्या पाशान्वीजवता यथा ॥ 15cd
ओं हौं(2) शान्तिकलापाशाय हः हूं फट् ।
विसृज्य वर्त्तुलीकृत्य पाशमन्त्रेण पूर्ववत् । 16ab
घृतपूर्णे स्रुवे दत्वा कलास्त्रेणैव होमयेत् ॥ 16cd
अस्त्रेण जुहुयात् पञ्च पाशाङ्कुशनिवृत्तये । 17ab
प्रायश्चित्तनिषेधाय दद्यादष्टाहुतीरथ ॥ 17cd
ओं हः अस्त्राय हूं फट् ।
हृदेश्वरं समावाह्य कृत्वा पूजनतर्पणे । 18ab
विदधीत विधानेन तस्मै शुल्कसमर्पणं ॥ 18cd
ओं हां ईश्वर बुद्ध्यहङ्कारौ शुल्कं गृहाण स्वाहा ।
निःशेषदग्धपाशस्य पशोरस्येश्वर त्वया । 19ab
न स्थेयं बन्धकत्वेन शिवाज्ञां श्रावयेदिति ॥ 19cd

---

1 एकं पाशवियोगार्थमिति ग, घ, चिह्नितपुस्तकपाठः ।

2 ओं ह्यैमिति क, ङ, चिह्नितपुस्तकपाठः । ओं ज्योमिति ग, चिह्नितपुस्तकपाठः । ओं यैमिति घ, चिह्नितपुस्तकपाठः ।

विसृजेदीश्वरन्देवं रौद्रात्मानं नियोजयेत् । 20ab
ईषच्चन्द्रमिवात्मानं विधिना ऽऽत्मनि योजयेत् ॥ 20cd
सूत्रे संयोजयेदेनं शुद्धयोद्भवमुद्रया । 21ab
दद्यात् मूलेन शिष्यस्य शिरस्यमृतविन्दुकं ॥ 21cd
विसृज्य पितरौ वह्नेः पूजितौ कुसुमादिभिः । 22ab
दद्यात् पूर्णां विधानज्ञो निःशेषविधिपूरणीं ॥ 22cd
अस्यामपि विधातव्यं पूर्ववत्ताडनादिकं । 23ab
स्ववीजन्तु विशेषः स्याच्छुद्धिः शान्तेरपीडिता ॥ 23cd

इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षायां शान्तिशोधनं नाम सप्तशीतितमो ऽध्यायः ॥

## 88

अथाष्टाशीतितमो ऽध्यायः ।

निर्वाणदीक्षाकथनं ।
ईश्वर उवाच ।
सन्धानं शान्त्यतीतायाः शान्त्या सार्द्धं विशुद्धया । 1ab
कुर्वीत पूर्ववत्तत्र तत्त्ववर्णादि तद् यथा ॥ 1cd
ओं ह्रीं क्षौं हौं हां इति सन्धानानि ।
उभौ शक्तिशिवौ तत्त्वे भुवनाष्टकसिद्धिकं । 2ab
दीपकं रोचिकञ्चैव मोचकं चोर्द्धगामि च ॥ 2cd
व्योमरूपमनाथञ्च स्यादनाश्रितनष्टमं । 3ab
ओङ्कारपदमीशाने मन्त्रो वर्णाश्च षोडश ॥ 3cd
अकारादिविसर्गान्ता वीजेन देहकारकौ । 4ab
कुहूश्च शङ्खिनी नाड्यौ देवदत्तधनञ्जयौ ॥ 4cd
मारुतौ स्पर्शनं श्रोत्रं इन्द्रिये विषयो नभः । 5ab

शब्दो गुणो ऽस्यावस्था तु तुर्य्यातीता तु पञ्चमी ॥ 5cd
हेतुः सदाशिवो देव इति तत्त्वादिसञ्चयं । 6ab
सञ्चिन्त्य शान्त्यतीताख्यं विदध्यात्ताडनादिकं ॥ 6cd
कलापाशं समाताड्य फडन्तेन विभिद्य च । 7ab
प्रविश्यान्तर्न्नमो ऽन्तेन फडन्तेन वियोजयेत् ॥ 7cd
शिखाहृत्सम्पुटीभूतं स्वाहान्तं सृणिमुद्रया । 8ab
पूरकेण समाकृष्य पाशं मस्तकसूत्रतः ॥ 8cd
कुम्भकेन समादाय रेचकेनोद्भवाख्यया । 9ab
हृत्सम्पुटनमो ऽन्तेन वह्निं कुण्डे निवेशयेत् ॥ 9cd
अस्याः पूजादिकं सर्वं निवृत्तेरिव साधयेत् । 10ab
सदाशिवं समावाह्य पूजयित्वा प्रतर्प्य च ॥ 10cd
सदा ख्याते ऽधिकारे ऽस्मिन् मुमुक्षुं दीक्षयाम्यहं । 11ab
भाव्यं त्वया ऽनुकूलेन भक्त्या विज्ञापयेदिति ॥ 11cd
पित्रोरावाहनं पूजां कृत्वा तर्पणसन्निधी । 12ab
हृत्सम्पुटात्मबीजेन शिष्यं वक्षसि ताडयेत् ॥ 12cd
ओं हां हूं हं फट् ।
प्रविश्यचाप्यनेनैव चैतन्यं विभजेत्ततः । 13ab
शस्त्रेण पाशसंयुक्तं ज्येष्ठया ऽङ्कुशमुद्रया ॥ 13cd
ओं हां हूं हं फट्(1) ।
स्वाहान्तेन तदाकृष्य तेनैव पुटितात्मना । 14ab
गृहीत्वा तन्नमो ऽन्तेन निजात्मनि नियोजयेत् ॥ 14cd
ओं हां हं हीं आत्मने नमः(2) ।

1 ओं हां हुं हः फट् इति ख, चिह्नितपुस्तकपाठः ।
2 ओं हां हं ह्रीमात्मने नम इति ख, चिह्नितपुस्तकपाठः ।

पूर्व्ववत् पितृसंयोगं भावयित्वोद्भवाख्यया । 15ab
वामया तदनेनैव[1] देव्या गर्भे नियोजयेत् ॥ 15cd
गर्भाधानादिकं सर्वं पूर्वोक्तविधिना चरेत् । 16ab
मूलेन पाशशैथिल्ये निष्कृत्यैव शतं जपेत् ॥ 16cd
मलशक्तितिरोधाने पाशानाञ्च वियोजने । 17ab
पञ्चपञ्चाहुतीर्द्दद्यादायुधेन यथा पुरा ॥ 17cd
पाशानायुधमन्त्रेण सप्रवाराभिजप्तया । 18ab
छिन्द्यादस्त्रेण कर्त्तर्य्या कलावीजयुजा यथा ॥ 18cd
ओं हां शान्त्यतीतकलापाशाय हः हूं फट् ।
विसृज्य वर्त्तुलीकृत्य पाशानस्त्रेण पूर्व्ववत् । 19ab
घृतपूर्णे श्रुवे दत्वा कलास्त्रेणैव होमयेत् ॥ 19cd
अस्त्रेण जुहुयात् पञ्च पाशाङ्कुशनिवृत्तये । 20ab
प्रायश्चित्तनिषेधार्थं दद्यादष्टाहुतीस्ततः ॥ 20cd
सदाशिवं हृदावाह्य कृत्वा पूजनतर्पणे । 21ab
पूर्वोक्तविधिना कुर्य्यादधिकारसमर्पणं ॥ 21cd
ओं हां सदाशिव मनोविन्दु शुल्कं गृहाण स्वाहा ।
निःशेषदग्धपाशस्य पशोरस्य सदाशिव । 22ab
बन्धाय न त्वया स्थेयं शिवाज्ञां श्रावयेदिति ॥ 22cd
मूलेन जुहुयात् पूर्णां विसृजेत्तु सदाशिवं । 23ab
ततो विशुद्धमात्मानं शरच्चन्द्रमिवोदितं ॥ 23cd
संहारमुद्रया रौद्र्या संयोज्य गुरुरात्मनि । 24ab
कुर्वीत शिष्यदेहस्थमुद्धृत्योद्भवमुद्रया ॥ 24cd
दद्यादाप्यायनायास्य मस्तके ऽर्घ्याम्बुविन्दुकं । 25ab
क्षमयित्वा महाभक्त्या पितरौ विसृजेत्तथा ॥ 25cd

1 वामया हृदयेनैवेति ग, चिह्नितपुस्तकपाठः ।

खेदितौ शिष्यदीक्षायै यन्मया पितरौ युवां । 26ab
कारुण्यनान्मोक्षयित्वा तद्व्रज त्वं स्थानमात्मनः ॥ 26cd
शिखामन्त्रितकर्त्तर्य्या बोधशक्तिस्वरूपिणीं । 27ab
शिखां छिन्द्याच्छिवास्त्रेण शिष्यस्य चतुरङ्गुलां ॥ 27cd
ओं क्लीं शिखायै हूं फट्(1) ओं हः अस्त्राय हूं फट् ।
स्रुचि तां घृतपूर्णायां गोविड्गोलकमध्यगां[2] । 28ab
संविधायास्त्रमन्त्रेण हूं फडन्तेन होमयेत् ॥ 28cd
ओं हौं हः अस्त्राय हूं फट् ।
प्रक्षाल्य स्रुक्स्रुवौ शिष्यं संस्नाप्याचम्य च स्वयं । 29ab
योजनिकास्थमात्मानं शस्त्रमन्त्रेण ताडयेत् ॥ 29cd
वियोज्याकृष्य सम्पूज्य[3] पूर्व्ववद् द्वादशान्ततः । 30ab
आत्मीयहृदयाम्भोजकर्णिकायां निवेशयेत् ॥ 30cd
पूरितं श्रुवमाज्येन विहिताधोमुखश्रुचा । 31ab
नित्योक्तविधिना ऽऽदाय शङ्खसन्निभमुद्रया ॥ 31cd
प्रसारितशिरोग्रीवो नादोच्चारानुसारतः । 32ab
समदृष्टिशिवश्चान्तः परभावसमन्वितः ॥ 32cd
कुम्भमण्डलवह्निभ्यः[4] शिष्यादपि निजात्मनः । 33ab
गृहीत्वा षड्विधाध्वानं श्रुगग्रे प्राणनाडिकं ॥ 33cd
सञ्चिन्त्य विन्दुवद् ध्यात्वा क्रमशः सप्तधा यथा । 34ab
प्रथमं प्राणसंयोगस्वरूपमपरन्ततः ॥ 34cd

---

1 ओं हूं शिखायै हूं फट् इति ख, ङ, चिह्नितपुस्तकपाठः । ओं ह्रीं शिखायै ह्रं फडिति ग, चिह्नितपुस्तकपाठः ।

2 गोविन्दलोकमध्यगामिति ख, चिह्नितपुस्तकपाठः ।

3 वियोज्याकृष्य सङ्गृह्येति ख, ङ, चिह्नितपुस्तकपाठः ।

4 कुण्डमण्डलवह्निभ्य इति ख, चिह्नितपुस्तकपाठः ।

हृदयादिक्रमोच्चारविसृष्टं मन्त्रसञ्ज्ञकं । 35ab
पूरकं कुम्भकं कृत्वा व्यादाय वदनं मनाक् ॥ 35cd
सुषुम्णानुगतं नादस्वरूपन्तु तृतीयकं । 36ab
सप्तमे कारणे त्यागात्प्रशान्तविस्वरं लयः ॥ 36cd
शक्तिनादोर्द्ध्वसञ्चारस्तच्छक्तिविस्वरं मतं । 37ab
प्राणस्य निखिलस्यापि शक्तिप्रमेयवर्जितं ॥ 37cd
तत्कालविस्वरं षष्ठं शक्त्यतीतञ्च सप्तमं । 38ab
तदेतद् योजनास्थानं विस्वरन्तत्त्वसञ्ज्ञकं ॥ 38cd
पूरकं कुम्भकं कृत्वा व्यादाय वदनं मनाक् । 39ab
शनैरुदीरयन् मूलं कृत्वा शिष्यात्मनो लयं ॥ 39cd
हकारे तडिदाकारे षडध्वजप्राणरूपिणि । 40ab
उकारं परतो नाभेर्वितस्तिं व्याप्य संस्थितं ॥ 40cd
ततः परं मकारन्तु हृदयाच्चतुरङ्गुलं । 41ab
ओङ्कारं वाचकं विष्णोस्ततो ऽष्टाङ्गुलकण्ठकं ॥ 41cd
चतुरङ्गुलतालुस्थं मकारं रुद्रवाचकं । 42ab
तद्वल्ललाटमध्यस्थं विन्दुमीश्वरवाचकं ॥ 42cd
नादं सदाशिवं देवं ब्रह्मरन्ध्रावसानकं । 43ab
शक्तिं च ब्रह्मरन्ध्रस्थां त्यजन्नित्यमनुक्रमात् ॥ 43cd
दिव्यं पिपीलिकास्पर्शं तस्मिन्नेवानुभूय च । 44ab
द्वादशान्ते परे तत्त्वे परमानन्दलक्षणे ॥ 44cd
भावशून्ये मनो ऽतीते शिवे नित्यगुणोदये । 45ab
विलीय मानसे तस्मिन् शिष्यात्मानं विभावयेत् ॥ 45cd
विमुञ्चन् सर्पिषो धारां ज्वालान्ते ऽपि परे शिवे । 46ab
योजनिकास्थिरत्वाय वौषडन्तशिवाणुना[1] ॥ 46cd

1 वौषडन्तशिवात्मनेति ख, चिह्नितपुस्तकपाठः ।

दत्वा पूर्णां विधानेन गुणापदानमचरेत् । 47ab

ओं हां आत्मने(1) सर्वज्ञो भव स्वाहा । ओं हां आत्मने(2) परितृप्तो भव स्वाहा । ओं हूं आत्मने(3) अनादिबोधो भव स्वाहा । ओं हौं आत्मने(4) स्वतन्त्रो भव स्वाहा । ओं हौं आत्मन्(5) अलुप्तशक्तिर्भव स्वाहा । ओं हः आत्मने(6) अनन्तशक्तिर्भव स्वाहा ।

इत्थं षड्गुणमात्मानं गृहीत्वा परमाक्षरात् ॥ 47cd
विधिना भावनोपेतः शिष्यदेहे नियोजयेत् । 48ab
तीव्राणुशक्तिसम्पातजनितश्रमशान्तये ॥ 48cd
शिष्यमूर्द्धनि विन्यस्येदर्घ्यादमृतविन्दुकं । 49ab
प्रणमय्यैशकुम्भादीन् शिवाद्दक्षिणमण्डले[7] ॥ 49cd
सौम्यवक्त्रं व्यवस्थाप्य शिष्यं दक्षिणमात्मनः । 50ab
त्वयैवानुगृहीतो ऽयं मूर्त्तिमास्थाय मामकीं ॥ 50cd
देवे वह्नौ गुरौ तस्माद्भक्तिं चाप्यस्य वर्द्धय[8] । 51ab
इति विज्ञाप्य देवेशं प्रणम्य च गुरुः स्वयं ॥ 51cd

---

1 ओं ह्रीं आत्मन्निति ख, चिह्नितपुस्तकपाठः । ओं हौं आत्मन्निति घ, चिह्नितपुस्तकपाठः ।

2 ओं ह्रीं आत्मने इति ख, ग, चिह्नितपुस्तकपाठः । ओं हीं आत्मन्निति ङ, चिह्नितपुस्तकपाठः ।

3 ओं ह्रैं आत्मन्निति ख, चिह्नितपुस्तकपाठः । ओं आत्मन्निति ग, घ, चिह्नितपुस्तकपाठः ।

4 ओं ह्रैं आत्मन्निति ख, चिह्नितपुस्तकपाठः । ओं हुं आत्मन्निति ग, चिह्नितपुस्तकपाठः । ओं हौं आत्मन्निति घ, ङ, चिह्नितपुस्तकपाठः ।

5 ओं हैं आत्मन्निति ख, चिह्नितपुस्तकपाठः ।

6 ओम् हः आत्मन्निति ख, ङ, चिह्नितपुस्तकपाठः ।

7 शिवदक्षिणमण्डले इति ग, चिह्नितपुस्तकपाठः ।

8 भक्तिं नाथास्य वर्द्धयेति ख, ङ, चिह्नितपुस्तकपाठः ।

श्रेयस्तवास्त्विति ब्रूयादाशिषं शिष्यमादरात् । 52ab
ततः परमया भक्त्या दत्वा देवे ऽष्टपुष्पिकां । 52cd
पुत्रकं शिवकुम्भेन संस्नाप्य विसृजेन्मखं ॥ 52॥ 52ef

इत्यादिमहापुराणे आग्नेये निर्वाणदीक्षासमापनं नाम अष्टाशीतितमो ऽध्यायः ॥

# 89

## अथोननवतितमो ऽध्यायः ।

एकतत्त्वदीक्षाकथनं ।
ईश्वर उवाच ।
अथैकतात्त्विकी दीक्षा लघुत्वादुपदिश्यते । 1ab
सूत्रबन्धादि कुर्व्वीत यथायोगं निजात्मना ॥ 1cd
कालाग्न्यादिशिवान्तानि तत्त्वानि परिभावयेत् । 2ab
समतत्त्वे समग्राणि सूत्रे मणिगणानिव ॥ 2cd
आवाह्य शिवतत्त्वादि गर्भाधानादि पूर्ववत् । 3ab
मूलेन किन्तु कुर्व्वीत सर्व्वशुल्कसमर्पणं ॥ 3cd
प्रददीत ततः पूर्णां तत्त्वव्रातोपगर्भितां । 4ab
एकयैव यया शिष्यो निर्व्वाणमधिगच्छति ॥ 4cd
योजनायै शिवे चान्यां स्थिरत्वापादनाय च । 5ab
दत्वा पूर्णां प्रकुर्वीत शिवकुम्भाभिषेचनं ॥ 5cd

इत्यादिमहपुराणे आग्नेये एकतत्त्वदीक्षाकथनं नाम ऊननवतितमो ऽध्यायः ।

# 90

## अथ नवतितमो ऽध्यायः ।

अभिषेकादिकथनं ।

ईश्वर उवाच ।

शिवमभ्यर्च्याभिषेकं कुर्य्याच्छिष्यादिके श्रिये । 1ab
कुम्भानीशादिकाष्ठासु क्रमशो नव विन्यसेत् ॥ 1cd
तेषु क्षारोदं क्षीरोदं दध्युदं घृतसागरं । 2ab
इक्षुकादम्बरीस्वादुमस्तूदानष्टसागरान्[1] ॥ 2cd
निवेशयेद् यथासङ्ख्यमष्टौ विद्येश्वरानथ । 3ab
एकं शिखण्डिनं रुद्रं श्रीकण्ठन्तु द्वितीयकं ॥ 3cd
त्रिमूर्त्तमेकरुद्राक्षमेकनेत्रं शिवोत्तमं । 4ab
सप्तमं सूक्ष्मनामानमनन्तं रुद्रमष्टमं ॥ 4cd
मध्ये शिवं समुद्रञ्च शिवमन्त्रं च विन्यसेत् । 5ab
यागालयान् दिगीशस्य रचिते स्नानमण्डपे ॥ 5cd
कुर्य्यात् करद्वयायामां वेदीमष्टाङ्गुलोच्छ्रितां । 6ab
श्रीपर्णाद्यासने तत्र विन्यस्यानन्तमानसं ॥ 6cd
शिष्यं निवेश्य पूर्वास्यं सकलीकृत्य पूजयेत् । 7ab
काञ्जिकौदनमृद्भस्मदूर्वागोमयगोलकैः ॥ 7cd
सिद्धार्थदधितोयैश्च कुर्य्यान्निर्म्मञ्छनं ततः । 8ab
क्षारोदानुक्रमेणाथ हृदा विद्येशशम्बरैः ॥ 8cd
कलसैः स्नापयेच्छिष्यं स्वधाधारणयान्वितं । 9ab
परिधाप्य सिते वस्त्रे निवेश्य शिवदक्षिणे ॥ 9cd
पूर्व्वोदितासने शिष्यं पुनः पूर्ववदर्च्चयेत् । 10ab
उष्णीषं योगपट्टञ्च मुकुटं कर्त्तरीं घटीं ॥ 10cd
अक्षमालां पुस्तकादि शिवकाद्यधिकारकं । 11ab

1 स्वादुगर्भोदानष्टसागरानिति क, ख, चिह्नितपुस्तकपाठः ।

दीक्षाव्याख्याप्रतिष्ठाद्यं ज्ञात्वा ऽद्यप्रभृति त्वया ॥ 11cd
सुपरीक्ष्य[1] विधातव्यमाज्ञां संश्रावयेदिति । 12ab
अभिवाद्य ततः शिष्यं प्रणिपत्य महेश्वरं ॥ 12cd
विघ्नज्वालापनोदार्थं कुर्य्याद्विज्ञापनां यथा । 13ab
अभिषेकार्थमादिष्टस्त्वया ऽहं गुरुमूर्त्तिना ॥ 13cd
संहितापारगः सो ऽयमभिषिक्तो मया शिव । 14ab
तृप्तये मन्त्रचक्रस्य पञ्चपञ्चाहुतीर्यजेत् ॥ 14cd
दद्यात् पूर्णां ततः शिष्यं स्थापयेन्निजदक्षिणे । 15ab
शिष्यदक्षिणपाणिस्था अङ्गुष्ठाद्यङ्गुलीः क्रमात् ॥ 15cd
लाञ्छयेदुपबद्धाय दग्धदर्भाग्रशम्बरैः । 16ab
कुसुमानि करे दत्वा प्रणामं कारयेदमुं ॥ 16cd
कुम्भे ऽनले शिवे स्वस्मिंस्ततस्तत्कृत्यमाविशेत् । 17ab
अनुग्राह्यास्त्वया शिष्याः शास्त्रेण सुपरीक्षिताः ॥ 17cd
भूपवन्मानवादीनामभिषेकादभीप्सितं । 18ab
आं श्रां श्रौं पशुं हूं फडिति अस्त्रराजाभिषेकतः ॥ 18cd

इत्यादिमहापुराणे आग्नेये अभिषेकादिकथनं नाम नवति-
तमो ऽध्यायः ॥

## 91

अथैकनवतितमो ऽध्यायः ।
विविधमन्त्रादिकथनं ।
ईश्वर उवाच ।
अभिषिक्तः शिवं विष्णुं पूजयेद्भास्करादिकान् । 1ab
शङ्खभेर्य्यादिनिर्घोषैः स्नापयेत् पञ्चगव्यकैः ॥ 1cd

---

1 स्वयं वीक्ष्येति ग, चिह्नितपुस्तकपाठः ।

यो देवान्देवलोकं स याति स्वकुलमुद्धरन् । 2ab
वर्षकोटिसहस्रेषु यत् पापं समुपार्ज्जितं ॥ 2cd
घृताभ्यङ्गेन देवानां भस्मीभवति पावके । 3ab
आढकेन घृताद्यैश्च देवान् स्नाप्य सुरो भवेत् ॥ 3cd
चन्दनेनानुलिप्याथ गन्धाद्यैः पूजयेत्तथा । 4ab
अल्पायासेन स्तुतिभिस्तुता देवास्तु सर्वदा ॥ 4cd
अतीतानागतज्ञानमन्त्रधीभुक्तिमुक्तिदाः । 5ab
गृहीत्वा प्रश्नसूक्ष्मार्णे हृते द्वाभ्यां शुभाशुभं ॥ 5cd
त्रिभिर्जीवो मूलधातुश्चतुर्भिर्ब्राह्मणादिधीः । 6ab
यज्ञादौ भूततत्त्वादि शेषे चैवं जपादिकं ॥ 6cd
एकत्रिकातित्रिकान्ते पदे द्विपमकान्तके । 7ab
अशुभं मध्यमं मध्येष्विन्द्रस्त्रिषु नृपः शुभः ॥ 7cd
सङ्ख्यावृन्दे जीविताब्दं यमो ऽब्ददशहा ध्रुवं । 8ab
सूर्य्येभास्येशदुर्गाश्रीविष्णुमन्त्रैर्ल्लिखेत् कजे ॥ 8cd
कठिन्या जप्तया स्पृष्टे गोमूत्राकृतिरेखया । 9ab
आरभ्यैकं त्रिकं यावत्त्रिचतुष्कावसानकं ॥ 9cd
मरुद् व्योम मरुद्बीजैश्चतुःषष्टिपदे तथा । 10ab
अक्षाणां पतनात् स्पर्शाद्विषमादौ शुभादिकं ॥ 10cd
एकत्रिकादिमारभ्य अन्ते चाष्टत्रिकं तथा । 11ab
ध्वजाद्यायाः समा हीना विषमाः शोभनादिदाः[1] ॥ 11cd
आइपल्लवितैः काद्यैः षोडशस्वरपूर्व्वगैः । 12ab
आद्यैस्तैः सस्वरैः काद्यैस्त्रिपुरानाममन्त्रकाः ॥ 12cd
ह्रीं वीजाः प्रणवाद्याःस्पुर्न्नमो ऽन्ता यत्र पूजने । 13ab
मन्त्रा विंशतिसाहस्राः शतं षष्ठ्यधिकं ततः ॥ 13cd

---

1 शोभनादिकाः इति ङ, चिह्नितपुस्तकपाठः ।

आं ह्रीं मन्त्राः सरस्वत्याश्चण्डिकायास्तथैव च । 14ab
तथा गौर्य्याश्च दुर्गाया आं श्रीं मन्त्राः श्रियस्तथा ॥ 14cd
तथाक्षौं क्षौं मन्त्राः सूर्य्यस्य[1] आं हौं मन्त्राः शिवस्य च । 15ab
आं गं मन्त्रा गणेशस्य आं मन्त्राश्च तथा हरेः ॥ 15cd
शतार्द्धैकाधिकैः काद्यैस्तथा षोडशभिः स्वरैः । 16ab
काद्यैस्तैः सस्वरैराद्यैः कान्तैर्म्मन्त्रास्तथाखिलाः ॥ 16cd
रवीशदेवीविष्णूनां खाब्धिदेवेन्द्रवर्त्तनात् । 17ab
शतत्रयं षष्ठ्यधिकं प्रत्येकं मण्डलं क्रमात् । 17cd
अभिषिक्तो जपेद् ध्यायेच्छिष्यादीन् दीक्षयेद्गुरुः ॥ 17॥ 17ef

इत्यादिमहापुराणे आग्नेये नानामन्त्रादिकथनं नाम एकनवतितमो ऽध्यायः ॥

# 92

## अथ द्विनवतितमो ऽध्यायः ।

प्रतिष्ठाविधिकथनं ।
ईश्वर उवाच ।
प्रतिष्ठां सम्प्रवक्ष्यामि क्रमात् सङ्क्षेपतो गुह । 1ab
पीठं शक्तिं शिवो लिङ्गं तद्योगः सा शिवाणुभिः ॥ 1cd
प्रतिष्ठायाः पञ्च भेदास्तेषां रूपं वदामि ते । 2ab
यत्र ब्रह्मशिलायोगः सा प्रतिष्ठा विशेषतः ॥ 2cd
स्थापनन्तु यथायोगं पीठ एव निवेशनं । 3ab
प्रतिष्ठाभिन्नपीठस्य स्थितस्थापनमुच्यते ॥ 3cd
उत्थापनञ्च सा प्रोक्ता लिङ्गोद्धारपुरःसरा । 4ab
यस्यां तु लिङ्गमारोप्य संस्कारः क्रियते बुधैः ॥ 4cd

1 तथा क्षौ ह्रौ मन्त्राः सूर्य्यस्येति ग, घ, चिह्नितपुस्तकपाठः ।

आस्थापनं तदुद्दिष्टं द्विधा विष्ण्वादिकस्य च[1] । 5ab
आसु सर्व्वासु चैतन्यं नियुञ्जीत परं शिवम् ॥ 5cd
यदाधारादिभेदेन[2] प्रासादेष्वपि पञ्चधा । 6ab
परीक्षामथ मेदिन्याः कुर्य्यात्प्रासादकाम्यया ॥ 6cd
शुक्लाज्यगन्धा रक्ता च रक्तगन्धा सुगन्धिनी[3] । 7ab
पीता कृष्णा सुरागन्धा विप्रादीनां मही क्रमात् ॥ 7cd
पूर्व्वेशोत्तरसर्वत्र पूर्वा चैषां विशिष्यते[4] । 8ab
आखाते हास्तिके यस्याः पूर्णे मृदधिका भवेत् ॥ 8cd
उत्तमान्तां महीं विद्यात्तोयाद्यैर्वा समुक्षितां । 9ab
अस्थ्यङ्गारादिभिर्दुष्टामत्यन्तं शोधयेद् गुरुः[5] ॥ 9cd
नगरग्रामदुर्गार्थं गृहप्रासादकारणं[6] । 10ab
खननैर्गोकुलावासैः कर्षणैर्वा मुहुर्मुहुः ॥ 10cd
मण्डपे द्वारपूजादि मन्त्रतृप्त्यवसानकं[7] । 11ab
कर्म्म निर्वर्त्याघोरास्त्रं सहस्रं[8] विधिना यजेत् ॥ 11cd
समीकृत्योपलिप्तायां भूमौ संशोधयेद्दिशः । 12ab
स्वर्णदध्यक्षतै रेखाः प्रकुर्वीत[9] प्रदक्षिणं ॥ 12cd
मध्यादीशानकोष्टस्थे पूर्णकुम्भे[10] शिवं यजेत् । 13ab
वास्तुमभ्यर्च्य तत्तोयैः सिञ्चेत् कुद्दालकादिकं ॥ 13cd

---

1 उत्थापनश्चेत्यादि, विष्ण्वादिकस्य चेत्येत्यन्तः सार्द्धैकश्लोकात्मकपाठो ग॰ पुस्तके नास्ति ।
2 यथाधाराभिभेदेनेति ग॰ ।
3 रक्तगन्धानुगन्धीति ख॰ ।
4 प्रशस्यते इति घ॰ ।
5 शोधयेद्ध्रुवमिति घ॰ ।
6 नगरग्रामेत्यर्द्धश्लोको घ॰ पुस्तके नास्ति ।
7 मन्त्रदीप्त्यवसानकमिति ग॰ । मन्त्रभूम्यवसानकमिति घ॰ ।
8 निर्वर्त्य घोरास्त्रं महास्त्रमिति ग॰ ।
9 रेखां प्रकुर्वीतेति ख॰ ,ग॰ च ।
10 स्वर्णकुण्डे इति ग॰ । स्वर्णकुम्भे इति घ॰ , ङ॰ , च ।

बाह्ये रक्षोगणानिष्ट्वा विधिना दिग्बलिं क्षिपेत् । 14ab
भूमिं संसिच्य संस्नाप्य[1] कुद्दालाद्यं[2] प्रपूजयेत् ॥ 14cd
अन्यं वस्त्रयुगच्छन्नं कुम्भं स्कन्धे द्विजन्मनः । 15ab
निधाय गीतवाद्यादिब्रह्मघोषसमाकुलं ॥ 15cd
पूजां कुम्भे समाहृत्य प्राप्ते लग्ने ऽग्निकोष्ठके । 16ab
कुद्दालेनाभिषिक्तेन मध्वक्तेन तु खानयेत् ॥ 16cd
नैर्ऋत्यां क्षेपयेन्मृत्स्नां खाते कुम्भजलं क्षिपेत् । 17ab
पुरस्य पूर्व्वसीमन्तं[3] नयेद् यावदभीप्सितं ॥ 17cd
अथ तत्र क्षणं स्थित्वा भ्रामयेत्[4] परितः पुरं । 18ab
सिञ्चन् सीमन्तचिह्नानि यावदीशानगोचरं ॥ 18cd
अर्घ्यदानमिदं प्रोक्तं तत्र कुम्भपरिभ्रमात् । 19ab
इत्थं परिग्रहं भूमेः कुर्व्वीत तदनन्तरं ॥ 19cd
कर्करान्तं जलान्तं वा शल्यदोषजिघांसया । 20ab
खानयेद् भूः कुमारीं चेद् विधिना शल्यमुद्धरेत् ॥ 20cd
अकचटतपयशहान् मानवश्चेत् प्रश्नाक्षराणि तु[5] । 21ab
अग्नेर्ध्वजादिपातिताः स्वस्थाने शल्यमाख्यान्ति ॥ 21cd
कर्त्तुश्चाङ्गविकारेण जानीयात्तत्प्रमाणतः । 22ab
पश्वादीनां प्रवेशेन कीर्त्तनैर्विरुतैर्द्दिशः ॥ 22cd
मातृकामष्टवर्गाढ्यां फलके भुवि वा लिखेत् । 23ab
शल्यज्ञानं वर्गवशात् पूर्वादीशान्ततः[6] क्रमात् ॥ 23cd
अवर्गे चैव लोहन्तु कवर्गे ऽङ्गारमग्नितः । 24ab

1 भूमिं संसिच्य संस्थाप्येति ग॰ , घ॰ , ङ॰ च॰ ।
2 कुद्दालाख्यमिति ग॰ ।
3 पूर्वमीशान्तमिति ख॰ ।
4 स्रावयेत् इति ख॰ ।
5 नव चेत् प्रश्नाक्षराणि भाषन्ते इति ग॰ , घ॰ च ।
6 पूर्वादीनां तत इति ख॰ ।

चवर्गे भस्म दक्षे स्यात् टवर्गे ऽस्थि च नैर्ऋते ॥ 24cd
तवर्गे चेष्टका चाप्ये कपालञ्च पवर्गके । 25ab
यवर्गे शवकीतादि शवर्गे लोहमादिशेत् ॥ 25cd
हवर्गे रजतं तद्वदवर्गाच्चानर्थकरानपि । 26ab
प्रीक्ष्यात्मभिः करापूरैरष्टाङ्गुलमृदन्तरैः ॥ 26cd
पादोनं खातमापूर्य्य सजलैर्मुद्गराहतैः[1] । 27ab
लिप्तां समप्लवां तत्र कारयित्वा भुवं गुरुः ॥ 27cd
सामान्यार्घ्यकरो यायान्मण्डपं वक्ष्यामाणकं । 28ab
तोरणद्वाःपतीनिष्ट्वा प्रत्यग्द्वारेण संविशेत् ॥ 28cd
कुर्य्यात्तत्रात्मशुद्ध्यादि कुण्डमण्डपसंस्कृतिं । 29ab
कलसं वर्द्धनीसक्तं[2] लोकपालशिवार्च्चनं ॥ 29cd
अग्नेर्जननपूजादि सर्व्वं पूर्ववदाचरेत् । 30ab
यजमानान्वितो[3] यायाच्छिलानां स्नानमण्डपं ॥ 30cd
शिलाः प्रासादलिङ्गस्य पादधर्म्मादिसञ्ज्ञकाः । 31ab
अष्टाङ्गुलोच्छ्रिताः शस्ताश्चतुरस्राः करायताः ॥ 31cd
पाषाणानां शिलाः कार्य्या इष्टकानां तदर्द्धतः । 32ab
प्रासादे ऽश्मशिलाः शैले इष्टका इष्टकामये ॥ 32cd
अङ्किता नववक्त्राद्यैः[4] पङ्कजाः पङ्कजाङ्किताः । 33ab
नन्दा भद्रा जया रिक्ता पूर्णाख्या पञ्चमी मता[5] ॥ 33cd
आसां पद्मो महापद्मः शङ्खो ऽथ मकरस्तथा । 34ab
समुद्रश्चेति पञ्चामी निधिकुम्भाः क्रमादधः ॥ 34cd
नन्दा भद्रा जया पूर्णा अजिता चापराजिता । 35ab

---

1 मुशलैर्मुद्गराहतैरिति ङ॰ ।
2 वर्द्धनीयुक्तमिति ग॰ , ङ॰ च ।
3 यजमानार्चित इति घ॰ ।
4 नवरुद्राद्यैरिति घ॰ ।
5 “पाषाणानामित्यादिः, पञ्चमीर्मता” इत्यन्तः श्लोकद्वयात्मकपाठो ग॰ पुस्तके नास्ति ।

विजया मङ्गलाख्या च धरणी नवमी शिला ॥ 35cd
सुभद्रश्च विभद्रश्च सुनन्दः पुष्पनन्दकः[1] । 36ab
जयो ऽथ विजयश्चैव कुम्भः पूर्णस्तथोत्तरः[2] ॥ 36cd
नवानान्तु यथासङ्ख्यं निधिकुम्भा अमी नव । 37ab
आसनं प्रथमं दत्त्वा[3] ताड्योल्लिख्य शराणुना[4]॥ 37cd
सर्वासामविशेषेण तनुत्रेणावगुण्ठनं[5] । 38ab
मृद्भिर्गोमययोगामूत्रकषायैर्गन्धवारिणा ॥ 38cd
अस्त्रेण हूं फडन्तेन[6] मलस्नानं समाचरेत् । 39ab
विधिना पञ्चगव्येन स्नानं पञ्चामृतेन च ॥ 39cd
गन्धतोयान्तरं कुर्य्यान्निजनामाङ्किताणुना[7] । 40ab
फलरत्नसुवर्णानां गोशृङ्गसलिलैस्ततः ॥ 40cd
चन्दनेन समालभ्य[8] वस्त्रैराच्छादयेच्छिलां । 41ab
स्वर्णोत्थमासनं दत्वा नीत्वा यागंप्रदक्षिणं ॥ 41cd
शय्यायां कुशतल्पे वा हृदयेन निवेशयेत्[9] । 42ab
सम्पूज्य न्यस्य बुद्ध्यादिधरान्तं तत्त्वसञ्चयं ॥ 42cd
त्रिखण्डव्यापकं तत्त्वत्रयञ्चानुक्रमान् न्यसेत् । 43ab
बुद्ध्यादौ चित्तपर्य्यन्ते चिन्तातन्मात्रकावधौ[10] ॥ 43cd

1 पुष्पदन्तक इत् ख° , ग° , घ° , ङ° च ।

2 पूर्वस्तथोत्तर इति घ° ।

3 प्रणवं दत्वा इति ख° ।

4 शरात्मनेति ख° , ग° , च ।

5 तन्मात्रेणावगुण्ठनमिति ख° ।

6 हुं फडन्तेनेति ग° ।

7 कुर्य्याद् द्विजनामाङ्कितात्मनेति ख° । कुर्य्यान् निजनामाङ्कितात्मनेति ग° ।

8 समालिप्येति ग° ।

9 कुशतल्पे वा हृदयेन विशेषयेत् इति ख° । कुशतल्पे च हृदयेन निवेशयेत् इति ग° ।

10 बुद्ध्यादौ चित्तपर्यन्ते चित्ततन्मात्रकावधौ इति घ° । सम्पच्य इत्यादिः तन्मात्रकावधावित्यन्तः सार्द्धैकश्लोकपाठो ग° पुस्तके नास्ति ।

तन्मात्रादौ धरान्ते च शिवविद्यात्मनां स्थितिः । 44ab
तत्त्वानि निजमन्त्रेण तत्त्वेशांश्च हृदा ऽर्च्चयेत् ॥ 44cd
स्थानेषु पुष्पमालादिचिह्नितेषु यथाक्रमं । 45ab

ओं हूं(1) शिवतत्त्वाय नमः । ओं हूं(2) शिवतत्त्वाधिपतये रुद्राय नमः । ओं हां विद्यातत्त्वाय नमः । ओं हां(3) विद्यातत्त्वाधिपाय(4) विष्णवे नमः । ओं हां आत्मतत्त्वाय नमः । ओं हां आत्मतत्त्वाधिपतये ब्रह्मणे नमः(5) ।

क्षमाग्नियजमानार्कान् जलवातेन्दुखानि च ॥ 45cd
प्रतितत्त्वं न्यसेदष्टौ मूर्त्तीः प्रतिशिलां शिलां । 46ab
सर्वं पशुपतिं चोग्रं[6] रुद्रं भवमथेश्वरं[7] ॥ 46cd
महादेवं च भीमं च मूर्त्तीशांश्च यथाक्रमात् । 47ab
ओं धरामूर्त्तये नमः, ओं धराधिपतये नमः,
इत्यादिमन्त्रान् लोकपालान् यथासङ्ख्यं निजाणुभिः[8] ॥ 47cd
विन्यस्य पूजयेत् कुम्भांस्तन्मन्त्रैर्वा निजाणुभिः[9] । 48ab
इन्द्रादीनां तु वीजानि वक्ष्यमाणक्रमेण तु ॥ 48cd
लूं रूं शूं पूं वूं यूं मूं हूं क्षमिति(10) ।
उक्तो नवशिलापक्षः शिला पञ्चपदा तथा । 49ab

---

1,2 ओं ह्रं इति ग॰ , घ॰ च ।

3 ओं हीं इति घ॰ ।

4 विद्यातत्त्वाधिपतये इति ख॰ ।

5 ओं हूं शिवतत्त्वाधिपतये इत्यादिः, ओं हां आत्मतत्त्वाधिपतये ब्रह्मणे नम इत्यन्तः पाठो ग॰ पुस्तके नास्ति ।

6 पशुपतिं भीममिति घ॰ ।

7 भवमखेश्वरम् इति घ॰ ।

8,9 निजात्मभिरिति ख॰ , ग॰ । विन्यस्येत्यर्द्धश्लोको ग॰ पुस्तके नास्ति ।

10 ओं हूं घूं बूं यूं मूं हं क्षमितीति ग॰ । ओं कं सूं पूं शूं ह्रूं क्षमितीति घ॰ । लूं रूं शूं पूं वूं चूं मूं हूं क्षूमितीति ख॰ ।

प्रतितत्त्वं न्यसेन्मूर्त्तीः सृष्ट्या पञ्च धरादिकाः ॥ 49cd
ब्रह्मा विष्णुस्तथा रुद्र ईश्वरश्च सदाशिवः । 50ab
एते च पञ्च मूर्त्तीशा यष्टव्यास्तासु[1] पूर्ववत् ॥ 50cd
ओं पृथ्वीमूर्त्तये नमः । ओं पृथ्वीमूर्त्त्यधिपतये ब्रह्मणे नमः । इत्यादि मन्त्राः ।
सम्पूज्य कलशान् पञ्च क्रमेण निजनामभिः । 51ab
निरुन्धीत[2] विधानेन न्यासो मध्यशिलाक्रमात् ॥ 51cd
कुर्य्यात् प्राकारमन्त्रेण भूतिदर्भैस्तिलैस्ततः । 52ab
कुण्डेषु धारिकां शक्तिं विन्यस्याभ्यर्च्य तर्पयेत् ॥ 52cd
तत्त्वतत्त्वाधिपान् मूर्त्तीर्मूर्त्तीशांश्च[3] घृतादिभिः । 53ab
ततो ब्रह्मांशशुद्ध्यर्थं मूलाङ्गं ब्रह्मभिः क्रमात् ॥ 53cd
कृत्वा शतादिपूर्णान्तं प्रोक्ष्याः शान्तिजलैः शिलाः[4] । 54ab
पूजयेच्च कुशैः स्पृष्ट्वा प्रतितत्त्वमनुक्रमात् ॥ 54cd
सांन्निध्यमथ सन्धानं कृत्वा शुद्धं[5] पुनर्न्यसेत्[6] । 55ab
एवं भागत्रये कर्म्म गत्वा गत्वा समाचरेत् ॥ 55cd
ओं आं ईं आत्मतत्त्वविद्यातत्त्वाभ्यां नमः[7] इति । 56ab

1 न्यस्तव्यास्तासु इति ख॰ ।

2 निबध्नीतीति ख॰ , ग॰ , ङ॰ च ।

3 तत्र तत्राधिपान् मूर्त्तीर्मूर्त्तीशांश्चेति ङ॰ । तन्त्रतत्त्वाधिपान् मूर्त्तीर्मूर्त्तीशांस्वेति ख॰ ।

4 प्रोक्ष्य शान्तिजलैः शिलामिति ख॰ । प्रोक्ष्य शान्तिजलैः शिला इति ग॰ , घ॰ च ।

5 कृत्वा मन्त्रमिति ग॰ ।

6 सान्निध्यमित्यर्धश्लोको ङ॰ पुस्तके नास्ति । सान्निध्यमथ सन्धानं इत्यतः परः “ह्रस्वदीर्घप्रयो गतः” इत्यतः प्राङ्मध्वगपाठो घ॰ पुस्तके नास्ति ।

7 ओं आं हां आत्मतत्त्वविद्यातत्त्वाय नम इति ग॰ । ओं आं इं उं विद्यातत्त्वशिवतत्त्वाभ्यां नम इति ङ॰ । ओं आं इं आत्मविद्यातत्त्वाय नम इति ख॰ ।

संस्पृशेद् दर्भमूलाद्यैर्ब्रह्माङ्गादित्रयं क्रमात् । 56ab
कुर्यात्तत्त्वानुसन्धानं ह्रस्वदीर्घप्रयोगतः ॥ 56cd
ओं ह्रां उं[1] विद्यातत्त्वशिवतत्त्वाभ्यां नमः । 57ab
घृतेन मधुना पूर्णांस्ताम्रकुम्भान् सरत्नकान् । 57cd
पञ्चगव्यार्घ्यसंसिक्तान्[2] लोकपालाधिदैवतान् ॥ 57॥ 57ef
पूजयित्वा निजैर्म्मन्त्रैः सन्निधौ होममाचरेत् । 58ab
शिलानामथ सर्वासां संस्मरेदधिदेवताः ॥ 58cd
विद्यारूपाः कृतस्नाना हेमवार्णाः शिलाम्वराः । 59ab
न्यूनादिदोषमोषार्थं[3] वास्तुभूमेश्च शुद्धये । 59cd
यजेदस्त्रेण मूर्द्धान्तमाहुतीनां[4] शतं शतं ॥ 59॥ 59ef

इत्यादिमहापुराणे आग्नेये शिलान्यासकथनं नाम द्विनव-
तितमो ऽध्यायः ॥

# 93

## अथ त्रिनवतितमो ऽध्यायः ।

वास्तुपूजादिविधानम् ।
ईश्वर उवाच ।
ततः प्रासादमासूत्र्य वर्त्तयेद्वास्तुमण्डपं[5] । 1ab
कुर्य्यात् कोष्ठचतुःषष्टिं क्षेत्रे वेदास्रके समे ॥ 1cd
कोणेषु विन्यसेद् वंशौ[6] रज्जवो ऽष्टौ विकोणगाः । 2ab

1 ओं इं उं इति घ॰ , ङ॰ च ।
2 पञ्चगव्येन संसिक्तान् इति ग॰ ।
3 न्यूनादिदोषनाशार्थमिति घ॰ ।
4 यजेदस्त्रेण शुद्ध्यर्थमाहुतीनामिति घ॰ ।
5 वास्तुमण्डलमिति ग॰ ङ॰ । तत इति श्लोकार्धं घ॰ पुस्तके नास्ति
।
6 विन्यसेद्वंशमिति ख॰ ।

द्विपदाः षट्पदास्तास्तु वास्तुन्तत्रार्च्चयेद् यथा ॥ 2cd
आकुञ्चितकचं[1] वास्तुमुत्तानमसुराकृतिं[2] । 3ab
स्मरेत् पूजासु कुड्यादिनिवेशे उत्तराननं ॥ 3cd
जानुनी कूर्परौ शक्थि दिशि वातहुताशयोः । 4ab
पैत्र्यां पादपुटे रौद्र्यां शिरो ऽस्य हृदये ऽञ्जलिः ॥ 4cd
अस्य देहे समारूढा देवताः पूजिताः शुभाः । 5ab
अष्टौ कोणाधिपास्तत्र कोणार्द्धेष्वष्टसु स्थिताः[3] ॥ 5cd
षट्पदास्तु मरीच्याद्या दिक्षु पूर्वादिषु क्रमात् । 6ab
मध्ये चतुष्पदो ब्रह्मा शेषास्तु पदिकाः[4] स्मृताः ॥ 6cd
समस्तनाड़ीसंयोगे महामर्म्मानुजं फलं । 7ab
त्रिशूलं स्वस्तिकं वज्रं[5] महास्वस्तिकसम्पुटौ ॥ 7cd
त्रिकटुं[9] मणिबन्धं च सुविशुद्धं पदं तथा । 8ab
इति द्वादश मर्म्माणि वास्तोर्भित्त्यादिषु त्यजेत् ॥ 8cd
साज्यमक्षतमीशाय पर्जन्यायाम्बुजोदकं । 9ab
ददीताथ जयन्ताय पताकां कुङ्कुमोज्ज्वलां[7] ॥ 9cd
रत्नवारि महेन्द्राय रवौ धूम्रं वितानकं । 10ab
सत्याय घृतगोधूममाज्यभक्तं भृशाय च ॥ 10cd
विमांसमन्तरीक्षाय शकुन्तेभ्यस्तु पूर्वतः । 11ab
मधुक्षीराज्यसम्पूर्णां प्रदद्याद्वह्नये स्रुचं ॥ 11cd
लाजान् पूर्णं सुवर्णाम्बु वितथाय निवेदयेत् । 12ab

---

1 आकुञ्चितकरमिति घ॰ ।

2 कुर्य्यादित्यादिः मुत्तानमसुराकृतिमित्यन्तः श्लोकद्वयात्मकपाठो ग॰ पुस्तकके नास्ति ।

3 कोणार्द्धेषु व्यवस्थिता इति घ॰ ।

4 पादिका इति ख॰ ।

5 मुष्टिकं वक्त्वरमिति ख॰ ।

6 त्रिकोष्ठमिति ग॰ ।

7 ददीतेति अर्द्धश्लोको ग॰ पुस्तके नास्ति ।

दद्याद् गृहक्षते क्षौद्रं[1] यमराजे पलौदनं[2] ॥ 12cd
गन्धं गन्धर्वनाथाय जिह्वां भृङ्गाय पक्षिणः । 13ab
मृगाय पद्मपर्णानि[3] याम्यामित्यष्टदेवताः[4] ॥ 13cd
पित्रे तिलोदकं क्षीरं वृक्षजं दन्तधावनं । 14ab
दौवारिकाय देवाय प्रदद्याद् धेनुमुद्रया[5] ॥ 14cd
सुग्रीवाय दिशेत् पूपान् पुष्पदन्ताय दर्भकं । 15ab
रक्तं प्रचेतसे पद्मसुराय[6] सुरासवं ॥ 15cd
घृतं गुड़ौदनं शेषे रोगाय घृतमण्डकान् । 16ab
लाजान् वा पश्चिमाशायां देवाष्टकमितीरितं ॥ 16cd
मारुताय ध्वजं पीतं नागाय नागकेशरं । 17ab
मुख्ये भक्ष्याणि भल्लाटे मुद्गसूपं सुसंस्कृतं ॥ 17cd
सोमाय पायसं साज्यं शालूकमूषये[7] दिशेत् । 18ab
लोपीमदितये दित्यै पुरीमित्युत्तराष्टकं[8] ॥ 18cd
मोदकान् ब्रह्मणः प्राच्यां षट्पादाय मरीचये । 19ab
सवित्रे रक्तपुष्पाणि वह्न्यधःकोणकोष्ठके ॥ 19cd
तदधःकोष्ठके दद्यात् सावित्र्यै च कुशोदकं[9] । 20ab
दक्षिणे चन्दनं[10] रक्तं षट्पदाय विवस्वते ॥ 20cd
हरिद्रौदनमिन्द्राय रक्षोधःकोणकोष्ठके । 21ab

1 भूतक्षये रौद्रमिति ख° , छ° च । गृहकृते क्षौद्रमिति घ° ।
2 फलौदनमिति ख° , घ° च ।
3 यवपर्णानीति घ° । पद्मवर्णानीति ख° छ° च ।
4 याम्यामित्यष्टदेवता इति ख° ।
5 प्रदद्यादघमुद्रयेति ख° । प्रदद्याद्घनमुद्रयेति घ° , छ° च ।
6 पद्मं सम्बरायेति घ° ।
7 शालूकं शृणयेति ख° , छ° च ।
8 पुरीमित्यवराष्टकमिति ग° ।
9 सवित्रे च कुशोदकमिति ग° ।
10 सावित्र्यै चन्दनमिति ग° ।

इन्द्रजयाय मिश्रान्नमिन्द्राधस्तान्निवेदयेत् ॥ 21cd
वरुण्यां षट्पदासीने मित्रे सङ्ङ्मोदनं । 22ab
रुद्राय घृतसिद्धान्नं वायुकोणाधरे पदे ॥ 22cd
तदधो रुद्रदासाय मासं मार्गमथोत्तरे । 23ab
ददीत माषनैवेद्यं[1] षट्पदस्थे धराधरे[2] ॥ 23cd
आपाय शिवकोणाधः तद्वत्साय च तत्स्थले[3] । 24ab
क्रमाद्दद्याद्दधिक्षीरं पूजयित्वा विधानतः ॥ 24cd
चतुष्पदे निविष्टाय ब्रह्मणे मध्मदेशतः । 25ab
पञ्चगव्याक्षतोपेतञ्चरुं साज्यं निवेदयेत् ॥ 25cd
ईशादिवायुपर्य्यन्तकोणेष्वथ यथाक्रमं । 26ab
वास्तुवाह्ये चरक्याद्याश्चतस्रः पूजयेद् यथा ॥ 26cd
चरक्यै[4] सघृतं मांसं विदार्य्यै[5] दधिपङ्कजे । 27ab
पूतनायै पलं पित्तं रुधिरं च निवेदयेत् ॥ 27cd
अस्थीनि पापराक्षस्यै रक्तपित्तपलानि च । 28ab
ततो माषौदनं[6] प्राच्यां स्कन्दाय विनिवेदयेत् ॥ 28cd
अर्य्यम्णे दक्षिणाशायां पूपान् कृसरया युतान् । 29ab
जम्भकाय[7] च वारुण्यामामिषं रुधिरान्वितं ॥ 29cd
उदीच्यां पिलिपिञ्जाय[8] रक्तान्नं कुसुमानि च । 30ab
यजेद्वा सकलं वास्तुं कुशदध्यक्षतैर्जलैः ॥ 30cd

1 मांसनैवेद्यमिति ख॰ , छ॰ , च ।

2 वराधरे इति घ॰ ।

3 आपवत्सचतुष्टये इति ख॰ । तद्वत्सायै च तत्तले इति घ॰ , ज॰ च ।

4 वाराह्यै इति ङ॰ , छ॰ च ।

5 विपचे इति ख॰ , छ॰ च ।

6 ततो मांसौदनमिति ख॰ , घ॰ , छ॰ च ।

7 कुम्भकायेति छ॰ ।

8 पिलिपिच्छायेति ङ॰ । लिपिपिञ्जायेति छ॰ ।

गृहे च नगरादौ च एकाशीतिपदैर्यजेत् । 31ab
त्रिपदा रज्जवः कार्य्याः षट्पदाश्च विकोणके ॥ 31cd
ईशाद्याः पादिकास्तस्मिन्नागाद्याश्च द्विकोष्ठगाः[1] । 32ab
षट्पदस्था मरीच्याद्या ब्रह्मा नवपदः स्मृतः ॥ 32cd
नगरग्रामखेटादौ वास्तुः शतपदो ऽपि[2] वा । 33ab
वंशद्वयं कोणगतं दुर्जयं दुर्द्धरं सदा ॥ 33cd
यथा देवालये न्यासस्तथा शतपदे हितः । 34ab
ग्रहाः स्कन्दादयस्तत्र विज्ञेयाश्चैव षट्पदाः ॥ 34cd
चरक्याद्या भूतपदा रज्जुवंशादि पूर्ववत् । 35ab
देशसंस्थापने[3] वास्तु चतुस्त्रिंशच्छतं[4] भवेत् ॥ 35cd
चतुःषष्टिपदो[5] ब्रह्मा मरीच्याद्याश्च देवताः । 36ab
चतुःपञ्चाशत्पदिका आपाद्यष्टौ रसाग्निभिः ॥ 36cd
ईशानाद्या नवपदाः स्कन्दाद्याः शक्तिकाः[6] स्मृताः । 37ab
चरक्याद्यास्तद्वदेव रज्जुवंशादि पूर्ववत्[7] ॥ 37cd
ज्ञेयो वंशसहस्रैस्तु वास्तुमण्डलगः पदैः । 38ab
न्यासो नवगुणस्तत्र कर्त्तव्यो देशवास्तुवत् ॥ 38cd
पञ्चचिंशत्पदो वास्तुर्वैतालाख्यश्चितौ स्मृतः । 39ab
अन्यो नवपदो वास्तुः षोडशाङ्घ्रिस्तथापरः ॥ 39cd
षडस्रत्र्यस्रवृत्तादेर्म्मध्ये स्याच्चतुरस्रकं । 40ab

---

1 नागाद्याश्चार्द्धकोष्ठगा इति ख° , छ° च ।

2 शतपदे ऽपीति ग° ।

3 दशमं स्थापने इति ख° , ग° , घ° , ङ° , छ° च° ।

4 चतुर्विंशच्छतमिति ग° ।

5 चतुःषष्टिपदे इति घ° ।

6 ईशानाद्याः शिवपदा स्कन्दाद्याः पदिका इति घ° ।

7 समञ्च स्थापने वास्तुश्चतुस्त्रिंशच्छतं भवेदिति घ° पुस्तके ऽधिकः पाठः । चतुःषष्टिपदो ब्रह्मा इत्यादिः, रज्जुवंशादि पूर्ववत् इत्यन्तः पाठो ग° पुस्तके नास्ति ।

खाते वास्तोः समं पृष्टे[1] न्यासे ब्रह्मशिलात्मके ॥ 40cd
शाषाकस्य निवेशे च[2] मूर्त्तिसंस्थापने तथा । 41ab
पायसेन तु नैवेद्यं सर्वेषां वा प्रदापयेत् ॥ 41cd
उक्तानुक्ते तु वै वास्तुः पञ्चहस्तप्रमाणतः । 42ab
गृहप्रासादमानेन वास्तुः श्रेष्ठस्तु सर्वदा[4] ॥ 42cd

इत्यादिमहपुराणे आग्नेये वास्तुपूजाकथनं नाम त्रिनवतितमो ऽध्यायः ॥

## 94

### अथ चतुर्णवतितमो ऽध्यायः ।

शिलाविन्यासविधानं ।
ईश्वर उवाच ।
ईशादिषु चरक्याद्याः[5] पूर्ववत् पूजयेद्बहिः । 2ab
आहुतित्रितयं दद्यात् प्रतिदेवमनुक्रमात् ॥ 2cd
दत्वा भूतबलिं लग्ने शिलान्यासमनुक्रमात् । 3ab
मध्यसूत्रे[6] न्यसेच्छक्तिं कुम्भञ्चानन्तमुत्तमं[7] ॥ 3cd
नकारारूढमूलेन कुम्भे ऽस्मिन् धारयेच्छिलां । 4ab
कुम्भानष्टौ सभद्रादीन् दिक्षु पूर्वादिषु क्रमात् ॥ 4cd
लोकपालाणुभिर्न्यस्य[8] श्वभ्रेषु[6] न्यस्तशक्तिषु । 5ab

---

1 खातारम्भे समं पृष्ठे इति ङ॰ । खातो बालोः समः पृष्ठे इति छ॰ ।
2 निवेशेनेति ख॰ , छ॰ च ।
3 परं हस्तप्रमानत इति छ॰ ।
4 सर्वद इति ख॰ , घ॰ , छ॰ च । सर्वश इति ग॰ , च ।
5 ईशाद्यादिषु ब्रह्माद्या इति ग॰ ।
6 मध्ये श्वभ्र इति घ॰ ।
7 कुम्भञ्चानन्तमन्तिकमिति घ॰ , छ॰ च । कुम्भञ्चानन्तमन्तिममिति ङ॰ ।
8 लोकपालात्मभिर्न्यस्येदिति ख॰ , छ॰ च । लोकपालाणुभिर्न्यस्येदिति ङ॰ ।
9 सूत्रेष्विति क॰ । कुम्भेष्विति ग॰ ।

शिलास्तेष्वथ[1] नन्दाद्याः क्रमेण[2] विनिवेशयेत् ॥ 5cd
शम्बरैर्मूर्त्तिनाथानां[3] यथा स्युर्भित्तिमध्यतः । 6ab
तासु धर्म्मादिकानष्टौ[4] कोणात् कोणं विभागशः[5] ॥ 6cd
सुभद्रादिषु नन्दाद्याश्चतस्रो ऽग्न्यादिकोणगाः । 7ab
अजिताद्याश्च पूर्वादिजयादिष्वथ[6] विन्यसेत् ॥ 7cd
ब्रह्माणं चोपरि नस्य[7] व्यापकं च महेश्वरं । 8ab
चिन्तयेदेषु चाधानं व्योमप्रसादमध्यगं ॥ 8cd
बलिन्दत्त्वा जपेदस्त्रं विघ्नदोषनिवारणं[8] । 9ab
शिलापञ्चकपक्षे ऽपि मनागुद्दिश्यते यथा ॥ 9cd
मध्ये पूर्णशिलान्यासः[9] सुभद्रकलशे ऽर्द्धतः । 10ab
पद्मादिषु च नन्दाद्याः कोणेष्वग्न्यादिषु क्रमात् ॥ 10cd
मध्यभावे[10] च तस्रो ऽपि मातृवद्भावसम्मताः । 11ab
ओं पूर्णे त्वं महाविश्वे[11] सर्वसन्दोहलक्षणे ॥ 11cd
सर्वसम्पूर्णमेवात्र कुरुष्वाङ्गिरसः सुते । 12ab
ओं नन्दे त्वं नन्दिनी पुंसां त्वामत्र स्थापयाम्यहं ॥ 12cd
प्रासादे तिष्ठ सन्तृप्ता यावच्चन्द्रार्कतारकं । 13ab
आयुः कामं श्रियन्नन्दे देहि वासिष्ठ देहिनां[12] ॥ 13cd

---

1 शिलाद्यास्तथेति क॰ ।
2 क्रमश इति घ॰ ।
3 शम्बरैर्मूर्त्तिनाधानामिति ख॰ , छ॰ च । शम्बरैर्मूर्त्तिमाधानमिति ङ॰ ।
4 तान् सुधर्म्मादिकानष्टौ इति ख॰ ।
5 विभागत इति घ॰ ।
6 पूर्वादिजयादिषु चेति ग॰ ।
7 ब्रह्माणं चोपविन्यस्येति ख॰ , घ॰ , ङ॰ , छ॰ , च ।
8 विघ्नदोषनिवारकमिति ग॰ ।
9 पूर्वशिलान्यास इति घ॰ ।
10 मध्याभावे इति ख॰ , ग॰ च ।
11 महाभागे इति ग॰ ।
12 देहि मामिति ख॰ , छ॰ च । देहि न इति घ॰ ।

अस्मिन् रक्षा सदा[1] कार्य्या प्रासादे यत्नतस्त्वया । 14ab
ओं भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि ॥ 14cd
आयुर्दा कामदा देवि[2] श्रीप्रदा च सदा भव । 15ab
ओं जये ऽत्र सर्वदा देवि श्रीदा ऽऽयुर्दा च सदा भव[3] ॥ 15cd
ओं जये ऽत्र सर्वदा[4] देवि तिष्ठ त्वं स्थापिता मय[5] । 16ab
नित्यञ्जयाय भूत्यै च स्वामिनी भव भार्गवि ॥ 16cd
ओं रिक्ते ऽतिरिक्तदोषघ्ने[6] सिद्धिमुक्तिप्रदे शुभे । 17ab
सर्वदा सर्वदेशस्थे तिष्ठास्मिन् विश्वरूपिणि[7] ॥ 17cd
गगनायतनन्ध्यात्वा तत्र तत्त्वत्रयं[8] न्यसेत् । 18ab
प्रायश्चित्तन्ततो हुत्वा विधिना विसृजेन्मखं ॥ 18cd

इत्यादिमहापुराणे आग्नेये शिलान्यासकथनं नाम चतुर्णवतितमो ऽध्यायः ॥

## 95

### अथ पञ्चनवतितमो ऽध्यायः ।

प्रतिष्ठा सामग्रीविधानं ।
ईश्वर उवाच ।
वक्ष्ये लिङ्गप्रतिष्ठां च प्रासादे भुक्तिमुक्तिदां । 1ab
ताश्चरेत् सर्वदा मुक्तौ भुक्तौ देवदिने सति[9] ॥ 1cd
विना चैत्रेण माघादौ प्रतिष्ठा मासपञ्चके । 2ab

---

1 मुदा इति ख° छ° च ।
2 कामदे देवीति घ° ।
3 जयेत्रेत्यर्द्धश्लोकः छ° पुस्तके नास्ति ।
4 ओं जय एनं सदेति ख° छ° च ।
5 मम इति ङ° ।
6 रक्तातिरक्तदोषघ्न इति छ° । रक्तात्रिरक्तदोषघ्ने इति ख° ।
7 सन्तिष्ठास्मिन्नीशरूपिणीति घ° । शर्परूपिणीति ज° ।
8 तत्त्वे तत्त्वत्रयमिति घ° ।
9 सर्वदा मुक्तौ देवादेवे ग्रहे सतीति घ° । सर्वदा मुक्त्यै भुक्त्यै दैवदिने सतीति ङ° ।

गुरुशुक्रोदये कार्य्या प्रथमे करणत्रये ॥ 2cd
शुक्लपक्षे विशेषेण कृष्णे वा पञ्चमन्दिनं[1] । 3ab
चतुर्थीनवमीं षष्ठीं वर्जयित्वा चतुर्दशीं ॥ 3cd
शोभनास्तिथयः शषाः क्रूरवारविवर्जिताः । 4ab
शतभिषा धनिष्ठार्द्रा अनुरोधोत्तरत्रयं[2] ॥ 4cd
रोहिणी श्रवणश्चेति[3] स्थिरारम्भे महोदयाः । 5ab
लग्नञ्च कुम्भसिंहालितुलास्त्रीवृषधन्विनां ॥ 5cd
शस्तो जीवो नवर्क्षेषु सप्तस्थानेषु सर्वदा । 6ab
बुधः षडष्टदिक्सप्ततुर्येषु विनर्तुं[4] शितः ॥ 6cd
सप्तर्त्तुत्रिदशादिस्थः[5] शशाङ्को बलदः सदा[6] । 7ab
रविर्दशत्रिषट्संस्थो राहुस्त्रिदशषड्गतः ॥ 7cd
षट्त्रिस्थानगताः शस्ता मन्दाङ्गारार्ककेतवः । 8ab
शुभाः क्रूरश्च पापाश्च सर्व एकादशस्थिताः ॥ 8cd
एषां दृष्टिर्मुनौ पूर्णा[7] त्वार्द्धिकी ग्रहभूतयोः । 9ab
पादिकी रामदिक्स्थाने चतुरष्टौ[8] पादवर्जिता ॥ 9cd
पादान्यूनचतुर्नाडी भोगः स्यान्मीनमेषयोः । 10ab
वृषकुम्भौ च भुञ्जाते चतस्रः पादवर्जिताः ॥ 10cd
मकरो मिथुनं पञ्च चापालिहरिकर्क्कटाः । 11ab
पादीनाः षट् तुलाकन्ये घटिकाः सार्द्धपञ्च च ॥ 11cd

---

1 कृष्णेप्यापञ्चमं दिनमिति ख॰ , छ॰ च । कृष्णेप्यापञ्चमाह्निनादिति घ॰ ।

2 अनुराधोत्तरात्रयमिति च॰ ।

3 श्रवणश्चैते इति च॰ ।

4 बुधः षड्तुतुर्येषु दिक्सप्ताह विनेति छ॰ । बुधः षड्दव्यष्टतुर्षेषु दिक्सप्तषड् विनेति ख॰ ।

5 सप्तायत्रिदशादिस्थ इति ख॰ छ॰ च ।

6 बुधः षडष्टदिगित्यादिः, बलदः सदा इत्यन्तः पाठो ग॰ पुस्तके नास्ति ।

7 एवं दृष्टिवले पूर्णादिति छ॰ । एवं दृष्टिवले पूर्णेति ख॰ ।

8 वस्वष्टौ इति ख॰, छ॰ च ।

केशरी वृषभः कुम्भः स्थिराः स्युः सिद्धिदायकाः । 12ab
चरा धनुस्तुलामेषा द्विःस्वभावास्तृतीयकाः[1] ॥ 12cd
शुभः[2] शुभग्रहैर्दृष्टः शस्तो लग्नः शुभाश्रितः[3] । 13ab
गुरुशुक्रबुधैर्युक्तो लग्नो दद्याद्बलायुषी[4] ॥ 13cd
राज्यं शौर्य्यं[5] बलं पुत्रान् यशोधर्म्मादिकं बहु । 14ab
प्रथमः सप्तमस्तुर्य्यो दशमः केन्द्र उच्यते ॥ 14cd
गुरुशुक्रबुधास्तत्र सर्वसिद्धिप्रदायकाः । 15ab
त्र्येकादशचतुर्थस्था[6] लग्नात् पापग्रहाः शुभाः ॥ 15cd
अतोप्यनीचकर्मार्थं[7] योज्यास्तिथ्यादयो बुधैः । 16ab
धाम्नः पञ्चगुणां भूमिं त्यक्त्वा वा धानसम्मितां[8] ॥ 16cd
हस्ताद् द्वादशसोपानात्[9] कुर्य्यान्मण्डमग्रतः । 17ab
चतुरस्रं चतुर्द्वारं स्नानार्थन्तु[10] तदर्द्धतः ॥ 17cd
एकास्यं चतुरास्यं वा रौद्र्यां प्राच्युत्तरेथवा[11] । 18ab
हास्तिको दशहस्तो वै मण्डपोर्ककरो ऽथवा ॥ 18cd
द्विहस्तोत्तरया वृद्ध्या[12] शेषं स्यान्मण्डपाष्टकं । 19ab

1 कर्कटो मकरो द्विस्थः प्रव्रज्याकार्य्यनाशकाः । गुरुशक्रबुधास्तत्र सर्वसिद्धिप्रदायका इति ग॰ , घ॰ पुस्तके ऽधिकः पाठः ।

2 स्थिर इति ग॰ ।

3 शुभान्वित इति ख॰ , छ॰ च ।

4 धनायुषीति ग॰ ।

5 राज्यं सौख्यमिति ख॰ ।

6 द्व्येकादशचतुर्थस्था इति छ॰ । त्र्येकादशेत्यर्द्धश्लोको ग॰ पुस्तके नास्ति ।

7 अतोन्येनिष्ठकर्मार्थमिति ख॰ , घ॰ , छ॰ च ।

8 त्यक्त्वा वा चापसम्मितामिति ख॰ । त्यक्त्वा वा रामसम्मितामिति छ॰ ।

9 हस्ताद्वा दशसोपानादिति ख॰ । हस्तान् वा दश सोपानादिति ख॰ ।

10 स्नानार्थं चेति ङ॰ ।

11 प्राच्युतरे तथेति ङ॰ ।

12 द्विहस्तोत्तरयावृत्त्या इति घ॰ ।

वेदी चतुष्करा मध्ये कोणस्तम्भेन संयुता[1] ॥ 19cd
वेदीपादान्तरं त्यक्त्वा[2] कुण्डानि नव पञ्च वा । 20ab
एकं वा शिवकाष्ठायां[3] प्राच्यां वा तद्गुरोः परं ॥ 20cd
मुष्टिमात्रं शतार्द्धे स्याच्छते चारत्निमात्रकं[4] । 21ab
हस्तं सहस्रहोमे स्यान्नियुते तु द्विहास्तिकं[5] ॥ 21cd
लक्षे चतुष्करं कुण्डं कोटिहोमे ऽष्टहस्तकं । 22ab
भगाभमग्नौ[6] खण्डेन्दु दक्षे त्र्यस्रञ्च नैर्ऋते ॥ 22cd
षडस्रं वायवे पद्मं[7] सौम्ये चाष्टास्रकं शिवे । 23ab
तिर्य्यक्पातशिवं खातमूर्द्धं[8] मेखलया सह ॥ 23cd
तद्बहिर्म्मेखलास्तिस्रो वेदवह्नियमाङ्गुलैः[9] । 24ab
अङ्गुलैः षड्भिरेका वा कुण्डाकारास्तु मेखलाः ॥ 24cd
तासामुपरि योनिः स्यान्मध्ये ऽश्वत्थदलाकृतिः । 25ab
उच्छ्रायेणाङ्गुलं तस्माद्विस्तारेणाङ्गुलाष्टकं[10] ॥ 25cd
दैर्घ्यं कुण्डार्द्धमानेन कुण्डकण्ठसमो ऽधरः । 26ab
पूर्वाग्नियाम्यकुण्डानां योनिः स्यादुत्तरानना ॥ 26cd
पूर्वानना तु शेषाणामैशान्ये ऽन्यतरा तयोः । 27ab

---

1 कोणस्तम्भेषु संयुतेति क॰ , ग॰ , घ॰ च । कोणस्तम्भेषु सन्मतेति ङ॰ । कोणस्तम्भेनुसंयुतेति ख॰ , छ॰ च ।

2 वेदी पादान्तरं त्यक्तेति घ॰ , ङ॰ , च ।

3 शिवकाष्ठादौ इति ग॰ ।

4 शतार्द्धस्य शते चारन्त्निमात्रकमिति छ॰ । शतार्द्धस्य शते वारत्नि-मात्रकमिति घ॰ । शतार्द्धस्य शते वा वह्निमात्रकमिति ङ॰ ।

5 द्विहस्तकमिति ख॰ ।

6 खड्गाभमग्नौ इति ख॰ , ग॰ , ङ॰ , छ॰ च ।

7 पद्मे इति ख॰ , घ॰ च ।

8 तिर्य्यक् पातसममूर्द्धमिति ख॰ , ग॰ , घ॰ च ।

9 वेदवह्नि यवाङ्गुलैरिति घ॰ ।

10 तस्य विस्तरेणाङ्गुलाष्टकमिति घ॰ ।

कुण्डानां यश्चतुर्विंशो भागः सोङ्गुल इत्यतः ॥ 27cd
प्लक्षोदुम्वरकाश्वत्थवटजास्तोरणाः क्रमात् । 28ab
शान्तिभूतिबलारोग्यपूर्वाद्या नामतः क्रमात् ॥ 28cd
पञ्चषट्सप्तहस्तानि हस्तखातस्थितानि च । 29ab
तदर्द्धविस्तराणि स्युर्युतान्याम्रदलादिभिः ॥ 29cd
इन्द्रायुधोपमा रक्ता कृष्णा धूम्रा शशिप्रभा । 30ab
शुक्लाभा[1] हेमवर्णा च पताका स्फाटिकोपमा ॥ 30cd
पूर्वादितोब्जजे[2] रक्ता नीला ऽनन्तस्य[3] नैर्ऋते । 31ab
पञ्चहस्तास्तदर्द्धाश्च ध्वजा दीर्घाश्च विस्तराः ॥ 31cd
हस्तप्रदेशिता दण्डा ध्वजानां पञ्चहस्तकाः । 32ab
वल्मीकाद्दन्तिदन्ताग्रात्तथा[4] वृषभशृङ्गतः ॥ 32cd
पद्मषण्डाद्वराहाञ्च गोष्ठादपि चतुष्पथात् । 33ab
मृत्तिका द्वादश ग्राह्या वैकुण्ठेष्टौ पिनाकिनि ॥ 33cd
न्यग्रोधोदुम्वराश्वत्थचूतजम्वुत्वगुद्भवं । 34ab
कषायपञ्चकं ग्राह्यमार्त्तवञ्च फलाष्टकं ॥ 34cd
तीर्थाम्भांसि सुगन्धीनि[5] तथा सर्वौषधीजलं । 35ab
शस्तं पुष्पफलं वक्ष्ये रत्नगोशृङ्गवारि[6] च ॥ 35cd
स्नानायापाहरेत्[7] पञ्च पञ्चगव्यामृतं तथा । 36ab
पिष्टनिर्म्मितवस्त्रादिद्रव्यं निर्म्मञ्जनाय[8] च ॥ 36cd

---

1 शुक्राभेति ख॰ ।
2 पूर्वादिनो ध्वजे इति ग॰ ।
3 नीलानन्ते ऽथेति ग॰ ।
4 वल्मीकाद्धस्तिदन्ताग्रात्तयेति छ॰ ।
5 तीर्थतोयसुगन्धीनि इति ङ॰ ।
6 वर्गे गोशृङ्गवारि चेति छ॰ ।
7 स्नानायोपहरेदिति ख॰ , छ॰ , घ॰ च ।
8 पिष्टनिर्मितरुद्रादिद्रव्यं निर्म्मञ्जनायेति ग॰ । पिष्टनिर्मितवज्रादिकं निर्मथनायेति ज॰ ।

सहस्रशुषिरं कुम्भं मण्डलाय च रोचना[1] । 37ab
शतमोषधिमूलानां विजया लक्ष्मणा बला ॥ 37cd
गुडूच्यतिबला पाठा सहदेवा शतावरी । 38ab
ऋद्धिः[2] सुवर्चसा[3] वृद्धिः स्नाने प्रोक्ता पृथक् पृथक् ॥ 38cd
रक्षायै तिलदर्भौघो[4] भस्मस्नानन्तु केवलं । 39ab
यवगोधूमविल्वानां[5] चूर्णानि च विचक्षणः ॥ 39cd
विलेपनं[6] सकर्प्पूरं स्नानार्थं कुम्भगण्डकान्[7] । 40ab
खट्वाञ्च तूलिकायुग्मं सोपधानं सवस्त्रकं ॥ 40cd
कुर्य्याद्वित्तानुसारेण शयने लक्ष्यकल्पने[8] । 41ab
घृतक्षौद्रयुतं पात्रं कुर्य्यात् स्वर्णशलाकिकां ॥ 41cd
वर्द्धनीं शिवकुम्भञ्च लोकपालघटानपि । 42ab
एकं निद्राकृते कुम्भं शान्त्यर्थं कुण्डसङ्ख्यया[9] ॥ 42cd
द्वारपालादि-धर्म्मादि-प्रशान्तादि-घटानपि । 43ab
वस्तुलक्ष्मीगणेशानां कलशानपरानपि ॥ 43cd
धान्यपुञ्जकृताधारान् सवस्त्रान्[10] स्रग्विभूषितान् । 44ab

1 मङ्गलाय च रोचनेति ग॰ । मङ्गलाय च रोचनमिति ज॰ ।
2 सिद्धिरिति घ॰ ।
3 सुवर्चलेति ज॰ ।
4 तिलगर्भाद्यमिति ख॰ , घ॰ , ङ॰ , छ॰ च । तिलदर्भाज्यमिति ज॰ ।
5 यवगोधूमचूर्णानामिति घ॰ । पञ्चगोधूमविल्वानामिति छ॰ ।
6 लेपनञ्चेति ज॰ ।
7 कुम्भमण्डकानिति ख॰ । कुम्भगड्डुकानिति घ॰ । कुम्भगुण्डुकानिति ङ॰ । कुम्भसण्डकानिति छ॰ । कुम्भखण्डकानिति ज॰ ।
8 प्रायेण लक्ष्यकल्पने इति ग॰ । शयने लक्ष्यकं परे इति ज॰ ।
9 कुण्डसन्मितमिति ज॰ ।
10 सर्वांश्चेति घ॰ , ज॰ च ।

सहिरण्यान् समालब्धान् गन्धपानीयपूरितान् ॥ 44cd
पूर्णपात्रफलाधारान्[1] पल्लवाद्यान्[2] सलक्षणान् । 45ab
वस्त्रैराच्छादयेत् कुम्भानाहरेद्गौरसर्षपान् ॥ 45cd
विकिरार्थन्तथा लाजान् ज्ञानखड्गञ्च पूर्ववत् । 46ab
सापिधानां चरुस्थालीं दर्व्वींच ताम्रनिर्म्मितां[3] ॥ 46cd
घृतक्षौद्रान्वितं पात्रं पादाभ्यङ्गकृते तथा । 47ab
विष्टरांस्त्रिशतादर्भदलैर्बाहुप्रमाणकान्[4] ॥ 47cd
चतुरश्चतुरस्तद्वत् पालाशान् परिधीनपि । 48ab
तिलपात्रं हविःपात्रमर्धपात्रं पवित्रकं ॥ 48cd
फलविंशाष्टमानानि घटो धूपप्रदानकं[5] । 49ab
स्रुक्स्रुवौ पिटकं पीठं व्यजनं शुष्कमिन्धनं ॥ 49cd
पुष्पं पत्रं गुग्गुलञ्च घृतैर्द्दीपांश्च धूपकं । 50ab
अक्षतानि त्रिसूत्रीञ्च गव्यमाज्यं यवांस्तिलान् ॥ 50cd
कुशाः शान्त्यै त्रिमधुरं समिधो दशपर्विकाः । 51ab
बाहुमात्रं स्रुवं हस्तम्[6] अर्कादिग्रहशान्तये ॥ 51cd
समिधो ऽर्कपलाशोत्थाः खादिरामार्गपिप्पलाः[7] । 52ab
उदुम्वरशमीदूर्वाकुशोत्थाः शतमष्ट च ॥ 52cd
तदभावे यवतिला गृहोपकरणं तथा । 53ab
स्थालीदर्वीपिधानादि देवादिभ्यो ऽंशुकद्वयं ॥ 53cd
मुद्रामुकुटवासांसि हारकुण्डलकङ्कणान् । 54ab

1 पूर्वपात्रफलाधारानिति छ॰ ।
2 पल्लवाग्रानिति ख॰ , घ॰ , ज॰ च ।
3 कुर्व्वीत ताम्रनिर्मितामिति ख॰ ।
4 दलैर्बाहुमात्रप्रमाणत इति ग॰ ।
5 घण्टाधूपप्रदानकमिति घ॰ , छ॰ च ।
6 बाहुमात्रां स्रुचं हस्तामिति छ॰ ।
7 खादिरापाङ्गपिप्पला इति ख॰ , छ॰ , च । खादिरापामार्कपिप्पला इति घ॰ ।

कुर्य्यादाचार्यपूजार्थं[1] वित्तशाठ्यं विवर्जयेत् ॥ 54cd
तत्पादपादहीना च मूर्त्तिभृदस्त्रजापिनां[2] । 55ab
पूजा स्याज्जापिभिस्तुल्या[3] विप्रदैवज्ञशिल्पिनां ॥ 55cd
वज्रार्कशान्तौ[4] नीलातिनीलमुक्ताफलानि च[5] । 56ab
पुष्पपद्मादिरागञ्च वैदूर्य्यं रत्नमष्टमं[6] ॥ 56cd
उशीरमाधवक्रान्तारक्तचन्दनकागुरुं । 57ab
श्रीखण्डं सारिकङ्कुष्ठं[7] शङ्खिनी ह्योषधीगुणः[8] ॥ 57cd
हेमताम्रमयं रक्तं राजतञ्च[9] सकांस्यकं । 58ab
शीसकञ्चेति लोहानि हरितालं मनःशिला ॥ 58cd
गैरिकं हेममाक्षीकं पारदो[10] वह्निगैरिकं । 59ab
गन्धकाभ्रकमित्यष्टौ[11] धातवो व्रीहयस्तथा ॥ 59cd
गोधूमान् सतिलान्माषान्मुद्गानप्याहरेद्यवान् । 60ab
नीवारान् श्यामकानेवं व्रीहयो ऽप्यष्ट कीर्त्तिताः ॥ 60cd

इत्याग्नेये महापुराणे प्रतिष्ठासामग्री नाम पञ्चनवतितमो ऽध्यायः ॥

1 कुर्य्यादाचार्य्यपूजाद्यमिति घ॰ ।
2 मूर्त्तिभृच्छस्त्रजापिनामिति घ॰ ।
3 पूजा ऽस्यात् पितृभिस्तुल्येति घ॰ , ज॰ च ।
4 वस्त्रार्ककान्तौ इति ङ॰ , छ॰ , च ।
5 नीलाभं नीलमुक्ताफलानि चेति ख॰ । नीलादिनीलमुक्ताफलानि चेति ग॰ । नीलाभं नीलं मुक्ताफलानि वेति ज॰ ।
6 रत्नमष्टकमिति घ॰ , ङ॰ , ज॰ च ।
7 सारिका कुष्ठमिति ख॰ , छ॰ , च । साविकं कुष्ठमिति ज॰ ।
8 शङ्खिनीत्योषधीगण इति ङ॰ , ज॰ , च ।
9 हेमताम्रमयो रङ्गराजजञ्चेति ख॰ ।
10 पारदे इति ख॰ , छ॰ च ।
11 गन्धकत्रिकमित्यष्टौ इति घ॰ ।

# 96

## अथ षण्णवतितमो ऽध्यायः ।

अधिवासनविधिः ।

ईश्वर उवाच ।

स्नात्वा नित्यद्वयं कृत्वा[1] प्रणवार्घकरो गुरुः[2] । 1ab
सहायैर्मूर्त्तिपैर्विप्रैः[3] सह गच्छेन्मखालयं ॥ 1cd
क्षान्त्यादितोरणांस्तत्र पूर्ववत् पूजयेत् क्रमात् । 2ab
प्रदक्षिणक्रमादेषां शाखायां द्वारपालकान् ॥ 2cd
प्राचि नन्दिमहाकालौ याम्ये भृङ्गिविनायकौ[4] । 3ab
वारुणे वृषभस्कन्दौ देवीचण्डौ तथोत्तरे[5] ॥ 3cd
तच्छाखामूलदेशस्थौ प्रशान्तशिशिरौ घटौ । 4ab
पर्ज्जन्याशोकनामानौ भूतं सञ्जीवनामृतौ[6] ॥ 4cd
धनदश्रीप्रदौ[7] द्वौ द्वौ पूजयेदनुपूर्वशः[8] । 5ab
स्वनामभिश्चतुर्थ्यन्तैः प्रणवादिनमोन्तगैः ॥ 5cd
लोकग्रहवसुद्वाःस्थस्रवन्तीनां[6] द्वयं द्वयं । 6ab

---

1 नित्यक्रियां कृत्वेति ङ. ।

2 प्रणवार्घ्यकरो मुनिरिति ग॰ । पुनरर्घ्यकरो मुनिरिति ङ॰ ।

3 सहायैर्ऋत्विग्विप्रैश्चेति ख॰ , घ॰ च । सहायैर्भूपतिविप्रैरिति ज॰ ।

4 भृङ्गविनायकाविति छ॰ ।

5 वृषोत्तरे इति ग॰ , घ॰ , ङ॰ च ।

6 भूतसञ्जीवनासुतौ इति छ॰ । भूतसञ्जीवनामृतौ इति ख॰ , ज॰ च ।

7 धनदद्विपदौ इति ख॰ । धनदौ द्विपदौ इति घ॰ । धनदश्वापदौ इति ज॰ ।

8 पूजयेदथ पूर्वश इति ग॰ ।

9 लोकग्रहवसुद्वाःस्थहस्तादीनामिति ग॰ ।

भानुत्रयं युगं वेदो लक्ष्मीर्गणपतिस्तथा[1] ॥ 6cd
इति देवामखागारे[2] तिष्ठन्ति प्रतितोरणं । 7ab
विघ्नसङ्घापनोदाय क्रतोः संरक्षणाय च ॥ 7cd
वज्रं शक्तिं तथा दण्डं[3] खड्गं[3] पाशं ध्वजं गदां । 8ab
त्रिशूलं चक्रमम्भोजम्पताकास्वर्च्चयेत्[4] क्रमात् ॥ 8cd
ओं ह्रूं फट् नमः । ओं ह्रूं फट् द्वाःस्थशक्तये ह्रूं फट् नमः (5) इत्यादिमन्त्रैः ।
कुमुदः कुमुदाक्षश्च पुण्डरीकोथ वामनः । 9ab
शङ्कुकर्णः सर्वनेत्रः सुमुखः[6] सुप्रतिष्ठितः ॥ 9cd
ध्वजाष्टदेवताः[7] पूज्याः पूर्वादौ[8] भूतकोटिभिः । 10ab
ओं कौं कुमुदाय नम इत्यादिमन्त्रैः ॥ 10cd
हेतुकं त्रिपुरघ्नञ्च शक्त्याख्यं[9] यमजिह्वकं[10] । 11ab
कालं करालिनं षष्ठमेकाङ्घ्रिम्भीममष्टकं ॥ 11cd
तथैव पूजयेद् दिक्षु क्षेत्रपालाननुक्रमात् । 12ab

---

1 भानुत्रयं युगं वेदो लक्ष्मीकुलपतिस्तथेति ख॰ , ग॰ , छ॰ च । भानुत्रययुगं वेदो वेदो लक्ष्मीपतिस्तथेति ज॰ ।

2 देवामरागरे इति ख॰ , ग॰ , घ॰ , ङ॰ , छ॰ च ।

3 तथा कुण्डमिति ख॰ , छ॰ च । तथा चण्डमिति ज॰ ।

4 पताकामर्चयेदिति ग॰ । पताकासु यजेदिति ङ॰ ।

5 हुं फट् नमः, ओं हुं फट् द्वाः स्थशक्तये हुं फट् नम इति ख॰ । ओं क्रूं फट् नमः । ओं क्रूं फट् द्वाःस्थशक्तये क्रूं फट् नम इति छ॰ । ओं हुं फट् वक्राय हुं फट् नम इति ग॰ । ओं हुं फट् वज्राय हुं फट् नम इति ङ॰ ।

6 प्रमुख इति ज॰ ।

7 ध्वजाश्च देवता इति ग॰ ।

8 पूजादौ इति ङ॰ , ज॰ च ।

9 बुद्धाख्यमिति ग॰ । बुद्ध्याख्यमिति ज॰ ।

10 अजजिह्वकमिति ज॰ ।

बलिभिः कुसुमैर्धूपैः सन्तुष्टान् परिभावयेत्[1] ॥ 12cd
कम्बलास्तृतेषु वर्णेषु वंशस्थूणास्वनुक्रमात्[2] । 13ab
पञ्च क्षित्यादितत्त्वानि सद्योजातादिभिर्यजेत् ॥ 13cd
सदाशिवपदव्यापि मण्डपं[3] धाम शाङ्करं । 14ab
पताकाशक्तिसंयुक्तं[4] तत्त्वदृष्ट्यावलोकयेत्[5] ॥ 14cd
दिव्यान्तरिक्षभूमिष्ठविघ्नानुत्सार्य्य पूर्ववत् । 15ab
प्रविशेत् पश्चिमद्वारा शेषद्वाराणि दर्शयेत्[6] ॥ 15cd
प्रदक्षिणक्रमाद्गत्वा निविष्टोवेदिदक्षिणे । 16ab
उत्तराभिमुखः कुर्य्याद् भूतशुद्धिं यथा पुरा ॥ 16cd
अन्तर्य्यागं विशेषार्घ्यं मन्त्रद्रव्यादिशोधनं । 17ab
कुर्व्वीत आत्मनः[7] पूजां पञ्चगव्यादि पूर्ववत् ॥ 17cd
साधारङ्कलसन्तस्मिन् विन्यसेत्तदनन्तरं । 18ab
विशेषाच्छिवतत्त्वाय तत्त्वत्रयमनुक्रमात् ॥ 18cd
ललाटस्कन्धपादान्तं शिवविद्यात्मकं परं । 19ab
रुद्रनारायणब्रह्मदैवतं निजसञ्चरैः[8] ॥ 19cd

1 प्रविभावयेदिति ख° , छ° च ।

2 काक्षीतृणेषु वर्गेषु वंशे स्थूलाननुक्रमात् इति ख° । काष्ठातृणेषु वर्णेषु वंशे स्थूलाननुक्रमात् इति छ° । काक्षीतृणेषु वंशेषु स्थूणास्वन्येष्वनुक्रमात् इति घ° । कक्षां दृशेम्बरांशे च तृणानन्येष्वानुक्रमादिति ज° । कन्यातृणेषु रत्नेषु वंशेस्थूणाननुक्रमादिति ङ° ।

3 मण्डलमिति ङ° ।

4 पिनाकशक्तिसंयुक्तामिति घ° ।

5 तत्तु दृष्ट्यावलोकयेदिति ख° , छ° च ।

6 शेषद्वाराणि चङ्क्रमेदिति ख° , छ° च । शेषद्वाराणि पूजयेदिति छ° ।

7 स्वात्मन इति ख° , घ° , छ° , ज° च ।

8 निजसंवरैरिति ग° , ङ° च । निजसञ्चयैरिति घ° ।

ओं हं हां(1) ।
मूर्त्तीस्तदीश्वरांस्तत्र पूर्ववद्विनिवेशयेत् । 20ab
तद्व्यापकं शिवं साङ्गं शिवहस्तञ्च मूर्द्धनि ॥ 20cd
ब्रह्मरन्ध्रप्रविष्टेन तेजसा वाह्यसान्तरं[2] । 21ab
तमःपटलमाधूय प्रद्योतितदिगन्तरं[3] ॥ 21cd
आत्मानं मूर्त्तिपैः सार्द्धं स्रग्वस्त्रकुसुमादिभिः[4] । 22ab
भूषयित्वा शिवोस्मीति ध्यात्वा बोधासिमुद्धरेत् ॥ 22cd
चतुष्पदान्तसंस्कारैः[5] संस्कुर्य्यान्मखमण्डपं । 23ab
विक्षिप्य विकिरादीनि कुशकूर्चोपसंहरेत्[6] ॥ 23cd
आसनीकृत्य वर्द्धन्यां वास्त्वादीन् पूर्ववद्यजेत् । 24ab
शिवकुम्भास्त्रवर्द्धन्यौ पूजयेच्च स्थिरासने[7] ॥ 24cd
स्वदिक्षु कलशारूढांल्लोकपालाननुक्रमात् । 25ab
वाहायुधादिसंयुक्तान् पूजयेद्विधिना यथा ॥ 25cd
ऐरावतगजारूढं स्वर्णवर्णं[8] किरीटिनं । 26ab
सहस्रनयनं शक्रं वज्रपाणिं विभावयेत् ॥ 26cd
सप्तार्च्चिषं च विभ्राणमक्षमालां कमण्डलुं । 27ab
ज्वालामालाकुलं रक्तं[9] शक्तिहस्तमजासनं ॥ 27cd

1 उं हां हां इति ख॰ , ग॰ , घ॰ , ङ॰ , छ॰ च । ओं ईं आं इति घ॰ , ज॰ च ।
2 तेजसा वाह्यमन्तरमिति ख॰ । तेजसा वाह्याभ्यन्तरमिति छ॰ । तेजसा वाह्यमान्तरमिति ग॰ , घ॰ , ङ॰ च ।
3 प्रविष्टोनुदिगन्तरमिति घ॰ , ज॰ च ।
4 स्रग्वस्त्रमुकुटादिभिरिति घ॰ , ज॰ च ।
5 चतुष्पथार्णसंस्कारैरिति छ॰ ।
6 कुशदूर्वोपसंहरेदिति ग॰ ।
7 शिवकुम्भास्त्रवर्द्धन्यां पूजयेदस्थिरासने इति घ॰ , ज॰ च ।
8 वर्णवस्त्रमिति ग॰ । स्वर्णवस्त्रमिति ख॰ , ज॰ , च ।
9 कालं मालाकुलं रक्तमिति ख॰ , ग॰ , ङ॰ , छ॰ च । कालं मालाकुलं, व्यक्तमिति ग॰ । ज्वालामालाकुलं सक्तमिति घ॰ ।

महिषस्थं दण्डहस्तं यमं कालानलं स्मरेत् । 28ab
रक्तनेत्रं खरारूढं[1] खड्गहस्तञ्च नैर्ऋतं ॥ 28cd
वरुणं मकरे श्वेतं नागपाशधरं स्मरेत् । 29ab
वायुं च हरिणे नीलं कुवेरं मेघसंस्थितं[2] ॥ 29cd
त्रिशूलिनं वृषे चेशं कूर्म्मेनन्तन्तु चक्रिणं । 30ab
ब्रह्माणं हंसगं ध्यायेच्चतुर्वक्त्रं चतुर्भुजं ॥ 30cd
स्तम्भमूलेषु कुम्भेषु वेद्यां धर्मादिकान्[3] यजेत् । 31ab
दिक्षु कुम्भेष्वनन्तादीन् पूजयन्त्यपि केचन ॥ 31cd
शिवाज्ञां श्रावयेत् कुम्भं भ्रामयेदात्मपृष्ठगं[4] । 32ab
पूर्ववत् स्थापयेदादौ कुम्भं तदनु वर्द्धनीं ॥ 32cd
शिवं स्थिरासनं[5] कुम्भे शस्त्रार्थञ्च[6] ध्रुवासनं । 33ab
पूजयित्वा यथापूर्वं स्पृशेदुद्भवमुद्रया ॥ 33cd
निजयागं[7] जगन्नाथ रक्ष भक्तानुकम्पया । 34ab
एभिः संश्राव्य रक्षार्थं कुम्भे खड्गं निवेशयेत्[8] ॥ 34cd
दीक्षास्थापनयोः कुम्भे स्थण्डिले मण्डले ऽथवा । 35ab
मण्डलेभ्यर्च्य देवेशं व्रजेद्वै कुण्डसन्निधौ ॥ 35cd
कुण्डनाभिं पुरस्कृत्य निविष्टा मूर्त्तिधारिणः । 36ab
गुरोरादेशतः कुर्युर्न्निजकुण्डेषु[9] संस्कृतिं ॥ 36cd

---

1 शवारूढमिति ग॰ , घ॰ , ङ॰ , ज॰ च ।
2 मानुषस्थितमिति घ॰ ।
3 कर्म्मादिकानिति ज॰ ।
4 भ्रामयेदनुपूज्य तमिति ज॰ । भ्रामयेदनुपृष्ठगमिति घ॰ ।
5 स्थिरासने इति ख॰ , घ॰ च ।
6 शस्त्राणुञ्चेति ख॰ , ग॰ , छ॰ च ।
7 इमं यागमिति ङ॰ ।
8 शङ्खन्निवेदयेदिति ग॰ । खड्गन्निवेदयेदिति घ॰ , ङ॰ च ।
9 कुर्य्युर्न्निजकुम्भेष्विति ख॰ , घ॰ , छ॰ , ज॰ च ।

जपेयुर्जापिनः सङ्ख्यां[1] मन्त्रमन्ये तु संहितां[2] । 37ab
पठेयुर्ब्राह्मणाः शान्तिं स्वशाखावेदपारगाः ॥ 37cd
श्रीसूक्तं पावमानीश्च[3] मैत्रकञ्च वृषाकपिं । 38ab
ऋग्वेदी सर्वदिग्भागे सर्वमेतत् समुच्चरेत्[4] ॥ 38cd
देवव्रतन्तु भारुण्डं[5] ज्येष्ठसाम रथन्तरं । 39ab
पुरुषं गीतिमेतानि सामवेदी तु दक्षिणे ॥ 39cd
रुद्रं पुरुषसूक्तञ्च श्लोकाध्यायं विशेषतः । 40ab
ब्राह्मणञ्च यजुर्वेदी पश्चिमायां समुच्चरेत्[6] ॥ 40cd
नीलरुद्रं तथाथर्वी सूक्ष्मासूक्ष्मन्तथैव च । 41ab
उत्तरे ऽथर्वशीर्षञ्च[7] तत्परस्तु समुद्धरेत् ॥ 41cd
आचार्य्यश्चाग्निमुत्पाद्य प्रतिकुण्डं प्रदापयेत्[8] । 42ab
वह्नेः पूर्वादिकान् भागान्[9] पूर्वकुण्डादितः[10] क्रमात् ॥ 42cd
धूपदीपचरूणाञ्च ददीताग्निं समुद्धरेत्[11] । 43ab
पूर्ववच्छिवमभ्यर्च्य शिवाग्नौ मन्त्रतर्पणं ॥ 43cd
देशकालादिसम्पत्तौ[12] दुर्न्निमित्तप्रशान्तये । 44ab

---

1 जापिनोसङ्ख्यमिति क॰ , ङ॰ , छ॰ च ।
2 अस्त्रमन्ये तु संस्थितमिति ग॰ । अस्त्रमन्ये तु संहितामिति ङ॰ ।
3 पावमानीन्तु इति ज॰ ।
4 सर्वमेतत् समुद्धरेदिति ख॰ , ग॰ , घ॰ , छ॰ , ज॰ च । सर्वमस्त्रं समुद्धरेदिति ङ॰ ।
5 भावज्ञमिति छ॰ । श्रीकुण्डमिति ङ॰ ।
6 समुद्धरेदिति ख॰ , घ॰ , ङ॰ , छ॰ , ज॰ च ।
7 उत्तरेथर्वसूक्तञ्चेति ग॰ ।
8 प्रदीपयेदिति घ॰ ।
9 पूर्वादिदिग्भागादिति ज॰ । पूर्वादिकाद्भागादिति घ॰ ।
10 सर्वकुण्डादित इति ख॰ , छ॰ , च ।
11 आचार्य्यश्चाग्निमुत्पाद्येत्यादिः ददीताग्निं समुद्धरेदित्यन्तः पाठो ग॰ पुस्तके नास्ति ।
12 देशकालादिसङ्ख्याप्तौ इति घ॰ ।

होमङ्कृत्वा तु मन्त्रज्ञः पूर्णां दत्त्वा शुभावहां ॥ 44cd
पूर्ववच्चरुकं कृत्वा प्रतिकुण्डं निवेदयेत्[1] । 45ab
यजमानालङ्कृतास्तु व्रजेयुः स्नानमण्डपं ॥ 45cd
भद्रपीठे निधायेशं[2] ताडयित्वावगुण्ठयेत् । 46ab
स्नापयेत्[3] पूजयित्वा तु मृदा काषायवारिणा ॥ 46cd
गोमूत्रैर्गोमयेनापि वारिणा चान्तरान्तरा । 47ab
भस्मना गन्धतोयेन फडन्तास्त्रेण वारिणा ॥ 47cd
देशिको मूर्त्तिपैः सार्द्धं कृत्वा कारणशोधनं[4] । 48ab
धर्मजप्तेन सञ्छाद्य[5] पीतवर्णेन वाससा ॥ 48cd
सम्पूज्य सितपुष्पैश्च[6] नयेदुत्तरवेदिकां । 49ab
तत्र दत्तासनायाञ्च शय्यायां सन्निवेश्य च[7] ॥ 49cd
कुङ्कुमालिप्तसूत्रेण विभज्य गुरुरालिखेत् । 50ab
शलाकया सुवर्णस्य अक्षिणी शस्त्रकर्मणा[8] ॥ 50cd
अञ्जयेल्लक्ष्मकृत् पश्चाच्छास्त्रदृष्टेन कर्मणा । 51ab
कृतकर्मा च शस्त्रेण लक्ष्मी शिल्पी समुत्क्षिपेत्[9] ॥ 51cd
त्र्यंशादर्द्धोथ[10] पादार्द्धादर्द्धाया अर्द्धयोथवा[11] । 52ab

---

1 निवेशयेदिति ख॰ ,घ॰ च ।

2 भद्रपीठे निधायैनमिति ख॰ , छ॰ , च । तत्र पीठे विधायेशमिति ङ॰ । भद्रपीठे विधायेशमिति घ॰ ।

3 स्नपयेदिति ख॰ , ग॰ , ङ॰ च ।

4 कृचा चाकारशोधनामिति घ॰ , ज॰ च ।

5 धर्मजप्तेन संस्थाप्येति ग॰ । धर्म्मजलेन सञ्छाद्येति ङ॰ ।

6 सम्पूज्य सितवस्त्रैश्चेति ग॰ । सम्पूज्यसितपुष्पैस्तु इति घ॰ ।

7 सन्निवेशयेदिति छ॰ ।

8 शास्त्रकर्म्मणेति ख॰ , ग॰ , छ॰ , ज॰ च । शास्त्रवर्मणेति घ॰ । शास्त्रकर्म्मणि इति ड॰ ।

9 समुत्किरेत् इति घ॰ , ज॰ च ।

10 त्र्यंशादप्यथेति घ॰ । त्र्यंशादधोथेति ज॰ ।

11 अर्द्धतो ऽपिवेति ग॰ । अर्द्धतो वरमिति ज॰ ।

सर्वकामप्रसिद्ध्यर्थं शुभं लक्ष्मावतारणं[1] ॥ 52cd
लिङ्गदीर्घविकारांशे त्रिभक्तं भागवर्णनात्[2] । 53ab
विस्तारो लक्ष्म देहस्य भवेल्लिङ्गस्य[3] सर्वतः ॥ 53cd
यवस्य नवभक्तस्य भागैरष्टाभिरावृता[6] । 54ab
हस्तिके[5] लक्ष्मरेखा च गाम्भीर्य्याद् विस्तरादपि[7] ॥ 54cd
एवमष्टांशवृद्ध्या तु लिङ्गे सार्द्धकरादिके । 55ab
भवेदष्टयवा[8] पृथ्वी गम्भीरात्र च हास्तिके ॥ 55cd
एवमष्टांश वृद्ध्यातु लिङ्गे सार्द्धकरादिके । 56ab
भवेदष्टयवा पृथ्वी गम्भीरान्नवहास्तिके[6] ॥ 56cd
शाम्भवेषु[10] च लिङ्गेषु पादवृद्धेषु सर्वतः[11] । 57ab
लक्ष्म देहस्य विष्कम्भो भवेद्वै यववर्द्धनात् ॥ 57cd
गम्भीरत्वपृथुत्वाभ्यां रेखापि त्र्यंशवृद्धितः[12] । 58ab
सर्वेषु च भवेत् सूक्ष्मं लिङ्गमस्तकमस्तकं ॥ 58cd

---

1 लक्ष्मावतारकमिति घ॰ ।

2 त्रिभुक्ते भाववर्णनादिति क॰ । त्रिभुक्ते भागवर्जनादिति घ॰ । त्रिभक्ते भागवर्जनादिति ज॰ । त्रिभुक्ते भागवर्त्तनादिति ङ॰ । विभक्ते भाववर्णनादिति छ॰ ।

3 भवेल्लिङ्गेषु सर्वत इति ख॰ , ग॰ , ङ॰ , छ॰ च ।

4 नवभक्तस्य भागैरष्टाभिराहतेति ख॰ , छ॰ च । भवभक्तस्य भागैरष्टाभिराहतेति ज॰ । नवभक्तस्य भागैरष्टाभिरादृतेति घ॰ ।

5 हास्तिकं इति ग॰ , घ॰ , च ।

6 गम्भीरा नवहास्तिके इति घ॰ ।

7 लिङ्गे वृद्धिकरादिके इति ख॰ । लिङ्गेषु द्विकरादिषु इति ग॰ । लिङ्गे वृद्धिकरादिषु इति ख॰ , घ॰ च ।

8 भवेदष्टकरेति घ॰ ।

9 गम्भीरा नवहास्तिके इति ग॰ । गम्भीरा नवहस्तके इति ज॰ ।

10 सोत्तरेषु इति ज॰ ।

11 यवस्य नवभक्तस्येत्यादिः । पादवृद्धेषु सर्वत इत्यन्तः पाठो ङ॰ पुस्तके नास्ति ।

12 द्व्यंशवृंहितेति ख॰ , घ॰ , छ॰ च । त्र्यंशवृंहितेति ङ॰ । द्व्यंशवृद्धित इति ज॰ ।

लक्ष्मक्षेत्रेष्टधाभक्ते मूर्ध्निभागद्वये शुभे[1] । 59ab
षड्भागपरिवर्तेन मुक्त्वा भागद्वयन्त्वधः[2] ॥ 59cd
रेखात्रयेण सम्बद्धं[3] कारयेत् पृष्टदेशगं । 60ab
रत्नजे लक्षणोद्धारो यवौ हेमसमुद्भवे ॥ 60cd
स्वरूपं लक्षणन्तेषां प्रभा रत्नेषु निर्मला । 61ab
नयनोन्मीलनं वक्त्रे[4] सान्निध्याय च लक्ष्म तत् ॥ 61cd
लक्ष्मणोद्धाररेखाञ्च घृतेन मधुना तथा । 62ab
मृत्युञ्जयेन[5] सम्पूज्य शिल्पिदोषनिवृत्तये ॥ 62cd
अर्च्चयेच्च[6] ततो लिङ्गं स्नापयित्वा मृदादिभिः । 63ab
शिल्पिनन्तोषयित्वा तु दद्याद्गां गुरवे ततः ॥ 63cd
लिङ्गं धूपादिभिः प्राच्यं गायेयुर्भर्तृगास्त्रयः । 64ab
सव्येन चापसव्येन सूत्रेणाथ कुशेन वा ॥ 64cd
स्मृत्वा च रोचनं दत्वा कुर्यान्निर्मञ्जनादिकं[7] । 65ab
गुडलवणधान्याकदानेन विसृजेच्च ताः ॥ 65cd
गुरुमूर्त्तिधरैः[8] सार्द्धं हृदा वा प्रणवेन वा । 66ab
मृत्स्नागोमयगोमूत्रभस्मभिः[9] सलिलान्तरं ॥ 66cd
स्नापयेत् पञ्चगव्येन पञ्चामृतपुरःसरं[10] । 67ab

---

1 मूर्त्तिभागद्वये च्युते इति ज° । मूर्त्तिभागद्वये युते इति ज° ।
2 मुक्त्वा भागद्वयं बुध इति ख° , ग° , घ° , ङ° , छ° च ।
3 ससिद्धमिति ग° , ज° च ।
4 व्यक्ते इति ग° , घ° , ज° च ।
5 मृत्युञ्जयञ्चेति ग° ।
6 अर्च्चयेत्तु इति ग° , ज° च ।
7 पुष्पावरोधनं दत्वा कुर्य्यान्निर्मन्थनादिकमिति ज° । स्पृष्ट्वा च रोचनां दत्वा कुर्यान् निर्मञ्जनादिकमिति ङ° ।
8 गुरुमूर्त्तिर्यवैरिति ख° , ङ° , ज° च ।
9 ततो मृण्मयगोमूत्रभस्मभिरिति ग° ।
10 स्नापयेदित्यर्द्धश्लोको छ° पुस्तके नास्ति ।

विरूक्षणं कषायैश्चसर्वौषधिजलेन वा ॥ 67cd
शुभ्रपुष्पफलस्वर्णरत्नशृङ्गयवोदकैः[1] । 68ab
तथा धारासहस्रेण दिव्यौषधिजलेन च[2] ॥ 68cd
तीर्थोदकेन गाङ्गेन चन्दनेन च वारिणा । 69ab
क्षीरार्णवादिभिः[3] कुम्भैः शिवकुम्भजलेन च[4] ॥ 69cd
विरूक्षणं विलेपञ्च[5] सुगन्धैश्चन्दनादिभिः । 70ab
सम्पूज्य ब्रह्मभिः[6] पुष्पैर्वर्मणा रक्तचीवरैः[7] ॥ 70cd
रक्तरूपेण[8] नीराज्य रक्षातिलकपूर्वकं । 71ab
घृतौधैर्जलदुग्धैश्च कुशाद्यैरर्घ्यसूचितैः ॥ 71cd
द्रव्यैः स्तुत्यादिभिस्तुष्टमर्चयेत्[9] पुरुषाणुना[10] । 72ab
समाचम्य[11] हृदा देवं ब्रूयादुत्थीयतां प्रभो ॥ 72cd
देवं ब्रह्मरथेनैव क्षिप्रं द्रव्याणि तन्नयेत्[12] । 73ab
मण्डपे पश्चिमद्वारे शय्यायां विनिवेशयेत् ॥ 73cd
शक्त्यादिशक्तिपर्य्यन्ते[12] विन्यसेदासने शुभे । 74ab

1 ओड्रपुष्पफलस्वर्णशृङ्गगवोदकैरिति ग° ।
2 दिव्यौषधिजलेन वा इति ग° ।
3 क्षारार्णवादिभिरिति ङ° , छ° , ज° च ।
4 सरः कुम्भजलेन तु इति ज° ।
5 विकर्षणं विलेपञ्चेति घ° , ज° च ।
6 बहुभिरिति ज° ।
7 ब्रह्मणा रक्तचन्दनैरिति ग° । ब्रह्मणा रक्तजीवकैरिति ङ° ।
8 बहुरूपेण इति ग° , घ° , ज° च ।
9 स्तुत्यादिभिस्तुत्यमर्चयेदिति ख° , छ° च ।
10 पुरुषात्मनेति ख° , ग° , घ° , छ° च ।
11 समाचर्य्येति ग° ।
12 तर्पयेदिति ख° , छ° च ।
13 शक्त्यादिमूर्त्तिपर्य्यन्ते इति ख° , घ° , ज° च ।

पश्चिमे पिण्डिकान्तस्य न्यसेद्ब्रह्मशलान्तदा[1] ॥ 74cd
शस्त्रमस्त्र[2] शतालब्धनिद्राकुम्भधृवासनं[3] । 75ab
प्रकल्प्य शिवकोणे च दत्वार्घ्यं हृदयेन तु ॥ 75cd
उत्थाप्योक्तासने लिङ्गं शिरसा पूर्वमस्तकं । 76ab
समारोप्य न्यसेत्तस्मिन्[4] सृष्ट्या धर्मादिवन्दनं[5] ॥ 76cd
दद्याद्धूपञ्च सम्पूज्य तथा वासांसि वर्मणा । 77ab
गृहोपकृतिनैवेद्यं हृदा दद्यात् स्वशक्तितः[6] ॥ 77cd
घृतक्षौद्रयुतं पात्रमभ्यङ्गाय पदान्तिके । 78ab
देशिकश्च स्थितस्तत्र षट्त्रिंशत्तत्त्वसञ्चयं[7] ॥ 78cd
शक्त्यादिभूमिपर्य्यन्तं स्वतत्त्वाधिपसंयुतं । 79ab
विन्यस्य पुष्पमालाभिस्त्रिखण्डं[8] परिकल्पयेत् ॥ 79cd
मायापदेशशक्त्यन्तन्तुर्य्याशाष्टांशवर्त्तुलं[9] । 80ab
तत्रात्मतत्त्वविद्याख्यं[10] शिवं सृष्टिक्रमेण तु[11] ॥ 80cd
एकशः प्रतिभागेषु ब्रह्मविष्णुहराधिपान् । 81ab
विन्यस्य मूर्त्तिमूर्त्तीशान् पूर्वादिक्रमतो यथा ॥ 81cd
क्ष्मावह्निर्यजमानार्कजलवायुनिशाकरान् । 82ab

---

1 ब्रह्मशिलान्तथेति ख॰ , ङ॰ , छ॰ , ज॰ च ।
2 शस्त्रमन्त्रेति ख॰ , ग॰ , घ॰ , ङ॰ , छ॰ च ।
3 निद्राकुम्भ धृवासनमिति ज॰ ।
4 व्यसेदस्मिन्निति ज॰ ।
5 सृष्ट्या धर्म्मादिबन्धनमिति ख॰ । सृष्ट्यादिरर्घ्यादिबन्धनमिति छ॰ ।
6 गृहोपकृतीत्यर्द्धश्लोको ग॰ पुस्तके नास्ति ।
7 षड्लिङ्गतनुसञ्चयमिति ज॰ । षड्विंशतत्त्वसञ्चयमिति घ॰ ।
8 त्रिशृङ्गमिति ग॰ ।
9 मायाशादशशक्त्यन्ततूर्या ग्राह्या प्रवर्त्तनमिति ज॰ । मायापदेशेति अर्द्धश्लोको घ॰ पुस्तके नास्ति ।
10 तत्रानुतत्त्वविध्याख्यमिति ज॰ ।
11 सृष्टिक्रमेण चेति ग॰ ।

आकाशमूर्त्तिरूपांस्तान् न्यसेत्तदधिनायकान् ॥ 82cd
सर्वं पशुपतिं[1] चोग्रं रुद्रं भवमखेश्वरं[2] । 83ab
महादेवञ्च भीमञ्च मन्त्रास्तद्वाचका इमे ॥ 83cd
लवशषचयसाश्च हकारश्च त्रिमात्रिकः । 84ab
प्रणवो हृदयाणुर्वा मूलमन्त्रो ऽथवा क्वचित् ॥ 84cd
पञ्चकुण्डात्मके यागे[3] मूर्तीः पञ्चाथवा न्यसेत् । 85ab
पृथिवीजलतेजांसि वायुमाकाशमेव च ॥ 85cd
क्रमात्तदधिपान् पञ्च[4] ब्रह्माणं धरणीधरं । 86ab
रुद्रमीशं सदाख्यञ्च सृष्टिन्यायेन मन्त्रवित्[5] ॥ 86cd
मुमुक्षोर्वा निवृत्ताद्याः[6] अजाताद्यास्तदीश्वराः[7] । 87ab
त्रितत्त्वं वाथ[8] सर्वत्र न्यसेद्व्याप्त्यात्मकारणं[9] ॥ 87cd
शुद्धे चात्मनि विद्येशा अशुद्धे लोकनायकाः । 88ab
द्रष्टव्या मूर्त्तिपाश्चैव भोगिनो मन्त्रनायकाः ॥ 88cd
पञ्चविंशत्तथैवाष्टपञ्चत्रीणि यथाक्रमं । 89ab
एषान्तत्त्वं तदीशानामिन्द्रादीनां ततो[10] यथा ॥ 89cd

ओं हां शक्तितत्त्वाय नम इत्यादि(11) । ओं हां शक्तितत्त्वाधिपाय(12) नम इत्यादि । ओं हां क्ष्मामूर्त्तये नमः । ओं हां क्ष्मामूर्त्त्यधीशाय(13)

---

1 गर्भे पशुपतिमिति ज॰ ।

2 भवमथेश्वरमिति ग॰ ,छ॰ , ज॰ च ।

3 पञ्चदण्डात्मके मार्गे इति ज॰ । पञ्चदण्डात्मके यागे इति ङ॰ ।

4 तदधिपालञ्चेति ख॰ ।

5 सृष्टिन्यासेन मन्त्रविदिति ख॰ , घ॰ , ङ॰ च । सृष्टिन्यासेन पूर्वविदिति ज॰ ।

6 मुमुञ्चोर्विनिवृत्ताद्या इति ख॰ ।

7 अजात्याद्यास्तदीश्वरा इति ख॰ ।

8 त्रितत्त्वं चाथेति घ॰ , ज॰ च ।

9 व्याप्यात्मकारणमिति ख॰ । व्याप्त्या स्वकारणमिति घ॰ , ङ॰ च ।

10 इन्द्रादीशान्तत इति ख॰ , घ॰ , ङ॰ , छ॰ च ।

11 नम इतीति घ॰ , ज॰ च ।

12 शब्दतत्त्वाधिपतये इति ख॰ , घ॰ , छ॰ च ।

13 सूक्ष्ममूर्त्तये इति घ॰ ।

शिवाय नम इत्यादि । ओं ह्रां पृथिवीमूर्त्तये नमः । ओं ह्रां मूर्त्त्यधिपाय(1) ब्रह्मणे नम इत्यादि । ओं ह्रां शिवतत्त्वाधिपाय(2) रुद्राय नम इत्यादि ।

नाभिकन्दात्समुच्चार्य्य घण्टानादविसर्प्पणं[3] । 90ab
ब्रह्मादिकारणत्यागाद् द्वादशान्तसमाश्रितं ॥ 90cd
मन्त्रञ्च मनसा भिन्नं प्राप्तानन्दरसोपमं । 91ab
द्वादशान्तात्समानीय निष्कलं[4] व्यापकं शिवं ॥ 91cd
अष्टत्रिंशत्कलोपेतं सहस्रकिरणोज्ज्वलं । 92ab
सर्वशक्तिमयं साङ्गं ध्यात्वा लिङ्गे[5] निवेशयेत् ॥ 92cd
जीवन्यासो भवेदेवं लिङ्गे सर्वार्थसाधकः । 93ab
पिण्डिकादिषु तु न्यासः[6] प्रोच्यते साम्प्रतं यथा ॥ 93cd
पिण्डिकाञ्च कृतस्नानां[7] विलिप्ताञ्चन्दनादिभिः । 94ab
सद्वस्त्रैश्च समाच्छाद्य[8] रन्ध्रे च भगलक्षणे ॥ 94cd
पञ्चरत्नादिसंयुक्तां[9] लिङ्गस्योत्तरतः स्थितां । 95ab
लिङ्गवत्कृतविन्यासां[10] विधिवत्सम्प्रपूजयेत् ॥ 95cd
कृतस्नानादिकान्तत्र लिङ्गमूले शिलां[11] न्यसेत् । 96ab
कृतस्नानादिसंस्कारं शक्त्यन्तं वृषभं तथा ॥ 96cd

---

1 पृथिवीमूर्त्त्यधिपतये इति ख॰ । पृथिवी मूर्त्त्यधिपायेति ज॰ , घ॰ च ।

2 शिवतत्त्वायेति ज॰ ।

3 घण्टानादविसर्पिणमिति घ॰ , ज॰ च ।

4 निष्फलमिति ख॰ , घ॰ , ङ॰ च ।

5 लिङ्गमिति ग॰ , घ॰ , ज॰ च ।

6 विन्यास इति ग॰ ।

7 कृतस्नातामिति ख॰ , घ॰ , ज॰ च ।

8 सहस्रैः साह्मासाद्येति ज॰ ।

9 यवरत्नादिसंयुक्तामिति घ॰ , ज॰ च ।

10 लिङ्गवत्कृतविन्यासमिति ख॰ , छ॰ च ।

11 कृतस्नानादिकामिति तद्वल्लिङ्गमूले शिलामिति ख॰ , घ॰ , ङ॰ च । कृतस्नानादिकं तद्वल्लिङ्गमूले शिवामिति ज॰ ।

प्रणवपूर्वं हुं पूं ह्रीं[1] मध्यादन्यतमेन च । 97ab
क्रियाशक्तियुतां पिण्डीं शिलामाधररूपिणीं ॥ 97cd
भस्मदर्भतिलैः कुर्य्यात् प्राकारत्रितयन्ततः । 98ab
रक्षायै लोकपालांश्च सायुधान्याजयेद्बहिः[2] ॥ 98cd

ओं हूं ह्रं(3) क्रियाशक्तये नमः । ओं हूं ह्रां हः(4) महागौरी रुद्रदयिते स्वाहेति च(5) पिण्डिकायां । ओं हां(6) आधारशक्तये नमः । ओं हां वृषभाय नमः ।

धारिका दीप्तिमत्युग्रा ज्योत्स्ना चैता बलोत्कटाः । 99ab
तथा धात्री विधात्री च न्यसेद्वा पञ्चनायिकाः ॥ 99cd
वामा ज्येष्ठा क्रिया ज्ञाना[7] बेधा तिस्रोथवा न्यसेत् । 100ab
क्रियाज्ञाना तथेच्छा च[8] पूर्ववच्छान्तिमूर्त्तिषु ॥ 100cd
तमो मोहा क्षमी निष्ठा मृत्युर्मायाभवज्वराः[9] । 101ab
पञ्च चाथ महामोहा घोरा च त्रितयज्वरा ॥ 101cd

---

1 प्रणवं पूर्वं हूं प्रीं ह्रीं इति ख° । प्रणवपूर्वं हूं सूं इति ग° । प्रणवपूर्वं क्रूं सूं क्लों क्रीं इति छ° । प्रणवं पूर्वहूं स्रीं सूं ह्रीं इति घ° । प्रणवपूर्वं हूं सूं हूं इति ज° ।

2 सायुधान् पूजयेत्तत इति ख° , छ° च । सायुधान् पूजयेद्बहिरिति ग° , ङ° च । सायुधाश्च त्यजेद्बहिरिति घ° । सायुधान्याजग्रेद्बहिरिति ज° ।

3 ओं हूं ह्रीं इति ग° , ङ° च । ओं ह्रीं इति घ° । ओं ह्रीं ह्रीं स इति ग° ।

4 ओं हूं ह्रीं स इति ख° । ओं क्रूं ह्रीं स इति घ° । ओं ह्रीं ह्रीं स इति ग° । ओं ह्रीं स इति घ° , ङ° च ।

5 स्वाहेति ख° , ग° , ङ° , छ° च ।

6 ओं ह्रीं इति ख° , ग° , ङ° , छ° च ।

7 क्रिया मेधेति ङ° ।

8 तथैवेच्छेति ङ° ।

9 तमा मोहा क्षमा निष्ठा मृत्युर्माय भया ज्वरेति ख° । उमा मोहा क्षमा नित्या मृत्युर्मायाभयाज्वरा इति ज° ।

तिस्रोथवा क्रियाज्ञाना[1] तथा बाधाधिनायिका । 102ab
आत्मादित्रिषु[2] तत्त्वेषु तीव्रमूर्त्तिषु विन्यसेत् ॥ 102cd
अत्रापि पिण्डिका ब्रह्मशिलादिषु यथाविधि । 103ab
गौर्य्यादिसंवरैरेव[3] पूर्ववत् सर्वमाचरेत्[4] ॥ 103cd
एवं विधाय विन्यासं गत्वा कुण्डान्तिकं ततः । 104ab
कुण्डमध्ये महेशानं मेखलासु महेश्वरं ॥ 104cd
क्रियाशक्तिं तथान्यासु नादमोष्ठे च[5] विन्यसेत् । 105ab
घटं स्थण्डिलवह्नीशैः[6] नाडीसन्धानकन्ततः[7] ॥ 105cd
पञ्चतन्तुसमां शक्तिमुद्घातेन समुद्यतां[8] । 106ab
विशन्तीं सूर्यमार्गेण निःसरन्तीं समुद्गतां[9] ॥ 106cd
पुनश्च शून्यमार्गेण[10] विशतीं स्वस्य चिन्तयेत् । 107ab
एवं सर्वत्र सन्धेयं मूर्त्तिपैश्च परस्परं ॥ 107cd
सम्पूज्य धारिकां शक्तिं कुण्डे सन्तर्प्य च क्रमात् । 108ab
तत्त्वतत्त्वेश्वरा मुर्त्तीमूर्त्तीशांश्च[11] घृतादिभिः[12] ॥ 108cd
सम्पूज्य तर्प्पयित्वा तु सन्निधौ संहिताणुभिः[13] । 109ab

---

1 क्रियाज्ञानीति ग॰ , घ॰ च ।
2 आज्ञादित्रिषु इति घ॰ ।
3 गौर्य्यादिसञ्चरैरेवेति घ॰ , ज॰ च ।
4 पूर्ववत् सर्वमर्च्चयेदिति ख॰ , छ॰ च । पूर्ववच्च समाचरेदिति ज॰ । न्यासं पूर्ववदाचरे स दिति ङ॰ ।
5 नादमध्ये चेति ज॰ ।
6 घटं स्थण्डिलवर्गीशैरिति ख॰ , छ॰ च ।
7 नाडीसम्भारकं तत इति ज॰ ।
8 तत्त्वतत्त्वेश्वरा मूर्त्तिः स्वर्ग्या तेन समुच्यतामिति ख॰ , छ॰ च । पञ्चतत्त्वसमां शक्तिं स्वधा तेन समुद्यतामिति ङ॰ ।
9 समुद्गमानिति ज॰ ।
10 सूर्य्यमार्गेणेति छ॰ ।
11 मूर्त्ति मूर्त्तीशांश्चेति ज॰ ।
12 घटस्थण्डिलेत्यादिः, घृतादिभिरत्यन्तः पाठो घ॰ पुस्तके नास्ति ।
13 संहितात्मभिरिति ख॰ । सहितात्मभिरिति छ॰ । संघटाणुभिरिति ज॰ ।

शतं सहस्रमर्द्धं वा पूर्णया सह होमयेत्[1] ॥ 109cd
तत्त्वतत्त्वेश्वरा मूर्त्तिमूर्त्तीशांश्च करेणुकान्[2] । 110ab
तथा सन्तर्प्य सान्निध्ये जुहुयुर्मूर्त्तिपा अपि ॥ 110cd
ततो ब्रह्मभिरङ्गैश्च[3] द्रव्यकालानुरोधतः । 111ab
सन्तर्प्य शक्तिं कुम्भाम्भःप्रोक्षिते[4] कुशमूलतः ॥ 111cd
लिङ्गमूलं च संस्पृश्य[5] जपेयुर्होमसङ्ख्यया । 112ab
सन्निधानं हृदा कुर्य्युर्वर्म्मणा चावगुण्ठनं ॥ 112cd
एवं संशोध्य ब्रह्मादि[6] विष्ण्वन्तादि विशुद्धये । 113ab
विधाय पूर्ववत्सर्वं होमसङ्ख्याजपादिकम् ॥ 113cd
कुशमध्याग्रयोगेन लिङ्गमध्याग्रकं स्पृशेत् । 114ab
यथा यथा च सन्धानं तदिदानीमिहोच्यते ॥ 114cd
ओं हां हं ओं ओं ओं एं ओं भूं भूं वाह्यमूर्त्तये नमः (7)
।

---

1 एवं विधायेत्यादिः, पूर्णया सह होमयेदित्यन्तः सप्तश्लोकात्मकः पाठो ग॰ पुस्तके नास्ति ।

2 मूर्त्तिपांश्च करेणुकान् इति घ॰ , ङ॰ च ।

3 ब्रह्मभिरंशैश्चेति ख॰ , घ॰ च । ब्रह्मभिरङ्गैश्चेति छ॰ , ज॰ च ।

4 सन्तर्प्य शक्तिकुम्भाम्भःप्रोक्षिते इति क॰ । सन्तर्प्यशान्तिकुम्भस्थैः प्रोक्षिते इति ज॰ । सन्तर्प्य शान्तिकुम्भाम्भः प्रोक्षिते इति घ॰ ।

5 सम्पूज्येति ख॰ , छ॰ च ।

6 ब्रह्मादीनिति ख॰ , ग॰ , घ॰ , छ च ।

7 ओं हां हां ओं ओं ओं बीं ओं भूं भूं वास्तुमूर्त्तये नम इति ख॰ , छ॰ च । ओं हां ओं हां ओं ओं वां ओं भूं हां वां क्ष्मामूर्त्तये नम इति ज॰ । घ॰ पुस्तके भूं भूं वां इति विशेषः । ओं हां हां ओं ओं वां ओं ओं हूं हूं वाह्यमूर्त्तये नम इति ङ॰ ।

ओ ह्रां वां आं ओं आं षां ओं भूं भूं वां(1) वह्निमूर्त्तये नमः ।

एवञ्च यजमानादिमूर्त्तिभिरभिसन्धेयं[2] । 115ab
पञ्चमूर्त्यात्मकेप्येवं सन्धानं हृदयादिभिः ॥ 115cd
मूलेन स्वीयवीजैर्वा ज्ञेयन्तत्त्वत्रयात्मके[3] । 116ab
शिलापिण्डो वृषेष्वेवं पूर्णाच्छिन्नं सुसंवरैः[4] ॥ 116cd
भागाभागविशुद्ध्यर्थं होमं कुर्य्याच्छतादिकं[5] । 117ab
न्यूनादिदोषमोषाय शिवेनाष्टाधिकं शतं ॥ 117cd
हुत्वाथ[6] यत् कृतं कर्म्म शिवश्रोत्रे[7] निवेदयेत् । 118ab
एतत्समन्वितं[8] कर्म त्वच्छक्तौ च मया प्रभो ॥ 118cd
ओं नमः भगवते रुद्राय रुद्र नमोस्तु ते[9] । 119ab
विधिपूर्णमपूर्णं वा स्वशक्त्यापूर्य्य[10] गृह्यतां ॥ 119cd
ओं ह्रीं[11] शाङ्करि पूरय[12] स्वाहा इति पिण्डिकायां । 120ab
अथ लिङ्गे न्यसेज् ज्ञानी क्रियाख्यं पीठविग्रहे ॥ 120cd
आधाररूपिणीं शक्तिं न्यसेद् ब्रह्मशिलोपरि । 121ab
निबध्य[13] सप्तरात्रं वा पञ्चरात्रं त्रिरात्रकं ॥ 121cd

---

1 ओं ह्रां ह्रां वां ओं ओं वां ओं भूं भूं वां इति ख॰ , ग॰ , छ॰ च । ओं ह्रां ह्रां वां ओं ओं वां ओं ओं ओं वां हूं हूं वां इति ज॰ । ओं ओं ह्रां वां ओं ओं ओं वां ओं हूं हूं इति ङ॰ ।

2 मूर्त्तिभिरपि सन्धेयमिति घ॰ , ज॰ च ।

3 ज्ञेयं तत्तु त्रयात्मकमिति ख॰ , छ॰ च । देयं तत्र त्रयात्मके इति ङ॰ ।

4 पूर्णाच्छिन्नात्मकसंवरैरिति ख॰ , छ॰ च । पूर्णाच्छिन्नं स्वयंवरैरिति ङ॰ ।

5 शताधिकमिति ग॰ , घ॰ च ।

6 स्तुत्वाथेति ङ॰ ।

7 शिवाग्रे तदिति ङ॰ ।

8 समर्पितमिति ख॰ , घ॰ , ज॰ च ।

9 रुद्राय रुद्रो रुद्र नमोस्तु ते इति ङ॰ , ज॰ च ।

10 स्वशक्त्यापूज्येति ख॰ , छ॰ च ।

11 ओं ह्रूं इति घ॰ ।

12 पूजयेति ख॰ , छ॰ , ङ॰ च ।

13 निरुध्येति ख॰ , ज॰ , ङ॰ च ।

एकरात्रमथो वापि यद्वा सद्योधिवासनं[1] । 122ab
विनाधिवासनं यागः कृतो ऽपि फलप्रदः ॥ 122cd
स्वमन्त्रैः प्रत्यहं देयमाहुतीनां शतं शतं । 123ab
शिवकुम्भादिपूजाञ्च दिग्बिलञ्च निवेदयेत् ॥ 123cd
गुर्वादिसहितो वासो[2] रात्रौ नियमपूर्वकम् । 124ab
अधिवासः स वसतेवधेर्भावः समीरितः ॥ 124cd

इत्याग्नेये महापुराणे अधिवासनविधिर्नाम षण्णवतितमो ऽध्यायः ।

# 97

## अथ सप्तनवतितमो ऽध्यायः ।

शिवप्रतिष्ठाकथनं ।
ईश्वर उवाच ।
[3]प्रातर्न्नित्यविधिं कृत्वा द्वारपालप्रपूजनं । 1ab
प्रविश्य प्राग्विधानेन देहशुद्ध्यादिमाचरेत् ॥ 1cd
दिक्पतींश्च समभ्यर्च्य शिवकुम्भञ्च वर्द्धनीं । 2ab

1 सत्याधिवासनमिति ज° ।
2 दीक्षान्तञ्च समभ्यर्च्येति ज° ।
3 वासुदेव दयाशील लीलया मां समुद्धर । घरोद्धारे समर्थोसि ममोद्धारे कियाञ्छ्रमः ॥ इति श्लोको ख° , छ° पुस्तकेधिकोत्रास्ति ।

अष्टमुष्टिकया[1] लिङ्गं वह्निं सन्पर्प्य च क्रमात् ॥ 2cd
शिवाज्ञातस्ततो गच्छेत् प्रासादं शस्त्रमुच्चरन्[2] । 3ab
तद्गतान् प्रक्षिपेद्विघ्नान् हुम्फडन्तशराणुना[3] ॥ 3cd
न मध्ये स्थापयेल्लिङ्गं बेधदोषविशङ्कया । 4ab
तस्मान्मध्यं परित्यज्य यवार्द्धेन यवेन वा ॥ 4cd
किञ्चिदीशानमाश्रित्य शिलां मध्ये निवेशयेत् । 5ab
मूलेन तामनन्ताख्यां सर्वाधारस्वरूपिणीं[4] ॥ 5cd
सर्वगां सृष्टियोगेन विन्यसेदचलां शिलां । 6ab
अथवानेन मन्त्रेण शिवस्यासनरूपिणीं ॥ 6cd
ओंनमो व्यापिनि भगवति स्थिरे ऽचले ध्रुवे । 7ab
ह्रं लं ह्रीं स्वाहा(5) ।
त्वया शिवाज्ञया शक्ते स्थातव्यमिह सन्ततं ॥ 7cd
इत्युक्त्वा च समभ्यर्च्य[6] निरुध्याद्रौद्रमुद्रया[7] । 8ab
वज्रादीनि च रत्नानि तथोशीरादिकौषधीः ॥ 8cd
लोहान् हेमादिकांस्यन्तान् हरितालादिकांस्तथा । 9ab
धान्यप्रभृतिशस्त्रांश्च पूर्वमुक्ताननुक्रमात् ॥ 9cd
प्रभारागत्वदेहत्ववीर्य्यशक्तिमयानिमान्[8] । 10ab

भावयेन्नेकचित्तस्तु लोकपालेशसंवरैः[9] ॥ 10cd
पूर्वादिषु च गर्त्तेषु[10] न्यसेदेकैकशः क्रमात्[11] । 11ab

1 अष्टपुत्रियेति ख॰ , घ॰ , छ॰ च । अष्टपुष्पिकयेति ग॰ , ङ॰ , च । अष्टपुष्टिकया इति ज॰ ।

2 प्रासादमस्त्रमुच्चरन् इति ख॰ , ङ॰ च । प्रसादं शास्त्रमुच्चरन्निति ग॰ , ज॰ च ।

3 हुं फडन्तशिवात्मनेति ख॰ , ग॰ , छ॰ च । हुं फडन्तशिवाणुनेति ज॰ ।

4 सर्वाधानस्वरूपिणीमिति ज॰ ।

5 ह्रूं लं ह्रूं स्वाहेति ख॰ , छ॰ , च । ओं ह्रां लं हां स्वाहेति ज॰ ।

6 इत्युक्त्वा तं समभ्यर्च्चेति ख॰ , छ॰ च । इत्युन्मूलं समभ्यर्च्चेति ग॰ । इत्युच्चार्य्य समभ्यर्च्येति ङ॰ ।

7 विरुन्ध्याद्बोधमुद्रयेति ख॰ , ग॰ , ङ॰ च ।

8 वीर्य्याशक्तिमनुक्रमादिति घ॰ ।

9 लोकपालेशसञ्चरैरिति घ॰ ।

10 पूर्वादिवत् स्वगर्त्तेषु इति ङ॰ ।

11 प्रभारागेत्यादिः न्यसेदेकैकशः क्रमादिति पाठः, छ पुस्तके नास्ति ।

हेमजं तारजं कूर्म्मं वृषं वा द्वारसम्मुखं[1] ॥ 11cd
सरित्तटमृदा युक्तं पर्वताग्रमृदाथवा[2] । 12ab
प्रक्षिपेन्मध्यगर्त्तादौ[3] यद्वा मेरुं सुवर्णजं ॥ 12cd
मधूकाक्षतसंयुक्तमञ्जनेन समन्वितं । 13ab
पृथिवीं राजतीं यद्वा यद्वा हेमसमुद्भवां ॥ 13cd
सर्ववीजसुवर्णाभ्यां समायुक्तां विनिक्षिपेत्[4] । 14ab
स्वर्णजं राजतं वापि सर्वलोहसमुद्भवं[5] ॥ 14cd
सुवर्णं कृशरायुक्तं पद्मनालं[6] ततो न्यसेत् । 15ab
देवदेवस्य शक्त्यादिमूर्त्तिपर्य्यन्तमासनं ॥ 15cd
प्रकल्प्य पायसेनाथ लिप्त्वा[7] गुग्गुलुनाथवा । 16ab
श्वभ्रमाच्छाद्य वस्त्रेण तनुत्रेणास्त्ररक्षितं[8] ॥ 16cd
दिक्पतिभ्यो बलिं[9] दत्वा समाचान्तो ऽथ देशिकः । 17ab
शिवेन वा शिलाश्वभ्रसङ्गदोषनिवृत्तये[10] ॥ 17cd
शस्त्रेण वा शतं सम्यग् जुहुयात् पूर्णया सह । 18ab

---

1 द्वारसम्पुटमिति ग॰ ।

2 मृदा पुन इति ग॰ ।

3 मध्यगर्त्तायामिति ख॰ , घ॰ , ङ॰ च ।

4 मधूकाक्षतेत्त्यादिः, विनिक्षिपेदित्यन्तः पाठो ग॰ पुस्तके नास्ति ।

5 सर्वलोहसमन्वितमिति ग॰ ।

6 पञ्चधान्यमिति ख॰ , ग॰ च ।

7 लिप्तेति घ॰ , ङ॰ च ।

8 श्वभ्रमाच्छाद्य वस्त्रेण तन्मात्रेण स्वरक्षितमिति ख॰ , ङ॰ च । यन्त्रमाच्छाद्य शस्त्रेण तनुत्रेण स्वरक्षितमिति ज॰ । श्वभ्रेत्यादिपाठो ग॰ पुस्तके नास्ति ।

9 दिक्पालादिभ्यो बलिमिति ङ॰ ।

10 शिलास्तत्र सङ्गदोषनिवृत्तये इति घ॰ , ज॰ च । शिलाश्वभ्रमङ्ग-दोषनिवृत्तये इति ख॰ , छ॰ च ।

एकैकाहुतिदानेन सन्तर्प्य वास्तुदेवताः ॥ 18cd
समुत्थाप्य हृदादेवमासनं मङ्गलादिभिः । 19ab
गुरुर्देवाग्रतो गच्छेन्मूर्त्तिपैश्च दिशि स्थितैः[1] ॥ 19cd
चतुर्भिः सह कर्त्तव्या देवयज्ञस्य[2] पृष्ठतः । 20ab
प्रासादादि[3] परिभ्रम्य भद्राख्यद्वारसम्मुखं ॥ 20cd
लिङ्गं संस्थाप्य दत्वार्घ्यं प्रासादं सन्निवेशयेत्[4] । 21ab
द्वारेण द्वारबन्धेन द्वारदेशेन तच्छिला ॥ 21cd
द्वारबन्धे शिखाशून्ये तदर्द्धेनाथ तद्दृते[5] । 22ab
वर्जयन्[6] द्वारसंस्पर्शं द्वारेणैव महेश्वरं ॥ 22cd
देवगृहसमारम्भे कोणेनापि प्रवेशयेत् । 23ab
अयमेव विधिर्ज्ञेयो व्यक्तलिङ्गे ऽपि सर्वतः ॥ 23cd
गृहे प्रवेशनं द्वारे लोकैरपि समीरितं । 24ab
अपद्वारप्रवेशेन विदुर्गोत्रक्षयं गृहं[7] ॥ 24cd
अथ पीठे[8] च संस्थाप्य लिङ्गं द्वारस्य सम्मुखं । 25ab
तूर्य्यमङ्गलनिर्घोषैर्दूर्वाक्षतसमन्वितं ॥ 25cd
समुत्तिष्ठ हृदेत्युक्त्वा महापाशुपतं पठेत् । 26ab

---

1 मूर्त्तिपैः स्वदिशि स्थितैरिति ज० ।

2 बन्धुभिः सह कर्तव्या देवयानस्येति ख० । बन्धुभिः सहकारे च देवालयस्य इति ग० , ज० च ।

3 प्रासादार्द्धमिति ज० ।

4 सम्प्रवेशयेदिति घ० ।

5 तदर्द्धेनाथ घातयेत् इति झ० । तदर्द्धेनाथ तत्सुते इति ग० । तदर्द्धेनाथ तद्यतिमिति घ० । तदर्द्धे वाथ तत्सुतमिति ज० । तदर्द्धे नाथ तद्युते इति ङ० ।

6 बन्धने इति ख० । बन्ध्यन् इति घ० । रक्षयन् इति झ० । वर्जयेदिति छ० ।

7 वित्तगोत्रक्षयं गृहमिति ग० ।

8 अथ चैवं इति ज० , झ० , घ० च ।

अपनीय घटं श्वभ्राद्[1] देशिको मूर्त्तिपैः सह ॥ 26cd
मन्त्रं सन्धारयित्वा तु[2] विलिप्तं[3] कुङ्कुमादिभिः । 27ab
शक्तिशक्तिमतोरैक्यं ध्यात्वा चैव तु रक्षितं[4] ॥ 27cd
लयान्तं[5] मूलमुच्चार्य्य स्पृष्ट्वा श्वभ्रे निवेशयेत्[5] । 28ab
अंशेन ब्रह्मभागस्य यद्वा अंशद्वयेन च ॥ 28cd
अर्द्धेन वाष्टमांशेन सर्वस्याथ प्रवेशनं[7] । 29ab
विधाय सीसकं नाभिर्दीर्घाभिः[8] सुसमाहितः ॥ 29cd
श्वभ्रं[9] वालुकयापुर्य्य ब्रूयात् स्थिरीभवेति च[10] । 30ab
ततो लिङ्गे स्थिरीभूते ध्यात्वा[11] सकलरूपिणं ॥ 30cd
मूलमुच्चार्य्य शक्त्यन्तं सृष्ट्या च निष्कलं[12] न्यसेत् । 31ab
स्थाप्यमानं यदा लिङ्गं याम्यां दिशमथाश्रयेत्[13] ॥ 31cd
तत्तद्दिगीशमन्त्रेण पूर्णान्तं दक्षिणान्वितं । 32ab

---

1 घटं तत्र इति झ॰ ।

2 मन्त्रं सन्धारयित्वाथ इति ख॰ । पत्रस्थं धारयित्वा तु, इति घ॰ ।

3 सुलिप्तमिति ग॰ ।

4 लक्षितमिति घ॰ , ज॰ , झ॰ , च ।

5 नमोन्तमिति ङ॰ ।

6 शक्तिमुद्रे निवेशयेदिति ज॰ ।

7 अर्द्धेन चाष्टमांशेन सर्वस्याधः प्रवेशनम् इति ज॰ ।

8 सीसकं वाग्भिर्दीर्घाभिरिति छ॰ । सीसकं चापि दीर्घारिति ज॰ ।

9 अथेति क॰ , ङ॰ , छ॰ च ।

10 लयान्तमित्यादिः, स्थिरीभवेति च इत्यन्तः सार्द्धश्लोकद्वयात्मकः पाठो झ॰ पुस्तके नास्ति ।

11 ध्यायेदिति घ॰ ।

12 सृष्ट्यादिविकलमिति झ॰ । सृष्ट्यादिनिष्फलमिति ख॰ , घ॰ , च । सृष्ट्याच निष्फलमिति ग॰ , ङ॰ च ।

13 ततो लिङ्गे इत्यादिः, दिशमथाश्रयेदित्यन्तः पाठो ज॰ पुस्तके नास्ति ।

सव्ये स्थाने च वक्रे च[1] चलिते स्फुटितेपि वा ॥ 32cd
जुहुयान् मूलमन्त्रेण बहुरूपेण[2] वा शतं । 33ab
कुञ्चान्येष्वपि दोषेषु शिवशान्तिं समाश्रयेत्[3] ॥ 33cd
युक्तं न्यासादिभिर्लिङ्गं[4] कुर्वन्नेवं न दोषभाक् । 34ab
पीठबन्धमतः कृत्वा लक्षणस्यांशलक्षणं[5] ॥ 34cd
गौरीमन्त्रं लयं नीत्वा सृष्ट्या पिण्डीञ्च विन्यसेत् । 35ab
सम्पूर्य्य पार्श्वसंसिद्धिं वालुकावज्रलेपनं[6] ॥ 35cd
ततो मूर्त्तिधरैः सार्द्धं गुरुः शान्तिं घटोद्धृतः । 36ab
संस्थाप्य कलसैरन्यैस्तद्वत्[7] पञ्चामृतादिभिः ॥ 36cd
विलिप्य चन्दनाद्यैश्च[8] सम्पूज्य जगदीश्वरं । 37ab
उमामहेशमन्त्राभ्यां तौ स्पृशेल्लिङ्गमुद्रया ॥ 37cd
ततस्त्रितत्त्वविन्यासं षडर्चादिपुरःसरं[9] । 38ab
कृत्वा मूर्त्तिं तदीशानामङ्गानां ब्रह्मणामथ ॥ 38cd
ज्ञानी लिङ्गे[10] क्रियापीठे विनास्य स्नापयेत्ततः । 39ab
गन्धैर्व्विलिप्य सन्धूप्य व्यापित्वे शिवे न्यसेत् ॥ 39cd
स्रग्धूपदीपनैवेद्यैर्हृदयेन फलानि च । 40ab

---

1 वक्रेणेति ख॰ ।
2 चतूरूपेण इति झ॰ ।
3 स्थाप्यमानमित्यादिः, शान्तिं समाश्रयत् इत्यन्तः पाठी ग॰ , ङ॰ , पुस्तके नास्ति ।
4 उक्तन्यासविधिं लिङ्गे इति ख॰ । उक्तन्यासविधौ लिङ्गे इति ग॰ ।
5 पीठ बन्धमधः कृत्वा कुर्व्वन्नेव न दोषभाक् इति ख॰ , ग॰ च । पीठ बन्धमतः कृत्वा लक्षणस्याङ्गलक्षणमिति घ॰ ।
6 पार्श्वसिद्धिं च वालुकाव्रजलेपनमिति ज॰ ।
7 सप्तारन्यकलशैरन्यैः स्तुत्वा इति झ॰ ।
8 चतुराज्यैश्च इति झ॰ ।
9 षडर्घादिपुरःसरमिति झ॰ । षडग्रादिपुरःसरमिति ख॰ ।
10 ज्ञानलिङ्गे इति झ॰ ।

विनिवेद्य यथाशक्ति समाचम्य महेश्वरं ॥ 40cd
दत्वार्घं च जपं कृत्वा[1] निवेद्य वरदे करे[2] । 41ab
चन्द्रार्क्कतारकं यावन् मन्त्रेण शैवमूर्त्तिपैः[3] ॥ 41cd
स्वेच्छयैव त्वया नाथ स्थातव्यमिह मन्दिरे । 42ab
प्रणम्यैवं वहिर्गत्वा[4] हृदा वा प्रणवेन वा ॥ 42cd
संस्थाप्य वृषभं पश्चात् पूर्व्ववद्बलिमाचरेत् । 43ab
न्यूनादिदोषमोषाय[5] ततो मृत्युजिता शतं ॥ 43cd
शिवेन सशिवो हुत्वा शान्त्यर्थं पायसेन च । 44ab
ज्ञानाज्ञानकृतं यच्च तत् पूरय महाविभो[6] ॥ 44cd
हिरण्यपशुभूम्यादि[7] गीतवाद्यादिहेतवे । 45ab
अम्विकेशाय तद् भक्त्या शक्त्या सर्वं निवेदयेत् ॥ 45cd
दानं महोत्सवं पश्चात् कुर्याद्दिनचतुष्टयं । 46ab
त्रिसन्ध्यं त्रिदिनं मन्त्री होमयेन् मूर्त्तिपैः सह ॥ 46cd
चतुर्थेहनि पूर्णाञ्च चरुकं बहुरूपिणा । 47ab
निवेद्य सर्व्वकुण्डेषु सम्पाताहुतिसोधितम्[8] ॥ 47cd
दिनचतुष्टयं यावत्तन्निर्म्माल्यन्तदूर्द्धतः । 48ab
निर्म्माल्यापनयं कृत्वा स्नापयित्वा तु[9] पूजयेत् ॥ 48cd
पूजा सामान्यलिङ्गेषु कार्य्या साधारणाणुभिः[10] । 49ab

---

1 जलं हुत्वा इति ग॰ ।
2 निवेद्य वरदेवके इति ज॰ ।
3 मन्त्रेशैर्मूर्त्तिपैः सह इति झ॰ । मन्त्रेशैर्मूर्त्तिजैः सह इति घ॰ ।
4 वहिष्कृत्वा इति झ॰ । वहिर्हत्वा इति घ॰ ।
5 न्यूनादिदोषमोक्षायेति ज॰ । न्यूनादिदोषनाशायेति ङ॰ ।
6 महाप्रभो इति झ॰ ।
7 हिरण्यवस्त्रधूपादि इति झ॰ ।
8 पायसाहुतिसोधितमिति झ॰ । सम्पाताहुतिशोधनमिति ग॰ ।
9 स्नापयित्वा च इति ग॰ ।
10 साधारणांशुभिरिति ख॰ । साधारणादिकमिति ग॰ ।

विहाय लिङ्गचैतन्यं कुर्य्यात् स्थाणुविसर्ज्जनं ॥ 49cd
असाधारणलिङ्गेषु क्षमस्वेति विसर्ज्जनं । 50ab
आवाहनमभिव्यक्तिर्व्विसर्गः शक्तिरूपता ॥ 50cd
प्रतिष्ठान्ते क्वचित् प्रोक्तं स्थिराद्याहुतिसप्तकं । 51ab
स्थिरस्तथाप्रमेयश्चानादिबोधस्तथैव च ॥ 51cd
नित्योथ सर्व्वगश्चैवाविनाशी दृष्ट एव च[1] । 52ab
एते गुणा महेशस्य सन्निधानाय कीर्त्तिताः[2] ॥ 52cd
ओं नमः शिवाय स्थिरो भवेत्याहुतीनां क्रमः । 53ab
एवमेतच्च सम्पाद्य विधाय शिवकुम्भवत्[3] ॥ 53cd
कुम्भद्वयञ्च तन्मध्यादेककुम्भाम्भसा भवं । 54ab
संस्नाप्य तद् द्वितीयन्तु कर्त्तृस्नानाय धारयेत् ॥ 54cd
दत्वा बलिं समाचाम्य वहिर्गच्छेत् शिवाज्ञया[4] । 55ab
जगतीवाह्यतश्चण्डमैशान्यान्दिशि मन्दिरे ॥ 55cd
धामगर्भप्रमाणे च[5] सुपीठे[6] कल्पितासने । 56ab
पूर्ववन् न्यासहोमादि विधाय ध्यानपूर्वकं ॥ 56cd
संस्थाप्य विधिवत्तत्र ब्रह्माङ्गैः[7] पूजयेत्ततः । 57ab
अङ्गानि पूर्व्वयुक्तानि[8] ब्रह्माणी त्वर्चना यथा[9] ॥ 57cd

---

1 विलासी तृप्त एव च इति ख॰ , ङ॰ , छ॰ , ज॰ च । अविनाशी तृप्त एव च इति ङ॰ ।

2 सन्निधाय प्रकीर्त्तिता इति ख॰ , छ॰ च ।

3 ओं नम इत्यादि, शिवकुम्भवत् इत्यन्तः पाठो झ॰ पुस्तके नास्ति । शिवाय शिवकुम्भवत् इति ग॰ ।

4 वहिः कुम्भे शिवाज्ञया इति झ॰ ।

5 वामगर्भप्रमाणेन इति झ॰ ।

6 स्वपीठे इति ग॰ ।

7 ब्रह्माद्यैरिति ग॰ , झ॰ च ।

8 पूर्वमुक्तानि इति ख॰ , ग॰ , ङ॰ , छ॰ च । पूर्वभुक्तानीति ज॰ ।

9 त्वधुना यथा इति ख॰ ।

एवं सद्योजाताय ओं ह्रूं फट्(1) नमः । ओं विं वामदेवाय ह्रूं फट् नमः । ओं वुं(2) अघोराय ह्रूं फट् नमः । ओं(3) तत्पुरुषाय वौमीशानाय च ह्रूं फट् ॥

जपं विवेद्य[4] सन्तर्प्य विज्ञाप्य नतिपूर्वकं । 58ab
देवः सन्निहितो यावत्तावत्त्वं सन्निधो भव ॥ 58cd
न्यूनाधिकञ्च यत्किञ्चित् कृतमज्ञानतो मया[5] । 59ab
तवत्प्रसादेन चण्डेश तत् सर्वं परिपूरय ॥ 59cd
वाणलिङ्गे वाणरोहे[6] सिद्धलिङ्गे स्वयम्भुवि । 60ab
प्रतिमासु च सर्वासु न चण्डो ऽधिकृतो भवेत् ॥ 60cd
अद्वैतभावनायुक्ते स्थण्डिलेशविधावपि[7] । 61ab
अभ्यर्च्च्य चण्डं ससुतं यजमानं हि भार्य्यया ॥ 61cd
पूर्वस्थापितकुम्भेन स्नापयेत् स्नापकः[8] स्वयं । 62ab
स्थापकं यजमानोपि सम्पूज्य च[9] महेशवत्[10] ॥ 62cd
वित्तशाठ्यं विना दद्याद् भूहिरण्यादि[11] दक्षिणां । 63ab

1 ओं सद्योजाताय ह्रूं फट् इति झ° । एवं सद्योजाताय ओं ह्रूं फट् नम इति ख° , छ° च । ओं एवं सद्यो जाताय ह्रूं फट् नम इति ग° , ज° च ।

2 ओं वं इति झ° ।

3 ओं एवं चेति छ° । ओं एवं चेदिति ङ° । ओं वै इति ज° ।

4 धूपं निवेद्य इति घ° ।

5 कृतमज्ञानतोपि वा इति ग° ।

6 वाणलिङ्गे चले लोहे इति ज° ।

7 स्थण्डिले सन्निधावपि इति ज° , झ° च ।

8 स्थापक इति ज° ।

9 प्रपूज्य च इति ज° ।

10 महेश्वरमिति ख° , छ° च ।

11 गोहिरण्यादि इति ज° , झ° च ।

मूर्त्तिमान् विधिवत् पश्चात् जापकान् ब्राह्मणांस्तथा ॥ 63cd
देवज्ञं शिल्पिनं प्राच्र्य दीनानाथादि[1] भोजयेत् । 64ab
यदत्र सम्मुखीभावे स्वेदितो भगवन्मया ॥ 64cd
क्षमस्व नाथ तत् सर्वं कारुण्याम्बुनिधं मम[2] । 65ab
इति विज्ञप्तियुक्ताय यजमानाय सद्गुरुः ॥ 65cd
प्रतिष्ठापुण्यसद्भावं[3] स्फुरत्तारकसप्रभं[4] । 66ab
कुशपुष्पाक्षतोपेतं स्वकरेण समर्पयेत् ॥ 66cd
ततः पाशुपतोपेतं[5] प्रणम्य परमेश्वरं । 67ab
ततो ऽपि बलिभिर्भूतान् सन्निधाय निबोधयेत् ॥ 67cd
स्थातव्यं भवता तावद् यावत् सन्निहितो हरः[6] । 68ab
गुरुर्वस्त्रादिसंयुक्तं गृह्णीयाद्यागमण्डपं ॥ 68cd
सर्वोपकरणं शिल्पी तथा स्नापनमण्डपं[7] । 69ab
अन्ये देवादयः स्थाप्या मन्त्रैरागमसम्भवैः ॥ 69cd
आदिवर्णस्य भेदाद्वा[8] सुतत्त्वव्याप्तिभाविताः[9] । 70ab
साध्य[10] प्रमुखदेवाश्च सरिदोषधयस्तथा ॥ 70cd
क्षेत्रपाः किन्नराद्याश्च पृथिवीतत्त्वमाश्रिताः । 71ab

---

1 दीनानाथांश्चेति ज० ।
2 देव त्वं नाथतत् सर्वं कारुण्यान् मनवे नम इति झ० ।
3 प्रतिष्ठायज्ञसम्भारमिति ग० ।
4 स्फुरत्तारकसन्निभमिति ।
5 ततः पशुपतिं जप्त्वा इति ख० , ग० च ।
6 भव इति ख० , घ० च ।
7 गुरुर्वस्त्राणीत्यादिः, स्नानमण्डपमित्यन्तः पाठो झ० पुस्तके नास्ति ।
8 आदिवर्णस्य शेषाद्वा इति झ० ।
9 स्वातन्त्र्या व्याप्तिरीरिता इति ग० । स्वतत्त्वव्याप्तिभाविता इति छ० । स्वतन्त्रव्याप्ति भेदत इति ज० ।
10 जाप्य इति झ० ।

स्नानं सरस्वतीलक्ष्मीनदीनामम्भसि क्वचित् ॥ 71cd
भुवनाधिपतीनाञ्च स्थानं यत्र व्यवस्थितिः । 72ab
अण्डवृद्धिप्रधानान्तं त्रितत्त्वं ब्रह्मणः पदं ॥ 72cd
तन्मात्रादिप्रधानान्तं[1] पदमेतत् त्रिकं हरेः[2] । 73ab
नात्येशगणमातॄणां यक्षेशशरजन्मनां ॥ 73cd
अण्डजाः शुद्धविद्यान्तं पदं गणपतेस्तथा । 74ab
मायांशदेशशक्त्यनतं शिवाशिवोप्तरोचिषां[3] ॥ 74cd
पदमीश्वरपर्य्यन्तं व्यक्तार्चासु च कीर्त्तितं । 75ab
कूर्म्माद्यं कीर्त्तितं यच्च यच्च रत्नादिपञ्चकं[4] ॥ 75cd
प्रक्षिपेत् पीठगर्त्ते च पञ्चब्रह्मशिलां विना । 76ab
षड्भिर्विभाजिते गर्त्ते[5] त्यक्त्वा भावञ्च पृष्ठतः ॥ 76cd
स्थापनं पञ्चमांशे च यदि वा वसुभाजिते । 77ab
स्थापनं सप्तमे भागे प्रतिमासु सुखावहं ॥ 77cd
धारणाभिर्विशुद्धिः स्यात् स्थापने लेपचित्रयोः । 78ab
स्नानादि मानसन्तत्र शिलारत्नादिवेशनं[6] ॥ 78cd
नेत्रोद्घाटनमन्त्रेष्टमासनादिप्रकल्पनं । 79ab
पूजा निरम्बुभिः पुष्पैर्यथा चित्रं न दुष्यति ॥ 79cd
विधिस्तु चललिङ्गेषु सम्प्रत्येव निगद्यते । 80ab

---

1 तन्मात्रादिप्रयाणान्तमिति ख० ।
2 तत्त्वमेकं चित्रं हरेरिति घ० ।
3 स्नानं सरस्वतीत्यादिः, रोचिषामित्यन्तः पाठो झ० पुस्तके नास्ति ।
4 यद्रत्नादिकपञ्चकमिति ज० ।
5 षडभिर्विभाजिते गर्भे इति ङ० ।
6 शिलावाहादिवेशनं इति झ० । शिलारत्ननिवेशनमिति ख० ।

पञ्चभिर्वा त्रिभिर्वापि पृथक् कुर्य्याद्[1] विभाजिते[2] ॥ 80cd
भगत्रयेण भागांशो भवेद्भागद्वयेन वा । 81ab
स्वपीठेष्वपि[3] तद्वत् स्याल्लिङ्गेषु तत्त्वभेदतः ॥ 81cd
सृष्टिमन्त्रेण संस्कारो विधिवत् स्फाटिकादिषु । 82ab
किञ्च ब्रह्मशिलारत्नप्रभूतेश्चानिवेदनं[4] ॥ 82cd
योजनं पिण्डिकायाश्च मनसा परिकल्पयेत् । 83ab
स्वयम्भूवाणलिङ्गादौ[5] संस्कृतौ नियमो न हि ॥ 83cd
स्नापनं संहितामन्त्रैर्न्यासं होमञ्च कारयेत् । 84ab
नदीसमुद्ररोहाणां स्थापनं पूर्ववन् मतं ॥ 84cd
ऐहिकम् मृण्मयं लिङ्गं पिष्टकादि च तक्षणात्[6] । 85ab
कृत्वा सम्पूजयेच्छुद्धं दीक्षणादिविधानतः[7] ॥ 85cd
समादाय ततो मन्त्रानात्मानं सन्निधाय च । 86ab
तज्जले प्रक्षिपेल्लिङ्गं वत्सरात् कामदं भवेत् ॥ 86cd
विष्ण्वादिस्थापनं चैव पृयङ्मन्त्रैः समाचरेत् । 87ab

इत्याग्नेये महापुराणे शिवप्रतिष्ठा(8) नाम सप्तनवतितमो ऽध्यायः ॥

1 पृथक् पीठे इति ख॰ , ग॰ , घ॰ च ।
2 स्थापनमित्यादिः, कुर्याद् विभाजिते इत्यन्तः पाठो ङ॰ पुस्तके नास्ति ।
3 स्वपीठे स्नपिते इति ख॰ ।
4 प्रभूतेष्वधिवेशनमिति घ॰ ।
5 वाणलिङ्गानामिति ज॰ ।
6 पिष्टकादि च तत्क्रमादिति छ॰ , ज॰ च ।
7 मृष्टिमन्त्रेणेत्यादिः दीक्षणादिविधानत इत्यन्तः पाठो ग॰ पुस्तके नास्ति ।
8 शिवपूजा इति क॰ ।

## 98

### अथाष्टनवतितमो ऽध्यायः ॥

गौरीप्रतिष्ठाकथनं ।

ईश्वर उवाच ।

वक्ष्ये गौरीप्रतिष्ठाञ्च पूजया सहितां शृणु । 1ab
मण्डपाद्यं पुरो यच्च[1] संस्थाप्य चाधिरोपयेत् ॥ 1cd
शय्यायान्तांश्च विन्यस्य मन्त्रान्मूर्त्त्यादिकान् गुह । 2ab
आत्मविद्याशिवान्तञ्च[2] कुर्यादीशनिवेशनं ॥ 2cd
शक्तिं परां ततो[3] न्यस्य हुत्वा[4] जप्त्वा च पूर्ववत् । 3ab
सन्धाय च तथा पिण्डीं[5] क्रियाशक्तिस्वरूपिणीं ॥ 3cd
सदेशव्यापिकां ध्यात्वा न्यस्तरत्नादिकां तथा । 4ab
एवं संस्थाप्य तां पश्चाद्देवीन्तस्यान्नियोजयेत् ॥ 4cd
परशक्तिस्वरूपान्तां स्वाणुना[6] शक्तियोगतः । 5ab
ततो न्यसेत् क्रियाशक्तिं पीठे ज्ञानञ्च विग्रहे ॥ 5cd
ततोपि व्यापिनीं शक्तिं समावाह्य नियोजयेत् । 6ab
अम्बिकां शिवनाम्नीञ्च समालभ्य[7] प्रपूजयेत् ॥ 6cd

ओं आधारशक्तये नमः । ओं कूर्माय नमः । ओं स्कन्दाय च तथा नमः । ओं ह्रीं नारायणाय नमः । ओं ऐश्वर्याय नमः ।

---

1 मण्डपाद्यं प्रविशेच्च इति ग॰ ।
2 शिवास्त्रं चेति घ॰ ।
3 तथा शक्तिं परामिति ख॰ ।
4 स्तुत्वेति ज॰ ।
5 चण्डीमिति ख॰ ।
6 आत्मनेति छ॰ ।
7 त्र्यम्बकेशीतिनाम्नीञ्च समारभ्येति ज॰ ।

ओं अं अधश्छदनाय नमः । ओं पद्मासनाय नमः । ओं ऊर्ध्वच्छदनाय नमः । ओं पद्मासनाय नमः । अथ सम्पूज्याः केशवास्तथा । ओं ह्रीं कर्णिकाय नमः । ओं क्षं पुष्कराक्षेभ्य(1) इहार्चयेत् । ओं हां पुष्ट्यै ह्रीं च ज्ञानायै ह्रूं क्रियायै ततो नमः । ओं नालाय नमः । रुं धर्माय नमः(2) । रुं ज्ञानाय वै नमः(3) । ओं वैराग्याय वै नमः । ओं वै अधर्माय नमः(4) । ओं रुं अज्ञानाय वै नमः । ओं अवैराग्याय वै नमः । अं अनैश्वर्याय नमः । हुं वाचे हुं च रागिण्यै क्रैं ज्वालिन्यै ततो नमः । ओं ह्रौं शमायै(5) च नमः । ह्रूं ज्येष्ठायै ततो नमः । ओं ह्रौं रौं क्रौं नवशक्त्यै गौं च गौर्यासनाय च । गौं गौरीमूर्त्तये नमः । गौर्य्या मूलमथोच्यते । ओं ह्रीं सः(6) महागौरि रुद्रदयिते स्वाहा । गौर्य्यै नमः । गां ह्रूं ह्रीं शिवो गूं स्यात् शिखायै कवचाय च । गों नेत्राय च गों अस्त्राय ओं गौं विज्ञानशक्तये, ओं गूं क्रियाशक्तये नमः(7) । पूर्वादौ शक्रादिकान् । ओं सुं सुभगायै नमः । ह्रीं वीजललिता ततः । ओं ह्रीं कामिन्यै च नमः । ओं ह्रूं स्यात् कामशालिनीमन्त्रैर्गौरीं प्रतिष्ठाप्य प्राच्चर्य जप्त्वाथ सर्वभाक्(8) ॥

इत्याग्नेये महापुराणे गौरीप्रतिष्ठा नामाष्टनवतितमो ऽध्यायः ।

---

1 ओं खं पुष्करेभ्य इति ख॰ ।
2 धं धर्म्माय नम इति ख॰ ।
3 वं ज्ञानाय नम इति ख॰ ।
4 रुं अधर्माय नम इति ङ॰ ।
5 वामायै इति ख॰ , ग॰ , घ॰ , ङ॰ च ।
6 ॐ हुं स इति घ॰ ।
7 ह्रीं क्रियाशक्तये नम इति झ॰ । ओं क्रियाशक्तये नम इति घ॰ ।
8 जप्त्वानुरूपतः इति ग॰ , छ॰ , च ।

# 99

अथैकोनशततमो ऽध्यायः । सूर्य्यप्रतिष्ठाकथनं ।

ईश्वर उवाच ।

वक्ष्ये सूर्य्यप्रतिष्ठाञ्च पूर्ववन्मण्डपादिकं । 1ab
स्नानादिकञ्च सम्पाद्य[1] पूर्वोक्तविधिना ततः ॥ 1cd
विद्यामासनशय्यायां साङ्गं विन्यस्य भास्करं । 2ab
त्रितत्त्वं विन्यसेत्तत्र सस्वरं खादिपञ्चकं ॥ 2cd
शुद्ध्यादि पूर्ववत् कृत्वा पिण्डीं संशोध्य पूर्ववत् । 3ab
सदेशपदपर्य्यन्तं विन्यस्य तत्त्वपञ्चकं[2] ॥ 3cd
शक्त्या च सर्वतोमुख्या संस्थाप्य विधिवत्ततः । 4ab
स्वाणुना[3] विधिवत् सूर्य्यं शक्त्यन्तं[4] स्थापयेद्गुरुः ॥ 4cd
स्वाम्यन्तमथवादित्यं पादान्तन्नाम धारयेत् । 5ab
सूर्य्यमन्त्रास्तु[5] पूर्वोक्ता द्रष्टव्याः स्थापनेपि च[6] ॥ 5cd

इत्याग्नेये महापुराणे सूर्य्यप्रतिष्ठा नामैकोनशततमो ऽध्यायः ॥

1 स्नानादिकं च सम्पूज्य इति ख॰ , छ॰ , च ।
2 विन्यस्य पदपञ्चकमिति छ॰ । विन्यस्य रत्नपञ्चकमिति ज॰ ।
3 आत्मनेति छ॰ ।
4 शक्त्यर्थमिति ङ॰ ।
5 सूर्य्यमन्त्राश्चेति छ॰ ।
6 स्थापनेपि वेति ज॰ ।

# 100

अथ शततमो ऽध्यायः ।

द्वारप्रतिष्ठाकथनं ।

ईश्वर उवाच ।

द्वाराश्रितप्रतिष्ठाया वक्ष्यामि विधिमप्यथ । 1ab
द्वाराङ्गानि कषायाद्यैः संस्कृत्य शयने न्यसेत् ॥ 1cd
मूलमध्याग्रभागेषु त्रयमात्मादिसेश्वरं । 2ab
विन्यस्य सन्निवेश्याथ[1] हुत्वा जप्त्वात्र रूपतः[2] ॥ 2cd
द्वारादथो यजेद्वास्तुन्तत्रैवानन्तमन्त्रितः । 3ab
रत्नादिपञ्चकं न्यस्य शान्तिहोमं विधाय च ॥ 3cd
यवसिद्धार्थकाक्रान्ता ऋद्धिवृद्धिमहातिलाः । 4ab
गोमृत्सर्षपरागेन्द्रमोहनीलक्ष्मणामृताः ॥ 4cd
रोचना रुग् वचो दूर्वा प्रासादधश्च पोटलीं । 5ab
प्रकृत्योदुम्बरे बद्धा रक्षार्थं प्रणवेन तु ॥ 5cd
द्वारमुत्तरतः किञ्चिदाश्रितं सन्निवेशयेत् । 6ab
आत्मतत्त्वमधो न्यस्य विद्यातत्त्वञ्च शाखयोः ॥ 6cd
शिवमकाशदेशे च व्यापकं सर्वमङ्गले[3] । 7ab
ततो महेशनाथं च विन्यसेन्मूलमन्त्रतः ॥ 7cd

1 विन्यस्य च निवेशयाथ इति ख॰ । विन्यस्य सन्निबोध्याथेति ज॰ ।

2 जप्त्वानुरूपत इति ग॰ ।

3 सर्वपुष्कलमिति ख॰ , घ॰ च ।

द्वाराश्रितांश्च तल्पादीन्[1] कृतयुक्तैः[2] स्वनामभिः । 8ab
जुहुयाच्छतमर्द्धं वा द्विगुणं शक्तितोथवा[3] ॥ 8cd
न्यूनादिदोषमोषार्थं हेतितो जुहुयाच्छतं[4] । 9ab
दिग्बलिम्पूर्ववद्धुत्वा[5] प्रदद्याद्दक्षिणादिकं ॥ 9cd

इत्याग्नेये महापुराणे द्वारप्रतिष्ठा नाम शततमो ऽध्यायः ॥

# 101

## अथैकाधिकशततमो ऽध्यायः ॥

प्रासादप्रतिष्ठा ।
ईश्वर उवाच ।
प्रासादस्थापनं वक्ष्ये तच्चैतन्यं स्वयोगतः[6] । 1ab
शुकनाशासमाप्तौ तु पूर्ववेद्याश्च मध्यतः ॥ 1cd
आधारशक्तितः पद्मे विन्यस्ते प्रणवेन च[7] । 2ab
स्वर्णाद्ये कतमोद्ङ्गतं पञ्चगव्येन संयुतं ॥ 2cd
मधुक्षीरयुतं कुम्भं न्यस्तरत्नादिपञ्चकं[8] । 3ab
स्रग्वस्त्रं गन्धलिप्तञ्च गन्धवत्पुष्पभूषितं[9] ॥ 3cd
चूतादिपल्लवानाञ्च कृती कृत्यञ्च विन्यसेत्[10] । 4ab

---

1 नन्द्यादीन इति ख॰ ।
2 कृत्ययुक्तैरिति ज॰ ।
3 शक्तितो यथा इति ग॰ ।
4 भागत्रयेणेत्यादिः, जुहुयाच्छतमित्यन्तः पाठो झ॰ पुस्तके नास्ति । अत्र कतिपयश्लोकाधिको ऽध्यायत्रयात्मकः पाठः पतितोस्ति ।
5 पूर्ववद् दत्वा इति ग॰ , घ च ।
6 तच्चैतन्यञ्च योगत इति ग॰ । तच्चैतन्यस्वयोगत इति छ॰ ।
7 विन्यस्ते प्रणवेन तु इति ख॰ , छ॰ , ज॰ , झ॰ च । विन्यसेत् प्रणवेन तु इति ग॰ ।
8 मधुक्षीरयुतं न्यस्तरत्नादिपञ्चकं तत इति ग॰ ।
9 गन्धवत्पुष्पधूपितमिति ग॰ , ङ॰ , छ॰ च ।
10 वह्निकृत पद्मं विन्यसेदिति ख॰ । वह्निकूपं यवं न्यसेदिति ग॰ । वह्निकूपेषु च न्यसेदिति ज॰ ।

पूरकेण समादाय सकलीकृतविग्रहः ॥ 4cd
सर्वात्मभिन्नात्मानं स्वाणुना[1] स्वान्तमारुतः । 5ab
आज्ञया बोधयेच्छम्भौ[2] रेचकेन ततो गुरुः ॥ 5cd
द्वादशान्तात्[3] समादाय स्फुरद्वह्निकणोपमं । 6ab
निक्षिपेत् कुम्भगर्भे च न्यस्ततन्त्रातिवाहिकं[4] ॥ 6cd
विग्रहन्तद्गुणानाञ्च बोधकञ्च कलादिकं । 7ab
क्षान्तं वागीश्वरं[5] तत्तु व्रातं तत्र निवेशयेत् ॥ 7cd
दश नाडीर्दश प्राणानिन्द्रियाणि त्रयोदश । 8ab
तदधिपांश्च संयोज्य प्रणवाद्यैः स्वनामभिः ॥ 8cd
स्वकार्य्यकारणत्वेन[6] मायाकाशनियामिकाः[7] । 9ab
विद्येशान् प्रेरकान् शम्भुं व्यापिनञ्च सुसम्वरैः[8] ॥ 9cd
अङ्गानि च[9] विनिक्षिप्य निरुन्ध्याद्रोधमुद्रया[10] । 10ab
सुवर्णाद्युद्भवं यद्वा पुरुषं पुरुषानुगं ॥ 10cd
पञ्चगव्यकषायाद्यैः पूर्ववत् संस्कृतन्ततः । 11ab
शय्यायां कुम्भमारोप्य ध्यात्वा रुद्रमुमापतिं ॥ 11cd

---

1 सर्वात्मभिन्नात्मानं स्वात्मना इति ख° । सर्वात्माभिन्नमात्मा च स्थाणुनेति ज° ।

2 बोधयेच्छक्तौ इति ख° , घ° च ।

3 द्वादशान्तमिति ग° , ज° च ।

4 न्यस्य तत्र यथाक्रममिति ग° । न्यस्य तत्राभिवाहिकमिति छ° । न्यस्य तत्राभिवादकमिति ज° ।

5 वामेश्वरमिति ख° । वाणेश्वरमिति ङ° ।

6 अकार्य्यकारणत्वे नेति ख° , छ° च ।

7 प्रयामिका इति ख° , छ° च ।

8 व्यापिनञ्च स्वशक्तित इति झ° । व्यापिनञ्चास्य संस्रवैरिति ङ° ।

9 अज्ञाने चेति घ° , झ° च । अङ्कादि चेति ङ° ।

10 निर्मञ्छ्य द्रोणमुद्रया इति ग° । निरुन्ध्याद् द्रवमुद्रया इति झ° ।

तस्मिंश्च शिवमन्त्रेण व्यापकत्वेन विन्यसेत् । 12ab
सन्निधानाय होमञ्च प्रोक्षणं स्पर्शनं जपं ॥ 12cd
सान्निध्याबोधनं[1] सर्वम्भागत्रयविभागतः । 13ab
विधायैवं[2] प्रकृत्यन्ते[3] कुम्भे तं विनिवेशयेत् ॥ 13cd

इत्याग्नेये महापुराणे प्रासादकृत्यप्रतिष्ठा नामैकाधिकशत-
तमो ऽध्यायः ।

# 102

## अथ द्व्यधिकशततमो ऽध्यायः ।

ध्वजारोपणं ।
ईश्वर उवाच ।
चूलके ध्वजदण्डे च[4] ध्वजे देवकुले तथा । 1ab
प्रतिष्ठा च यथोद्दिष्टा[5] तथा स्कन्द वदामि ते[6] ॥ 1cd
तडागार्द्धप्रवेशाद्वा यद्वा सवार्द्धवेशनात् । 2ab
ऐष्टके दारुजः[7] शूलः शैलजे धाम्नि शैलजः[8] ॥ 2cd
वैष्णवादौ च चक्राढ्यः कुम्भः स्यान्मूर्त्तिमानतः । 3ab
स च त्रिशूलयुक्तस्तु अग्रचूलाभिधो मतः[9] ॥ 3cd

1 सन्निध्याबोधनमिति ख॰ , छ॰ , ज॰ च ।
2 विधायैवेति ज॰ ।
3 प्रकृत्या तु इति ख॰ ।
4 चूडके ध्वजदण्डे वा इति ज॰ ।
5 यथादिष्टा इति झ॰ ।
6 तथा ह्यहं वदामि ते इति ङ॰ ।
7 ऐष्टे दारुभव इति घ॰ , ज॰ च ।
8 तडागार्द्धेत्यादिः, शैलज इत्यन्तः पाठो झ॰ पुस्तके नास्ति ।
9 अग्रं चूडाभिधो मत इति घ॰ । अस्रचूलादिदोषत इति छ॰ । गृहचूडाभिधो मत इति ङ॰ । अग्रं चूडादिदोषत इति ख॰ ।

ईशशूलः[1] समाख्यातो मूर्द्ध्नि लिङ्गसमन्वितः । 4ab
वीजपूरकयुक्तो वा शिवशास्त्रेषु तद्विधः ॥ 4cd
चित्रो ध्वजश्च जङ्घातो यथा जङ्गार्द्धतो भवेत्[2] । 5ab
भवेद्वा दण्डमानस्तु यदि वा तद्यदृच्छया[3] ॥ 5cd
महाध्वजः समाख्यातो यस्तु पीठस्य वेष्टकः[4] । 6ab
शक्रैर्ग्रहै रसैवापि हस्तैर्दण्डस्तु सम्भितः ॥ 6cd
उत्तमादिक्रमेणैव विज्ञेयः शूरिभिस्ततः । 7ab
वंशजः शालजातिर्वा स दण्डः सर्वकामदः ॥ 7cd
अयमारोप्यमाणस्तु भङ्गमायाति वै यदि । 8ab
राज्ञोनिष्टं[5] विजानीयाद्यजमानस्य वा तथा[6] ॥ 8cd
मन्त्रेण बहुरूपेण पूर्ववच्छान्तिमाचरेत् । 9ab
द्वारपालादिपूजाञ्च मन्त्राणान्तर्प्यणन्तथा ॥ 9cd
विधाय चूलकं[7] दण्डं स्नापयेदस्त्रमन्त्रतः । 10ab
अनेनैव तु मन्त्रेण ध्वजं सम्प्रोक्ष्य देशिकः ॥ 10cd
मृदु कषायादिभिः[8] स्नानं प्रासादङ्कारयेत्ततः । 11ab
विलिप्य रसमाच्छाद्य[9] शय्यायां न्यस्य पूर्ववत् ॥ 11cd
चूडके[20] लिङ्गवणन्यासो न च ज्ञानं न च क्रिया । 12ab

---

1 ईशश्चूड इति इति ग॰ । ईशश्चूल इति ङ॰ । ईषश्चूल इति छ॰ । शशः शूल इति ज॰ ।

2 जङ्घातो यद्वा जङ्घार्द्धतो भवेदिति ख॰ । सङ्घातो यथा जङ्घार्द्धतो यजेदिति घ॰ ।

3 यदि वा तद्विदिच्छया इति ख॰ ।

4 यस्तु स्यात् पीठवेष्टक इति ङ॰ ।

5 राज्ञोरिष्टमिति ज॰ ।

6 वै तथा इति ज॰ ।

7 चूडकमिति ज॰ ।

8 भृत्काषायादिभिरिति ख॰ , छ॰ च ।

9 विलिप्य रसमादायेति ज॰ ।

10 चूलके इति घ॰ , ङ॰ च ।

विशेषार्था[1] चतुर्थी च न कुण्डस्य[2] कल्पना ॥ 12cd
दण्डे तयार्थतत्त्वञ्च[3] विद्यातत्त्वं द्वितीयकं । 13ab
सद्योजातानि वक्राणि[4] शिवतत्त्वं पुनर्ध्वजे ॥ 13cd
निष्कलञ्च शिवन्तत्र न्यस्याङ्गानि प्रपूजयेत् । 14ab
चूडके च[4] ततो मन्त्रो सान्निध्ये सहिताणुभिः[6] ॥ 14cd
होमयेत् प्रतिभागञ्च ध्वजे तैस्तु फडन्तकैः[7] । 15ab
अन्यथापि कृतं यच्च ध्वजसंस्कारणं[8] क्कचित् ॥ 15cd
अस्त्रयागविधावेवं[9] तत्सर्वमुपदर्शितं । 16ab
प्रासादे कारिते स्थाने[10] स्रग्वस्त्रादिविभूषिते ॥ 16cd
जङ्घा वेदी तदूर्द्धे तु त्रितत्त्वादि निवेश्य च । 17ab
होमादिकं विधायाथ शिवं सम्पूज्य पूर्ववत् ॥ 17cd
सर्वतत्त्वमयं ध्यात्वा शिवञ्च व्यापकं न्यसेत् । 18ab
अनन्तं कालरुद्रञ्च विभाव्य च पदाम्बुजे ॥ 18cd
कुष्माण्डहाटकौ पीठे पातालनरकैः[11] सह । 19ab
भुवनैर्लोकपालैश्च शतरुद्रादिभिर्वृतं ॥ 19cd
ब्रह्माण्दकमिदं ध्यात्वा जङ्घाताञ्च विभावयेत् । 20ab
वारितेजोनिलव्योमपञ्चाष्टकसमन्वितं[12] ॥ 20cd

1 विशेषाद्या इति घ॰ ।
2 नवदण्डस्येति झ॰ ।
3 तथात्मतत्त्वञ्चेति ग॰ , घ॰ च ।
4 सद्योजातादि वक्राणीति झ॰ ।
5 चूलके च इति ख॰ , ज॰ च ।
6 संहितात्मभिरिति ख॰ , ग॰ च ।
7 चूलके इति श्लोको झ॰ पुस्तके नास्ति ।
8 तच्च ध्वजे संहरणमिति ख॰ , छ॰ , च । यच्च ध्वजसंस्करणमिति घ॰ ।
9 अस्त्रयागे विधाने चेति ज॰ ।
10 प्रासादकारितस्थाने इति ख॰ , झ॰ च । प्रासादे कारितस्थाने इति ज॰ ।
11 पातालनवकैरिति ङ॰ , ज॰ च ।
12 पञ्चाङ्गकसमन्वितमिति ग॰ ।

सर्वावरणसञ्ज्ञञ्च वृद्धयोन्यवृकान्वितं[1] । 21ab
योगाष्टकसमायुक्तं[2] नाशाविधि गुणत्रयं ॥ 21cd
पटस्थं पुरुषं सिंहं वामञ्च[3] परिभावयेत् । 22ab
मञ्जरीवेदिकायाञ्च विद्यादिकचतुष्टयं ॥ 22cd
कण्ठे मायां सरुद्राञ्च[4] विद्याश्चामलसारके[5] । 23ab
कलसे चेश्वरं विन्दुं विद्येश्वरसमन्वितं[6] ॥ 23cd
जटाजूटञ्च तं विद्याच्छूलं चन्द्रार्द्धरूपकं । 24ab
शक्तित्रयं च तत्रैव दण्डे नादं विभाव्य च ॥ 24cd
ध्वजे च कुण्डलीं शक्तिमिति धाम्नि विभावयेत् । 25ab
जगत्या वाथ सन्धाय लिङ्गं पिण्डिकयाथवा[7] ॥ 25cd
समुत्थाप्य सुमन्त्रैश्च[8] विन्यस्ते शक्तिपङ्कजे । 26ab
न्यस्तरत्नादिके तत्र स्वाधारे विनिवेशयेत् ॥ 26cd
यजमानो ध्वजे लग्ने बन्धुमित्रादिभिः सह । 27ab
धाम प्रदक्षिणीकृत्य लभते फलमीहितं[9] ॥ 27cd
गुरुः पाशुपतं ध्यायन्[10] स्थिरमन्त्राधिपैर्युतं[11] । 28ab
अधिपान् शस्त्रयुक्तांश्च रक्षणाय निबोधयेत्[12] ॥ 28cd

---

1 वुद्धयोन्यन्तकान्वितमिति ग॰ ।

2 यागष्टकसमायुक्तमिति झ॰ ।

3 रागश्चेति ख॰ , ज॰ च ।

4 कण्ठे मायाङ्गवक्त्रञ्चेति झ॰ ।

5 विद्याश्चामनसारके इति ख॰ , ग॰ च । विद्याद्या मनसारके इति ज॰ ।

6 विश्वेश्वरसमन्वितमिति ख॰ , घ॰ , छ॰ च । विद्योत्तरसमन्वितमिति ग॰ । सर्वावरणसञ्ज्ञञ्चेत्यादिः, विद्येश्वरसमन्वितमित्यन्तः पाठो ङ॰ पुस्तके नास्ति ।

7 लिङ्गपिण्डिकयाथवेति घ॰ , ङ॰ , ज॰ च ।

8 स्वमन्त्रैश्चेति ग॰ , ङ॰ , च ।

9 लभते फलमीप्सितमिति ङ॰ ।

10 पाशुपतं ध्यायेदिति ख॰ , घ॰ च ।

11 शिवमन्त्राधिपैर्युतमिति घ॰ , ङ॰ च ।

12 रक्षणाय निवेदयेदिति ख॰ , छ॰ च ।

न्यूनादिदोषशान्त्यर्थं हुत्वा[1] दत्वा च दिग्बलिं । 29ab
गुरवे दक्षिणां दद्याद् यजमानो दिवं व्रजेत् ॥ 29cd
प्रतिमालिङ्गवेदीनां यावन्तः परमाणवः । 30ab
तावद्युगसहस्राणि कर्त्तुर्भोगभुजः[2] फलं ॥ 30cd

इत्याग्नेये महापुराणे ध्वजारोहणादिविधिर्नाम द्व्यधिकशततमो ऽध्यायः ।

## 103

### अथ त्र्यधिकशततमोध्यायः ।

जीर्णोद्धारः ।
ईश्वर उवाच ।
जीर्णादीनाञ्च लिङ्गानामुद्धारं विधिना वदे । 1ab
लक्ष्मोज्झितञ्च भग्नञ्च स्थूलं वज्रहतं तथा ॥ 1cd
संपुटं स्फुटितं व्यङ्गं लिङ्गमित्येवमादिकं । 2ab
इत्यादिदुष्टलिङ्गानां योज्या पिण्डी[3] तथा वृषः ॥ 2cd
चालितञ्चलितं लिङ्गमत्यर्थं[4] विषमस्थितं । 3ab
दिङ्मूढं पातितं लिङ्गं मध्यस्थं पतितं तथा ॥ 3cd
एवंविधञ्च संस्थाप्य[5] निर्व्रणञ्च भवेद्यदि । 4ab
नद्यादिकप्रवाहेन तदपाक्रियते यदि ॥ 4cd
ततो ऽन्यत्रापि संस्थाप्य विधिदृष्टेन कर्म्मणा । 5ab

---

1 न्यूनादिदोषनाशार्थं कृत्वेति झ° । न्यूनादिदोषनाशाय हुत्वेति घ° , ज° च ।
2 कर्त्तर्भोगवत इति ख° , छ° च ।
3 त्याज्या पिण्डीति घ° ।
4 निम्नमत्यर्थमिति ज° ।
5 सन्त्याज्यमिति झ° ।

सुस्थितं दुस्थितं वापि[1] शिवलिङ्गं न चालयेत् ॥ 5cd
शतेन स्थापनं कुर्य्यात् सहस्रेण तु चालनं[2] । 6ab
पूजादिभिश्च संयुक्तं जीर्णाद्यमपि सुस्थितं[3] ॥ 6cd
याम्ये मण्डपमीशे वा प्रत्यग्द्वारैकतोरणं । 7ab
विधाय द्वारपूजादि स्थण्डिले मन्त्रपूजनं[4] ॥ 7cd
मन्त्रान् सन्तर्प्य सम्पूज्य वास्तुदेवांस्तु पूर्ववत् । 8ab
दिग्बलिं च वहिर्दत्वा समाचम्य स्वयं गुरुः ॥ 8cd
ब्राह्मणान् भोजयित्वा तु शम्भुं[5] विज्ञापयेत्ततः । 9ab
दुष्टलिङ्गमिदं शम्भोः शान्तिरुद्धारणस्य चेत्[6] ॥ 9cd
रुचिस्तवादिविधिना[7] अधितिष्ठस्व मां शिव । 10ab
एवं विज्ञाप्य देवेशं शान्तिहोमं समाचरेत् ॥ 10cd
मध्वाज्यक्षीरदूर्वाभिर्मूलेनाष्टाधिकं शतं । 11ab
ततो लिङ्गं च संस्थाप्य पूजयेत् स्थिण्डिले[8] तथा ॥ 11cd
ओं व्यापकेश्वरायेति नात्यन्तं शिववादिना[9] । 12ab

---

1 दुस्थितं चापीति ग॰ ।

2 सहस्रेण च चालयेदिति ग॰ ।

3 जीर्णाद्यमपि संस्थितमिति ख॰ , छ॰ च । पूजया रहितं यत्तदन्निष्ठमपि दुःस्थितमिति ख॰ , घ॰ , पुस्तके ऽधिकः पाठः ।

4 स्थण्डिलेशप्रपूजनमिति ख॰ , ग॰ , ङ॰ , छ॰ , झ॰ च । स्थण्डिले सम्प्रपूजनमिति घ॰ , ज॰ च ।

5 सर्वमिति क॰ ।

6 शान्तिरुद्धरणे न्यसेदिति ख॰ , ग॰ , घ॰ , छ॰ च ।

7 रुचिस्तवास्ति विधिनेति ख॰ , ङ॰ , छ॰ , ज॰ च ।

8 स्थण्डिलमिति ख॰ , घ॰ , छ॰ , ज॰ च ।

9 ओं व्यापकेश्वरायेति तत्त्वेनाभ्यन्तरादिने इति ख॰ । ओं व्यापकेश्वरायेति नात्यन्तशिववाचिनेति घ॰ । ओं व्यापकेश्वरायेति तत्त्वेनात्यन्तवादिने इति छ॰ ।

ओं व्यापकं हृदयेश्वराय नमः(1) । ओं व्यापकेश्वराय शिरसे नमः(2) । इत्याद्यङ्गमन्त्राः(3) ।

ततस्तत्राश्रितं तत्त्वं श्रावयेदस्त्रमस्ततः[4] ॥ 12cd
सत्त्वः कोपीह[5] यः कोपिलिङ्गमाश्रित्य तिष्ठति । 13ab
लिङ्गन्त्यक्त्वा शिवाज्ञाभिर्यत्रेष्टं तत्र गच्छतु ॥ 13cd
विद्याविद्येश्वरैर्युक्तः स भवोत्र[6] भविष्यति । 14ab
सहस्रं प्रतिभागे च ततः पाशुपताणुना[7] ॥ 14cd
हुत्वा शान्त्यम्बुना प्रोक्ष्य स्पृष्ट्वा कुशैर्जपेत्ततः[8] । 15ab
दत्वार्घं च विलोमेन तत्त्वतत्त्वाधिपांस्तथा ॥ 15cd
अष्टमूर्त्तीश्वरान् लिङ्ग[9] पिण्डिकासंस्थितान् गुरुः । 16ab
विसृज्य स्वर्णपाशेन वृषस्कन्धस्थया तथा ॥ 16cd
रज्वा बध्वा तया नीत्वा शिवमन्तं गृणन् जनैः । 17ab
तज्जले निक्षिपेन् मन्त्री पुष्टचर्थं जुहुयाच्छतं ॥ 17cd
तृप्तये दिक्पतीनाञ्च वास्तुशुद्धौ[10] शतं शतं । 18ab
रक्षां विधाय तद्धाम्नि महापाशुपता ततः ॥ 18cd
लिङ्गमन्यत्ततस्तत्र विधिवत् स्थापयेद् गुरुः । 19ab
असुरैर्मुनिभिर्गोत्रैस्तन्त्रविद्भिः[11] प्रतिष्ठितं ॥ 19cd

---

1 ओं व्यापकेश्वराय हृदयाय नम इति ख॰ , ग॰ च । ओं व्यापकेश्वर हृदया नम इति झ॰ , घ॰ च ।
2 शिरसे स्वाहेति ज॰ ।
3 इत्यङ्गमन्त्रा इति ख॰ , ङ॰ , च । इत्यादिमन्त्रा इति छ॰ ।
4 स्नापयेदस्त्रमन्त्रत इति छ॰ । धारयेदस्त्रमन्त्रत इति ज॰ ।
5 सिद्धः कोपीहेति घ॰ ।
6 शम्भुरत्रेति घ॰ , ज॰ च । प्रभुरत्रेति ख॰ , छ॰ च ।
7 पाशुपतात्मनेति ख॰ , ग॰ , छ॰ च ।
8 दर्भैर्जपेत्तत इति ङ॰ ।
9 मूर्त्तिमूर्त्तीश्वरान् लिङ्गे इति ख॰ , घ॰ , ङ॰ , छ॰ च ।
10 वास्तुमध्ये घ॰ ।
11 तत्त्वविद्भिरिति ख॰ , घ॰ , छ॰ , ज॰ च ।

जीर्णं वाप्यथवा भग्नं[1] विधिनापि नचालयेत् । 20ab
एष एव विधिः कार्योजीर्णधामसमुद्धृतौ ॥ 20cd
खड्गे मन्त्रगणं न्यस्य कारयेत् मन्दिरान्तरं । 21ab
सङ्कोचे मरणं प्रोक्तं विस्तारे तु धनक्षयः ॥ 21cd
तद्द्रव्यं श्रेष्ठद्रव्यं वा तत् सकार्यं तत्प्रमाणकं ।

इत्याग्नेये महपुराणे जीर्णोद्धारो नाम त्र्यधिकशततमो ऽध्यायः ॥

# 104

## अथ चतुरधिकशततमोध्यायः ।

प्रासादलक्षणं ।
ईश्वर उवाच ।
वक्ष्ये प्रासादसामान्यलक्षणं ते शिखध्वज । 1ab
चतुर्भागीकृते क्षेत्रे भित्तेर्भागेन विस्तरात् ॥ 1cd
अद्रिभागेन[3] गर्भः स्यात् पिण्डिका पादविस्तरात् । 2ab
पञ्चभागीकृते क्षेत्रेन्तर्भागे[4] तु पिण्डिका ॥ 2cd
सुषिरं भागविस्तीर्णं भित्तयो भागविस्तरात् । 3ab
भागौ द्वौ मध्यमे गर्भे ज्येष्ठभागद्वयेन तु[5] ॥ 3cd

---

1 जीर्णे प्राप्य यथा मग्नमिति ख० ।
2 तत्प्रमाणत इति घ० ।
3 अर्द्धभागेनेति ख० , घ० , छ० , ज० च ।
4 पञ्चभागीकृते वापि मध्यभागे इति घ० , छ० , ज० च ।
5 भागौ द्वौ मध्यमो गर्भो ज्येष्ठो भागद्वयेन तु इति ङ० , छ० , ज० च ।

त्रिभिस्तु कन्यसागर्भः[1] शेषो भित्तिरिति क्वचित् । 4ab
षोढाभक्येथवा क्षेत्रे भित्तिर्भागैकविस्तरात् ॥ 4cd
गर्भो भागेन विस्तीर्णो भागद्वयेन पिण्डिका । 5ab
विस्ताराद् द्विगुणो वापि सपादद्विगुणो ऽपि वा ॥ 5cd
अर्द्धार्द्धद्विगुणो वापि[2] त्रिगुणः क्वचित्तिदुच्छ्रयः । 6ab
जगती विस्तरार्द्धेन त्रिभागेन क्वचिद्भवेत् ॥ 6cd
नेमिः पादोनविस्तीर्णा[3] प्रासादस्य समन्ततः । 7ab
परिधिस्त्रयं शको मध्ये रथकांस्तत्र कारयेत् ॥ 7cd
चामुण्डं भैरवं तेषु नाट्येशं च निवेशयेत् । 8ab
प्रासादार्द्धेन देवानामष्टौ वा चतुरो ऽपिवा ॥ 8cd
प्रदक्षिणां वहिः कुर्यात् प्रासादादिषु[4] वा नवा । 9ab
आदित्याः पूर्वतः स्थाप्याः स्कन्दोग्निर्वायुगोचरे[5] ॥ 9cd
एवं यमादयो न्यस्याः स्वस्याः स्वस्यां दिशि स्थिताः । 10ab
चतुर्द्धा शिखरं कृत्वा शुकनासा द्विभागिका ॥ 10cd
तृतीये वेदिका त्वग्नेः सकण्ठो मलसारकः[6] । 11ab
वैराजः पुष्पकश्चान्यः कैलासो[7] मणिकस्तथा ॥ 11cd
त्रिविष्टपञ्च पञ्चैव मेरुमूर्द्धनि संस्थिताः[8] । 12ab
चतुरस्रस्तु तत्राद्यो द्वितीयोपि तदायतः ॥ 12cd

---

1 त्रिभिस्तु कलसो गर्भ इति ख॰ , छ॰ च ।

2 अध्यर्द्धद्विगुणो वापीति घ॰ , ज॰ च ।

3 पादेन विस्तीर्णा इति घ॰ , ज॰ च ।

4 प्रासादाद्दिक्षु इति ख॰ , घ॰ , छ॰ , ज॰ च । प्रासादे दिक्षु इति ङ॰ ।

5 स्कन्दोग्निर्वामगोचरे इति क॰ ।

6 सकण्ठोमवसारक इति ङ॰ । सकण्ठोमवसाधक इति छ॰ ।

7 कैलास्य इति ङ॰ , छ॰ च ।

8 चतुर्द्धेत्यादिः, मेरुमूर्द्ध्नि संस्थिता इत्यन्तः पाठो ग॰ पुस्तके नास्ति ।

वृत्तो वृत्तायतश्चान्यो[1] ह्यष्टास्रश्चापि पञ्चमः । 13ab
एकैको नवधाभेदैश्चत्वारिंशच्च पञ्च च ॥ 13cd
प्रासादः प्रथमो मेरुर्द्वितियो मन्दरस्तथा । 14ab
विमानञ्च तथा भद्रः सर्वतोभद्र एव च ॥ 14cd
चरुको[2] नन्दिको नन्दिवर्द्धमानस्तथापरः । 15ab
श्रीवत्सश्चेति वैराजान्ववाये च समुत्थिताः ॥ 15cd
बलभी गृहराजश्च शालागृहञ्च मन्दिरं । 16ab
विशालश्च समो ब्रह्म[3] मन्दिरं भुवनन्तथा ॥ 16cd
प्रभवः शिविका वेश्म नवैते पुष्पकोद्भवाः[4] । 17ab
बलयो[5] दुन्दुभिः पद्मो महापद्मक[6] एवच ॥ 17cd
वर्द्धनी वान्य उष्णीषः[7] शङ्खश्च कलसस्तथा । 18ab
खवृक्षश्च तथाप्येते वृत्ताः कैलाससम्भवाः[8] ॥ 18cd
गजोथ वृषभो हंसो गरुत्मान्नृक्षनायकः । 19ab
भूषणो[9] भूधरश्चान्नचे श्रीजयः पृथवीधरः[10] ॥ 19cd
वृत्तायतात् समुद्भूता नवैते मणिकाह्वयात्[11] । 20ab
वज्रं चक्रन्तथा चान्यत् स्वस्तिकं वज्रस्वस्तिकं[12] ॥ 20cd

---

1 चतुर्वृत्तायतश्चान्य इति घ° ।
2 रुचका इति क° ।
3 विशालश्च मनो ब्रह्मेति ख° , घ° च । विशालश्च तथा ब्रह्मेति ग° ।
4 नवैते पुष्करोद्भवा इति ङ° ।
5 पणव इति ज° ।
6 महापद्मश्च इति क° ।
7 शकुनी चास्य उष्णीष इति ज° ।
8 वर्द्धनीत्यादिः, कैलाससम्भवा इत्यन्तः पाठो छ° पुस्तके नास्ति ।
9 वृषण इति ङ° ।
10 खवृक्षश्चेत्यादिः, पृथिवीधर इत्यन्तः पाठो ज° पुस्तके नास्ति ।
11 मणिकाक्षयात् इति ज° ।
12 वज्रहस्तिकमिति ख° , ग° , छ° च । वज्रमुष्टिकमिति ज° ।

चित्रं स्वस्तिकखड्गञ्च गदा श्रीकण्ठ एव च । 21ab
विजयो नामतश्चैते[1] त्रिविष्टपसमुद्भवाः ॥ 21cd
नगराणामिमाः सञ्ज्ञा लाटादीनामिमास्तथा[2] । 22ab
ग्रीवार्द्धेनोन्नतञ्चूलम्पृथुलञ्च विभागतः[3] ॥ 22cd
दशधा वेदिकाङ्कृत्वा पञ्चभिः स्कन्धविस्तरः । 23ab
त्रिभिः कण्ठं तु कर्तव्यं चतुर्भिस्तु प्रचण्डकं[4] ॥ 23cd
दिक्षु द्वाराणि कार्याणि न विदिक्षु कदाचन । 24ab
पिण्डिका कोणविस्तीर्णा मध्यमान्ता ह्युदाहृता ॥ 24cd
क्वचित् पञ्चमभागेन महताङ्गर्भपादतः । 25ab
उच्छ्राया द्विगुणास्तेषामन्यथा वा निगद्यते ॥ 25cd
षष्ठ्याधिकात् समारभ्य अङ्गुलानां शतादिह[5] । 26ab
उत्तमान्यपि चत्वारि द्वाराणि दशहानितः[6] ॥ 26cd
त्रीण्येव मध्यमानि स्युस्त्रीण्येव कन्यसान्यतः । 27ab
उच्छ्रायार्द्धेन विस्तारो ह्युच्छ्रायो ऽभ्यधिकस्त्रिधा ॥ 27cd
चतुर्भिरष्टभिर्वापि दशभिरङ्गुलैस्ततः[7] । 28ab
उच्छ्रायात् पादविस्तीर्णा विशाखास्तदुदुंवरे[8] ॥ 28cd
विस्तरार्द्धेन बाहुल्यं[9] सर्वेषामेव कीर्तितम् । 29ab

---

1 विजयो नायकश्चैते इति ग॰ ।

2 नटादीनामिमास्तथेति ख॰ , ङ॰ च । नाट्यादीनामिमास्तथेति ग॰ , घ॰, च । नादादीनामिमास्तथेति ज॰ ।

3 पृथुलं स्वत्रिभागत इति ख॰ , घ॰ , छ॰ च । पृथुसमुद्रभागत इति ङ॰ ।

4 चतुर्भिस्तु तदण्डकमिति ख॰ , ग॰ च । चतुर्भिः कृतदण्डकमिति ज॰ ।

5 षष्ठ्याधिकांशमारभ्य अङ्गुलानां शताधिकमिति ज॰ ।

6 उत्तमान्यपि चत्वारि चत्वारि दशहानित इति ज॰ ।

7 दशभिर्वा गुणैः शुभ इति छ॰ ।

8 विशाखास्थे त्वडुम्बरे इति छ॰ च ।

9 विशुद्धेन तु वाहुल्यमिति ख॰ ।

द्विपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्टदं ॥ 29cd
अधःशाखाचतुर्थांशे प्रतीहारौ निवेशयेत् । 30ab
मिथुनैः पादवर्णाभिः[1] शाखाशेषं विभूषयेत् ॥ 30cd
स्तम्भबिद्धे भृत्यता स्यात् वृक्षबिद्धे त्वभूतिता । 31ab
कूपबिद्धे भयं द्वारे क्षेत्रबिद्धे[2] धनक्षयः ॥ 31cd
प्रासादगृहशालादिमार्गविद्धेषु[3] बन्धनं । 32ab
सभाबिद्धे न दारिद्र्यं वर्णबिद्धे[4] निराकृतिः ॥ 32cd
उलूखलेन दारिद्र्यं शिलाबिद्धेन शत्रुता[5] । 33ab
छायाबिद्धेन दारिद्र्यं बेधदोषो न जायते ॥ 33cd
छेदादुत्पाटनाद्वापि तथा प्राकारलक्षणात् । 34ab
सीमाया द्विगुणत्यागाद् बेधदोषो न जायते ॥ 34cd

इत्याग्नेये महापुराणे सामान्यप्रासादलक्षणं नाम चतुरधिकशततमो ऽध्यायः ।

## 105

### अथ पञ्चाधिकशततमो ऽध्यायः ।

नगरादिवास्तुकथनं ।
ईश्वर उवाच ।
नगरग्रामदुर्गाद्या[6] गृहप्रासादवृद्धये । 1ab

---

विस्तरार्द्धेन वा हन्यादिति झ° । विस्तरार्द्धेन बहुल्यमिति ज° ।
1 मिथुनैरथ वल्लीभिरिति ख° , छ° च ।
2 द्वारे श्वभ्रबिद्धे इति ख° , घ° , ङ° च ।
3 मार्गवेधैश्च इति छ° ।
4 चुल्लीबिद्धे इति ख° , ङ° च ।
5 शिलाबिद्धेन मूढतां इति ग° , ज° च ।
6 नगरग्रामदुर्गादौ इति ख° , छ° , ज° च । नगरग्रामदुर्गाख्यमिति घ° ।

एकाशीतिपदैर्वस्तुं पूजयेत् सिद्धये ध्रुवं ॥ 1cd
प्रागास्या दशधा नाड्यास्तासां नामानि च ब्रुवे । 2ab
शान्ता यशोवती कान्ता विशाला प्राणवाहिनी ॥ 2cd
सती वसुमती नन्दा सुभद्राथ[1] मनोरमा[2] । 3ab
उत्तरा द्वादशान्याश्च[3] एकाशीत्यङ्घ्रिकारिका ॥ 3cd
हरिणी सुप्रभा लक्ष्मीर्विभूतिर्विमला प्रिया । 4ab
जया ज्वाला विशोका च स्मृतास्तत्रपादतः[4] ॥ 4cd
ईशाद्यष्टाष्टकं दिक्षु यजेदीशं धनञ्जयं । 5ab
शक्रमर्कं तथा सत्यं[5] भृशं व्योम च पूर्वतः ॥ 5cd
हव्यवाहञ्च पूर्वाणि वितथं भौममेव च । 6ab
कृतान्तमथ गन्धर्वं भृगं मृगञ्च दक्षिणे ॥ 6cd
पितरं द्वारपालञ्च सुग्रीवं पुष्पदन्तकं । 7ab
वरुणं दैत्यशेषौ च यक्ष्माणं पश्चिमे सदा ॥ 7cd
रोगाहिमुख्यो[6] भल्लाटः सौभाग्यमदितिर्दितिः[7] । 8ab
नवान्तः पदगो ब्रह्मा पूज्योर्द्धे च षडङ्घ्रिगाः[8] ॥ 8cd
ब्रह्मेशान्तरकोष्ठस्थ[9] मायाख्यान्तु पदद्वये । 9ab
तदधश्चापवत्साख्यं केन्द्रान्तरेषु षट्पदे ॥ 9cd

---

1 सुभद्रा चेति ज॰ ।
2 मनोजवा इति ज॰ ।
3 उत्तरास्या दशान्याश्चेति ख॰ , ग॰ , घ॰ , ङ॰ , ज॰ च ।
4 सूत्रपादत इति ग॰ । सूत्रपातत इति छ॰ ।
5 शक्रमेकं तथापत्यमिति झ॰ ।
6 रोगाहिमोक्षेति ख॰ , छ॰ च ।
7 सोमरूप्यदितौ दितिमिति ख॰ ।
8 षडङ्गका इति ग॰ ।
9 गोष्ठस्थ इति छ॰ ।

मरीचिकाग्निमध्ये तु सविता द्विपदस्थितः । 10ab
सावित्री तदधो द्व्यंशे विवस्वान् षट्पदे त्वधः ॥ 10cd
पितृब्रह्मान्तरे विष्णुमिन्दुमिन्द्रं त्वधो जयं । 11ab
वरुणब्रह्मणोर्म्मध्ये मित्राख्यं षट्पदे यजेत् ॥ 11cd
रोगब्रह्मान्तरे नित्यं द्विपञ्च[1] रुद्रदासकम् । 12ab
तदधो द्व्यङ्घ्रिगं यक्ष्म षट्सौम्येषु धराधरं[2] ॥ 12cd
चरकीं स्कन्दविकटं विदारीं पूतनां क्रमात् । 13ab
जम्मं पापं[3] पिलिपिच्छं[4] यजेदीशादिवाह्यतः[5] ॥ 13cd
एकाशीपदं वेश्म मण्डपश्च शताङ्घ्रिकः[6] । 14ab
पूर्ववद्देवताः पूज्या ब्रह्मा तु षोडशांशके[7] ॥ 14cd
मरीचिश्च विवस्वांश्च मित्रं पृथ्वीधरस्तथा[8] । 15ab
दशकोष्ठस्थिता दिक्षु त्वन्ये बेशादिकोणगाः[9] ॥ 15cd
दैत्यमाता तथेशाग्नी[10] मृगाख्यौ पितरौ तथा । 16ab
पापयक्ष्मानिलौ देवाः सर्वे सार्द्धांशके स्थिताः ॥ 16cd
यत्पाद्योकः[11] प्रवक्ष्यामि सङ्क्षेपेण क्रमाद् गुह । 17ab

---

1 द्विस्थश्चेति ख॰ , ग॰ , ज॰ च ।

2 षट्सौम्येषु चराचरमिति झ॰ , घ॰ च ।

3 कुम्भपालमिति छ॰ ।

4 पिल्लिपिञ्जमिति ख॰ । पिल्लिपिञ्छमिति छ॰ ।

5 चरकीमित्यादिः, वाह्यत इत्यन्तः पाठो झ॰ पुस्तके नास्ति ।

6 शतार्द्धकमिति झ॰ ।

7 ब्रह्मान्तैः षोडशांतकैरिति ख॰ , छ॰ च । ब्रह्मान्ताः षोड़शांशके इति ग॰ , ज॰ च ।

8 पृथ्वीधरन्तथेति ख॰ ।

9 त्वन्येवेशादिके गणा इति ख॰ , छ॰ च ।

10 दैत्यमाता भवेशाग्नी इति ख॰ । दैत्यमाता हरेशाग्नी इति घ॰ , ज॰ च ।

11 यज्ञाद्योक इति ङ॰ ।

सदिग्विंशत्करैर्दैर्घ्यादष्टाविंशति[1] विस्तरात् ॥ 17cd
शिशिराश्रयः शिवाख्यश्च[2] रुद्रहीनः सदोभयोः । 18ab
रुद्रद्विगुणिता नाहाः पृथुष्णोभिर्विना त्रिभिः ॥ 18cd
स्याद्ग्रहद्विगुणं दैर्घ्यात्तिथिभिश्चैव[3] विस्तरात्[4] । 19ab
सावित्रः सालयः कुड्या[5] अन्येषां पृथक् स्त्रिंशांशतः ॥ 19cd
कुड्यपृथुपजङ्घोच्चात् कुड्यन्तु त्रिगुणोच्छ्रयं । 20ab
कुड्यसूत्रसमा पृथ्वी वीथी भेदादनेकधा ॥ 20cd
भद्रे तुल्यश्च वीथीभिर्द्वारवीथी विनाग्रतः । 21ab
श्रीजयं पृष्ठतो हीनं भद्रोयं पार्श्वयोर्विना ॥ 21cd
गर्भपृथुसमा[9] वीथी तदर्द्धार्द्धेन वा क्वचित् । 22ab
वीथ्यर्द्धेनोपवीथ्याद्यमेकद्वित्रिपुरान्वितम् ॥ 22cd
सामान्यानाथ गृहं वक्ष्ये सर्वेषां सर्वकामदं । 23ab
एकद्वित्रिचतुःशालमष्टशालं यथाक्रमात् ॥ 23cd
एकं याम्ये च सौमास्यं द्वे चेत् पश्चात् पुरोमुखम्[7] । 24ab
चतुःशालन्तु साम्मुख्यात्तयोरिन्द्रेन्द्रमुक्तयोः ॥ 24cd
शिवास्यमम्बुपास्यैष इन्द्रास्ये यमसूर्य्यकं[8] । 25ab

---

1 साष्टाविंशति इति ख॰ , ङ॰ च ।

2 शिवाश्रमः शिवाख्यस्येति ख॰ , घ॰ , झ॰ च । शिवाग्रकशिवाख्यस्येति ग॰ । शिवाग्रगः शिवाख्यस्येति ङ॰ , ज॰ च । शिवाश्रयः शिवाख्यस्येति छ॰ ।

3 दैर्घ्यादृषिभिभिश्चैवेति घ॰ ।

4 दैर्घ्यात् साष्टाविंशतिविस्तरादिति छ॰ ।

5 सावित्रस्यालयः कुला इति ख॰ । सावित्र इत्यादिः, त्रिगुणोच्छ्रयमित्यन्तः पाठो झ॰ पुस्तके नास्ति ।

6 गर्भपीठसमा इति ख॰ , घ॰ , झ॰ च ।

7 सौम्यास्यं द्वे द्वे पश्चात्पुरोमुखमिति ख॰ । सौम्याख्यं द्वे च पश्चादधोमुखमिति झ॰ ।

8 सावित्रः सालयः कोटीनां तपसा

प्राक्सौम्यस्थे च दण्दाख्यं प्राग्याम्ये वातसञ्ज्ञकं ॥ 25cd
आप्येन्दौ गृहवल्याख्यं[1] त्रिशूलं तद्विनर्द्धिकृत् । 26ab
पूर्वशलाविहीनं[2] स्यात् सुक्षेत्रं वृद्धिदायकं ॥ 26cd
याम्ये हीने भवेच्छूली त्रिशालं वृद्धिकृत् परं[3] । 27ab
यक्षघ्नं जलहीनौकः सुतघ्नं बहुशत्रुकृत् ॥ 27cd

---

सत्यलोकतः । अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः । पादाद्यधस्तुर्भूलोको भुवः सूर्य्याद्ध्रुवः स्मृतः । स्वर्लोको भुवान्तश्च नियुतानि चतुर्द्दश । एकदण्डं कटाहेन वृतो ब्रह्माण्डविस्तरः । वारिवन्ह्यानलाशैस्ततो भूतादिनावधि । वृतं दशगुणैरण्डं भूतादिर्महता तथा । दशोत्तराण्यशेषाणि शुक्र कस्मान्मामुने । महान्तञ्च समावृत्य प्रधानं समवस्थितं । अनन्तस्य न तस्यान्तः संस्थानं न च विद्यते । हेतुभूतमशेषस्य प्रकृतिः सा पुरा मुने । असङ्ख्यातानि चाण्डानि तत्र जातानि च दृशां । दारुण्यग्निर्यथा तैलं तेन तद्वत् पुमानिति । प्रधानेवस्थितो व्यापी चेतनात्मात्मवेदनः । प्रधानश्च पुमांश्चैव सर्वभूतात्मभूतात्मभूस्तथा । विष्णुशक्त्या महत्प्राज्ञवृत्तौ संश्रयधर्म्मिणौ । तयोः सैव पृथग्भावे कारणं संशयस्य च । महाख्यं स्वतलश्चाख्यं पातालं चापि सत्तम । कृष्णपीतारुणाः शुक्रशर्कराशैलकाञ्चनाः । भूमयस्तेषु चान्येषु सन्ति दैत्यादयः सुखं । पातालानामधश्चान्ते शेषो विष्णोश्च तामसः । गुणानन्यान् स चानन्तः शिरसा धारयन्महीं । भुवोधो नरका लोकं नयते क्षत्रवैष्णवः । वारिणा भाविता पृथ्वी यावत्तावन्नभो मतं । सिद्धान्तमस्तुयाभ्यैव, इन्द्रास्थे यमसूर्य्यकं ।

मल्लब्धेषु क॰ , ख॰ , ग॰ , घ॰ , ङ॰ , छ॰ , झ॰ , चिह्नितपुस्तकेषु सावित्रः सालयः इत्यतः परं नैष पाठो वर्त्तते । तेषु तु मुद्रितपाठ एव वर्त्तते । पुनः ज॰ चिह्नितपुस्तके सावित्रः सालय इत्यतः परं इन्द्रास्येयमसूर्य्यकमित्यन्तः पाठो नास्ति । ज॰ चिह्नितपुस्तके य उक्तपाठो दृश्यते तत्र पूर्वापरसङ्गतिर्नास्ति । प्रकरणान्तरीयपाथोयमत्र लेखकभ्रमात् समागत इति भाति ।

1 गृहशल्याख्यमिति ख॰ ।

2 पूर्वशाखाविहीनमिति ङ॰ ।

3 याम्ये हीने भवेच्चुल्ली त्रिशास्त्रं दिनितत्परमिति झ॰ । याम्ये हीने भवेच्छत्री त्रिशालं वित्तहृत्परमिति ग॰ ।

इन्द्रादिक्रमतो वच्मि[1] ध्वजाद्यष्टौ गृहाण्यहं । 28ab
प्रक्षालानुस्रगावासमग्नौ[2] तस्य महानसं ॥ 28cd
याम्ये रसक्रिया शय्या धनुःशस्त्राणि रक्षसि । 29ab
धनमुक्त्यम्वुपेशाख्ये[3] सम्यगन्धौ च[4] मारुते ॥ 29cd
सौम्ये[5] धनपशू कुर्यादीशे दीक्षावरालयं[6] । 30ab
स्वामिहस्तमितं वेश्म विस्तारायामपिण्डिकं ॥ 30cd
त्रिगुणं हस्तसंयुक्तं कृत्वाष्टांशैर्हृतं तथा[7] । 31ab
तच्छेषोयं स्थितस्तेन वायसान्तं ध्वजादिकं ॥ 31cd
त्रयः पक्षाग्निवेदेषु रसर्षिवसुतो भवेत् । 32ab
सर्वनाशकरं वेश्म मध्ये चान्ते च संस्थितं ॥ 32cd
तस्माच्च[8] नवमे भागे शुभकृन्निलयो मतः । 33ab
तन्मध्ये मण्डपः शस्तः समो वा द्विगुणायतः ॥ 33cd
प्रत्यगाप्ये चेन्दुयमे[9] हट्ट एव गृहावली । 34ab
एकैकभवनाख्यानि दिक्ष्वष्टाष्टकसङ्ख्यया[10] ॥ 34cd
ईशाद्यदितिकान्तानि फलान्येषां यथाक्रमं[11] । 35ab
भयं नारी चलत्वं च जयो वृद्धिः प्रतापकः ॥ 35cd

---

1 इन्द्रादिक्रमतो वह्नीति ख॰ , छ॰ च ।

2 प्रक्षालनात्मभागारः समग्नौ इति छ॰ । प्रक्षालानुग्रहावासमग्नौ इति ज॰ ।

3 धनभ्क्ताम्बुपशाख्ये इति ख॰ , छ॰ च ।

4 शस्यमञ्चौ चेति झ॰ ।

5 याम्ये इति झ॰ ।

6 दीक्षासुरालयमिति ख॰ , ज॰ , झ॰ च ।

7 कृत्वाष्टांशैर्हृतं तथेति ग॰ । कृत्वाष्टाङ्गैर्हृतं तथेति घ॰ , ज॰ च । कृत्वाष्टांशहृतस्तथेति झ॰ ।

8 तस्मात्तु इति झ॰ ।

9 प्रागीशे चेन्दुयाम्ये वेति ख॰ । प्रागाप्ये चेन्दुयाम्ये इति छ॰ , झ॰ च ।

10 विस्पष्टाष्टकसङ्ख्येति क॰ ।

11 सर्वनाशकरमित्यादिः, यथाक्रममित्यन्तः पाठो ज॰ पुस्तके नास्ति ।

धर्मः कलिश्च नैस्व्यञ्च प्राग्द्वारेष्वष्टसु ध्रुवं । 36ab
दाहो ऽसुखं सुहृन्नाशो धननाशो मृतिर्द्धनं[1] ॥ 36cd
शिल्पित्वं तनयः स्याच्च याम्यद्वारफलाष्टकं । 37ab
आयुःप्राव्राज्यशस्यानि[2] धनशान्त्यर्थसङ्क्षयाः ॥ 37cd
शोषं भोगं चापत्यञ्च[3] जलद्वारफलानि च । 38ab
रोगो मदार्त्तिमुख्यत्वं चार्थायुः कृशता मतिः ॥ 38cd
मानश्च द्वारतः पूर्वे[4] उत्तरस्यान्दिशि क्रमात् । 39ab

इत्याग्नेये महापुराणे गृहादिवास्तुर्नाम पञ्चाधिकशततमो ऽध्यायः ॥

## 106

### अथ षड्धिकशततमो ऽध्यायः ।

नगरादिवास्तुः ।
ईश्वर उवाच ।
नगरादिकवास्तुश्च वक्ष्ये राज्यादिवृद्धये । 1ab
योजनं योजनार्द्धं वा[5] तदर्थं स्थानमाश्रयेत् ॥ 1cd

---

1 वनवासी मृतिर्धनमिति घ° । धर्म्मः कलिश्चेत्यादिः, मृतिर्धनमित्यन्तः पाठो झ° पुस्तके नास्ति ।
2 आयुः प्रावाह्यशस्यानीति ख° , छ° च ।
3 भोगं च पत्यं चेति ख° , छ° च ।
4 द्वारतः प्रोक्त इति घ° ।
5 योजनार्द्धन्तदर्द्धं च इति घ° , ङ° च ।

अभ्यर्च्य वास्तुनगरं प्राकाराद्यन्तु कारयेत् । 2ab
ईशादित्रिंशत्पदके पूर्वद्वारं च सूर्यके ॥ 2cd
गन्धर्वाभ्यां[1] दक्षिणे स्याद्वारुण्ये पश्चिमे तथा । 3ab
सौम्यद्वारं सौम्यपदे कार्या हट्टास्तु विस्तराः ॥ 3cd
येनेभादि सुखं गच्छेत् कुर्याद् द्वारं तु षड्करं । 4ab
छिन्नकर्णं विभिन्नञ्च चन्द्रार्द्धाभं पुरं न हि ॥ 4cd
वज्रसूचीमुखं नेष्टं[2] सकृद् द्वित्रिसमागमं । 5ab
चापाभं वज्रनागाभं[3] पुरारम्भे हि शान्तिकृत् ॥ 5cd
प्रार्च्य विष्णु हरार्कादीन्नत्वा दद्याद् बलिं बली[4] । 6ab
आग्नेये स्वर्णकर्मारान्[5] पुरस्य विनिवेशयेत् ॥ 6cd
दक्षिणे नृत्यवृत्तीनां[6] वेश्यास्त्रीणां गृहाणि च । 7ab
नटानाञ्चक्रिकादीनां[7] कैवर्त्तादेश्च नैर्ॠते ॥ 7cd
रथानामायुधानाञ्च कृपाणाञ्च वारुणे । 8ab
शौण्डिकाः कर्माधिकृता वायव्ये परिकर्मणः[8] ॥ 8cd
ब्राह्मणा यतयः सिद्धाः पुण्यवन्तश्च चोत्तरे । 9ab
फलाद्यादिविक्रयिण ईशाने च वणिग्जनाः ॥ 9cd
पूर्वतश्च बलाध्यक्षा आग्नेये विविधं बलं । 10ab
स्त्रीणामादेशिनो दक्षे काण्डारान्नैर्ॠते न्यसेत् ॥ 10cd
पश्चिमे च महामात्यान् कोषपालांश्च कारुकान् । 11ab

1 गन्धर्वाद्या इति ग° , ज° च ।
2 सूचीमुखं नष्टमिति झ° , छ° च ।
3 व्यायतं वज्रनासाभमिति घ° । चापाभं चक्रनाभाभमिति ङ° ।
4 स्तुत्वा नत्वा बलिं बली इति ङ° ।
5 आग्नेये तु कर्मकारानिति ख° ।
6 दक्षिणे भृत्यधूर्त्तानामिति छ° ।
7 नटानां वाह्लिकादीनामिति ख° , ज° च ।
8 परिकर्मण इति छ° , ज° ।

उत्तरे दण्डनाथांश्च नायकद्विजसङ्कुलान् ॥ 11cd
पूर्वतः क्षत्रियान् दक्षे वैश्याञ्च्छूद्रांश्च पश्चिमे । 12ab
दिक्षु वैद्यान् वाजिनश्च बलानि च चतुर्द्दिशं ॥ 12cd
पूर्वेण चरलिङ्ग्यादीञ्छ्मशानादीनि दक्षिणे । 13ab
पश्चिमे गोधनाद्यञ्च कृषिकर्तॄंस्तथोत्तरे ॥ 13cd
न्यसेन्म्लेच्छांश्च कोणेषु ग्रामादिषु तथा स्थितिं[1] । 14ab
श्रियं वैश्रवणं द्वारि[2] पूर्व्वे तौ[3] पश्यतां श्रियं ॥ 14cd
देवादीनां पश्चिमतः पूर्व्वास्यानि गृहाणि हि । 15ab
पूर्व्वतः पश्चिमास्यानि दक्षिणे चोत्तराननान्[4] ॥ 15cd
नाकेशविष्ण्वादिधामानि रक्षार्थं नगरस्य च[5] । 16ab
निर्द्दैवतन्तु नगरग्रामदुर्गगृहादिकं ॥ 16cd
भुज्यते तत् पिशाचाद्यै रोगाद्यैः परिभूयते । 17ab
नगरादि सदैवं हि जयदं भुक्तिमुक्तिदं ॥ 17cd
पूर्व्वायां श्रीगृहं प्रोक्तमाग्नेय्यां वै महानसं । 18ab
शयनं दक्षिणस्यान्तु[7] नैर्ऋत्यामायुधाश्रयं ॥ 18cd
भोजनं पश्चिमायान्तु वायव्यां धान्यसङ्ग्रहः । 19ab
उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहं[8] ॥ 19cd
चतुःशालं त्रिशालं वा द्विशालं चैकशालकं । 20ab
चतुःशालगृहाणान्तु शालालिन्दकभेदतः[9] ॥ 20cd

---

1 तथा स्थितमिति ख॰ , घ॰ , ङ॰ , छ॰ च । यथास्थितमिति ज॰ ।
2 वैश्रवणं वापि इति ग॰ ।
3 पूर्वत इति ख॰ ।
4 दक्षिणे चोत्तरेण चेति ख॰ , ग॰ , घ॰ च ।
5 नगरस्य हीति ख॰ , छ॰ च ।
6 रोगाद्यैरभिभूयते इति ज॰ ।
7 दक्षिणायां त्विति ग॰ , घ॰ , झ च ।
8 देवतालयमिति झ॰ ।
9 शालालिन्दप्रभेदत इति क॰ ।

शतद्वयन्तु जायन्ते पञ्चाशत् पञ्च तेष्वपि । 21ab
त्रिशालानि तु चत्वारि द्विशालानि तु पञ्चधा ॥ 21cd
एकशालानि चत्वारि एकालिन्दानि वच्मि च । 22ab
अष्टाविंशदलिन्दानि गृहाणि नगराणि च[1] ॥ 22cd
चतुर्भिः सप्रभिश्चैव पञ्चपञ्चाशदेव तु । 23ab
षडलिन्दानि विंशैव अष्टाभिर्विंश एव हि[2] ॥ 23cd
अष्टालिन्दं भवेदेवं[3] नगरादौ गृहाणि हि । 24ab

इत्यागेनेये महापुराणे नगरादिवास्तुर्नाम षड़धिकशततमो ऽध्यायः ॥

## 107

### अथ सप्ताधिकशततमो ऽध्यायः ।

स्वायम्भुवसर्गः ।
अग्निरुवाच(4) ।
वक्ष्ये भुवनकोषञ्च पृथ्वीद्वीपादिलक्षणं । 1ab
अग्निधृश्चाग्निबाहुश्च वपुष्मान्द्युतिमांस्तथा ॥ 1cd
मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च[5] । 2ab

---

1 गृहाणि नगरादिषु इति झ० । गृहाणि नगराणि तु इति ख० ।
2 विंश एव चेति ख० , छ० च ।
3 अष्टाभिर्विभजेदेवमिति छ० ।
4 ईश्वर उवाचेति ख० , छ० च ।
5 सवनः क्षय एव च इति क० ।

ज्योतिष्मान् दशमस्तेषां सत्यनामा सुतो ऽभवत् ॥ 2cd
प्रियव्रतसुताः ख्याताः सप्तद्वीपान्ददौ पिता । 3ab
जम्बुद्वीपमथाग्नीध्रे प्लक्षं मेधातिथेर्ददौ ॥ 3cd
वपुष्मते शाल्मलञ्च ज्योतिष्मते कुशाह्वयं । 4ab
क्रौञ्चद्वीपं द्युतिमते शाकं भव्याय दत्तवान् ॥ 4cd
पुष्करं सवनायादादग्नीध्रे ऽदात् सुते शतं[1] । 5ab
जम्बूद्वीपं पिता लक्षं नाभेर्द्दत्तं हिमाह्वयं ॥ 5cd
हेमकूटं किम्पुरुषे हरिवर्षाय नैषधं । 6ab
इलावृते मेरुमध्यं रम्ये नीलाचलश्रितं[2] ॥ 6cd
हिरण्वते श्वेतवर्षं कुरूंस्तु कुरवे ददौ । 7ab
भद्राश्वाय च भद्राश्वं केतुमालाय पश्चिमं ॥ 7cd
मेरोः प्रियव्रतः पुत्रानभिषिच्य ययौ वनं । 8ab
शालग्रामे तपस्तप्त्वा ययौ विष्णोर्लयं नृपः ॥ 8cd
यानि कुम्पुरुषाद्यानि ह्यष्टवर्षाणि सत्तम । 9ab
तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः ॥ 9cd
जरामृत्युभयं नास्ति धर्म्माधर्म्मौ युगादिकं । 10ab
नाधमं मध्यमन्तुल्या हिमाद्देशात्तु नाभितः[3] ॥ 10cd
ऋषभो मेरुदेव्याञ्च ऋषभाद् भरतो ऽभवत् । 11ab
ऋषभो दत्तश्रीः पुत्रे शालग्रामे हरिङ्गतः ॥ 11cd
भरताद् भारतं वर्षं भरतात् सुमतिस्त्वभूत्[4] । 12ab
भरतो दत्तलक्ष्मीकः शालग्रामे हरिं गतः ॥ 12cd

1 सुतेभ्य उ इति ख॰ , छ॰ च ।
2 रम्येनीलाचलाश्रियमिति ख॰ , ङ॰ , झ॰ च । रम्यं नीलाचले स्थितमिति घ॰ ।
3 हिमाद्देशान्तनाभित इति छ॰ ।
4 सुमतिस्तत इति ग॰ ।

स योगी योगप्रस्तावे[1] वक्ष्ये तच्चरितं पुनः । 13ab
सुमतेस्तेजसस्तस्मादिन्द्रद्युम्नो व्यजायत[2] ॥ 13cd
परमेष्ठी ततस्तस्मात् प्रतीहारस्तदन्वयः । 14ab
प्रतीहारात् प्रतीहर्त्ता प्रतिहर्त्तुर्भुवस्ततः ॥ 14cd
उद्गीतोथ च प्रस्तारो विभुः प्रस्तारतः सुतः[3] । 15ab
पृथुश्चैव ततो नक्तो नक्तस्यापि गयः सुतः ॥ 15cd
नरो गयस्य तनयः तत्पुत्रो ऽभूद्विराट् ततः । 16ab
तस्य पुत्रो महावीर्यो धीमांस्तस्मादजायत ॥ 16cd
महान्तस्तत्सुतश्चाभून्मनस्यस्तस्य चात्मजः । 17ab
त्वष्टा त्वष्टुश्च विरजा[4]रजस्तस्याप्यभूत् सुतः ॥ 17cd
सत्यजिद्रजसस्तस्य जज्ञे पुत्रशतं मुने । 18ab
विश्वज्योतिःप्रधानास्ते भारतन्तैर्विवर्द्धितं ॥ 18cd
कृतत्रेतादिसर्गेण सर्गः स्वायम्भुवः स्मृतः । 19ab

इत्याग्नेये महापुराणे स्वायम्भुवः सर्गो नाम सप्ताधिकशत-
ततमो ऽध्यायः ॥

# 108

## अथाष्टाधिकशततमो ऽध्यायः ।

भुवनकोषः ।
अग्निरुवाच ।
जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो महान् । 1ab
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चेति सप्तमः ॥ 1cd

1 योगप्रस्तारे इति ग° , ज° , झ° च ।
2 इन्द्रद्युम्नोभ्यजायतेति ख° , छ° च ।
3 प्रतीहारादित्यादिः , प्रस्तारतः सुत इत्यन्तः पाठो झ° पुस्तके नास्ति ।
4 दुष्टादुष्टश्च विरजा इति ख° ।

एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः । 2ab
लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समं[1] ॥ 2cd
जम्बूद्वीपो द्वीपमध्ये[2] तन्मध्ये मेरुरुच्छ्रितः[3] । 3ab
चतुरशीतिसाहस्रो भूयिष्ठः[4] षोडशाद्रिराट् ॥ 3cd
द्वात्रिंशन्मूर्द्धि विस्तरात् षोडशाधः[5] सहस्रवान् । 4ab
भूयस्तस्यास्य[6] शैलो ऽसौ कर्णिकाकारसंस्थितः ॥ 4cd
हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे । 5ab
नीलः श्वेतश्च शृङ्गो च उत्तरे वर्षपर्व्वताः ॥ 5cd
लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे । 6ab
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते ॥ 6cd
भारतं प्रथमं वर्षन्ततः किम्पुरुषं स्मृतं । 7ab
हरिवर्षन्तथैवान्यन्मेरोर्द्दक्षिणतो द्विज ॥ 7cd
रम्यकं चोत्तरे वर्षं तथैवान्यद्धिरण्मयं[7] । 8ab
उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥ 8cd
नवसाहस्रमेकैकमेतेषां मुनिसत्तम । 9ab
इलावृतञ्च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः ॥ 9cd
मेरोश्चतुर्द्दिशन्तत्र नवसाहस्रविस्तृतं[8] । 10ab

---

1 दधिदुग्धजलान्तका इति ख॰ , छ॰ च ।
2 जम्बूद्वीपस्तस्य मध्ये इति ज॰ ।
3 मेरुरुत्थित इति झ॰ ।
4 भूमिष्ठ इति घ॰ , ज॰ च । भुवि स्थ इति ङ॰ ।
5 षोडशांश इति झ॰ ।
6 भूपाद्मस्यास्य इति ख॰ , ग॰ , छ॰ च ।
7 तथैवात्र हिरण्मयमिति ग॰ । तथैवाथ हिरण्मयमिति ज॰ ।
8 इलावृतश्चेत्यादिः, नवसाहस्रविस्तृतमित्यन्तः पाठो छ॰ पुस्तके नास्ति ।

इलावृतं महाभाग चत्वारश्चात्र पर्व्वताः ॥ 10cd
विष्कम्भा रचिता मेरोर्य्योजनायुतविस्तृताः[1] । 11ab
पूर्व्वेण मन्दरो नाम दक्षिणे गन्धमादनः ॥ 11cd
विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः[2] । 12ab
कदम्बस्तेषु जम्बुश्च पिप्पलो वट एव च ॥ 12cd
एकादशशतायामाः पादपा गिरिकेतवः । 13ab
जम्बूद्वीपेति सञ्ज्ञा स्यात् फलं जम्बा गजोपमं ॥ 13cd
जम्बूनदीरसेनास्यास्त्विदं जाम्बूनदं[3] परं । 14ab
सुपार्श्वः पूर्वतो मेरोः केतुमालस्तु पश्चिमे ॥ 14cd
वनं चैत्ररथं पूर्व्वे दक्षिणे गन्धमादनः । 15ab
वैभ्राजं पश्चिमे सौम्ये नन्दनञ्च सरांस्यथ ॥ 15cd
अरुणोदं महाभद्रं संशितोदं[5] समानसं । 16ab
शिताभश्चक्रमुञ्जाद्याः पूर्वतः केशराचलाः[5] ॥ 16cd
दक्षिणेन्द्रेस्त्रिकूटाद्याः शिशिवासमुखा जले[6] । 17ab
शङ्ककूटादयः सौम्ये मेरौ च ब्रह्मणः पुरी ॥ 17cd
चतुर्द्दशसहस्राणि योजनानाञ्च दिक्षु च । 18ab
इन्द्रादिलोकपालानां समन्तात् ब्रह्मणः पुरः ॥ 18cd
विष्णुपादात् प्लावयित्वा चन्द्रं स्वर्गात् पतन्त्यपि । 19ab
पूर्वेण शीता भद्राश्वाच्छैलाच्छैलाद्गतार्णवं ॥ 19cd
तथैवालकनन्दापि दक्षिणेनैव भारतं[7] । 20ab

---

1 योजनायुतमुच्छ्रिता इति घ॰ ।
2 सुपार्श्वश्चोत्तरे स्थित इति घ॰ ।
3 रसेनास्माद्धेमजाम्बुनदमिति ख॰ , ग॰ , घ॰ , ङ॰ , छ॰ च ।
4 असितोदमिति ज॰ ।
5 पूर्वतः शिशिराचला इति ख॰ , ग॰ , घ॰ , ज॰ च ।
6 शशिवाममुखा जले इति ख॰ , घ॰ , ङ॰ , छ॰ च ।
7 दक्षिणेन च भारतमिति ख॰ । दक्षिणेनैति भारतमिति ग॰ ।

प्रयाति सागरं कृत्वा सप्तभेदाथ पश्चिमं ॥ 20cd
अब्धिञ्च चक्षुःसौम्याब्धिं भद्रोत्तरकुरूनपि[1] । 21ab
आनीलनिषधायामौ[2] माल्यवद्गन्धमादनौ ॥ 21cd
तयोर्म्मध्यगतो मेरुः कर्णिकाकारसंस्थितः । 22ab
भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा ॥ 22cd
पत्राणि लोकपद्मस्य मर्य्यादाशैलवाह्यतः । 23ab
जठरो देवकूटश्च मर्य्यादापर्वतावुभौ[3] ॥ 23cd
तौ दक्षिणोत्तरायामावानीलनिषधायतौ । 24ab
गन्धमादनकैलासौ पूर्ववच्चायतावुभौ[4] ॥ 24cd
अशीतियोजनायामावर्णवान्तर्व्यवस्थितौ । 25ab
निषधः पारिपात्रश्च मर्य्यादापर्वतावुभौ ॥ 25cd
मेरोः पश्चिमदिग्भागे यथा पूर्वे तथा स्थितौ । 26ab
त्रिशृङ्गो रुधिरश्चैव उत्तरौ वर्षपर्व्वतौ ॥ 26cd
पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ । 27ab
जाठराद्याश्च मर्य्यादाशैला मेरोश्चतुर्द्दिशं ॥ 27cd
केशरादिषु या द्रोण्यस्तासु सन्ति पुराणि हि । 28ab
लक्ष्मीविष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम ॥ 28cd
भौमानां स्वर्गधर्म्माणां न पापास्तत्र यान्ति च[5] । 29ab

---

1 भद्रोद्भवकुरूनपि इति ख॰ ।

2 अलीननिषधायामा इति ख॰ , छ॰ च ।

3 रम्यकमित्यादिः, मर्यादापर्वतावुभावित्यन्तः पाठो झ॰ पुस्तके नास्ति ।

4 पूर्वपश्चायतावुभौ इति घ॰ , ङ॰ , ज॰ च ।

5 भौमाः स्वर्गा धर्म्मिणान्ते न पापास्तत्र यान्ति च इति छ॰ , ङ॰ च । मौमानां स्वर्गधर्म्माणां तनया ह्यत्र यान्ति चेति ग॰ , घ॰ च । भोगिनां स्वर्गधर्म्माणां तनयास्तत्र यान्ति चेति ज॰ ।

भद्राश्वे ऽस्ति हयग्रीवो वराहः केतुमालके ॥ 29cd
भारते कूर्म्मरूपी च मत्स्यरूपः कुरुष्वपि । 30ab
विश्वरूपेण सर्वत्र पूज्यते भगवान् हरिः ॥ 30cd
किम्पुरुषाद्यष्टसु क्षुद्भीतिशोकादिकं न च । 31ab
चत्तुर्विंशतिसाहस्रं प्रजा जीवन्त्यनामयाः ॥ 31cd
कृतादिकल्पना नास्ति भौमान्यम्भांसि नाम्बुदाः । 32ab
सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः ॥ 32cd
नद्यश्च शतशस्तेभ्यस्तीर्थभूताः प्रजज्ञिरे । 33ab
भारते यानि नीर्थानि तानि तीर्थानि वच्मि ते ॥ 33cd

इत्याग्नेये महापुराणे भुवनकोषो नामाष्टाधिकशततमो ऽध्यायः ।

## 109

### अथ नवाधिकशततमो ऽध्यायः ।

तीर्थमाहात्म्यं ।
अग्निरुवाच ।
माहात्म्यं सर्वतीर्थानां वक्ष्ये यद्भक्तिमुक्तिदं । 1ab
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतं[1] ॥ 1cd
विद्या तपश्चकीर्त्तिश्च स तीर्थफलमश्नुते । 2ab

1 स्वसंयतमिति घ० ।

प्रतिग्राहादुपावृत्तो लघ्वाहारो जितेन्द्रियः ॥ 2cd
निष्पापस्तीर्थयात्री तु सर्वयज्ञफलं लभेत् । 3ab
अनुपोष्य त्रिरात्रीणि तीर्थान्यनभिगम्य च ॥ 3cd
अदत्वा काञ्चनं गाश्च दरिद्रो नाम जायते । 4ab
तीर्थाभिगमने[1] तत् स्याद्यद्यज्ञेनाप्यते फलं ॥ 4cd
पुष्करं परमं तीर्थं सान्निध्यं हि त्रिसन्ध्यकं । 5ab
दशकोटिसहस्राणि तीर्थानां विप्र पुष्करे ॥ 5cd
ब्रह्मा सह सुरैरास्ते मुनयः सर्वमिच्छवः । 6ab
देवाः प्राप्ताः सिद्धिमत्र स्नाताः पितृसुरार्च्चकाः[2] ॥ 6cd
अश्वमेधफलं प्राप्य[3] ब्रह्मलोकं प्रयान्ति ते । 7ab
कार्त्तिक्यामन्नदानाच्च निर्म्मलो ब्रह्मलोकभाक्[4] ॥ 7cd
पुष्करे दुष्करं गन्तुं[5] पुष्करे दुष्करं तपः । 8ab
दुष्करं पुष्करे दानं वस्तुं चैव सुदुष्करं[6] ॥ 8cd
तत्र वासाज्जपच्छ्राद्धात् कुलानां शतमुद्धरेत् । 9ab
जम्बुमार्गं च तत्रैव तीर्थन्तण्डुलिकाश्रमं ॥ 9cd
कर्णाश्रमं[7] कोटितीर्थं नर्म्मदाचार्वुदं परं । 10ab
तीर्थञ्चर्म्मण्वती सिन्धुः सोमनाथः प्रभासकं ॥ 10cd
सरस्वत्यब्धिसङ्गश्च[8] सागरन्तीर्थमुत्तमं । 11ab

---

1 तीर्थादिगमने इति घ॰ ।
2 पितृसुरार्च्चिता इति ख॰ ।
3 अश्वमेधफलश्चास्येति ख॰ , ग॰ , छ॰ च । अश्वमेधफलं चाप्येति घ॰ ।
4 ब्रह्मलोककमिति ख॰ , ग॰ , ङ॰ , छ॰ च ।
5 दुष्करं गन्तुमिति ख॰ ।
6 वस्तुं तत्र सुदुष्करमिति ज॰ ।
7 कण्वाश्रममिति घ॰ ।
8 सरस्वत्यब्धिसञ्ज्ञयेति ग॰ , घ॰ , ज॰ च ।

पिण्डारकं द्वारका च गोमती सर्वसिद्धिदा ॥ 11cd
भूमितीर्थं ब्रह्मतुङ्गं[1] तीर्थं पञ्चनदं परं । 12ab
भीमतीर्थं[2] गिरीन्द्रञ्च देविका पापनाशिनी ॥ 12cd
तीर्थं विनशनं पुण्यं नागोद्भेदमघार्द्दनं । 13ab
तीर्थं कुमारकोटिश्च सर्वदानीरितानि च ॥ 13cd
कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहं । 14ab
य एवं सततं ब्रूयात्सो ऽमलः प्राप्नुयाद्दिवं ॥ 14cd
तत्र विष्णवादयो देवास्तत्र वासाद्धरिं व्रजेत्[3] । 15ab
सरस्वत्यां सन्निहित्यां स्नानकृद्ब्रह्मलोकभाक्[4] ॥ 15cd
पांशवोपि कुरुक्षेत्रे नयन्ति परमां गतिं । 16ab
धर्म्मतीर्थं सुवर्णाख्यं गङ्गाद्वारमनुत्तमं ॥ 16cd
तीर्थं कणखलं पुण्यं भद्रकर्णह्रदन्तथा[5] । 17ab
गङ्गासस्वतीसङ्गं ब्रह्मावर्त्तमघार्द्दनं ॥ 17cd
भृगुतुङ्गञ्च कुब्जाम्रं गङ्गोद्भेदमघान्तकं[6] । 18ab
वाराणसी वरन्तीर्थमविमुक्तमनुत्तमं ॥ 18cd
कपालमोचनं तीर्थन्तीर्थराजं प्रयागकं । 19ab
गोमतीगङ्गयोः सङ्गं गङ्गा सर्वत्र नाकदा ॥ 19cd
तीर्थं राजगृहं पुण्यं शालग्राममघान्तकं । 20ab

---

1 ऋषितीर्थं ब्रह्मतुङ्गमिति घ॰ । भूमितीर्थं ब्रह्मसञ्ज्ञमिति छ॰ ।
2 भीमातीर्थमिति घ॰ ।
3 वामाद्दिवं ब्रजेदिति ज॰ ।
4 ब्रह्मलोकग इति ख॰ , ग॰ , घ॰ , ङ॰ , छ॰ , ज॰ च ।
5 तत्र कर्णह्रदं तथेति ख॰ । भद्रकं तु ह्रदं तथेति ग॰ , ङ॰ च ।
6 गङ्गोद्भेदमवन्तिकमिति ज॰ ।

वटेशं वामनन्तीर्थं कालिकासङ्गमुत्तमं[1] ॥ 20cd
लौहित्यं करतोयाख्यं शोणञ्चाथर्षभं परं । 21ab
श्रीपर्वतं कोल्वगिरिं[2] सह्याद्रिर्म्मलयो गिरिः ॥ 21cd
गोदावरी तुङ्गभद्रा कावेरो वरदा नदी । 22ab
तापी पयोष्णी रेवा च दण्डकारण्यमुत्तमं ॥ 22cd
कालञ्जरं मुञ्जवटन्तीर्थं सूर्पारकं परं । 23ab
मन्दाकिनी चित्रकूटं शृङ्गवेरपुरं परं[3] ॥ 23cd
अवन्ती परमं तीर्थमयोध्या पापनाशनी । 24ab
नैमिषं परमं तीर्थं भुक्तिमुक्तिप्रदायकं[4] ॥ 24cd

इत्याग्नेये महापुराणे तीर्थयात्रा माहात्म्यं नाम नवाधिक-शततमो ऽध्यायः ।

## 110

### अथ दशाधिकशततमो ऽध्यायः ।

गङ्गामाहात्म्यं ।
अग्निरुवाच ।
गङ्गामाहात्म्यमाख्यास्ये सेव्या सा भुक्तिमुक्तिदा । 1ab
येषां मध्ये याति गङ्गा ते देशा पावना वराः ॥ 1cd

---

1 तीर्थं कणखलमित्यादिः, कालिकासङ्गमुत्तममित्यन्तः पाठो छ॰ पुस्तके नास्ति ।
2 श्रीपर्वतं कोन्द्रगिरिरिति छ॰ । श्रीपर्वतं कोलगिरिमिति ज॰ ।
3 शृङ्गवेरपुरं वरमिति घ॰ ।
4 अग्निरुवाच । माहात्म्यं सर्वतीर्थानामित्यादिः, नैमिषं परमन्तीर्थं भुक्तिमुक्तिप्रदायकं । इत्याग्नेये महापुराणे तीर्थयात्रामाहात्म्यमित्यन्तः पाठो झ॰ पुस्तके नास्ति ।

गतिर्गङ्गा तु[1] भूतानां गतिमन्वेषतां[2] सदा । 2ab
गङ्गा तारयते[3] चोभौ वंशौ नित्यं हि सेविता ॥ 2cd
चान्द्रायणसहस्राच्च गङ्गाम्भःपानमुत्तमं । 3ab
गङ्गां मासन्तु संसेव्य सर्वयज्ञफलं लभेत् ॥ 3cd
सकलाघहरी देवी स्वर्गलोकप्रदायिनी । 4ab
यावदस्थि च गङ्गायां तावत् स्वर्गे स तिष्ठति ॥ 4cd
अन्धादयस्तु[4] तां सेव्य देवैर्गच्छन्ति तुल्यतां[5] । 5ab
गङ्गातीर्थसमुद्भूतमृद्धारी सो ऽघहार्कवत्[6] ॥ 5cd
दर्शनात् स्पर्शनात् पानात्तथा गङ्गेतिकीर्त्तनात् । 6ab
पुनाति पुण्यपुरुषान् शतशोऽथ सहस्रशः ॥ 6cd

इत्याग्नेये महापुराणे गङ्गामाहात्म्यं नाम दशाधिकशततमो ऽध्यायः ।

## 111

## अथ एकादशाधिकशततमो ऽध्यायः ।

प्रयागमाहात्म्यं ।
अग्निरुवाच ।
वक्ष्ये प्रयागमाहात्म्यं भुक्तिमुक्तिप्रदं परं[7] । 1ab
प्रयागे ब्रह्मविष्ण्वाद्या देव मुनिवराः स्थिताः ॥ 1cd

1 गतिर्गङ्गा हीति ग॰ , ज॰ च ।
2 गतिर्गतिमतामिति झ॰ ।
3 गङ्गा पावयते इति झ॰ ।
4 पतितादयस्तु इति झ॰ ।
5 गच्छन्ति साम्यतामिति घ॰ , झ॰ च ।
6 गङ्गातीरसमुद्भूतमृद्धारो सो ऽघहार्कवदिति ख॰ , ग॰ , झ॰ च । गङ्गातीरसमुद्भूतमृदं मूर्द्धा विभर्त्ति यः । विभर्त्ति रूपं सोर्कस्य तमोनाशाय केवलमिति ङ॰ ।
7 भक्तिमुक्तिफलप्रदमिति ग॰ । भुक्तिमुक्तिप्रदायकमिति झ॰ ।

सरितः सागराः सिद्धा गन्धर्वाप्सरसस्तथा । 2ab
तत्र त्रीण्यग्निकुण्डानितेषां मध्ये तु जाह्नवी ॥ 2cd
वेगेन समतिक्रान्ता सर्वतीर्थतिरस्कृता । 3ab
तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता ॥ 3cd
गङ्गायमुनयोर्म्मध्यं[1] पृथिव्या जघनं स्मृतं । 4ab
प्रयागं जघनस्यान्तरुपस्थमृषयो विदुः[2] ॥ 4cd
प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ । 5ab
तीर्थं भोगवती चैव वेदी प्रोक्ता प्रजापतेः ॥ 5cd
तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तः प्रयागके । 6ab
स्तवनादस्य[3] तीर्थस्य नामसङ्कीर्त्तनादपि ॥ 6cd
मृत्तिकालम्भनाद्वापि सर्वपापैः प्रमुच्यते । 7ab
प्रयागे सङ्गमे दानं श्राद्धं जप्यादि चाक्षयं[4] ॥ 7cd
न देववचनाद्विप्र न लोकवचनादपि । 8ab
मतिरुत्क्रमणीयान्ते प्रयागे मरणं प्रति ॥ 8cd
दशतीर्थसहस्राणि षष्टिकोट्यस्तथापराः । 9ab
तेषां सान्निध्यमत्रैव प्रयागं परमन्ततः ॥ 9cd
वासुकेर्भोगवत्यत्र हंसप्रपतनं परं । 10ab
गवां कोटिप्रदानाद्यत् त्र्यहं स्नानस्य[5] तत्फलं ॥ 10cd
प्रयागे माघमासे तु एवमाहुर्म्मनीषिणः । 11ab

---

1 गङायमुनयोर्मध्ये इति ख॰ ।

2 सरितः सागरा इत्यादिः, उपस्थमृषयो विदुरित्यन्तः पाठो ग॰ पुस्तके नास्ति ।

3 श्रवणादस्येति ख॰ , ग॰ , घ॰ , ङ॰ , ज॰ च ।

4 श्राद्धद्रव्यादि चाक्षयमिति घ॰ ।

5 त्र्यहं स्नातस्येति घ॰ ।

सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ॥ 11cd
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे । 12ab
अत्र दानाद्दिवं[1] याति राजेन्द्रो जायते ऽत्र च ॥ 12cd
वटमूले सङ्गमादौ मृतो विष्णुपुरीं व्रजेत् । 13ab
उर्वशीपुलिनं रम्यं तीर्थं सन्ध्यावटस्तथा ॥ 13cd
कोटीतीर्थञ्चाश्वमेधं गङ्गायमुनमुत्तमं । 14ab
मानसं रजसा हीनं तीर्थं वासरकं परं[2] ॥ 14cd

इत्याग्नेये महापुराणे प्रयागमाहात्म्यं नाम एकादशाधिक-शततमो ऽध्यायः ॥

# 112

## अथ द्वादशाधिकशततमो ऽध्यायः ।

वाराणसीमाहात्म्यम् ।
अग्निरुवाच ।
वाराणसी[3] परं तीर्थं गौर्य्यै प्राह महेश्वरः । 1ab
भुक्तिमुक्तिप्रदं पुण्यं वसतां गृणतां हरिं[4] ॥ 1cd
रुद्र उवाच ।
गौरीक्षेत्रं न मुक्तं वै अविमुक्तं ततः स्मृतं । 2ab

1 अन्नदानाद्दिवमिति ख॰ , ग॰ , घ॰ , ङ॰ , छ॰ , ज॰ च ।
2 तीर्थं वानरकं परमिति ख॰ , ग॰ , घ॰ , ङ॰ च ।
3 वाराणसीमिति ख॰ , घ॰ च ।
4 वसतां शृणुतां हरिमिति ग॰ , घ॰ , ङ॰ च ।

जप्तं तप्तं हुतं दत्तममविमुक्ते विलाक्षयं ॥ 2cd
अश्मना चरणौ हत्वा वसेत्काशीन्न हि त्यजेत्[1] । 3ab
हरिश्चन्द्रं परं गुह्यं गुह्यमाम्रातकेश्वरं[2] ॥ 3cd
जप्येश्वरं परं गुह्यं[3] गुह्यं श्रीपर्वतं तथा । 4ab
महालयं[4] परं गुह्यं भृगुश्चण्डेश्वरं[5] तथा ॥ 4cd
केदारं परमं गुह्यमष्टौ सन्त्यविमुक्तके । 5ab
गुह्यानां परमं गुह्यमविमुक्तं परं मम ॥ 5cd
द्वियोजनन्तु पूर्वं स्याद् योजनार्द्धं तदन्यथा[6] । 6ab
वरणा च नदी चासीत् तयोर्मध्ये[7] वाराणसी ॥ 6cd
अत्र स्नानं जपो होमो मरणं देवपूजनं । 7ab
श्राद्धं दानं निवासश्च यद्यत् स्याद्भुक्तिमुक्तिदं[8] ॥ 7cd

इत्याग्नेये महापुराणे वाराणसीमाहात्म्यं नाम द्वादशाधि-
कशततमो ऽध्यायः ॥

1 काशीं तु न हि सन्त्यजेदिति ज॰ ।
2 परं गुह्यमविमुक्तं परं ममेति ज॰ ।
3 जयेश्वरं परं गुह्यमिति ख॰ ।
4 महाबलमिति क॰ ।
5 भूमिचण्डेश्वरमिति ग॰ ।
6 तथान्यथेति झ॰ ।
7 द्वयोर्मध्ये इति ख॰ ।
8 यद्वत् स्याद्भुक्तिमुक्तिदमिति ङ॰ ।

# 113

## अथ त्रयोदशाधिकशततमो ऽध्यायः ।

नर्मदादिमाहात्म्यम् ।

अग्निरुवाच ।

नर्मदादिकमाहात्म्यं वक्ष्येहं नर्मदां परां[1] । 1ab
सद्यः पुनाति गाङ्गेयं दर्शनाद्वारि नार्म्मदं ॥ 1cd
विस्तराद्योजनशतं योजनद्वयमायता । 2ab
षष्टिस्तीर्थसहस्राणि षष्टिकोट्यस्तथापराः ॥ 2cd
पर्वतस्य समन्तात्तु तिष्ठन्त्यमरकण्टके[2] । 3ab
कावेरीसङ्गमं पुण्यं श्रीपर्वतमतः शृणु ॥ 3cd
गौरी श्रीरूपिणी तेपे तपस्तामब्रवीद्धरिः[3] । 4ab
अवाप्स्यसि त्वमध्यात्म्यं नाम्ना श्रीपर्वतस्तव ॥ 4cd
समन्ताद्योजनशतं महापुण्यं भविष्यति । 5ab
अत्र दानन्तपो जप्यं[4] श्राद्धं सर्वमथाक्षयं[5] ॥ 5cd

1 नर्मदापरमिति झ° ।
2 निर्यान्त्यमरकण्टके इति झ° ।
3 तपस्तामब्रवीद्धर इति ग° ।
4 अत्र दानं तथा जप्यमिति झ° ।
5 सर्वमथाक्षरमिति ख° , छ° च ।

मरणं शिवलोकाय सर्वदं तीर्थमुत्तमं । 6ab
हरो ऽत्र क्रीडते देव्या हिरण्यकशिपुस्तथा ॥ 6cd
तपस्तप्त्वा बली चाभून्मुनयः सिद्धिमाप्नुवन्[1] । 7ab

इत्याग्नेये महापुराणे नर्म्मदाश्रीपर्वतादिमाहात्म्यं नाम त्रयोदशाधिकशततमो ऽध्यायः ॥

## 114

### अथ चतुर्दशाधिकशततमो ऽध्यायः ।

गयामाहात्म्यम् ।
अग्निरुवाच ।
गयामाहात्म्यमाख्यास्ये गयातीर्थोत्तमोत्तमं । 1ab
गयासुरस्तपस्तेपे तत्तपस्तापिभिः[2] सुरैः ॥ 1cd
उक्तः क्षीराब्धिगो विष्णुः पालयास्मान् गयासुरात् । 2ab
तथेत्युक्त्वा हरिर्दैत्यं वरं ब्रूहीति चाब्रवीत् ॥ 2cd
दैत्यो ऽब्रवीत्पवित्रो ऽहं भवेयं सर्वतीर्थतः । 3ab
तथेत्युक्त्वा गतो विष्णुर्दैत्यं दृष्ट्वा न वा हरिं ॥ 3cd
गताः शून्या मही स्वर्गे देवा ब्रह्मादयः सुराः[3] । 4ab

1 सिद्धिमाप्नुयुरिति झ० ।
2 तत्तपस्तापितैरिति ग० , घ० , झ० च ।
3 ब्रह्मादयः पुनः इति ख० , ग० , घ० , ङ० , छ० , ज० , झ० च ।

गता ऊचुर्हरिं देवाः शून्या भूस्त्रिदिवं हरे ॥ 4cd
दैत्यस्य दर्शनादेव ब्रह्मणश्चाब्रवीद्धरिः । 5ab
यागार्थं दैत्यदेहं त्वं प्रार्थय त्रिदशैः सह ॥ 5cd
तच्छ्रुत्वा ससुरो ब्रह्मा[1] गयासुरमथाब्रवीत् । 6ab
अतिथिः प्रार्थयामि त्वान्देहं यागाय पावनं ॥ 6cd
गयासुरस्तथेत्युक्त्वापतत्तस्य शिरस्यथ[2] । 7ab
यागं चकार चलिते देहि पूर्णाहुतिं[3] विभुः ॥ 7cd
पुनर्ब्रह्माब्रवीद्विष्णुं पूर्णकाले ऽसुरो ऽचलत् । 8ab
शिष्णुर्धर्ममथाहूय प्राह देवमयीं शिलां ॥ 8cd
धारयध्वं सुराः सर्वे यस्यामुपरि सन्तु ते । 9ab
गदाधरो मदीयाथ मूर्त्तिः स्थास्यति सामरैः ॥ 9cd
धर्मः शिलां देवमयीं[4] तच्छ्रुत्वाधारयत् परां । 10ab
या धर्माद्धर्मवत्याञ्च जाता धर्मव्रता सुता ॥ 10cd
मरीचिर्ब्रह्मणः पुत्रस्तामुवाह तपोन्वितां[5] । 11ab
यथा हरिः श्रिया रेमे गौर्य्या शम्भुस्तथा तया ॥ 11cd
कुशपुष्पाद्यरण्याच्च आनीयातिश्रमान्वितः[6] । 12ab
भुक्त्वा धर्मव्रतां प्राह पादसंवाहनं कुरु ॥ 12cd
विश्रान्तस्य मुनेः पादौ तथेत्युक्त्वा प्रियाकरोत् । 13ab
एतस्मिन्नन्तरे ब्रह्मा मुनौ सुप्ते तथागतः[7] ॥ 13cd
धर्मव्रताचिन्तयञ्च किं ब्रह्माणं समर्चये । 14ab
पादसंवाहनं कुर्वे ब्रह्मा पूज्यो गुरोर्गुरुः[8] ॥ 14cd

---

1 तच्छ्रुत्वा सत्वरो ब्रह्मेति ङ॰ ।
2 शिरस्तथेति झ॰ ।
3 देहे पूर्णाहुतिमिति ख॰ , छ॰ , ज॰ च ।
4 देहमयीमिति ग॰ , ङ॰ , छ॰ च ।
5 तपस्विनीतामिति झ॰ ।
6 समानीय श्रमान्वित इति ज॰ ।
7 सुप्ते समागत इति घ॰ , ङ॰ , ज॰ , झ॰ च ।
8 धर्मव्रतेत्यादिः, गुरोर्गुरुरित्यन्तः पाठः छ॰ पुस्तके नास्ति ।

विचिन्त्य पूजयामास ब्रह्माणं चार्हणादिभिः । 15ab
मरीचिस्तामपश्यत् स[1] शशापोक्तिव्यतिक्रमात् ॥ 15cd
शिला भविष्यसि क्रोधाद्धर्म्मव्रता ऽब्रवीच्च तं[2] । 16ab
पादाभ्यङ्गं परित्यज्य त्वद्गुरुः पूजितो मया ॥ 16cd
अदोषाहं यतस्त्वं हि शापं प्राप्स्यसि शङ्करात् । 17ab
धर्म्मव्रता पृथक् शापं धारयित्वाग्निमध्यगात् ॥ 17cd
तपश्चचार वर्षाणां सहस्राण्ययुतानि च । 18ab
ततो विष्ण्वादयो देवा वरं ब्रूहीति चाब्रुवन् ॥ 18cd
धर्म्मव्रता ऽब्रवीद्देवान् शापन्निर्वर्त्तयन्तु मे । 19ab
देवा ऊचुः ।
दत्तो मरीचिना शापो भविष्यति नचान्यथा ॥ 19cd
शिला पवित्रा देवाङ्घ्रिलक्षिता त्वं[3] भविष्यसि । 20ab
देवव्रता देवशिला सर्व्वदेवादिरूपिणी ॥ 20cd
सर्व्वदेवमयी[4] पुण्या निश्चलायारसुस्य हि । 21ab
देवव्रतोवाच ।
यदि तुष्टास्थ मे सर्वे मयि तिष्ठन्तु सर्वदा ॥ 21cd
ब्रह्मा विष्णुश्च रुद्राद्या गौरीलक्ष्मीमुखाः सुराः । 22ab
अग्निरुवाच ।
देवव्रतावचः श्रुत्वा तथेत्युक्त्वा दिवङ्गताः ॥ 22cd
सा धर्मणासुरस्यास्य धृता देवमयी शिला । 23ab
सशिलश्चलितो दैत्यः स्थिता रुद्रादयस्ततः ॥ 23cd
सदेवश्चलितो दैत्यस्ततो देवैः[5] प्रसादितः । 24ab
क्षीराब्धिगो हरिः प्रादात् स्वमूर्त्तिं श्रीगदाधरं ॥ 24cd
गच्छन्तु भोः स्वयं यास्ये[6] मूर्त्या वै देवगम्यया[7] । 25ab

---

1 मरीचिस्तामपश्यद्वै इति घ॰ ।
2 धर्मव्रता ऽब्रवीद्धच इति ज॰ ।
3 पवित्रा देवानां वन्दिता त्वमिति घ॰ ।
4 सर्वतीर्थमयी इति घ॰ , झ॰ च ।
5 तदा देवैरिति ज॰ ।
6 गच्छेत्युक्त्वा स्वयं गच्छेदिति झ॰ । गच्छन्तूक्त्वा स्वयं यास्ये इति ख॰ , छ॰ च ।
7 मूर्त्या देवैकगम्यया इति घ॰ , ङ॰ च ।

स्थितो गदाधरो देवो व्यक्ताव्यक्तोभयात्मकः ॥ 25cd
निश्चलार्थं स्वयं देवः स्थित आदिगदाधरः । 26ab
गदो नामासुरो दैत्यः[1] स हतो विष्णुना पुरा ॥ 26cd
तदस्थिनिर्मिता[2] चाद्या गदा या विश्वकर्म्मणा । 27ab
आद्यया गदया हेतिप्रमुखा राक्षसा हताः ॥ 27cd
गदाधरेण विधिवत्[3] तस्मादादिगधाधरः[4] । 28ab
देवमय्यां शिलायां च[5] स्थिते चादिगदाधरे ॥ 28cd
गयासुरे निश्चलेय ब्रह्मा पूर्णाहुतिं ददौ । 29ab
गयासुरो ऽब्रवीद्देवान् किमर्थं वञ्चितो ह्यहं[6] ॥ 29cd
विष्णोर्वचनमात्रेण किन्नस्यान्निश्चलोह्यहं । 30ab
आक्रान्तो यद्यहं देवा दातुमर्हत[7] मे वरं ॥ 30cd
देवा ऊचुः ।
तीर्थस्य करणे यत्[8] त्वमस्माभिर्न्निश्चलीकृतः । 31ab
विष्णोः शम्भोर्ब्रह्मणश्च क्षेत्रं तव भविष्यति ॥ 31cd
प्रसिद्धं सर्वतीर्थेभ्यः पित्रादेर्ब्रह्मलोकदं । 32ab
इत्युक्त्वा ते स्थिता देवा देव्यस्तीर्थादयः स्थिताः ॥ 32cd
यागं कृत्वा ददौ ब्रह्मा ऋत्विग्भ्यो दक्षिणां तदा । 33ab
पञ्चक्रोशं गयाक्षेत्रं पञ्चाशत् पञ्च चार्पयेत् ॥ 33cd
ग्रामान् स्वर्णगिरीन्[9] कृत्वा नदीर्दुग्धमधुश्रवाः । 34ab
सरोवराणि दध्याज्यैर्बहूनन्नादिपर्वतान्[10] ॥ 34cd

---

1 नामासुरो रौद्र इति घ° , झ° च ।
2 तदङ्गान्निर्मिता इति झ° । तदर्था निर्मिता इति छ° ।
3 गदावरेण देवेनेति झ° ।
4 गदो नामासुर इत्यादिः, तस्मादादिगदाधर इत्यन्तः पाठो ज° पुस्तके नास्ति ।
5 शिलायान्तु इति ज° ।
6 वाञ्छितो ह्यहमिति ख° , छ° च ।
7 दातुमर्हथेति ङ° ।
8 तीर्थस्य कारणायेति घ° , झ° च ।
9 ग्रामान् पुण्यगिरीनिति ङ° ।
10 दध्याद्यैर्बहूनन्नादिपर्वतानिति ज° ।

कामधेनुं कल्पतरुं स्वर्णरूप्यगृहाणि च । 35ab
न याचयन्तु विप्रेन्द्रा अल्पानुक्त्का[1] ददौ प्रभुः ॥ 35cd
धर्मयागे प्रलोभात्तु प्रतिगृह्य धनादिकं । 36ab
स्थिता यदा गयायान्ते शप्ताते ब्रह्मणा तदा ॥ 36cd
विद्याविवर्ज्जिता[2] यूयं तृष्णायुक्ता भविष्यथ । 37ab
दुग्धादिवर्जिता नद्यः शैलाः पाषाणरूपिणः ॥ 37cd
ब्रह्माणं ब्राह्मणश्चोचुर्न्नष्टं शापेन शाखिलं । 38ab
जीवनाय प्रसादन्नः कुरु विप्रांश्च सो ऽब्रवीत् ॥ 38cd
तीर्थोपजीविका यूयं सचन्द्रार्क्कं[3] भविष्यथ । 39ab
ये युष्मान् पूजयिष्यन्ति गयायामागता नराः ॥ 39cd
हव्यकव्यैर्धनैः श्राद्धैस्तेषां कुलशतं व्रजेत्[4] । 40ab
नरकात् स्वर्गलोकाय[5] स्वर्गलोकात् पराङ्गतिं ॥ 40cd
गयोपि चाकरोद्यागं बह्वन्नं[6] बहुदक्षिणं । 41ab
गया पुरी तेन नाम्ना पाण्डवा ईजिरे हरिं ॥ 41cd

इत्याग्नेये महापुराणे गयामाहात्म्यं नाम चतुर्दशाधिकशततमो ऽध्यायः ।

---

1 अन्यानथेति झ° । क्षपानुक्त्का इति छ° ।
2 गन्धादिवर्जिता इति घ° ।
3 तीर्थोपजीवका यूयमाचन्द्रार्कमिति ख° , ग° , घ° , ङ° च ।
4 कुलशतं महदिति ज° ।
5 स्वर्गलोकं चेति घ° , ज° , झ° च ।
6 बह्वर्थमिति ख° , छ° च । बहुलमिति झ° ।